यस्यैकपलितभ्रान्तिं करोत्यद्यापि जाह्नवी ॥

तक्षकस्य.

63

स पातु वो यस्य जटाकलापे
स्थितः शशाङ्कः स्फुटहारगौरः ।
नीलोत्पलानामिव नालपुञ्जे
निद्रायमाणः शरदीव हंसः ॥

कस्यापि.

64

दिश्यात्स शीतकिरणाभरणः शिवं वो
यस्योत्तमाङ्गभुवि विस्फुरदूर्मिपक्षा ।
हंसीव निर्मलशशाङ्ककलामृणाल-
कन्दार्थिनी सुरसरिन्नभसः पपात ॥

कस्यापि.

65

श्रेयांसि वो दिशतु यस्य सिताभ्रशुभ्रा
विभ्राजते सुरसरिद्धरमौलिमाला ।
ऊर्ध्वेक्षणज्वलनतापविलीयमान-
चन्द्रामृतप्रविततामृतवाहिनीव ॥

रत्नाकरस्य.

66

च्युतामिन्दोर्लेखां रतिकलहभग्नं च वलयं
शनैरेकीकृत्य प्रहसितमुखी शैलतनया ।
अवोचद्यं पश्येत्यवतु स शिवः सा च गिरिजा
स च क्रीडाचन्द्रो दशनकिरणापूरिततनुः ॥

चन्द्रकस्य.

67

एषा ते हर का सुगात्रि कतमा मूर्ध्नि स्थिता किं जटा
हंसः किं भजते जटां नहि शशी चन्द्रो जलं सेवते ।
मुग्धे भूतिरियं कुतोत्र सलिलं भूतिस्तरङ्गायते
एवं यो विनिगूहते त्रिपथगां पायात्स वः शंकरः ॥

कस्यापि.

68

आश्लेषाधरबिम्बचुम्बनसुखालापस्मितान्यासतां
दूरे तावदिदं मिथो न सुलभं जातं मुखालोकनम् ।
इत्थं व्यर्थकृतैकदेहघटनोपन्यासयोरावयोः
केयं प्रेमविडम्बनेत्यवतु वः स्मेरोर्धनारीश्वरः ॥

शूरवर्मणः.

69

मातर्जीव किमेतदञ्जलिपुटे तातेन गोपाय्यते
वत्स स्वादु फलं प्रयच्छति न मे गत्वा गृहाण स्वयम् ।
मात्रैवं प्रहिते गुहे विघटयत्याकृष्य संध्याञ्जलिं
शंभोर्भिन्नसमाधिरुद्धरभसो हासोद्गमः पातु वः ॥

चन्द्रकस्य.

70

एकं दन्तच्छदस्य स्फुरति जपवशादर्धमन्यत्प्रकोपा-
देकः पाणिः प्रणन्तुं शिरसि कृतपदः क्षेप्तुमन्यस्तमेव ।
एकं ध्यानान्निमीलत्यपरमविषहं वीक्षितुं चक्षुरित्थं
तुल्यानिच्छापि वामा तनुरवतु स वो यस्य संध्यावसाने ॥

अर्भकस्य.

71

शैलराजतनयास्तनयुग्मव्यापृतास्ययुगलस्य गुहस्य ।
शेषवक्त्रकमलानि मलं वो दुग्धपानविधुराणि हरन्तु ॥

कस्यापि.

72

करजालमपूर्वचेष्टितं वस्तदभीष्टप्रदमस्तु तिग्मभासः ।
क्रियते भवबन्धनाद्विमुक्तिः प्रणतानामुपसेवितेन येन ॥

73

युष्माकमम्बरमणेः प्रथमे मयूखा-
स्ते मङ्गलं विदधतूदयरागभाजः ।
कुर्वन्ति ये दिवसजन्ममहोत्सवेषु
सिन्दूरपाटलमुखीरिव दिक्पुरंध्रीः ॥

एतौ भा० अमृतदत्तस्य.

74

आबाहूद्धतमण्डलाग्ररुचयः संनद्धवक्षःस्थलाः
सोष्माणो व्रणिनो विपक्षहृदयप्रोन्माथिनः कर्कशाः ।
उत्सृष्टाम्बरदृष्टविग्रहभरा यस्य स्मराग्रेसरा
योधा वारवधूस्तनाश्च न दधुः क्षोभं स वोऽव्याज्जिनः ॥

75

किं स्याद्भास्वान्न भानोरमृतघनरसस्यन्दिनः सन्ति पादाः
किं वा राकाशशाङ्को नहि तुहिनरुचिः कुत्रचिन्निष्कलङ्कः ।
साक्षाच्चिन्तामणिः किं विपुलफलमणेः सौकुमार्यं कुतस्त्यं
संदेहान्मुग्धधीभिः प्रथममिति मुनेः पातु दृष्टं वपुर्वः ॥

76

चिरमाविष्कृतप्रीतिभीतयः पान्तु वो द्विषाम् ।
वलयज्यारवोन्मिश्राश्चण्ड्याः कोदण्डकृष्टयः ॥

77

दिश्यान्महासुरशिरःसरसीप्सितानि
प्रेङ्खन्नखावलिमयूखमृणालनालम् ।
चण्ड्याश्चलच्चटुलनूपुरचञ्चरीक-
झांकारहारि चरणाम्बुरुहद्वयं वः ॥

एते केषामपि.

78

सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्या नवसंगमप्रणयिनी दृष्टिः शिवायास्तु वः ॥

कस्यापि.

79

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसं वहन्त्याः ।

भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥

भट्टनारायणस्य.

80

पायाद्गजेन्द्रवदनः स इमां त्रिलोकीं
यस्योद्गतेन गगने महता करेण ।
मूलावलम्बसितदन्तबिसाङ्कुरेण
नालायितं तपनबिम्बसरोरुहस्य ॥

कस्यापि.

81

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि-
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसंकोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु सीत्कारवत्यः ॥

भवभूतेः.

82

धनुर्माला मौर्वी क्वणदलिकुलं लक्ष्यमबला
मनो भेद्यं शब्दप्रभृतय इमे पञ्च विशिखाः ।
इयाञ्जेतुं यस्य त्रिभुवनमदेहस्य विभवः
स कामः कामान्वो दिशतु दयितापाङ्गवसतिः ॥

घण्टकस्य.

83

ब्रह्मा दक्षः कुबेरो यमवरुणमरुद्वह्निचन्द्रेन्द्ररुद्राः
शैला नद्यः समुद्रा ग्रहगणमनुजा दैत्यगन्धर्वनागाः ।
द्वीपा नक्षत्रतारारविवसुमुनयो व्योम भूरश्विनौ च
संलीना यस्य सर्वे वपुषि स भगवान्पातु वो विश्वरूपः ॥

कस्यापि.

84

मुग्धे मुञ्च विषादमत्र बलजित्कम्पो गुरुस्त्यज्यतां
सद्भावं भज पुण्डरीकनयने मान्यानिमान्मानय ।

लक्ष्मीं बोधयतः स्वयंवरविधौ धन्वन्तरेर्वाक्छला-
दन्यत्र प्रतिषेधमात्मनि विधिं शृण्वन्हरिः पातु वः ॥

दाक्षिणात्यस्य कस्यापि.

85

दिश्यात्सुखं नरहरिर्भुवनैकवीरो
यस्याहवे दितिसुतोऽहलनोद्यतस्य ।
क्रोधोद्धतं मुखमवेक्षितुमक्षमत्वं
जानेभवन्निजनखेष्वपि यन्नतास्ते ॥

प॰ श्रीबकस्य.

86

स्वस्ति स्वागतमर्थ्यहं वद विभो किं दीयतां मेदिनी
का मात्रा मम विक्रमत्रयपदं दत्तं गृहीतं मया ।
मा देहीत्युशनाः कुतो हरिरयं पात्रं किमस्मात्परं
यो हीत्थं बलिनार्चितो मखमुखे पायात्स वो वामनः ॥

87

चक्र ब्रूहि विभो गदे जय हरे कम्बो समाज्ञापय
भो भो नन्दक जीव पन्नगरिपो किं नाथ भिन्नो मया ।
को दैत्यः कतमो हिरण्यकशिपुः सत्यं भवद्भ्यः शपे
केनास्त्रेण नखैरिति प्रवदतो विष्णोर्मुखं पातु वः ॥

88

चिन्ताचक्रिणि हन्त चक्रिणि भिया कुब्जासनेऽब्जासने
नश्यद्धामनि तिग्मधामनि धृताशङ्के शशाङ्के भृशम् ।
भ्रश्यच्चेतसि च प्रचेतसि शुचा तान्ते कृतान्ते च यो
व्यमोभूत्कटुकालकूटकवलीकाराय पायात्स वः ॥

एते कस्यापि.

89

नित्यं निरावृति निजानुभवैकमान—
मानन्दधाम जगदङ्कुरबीजमेकम् ।

दिग्देशकालकलनादिसमस्तहस्त-
मर्दासहं दिशतु शर्म महन्महो वः ॥

90

व्योम्नीव नीरदभरः सरसीव वीचि-
व्यूहः सहस्रमहसीव सुधांशुधाम ।
यस्मिन्निदं जगदुदेति च लीयते च
तच्छाम्भवं भवतु वैभवमृद्धये वः ॥

91

लोकत्रयस्थितिलयोदयकेलिकारः
कार्येण यो हरिहरद्रुहिणत्वमेति ।
देवः स विश्वजनवाङ्मनसातिवृत्त-
शक्तिः शिवं दिशतु शश्वदनश्वरं वः ॥

92

सर्वः किलायमवशः पुरुषाणुकर्म-
कायादिकारणगणो यदनुग्रहेण ।
विश्वप्रपञ्चरचनाचतुरत्वमेति
स त्रायतां त्रिभुवनैकमहेश्वरो वः ॥

93

यः कन्दुकैरिव पुरंदर पद्मसद्म-
पद्मापतिप्रभृतिभिः प्रभुरप्रमेयः ।
खेलत्यलङ्घ्यमहिमा स हिमाद्रिकन्या-
कान्तः कृतान्तदलनो लघयत्वघं वः ॥

94

मुक्तिर्हि नाम परमः पुरुषार्थ एक-
स्तामन्तरायमवयन्ति यदन्तरज्ञाः ।
किं भूयसा भवतु सैव सुधामयूख-
लेखाशिखाभरणभक्तिरभङ्गुरा वः ॥

95

श्रीकण्ठस्य सकृत्तिकार्तभरणी मूर्तिः सदारोहिणी
ज्येष्ठा भद्रपदा पुनर्वसुयुता चित्रा विशाखान्विता ।
दिश्यादक्षतहस्तमूलघटिताषाढा मघालंकृता
श्रेयो वैश्रवणान्विता भगवतो नक्षत्रपालीव वः ॥

96

त्राता भीतिभृतां पतिश्चिदचितां क्लेशं सतां शंसतां
हन्ता भक्तिमतां सतां स्वसमतां कर्तापकर्तासताम् ।
देवः सेवकभुक्तिमुक्तिरचनाभूर्भूर्भुवःस्वस्त्रयी-
निर्माणस्थितिसंहतिप्रकटितक्रीडो मृडः पातु वः ॥

एते प॰ जगद्धरस्य.

97

राजा राजार्चिताङ्घ्रेरनुपचितकलो यस्य चूडामणित्वं
नागा नागात्मजार्धे न भसितधवलं यद्वपुर्भूषयन्ति ।
मा रामारागिणी भून्मतिरिति यमिनां येन वोदाहि मारः
स प्राः सप्राश्वनुत्तारुणकिरणनिभाः पातु बिभ्रत्त्रिनेत्रः ॥

98

राधामोहनमन्दिरं जिगमिषोश्चन्द्रावलीमन्दिरा-
द्राधे क्षेममिति प्रियस्य वचनं श्रुत्वाह चन्द्रावली ।
क्षेमं कंस ततः प्रियः प्रकुपितः कंसः क्व दृष्टस्त्वया
राधा क्वेति तयोः प्रसन्नमनसोर्हासोद्गमः पातु वः ॥

कस्यापि.

99

आकृष्टे युधि कार्मुके समवदद्वामः करो दक्षिणं
रे रे दक्षिणहस्त भोजनमहादानादि ते कुर्वतः ।
पश्चाद्धन्तुमयुक्तमित्यथ पुनः सोप्यब्रवीदद्रवं
प्रष्टुं राघवमाशु रावणशिरोवृन्दानि भिन्दानि किम् ॥

100

दृष्टः क्वापि स केशवो व्रजवधूमादाय कांचिद्गतः
सर्वा एव हि वञ्चिताः खलु वयं सोन्वेषणीयो यदि ।
द्वे द्वे गच्छत इत्युदीर्य सहसा राधां गृहीत्वा करे
गोपीवेषधरो निकुञ्जभवनं प्राप्तो हरिः पातु वः ॥

कस्यापि-

101

मातस्तर्णकरक्षणाय यमुनाकच्छं न गच्छाम्यहं
कस्माद्वत्स पिनष्टि पीवरकुचद्वन्द्वेन गोपीजनः ।
भ्रूभङ्गैर्विनिवारितोपि बहुशो जल्पन्यशोदाग्रतो
गोपीभिः करपद्ममुद्रितमुखः पायात्स वः केशवः ॥

102

संध्यां यत्प्रणिपत्य लोकपुरतो बद्धाञ्जलिर्याचसे
धत्से यच्च नदीं विलज्ज शिरसा तन्नाम सोढं मया ।
श्रीर्यातामृतमन्थने यदि हरिं कस्माद्विषं भक्षितं
मा स्त्रीलम्पट मां स्पृशेति गदिता गौर्या हरः पातु वः ॥

अथ वक्रोक्तिपद्धतिः

103

कस्त्वं शूली मृगय भिषजं नीलकण्ठः प्रियेहं
केकामेकां वद पशुपतिर्नैव दृश्ये विषाणे ।
मुग्धे स्थाणुः स चरति कथं जीवितेशः शिवाया
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः ॥

104

कोयं द्वारि हरिः प्रयाह्युपवनं शाखामृगस्यात्र किं
कृष्णोहं दयिते बिभेमि सुतरां कृष्णादहं वानरात् ।
मुग्धेहं मधुसूदनः पिब लतां तामेव तन्वीमले
इत्थं निर्वचनीकृतो दयितया ह्रीतो हरिः पातु वः ॥

105

निर्लज्ज हरे किमिदं प्रमदानुगतः सदा परिभ्रमसि ।
मुग्धे त्वत्संपर्कात्प्रमदो भवतीति किं चित्रम् ॥

106

शठ वर्णयामि भवतो नारीणामुपरि भूयसी प्रीतिः ।
प्रलपसि किमसंबद्धं कस्यारिषु विद्यते प्रेम ॥

107

व्यामोहयसि किमेवं रामासक्तिं ब्रवीमि भवदीयाम् ।
ज्येष्ठे भ्रातरि रामे न क्रियतां कथमिवासक्तिः ॥

108

किं मामेवं भ्रमयसि शोचामि व्यसनमेव भवदीयम् ।
निष्कारणकुपितायां त्वयि कथय किमल्पकं व्यसनम् ॥

109

वक्रवचनैरमीभिर्गोपवधूमिति निरुत्तरीकृत्य ।
मण्डलितगुरुपयोधरमुपगूढं पातु वः शौरेः ॥

110

अयि संप्रसीद पार्वति शिवोपि तव पादयोर्निपतितोहम् ।
शिव इति कथं हि जल्पसि सरुधिरगजचर्मसंवीतः ॥

111

शिव इति यदि तव गदिते द्विगुणो रोषो भवाम्यहं स्थाणुः ।
स्थाणुरसि सत्यमेतच्चेतसि भवतो न किंचिदपि ॥

112

त्यज रुषमवेहि मानिनि मामीश्वरमर्चितं त्रिभुवनस्य ।
त्र्यम्बक यदीश्वरस्त्वं नग्नः किं धूलिधूसरितः ॥

113

संप्रति किमत्र वक्ष्यसि पशुपतिरेषोस्मि पाण्डुरकपोले ।
पशुपतिरेव न गणयसि युक्तायुक्तानि यस्मात्त्वम् ॥

114

मुग्धे भ्रमसि किमेवं सत्यमिमं मां भवं विजानीहि ।
सत्यं भवोसि शठ हे येनातिविचित्ररूपोसि ॥

115

पण्डितवादस्तव यदि लोकेहं त्र्यम्बको विदित एषः ।
अम्बा ह्येकापि न ते प्रजल्पसि त्वं कुतस्तिस्रः ॥

116

वादो महानिहैव हि तथा विजानीह्यनङ्गदहनं माम् ।
दग्धमिदमङ्गमङ्गं त्वया ममैवेदृशैश्चरितैः ॥

117

संध्याप्रणामदोषाद्योनुनयति तं विजित्य पार्वत्या ।
आलिङ्गितश्च सरभसमुरसा वै हरतु दुरितं वः ॥

118

भव निःस्नेहस्त्वं मे न भवाम्येवं यथा त्वया गदितम् ।
निःस्नेहताभिलाषस्तव देवि कुतः समुत्पन्नः ॥

119

कुसृतिभिरलमेताभिः किमर्थमुपरिस्थिता नदीयं ते ।
का नरकपालमाला ममोपरिस्था गृहाणैताः ॥

120

जनमनुरागिणमेवं संतापयसि व्यलीककरणेन ।
तव नरकपालपङ्क्तिभिरवश्यमेवोपरि स्थेयम् ॥

121

किं कुपितोसि त्यज रुषमपनयतां विग्रहं मया हि भवान् ।
सह विग्रहो भवत्या न जातु विघटिष्यतेस्माकम् ॥

122

गङ्गाविग्रहकलुषामिति शिववचनैर्निरुत्तरां गौरीम् ।
परिहास्य योनुनिन्ये स करोतु शिवः शिवं भवताम् ॥

एते केषांचिदपि.

123

विजये कुशलस्त्र्यक्षो न क्रीडितुमहमनेन सह शक्ता ।
विजये कुशलोस्मि न तु त्र्यक्षोक्षद्वयमिदं पाणौ ॥

124

किं मे दुरोदरेण प्रयातु यदि गणपतिर्न तेभिमतः ।
कः प्रद्वेष्टि विनायकमहिलोकः किं न जानासि ॥

125

वसुरहितेन क्रीडा भवता सह कीदृशी न जिह्रेषि ।
किं वसुभिन्नमतोमून्सुरासुरानेव पश्य पुरः ।

126

चन्द्रग्रहणेन विना नास्मि रमे किं प्रवर्तयस्येवम् ।
देव्यै यदि रुचितमिदं नन्दिन्नाहूयतां राहुः ॥

127

हा राहौ निकटस्थे सितदंष्ट्रे भयकृति रतिः कस्य ।
यदि नेच्छसि तत्त्यक्तः संप्रत्येवैष हाराहिः ॥

128

आरोपयसि मुधा किं नाहमभिज्ञा त्वदङ्कस्य ।
दिव्यं वर्षसहस्रं स्थित्वैवं युक्तमभिधातुम् ॥

129

इत्थं पशुपतिपेशलपाशकलीलाप्रयुक्तवक्रोक्तेः ।
हर्षवशतरलतारकमाननमव्याद्भवान्या वः ॥

एते श्रीमयूरस्य.

130

अङ्गुल्या कः कवाटे प्रहरति कुटिलो माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणिधरः किं फणीन्द्रो द्विजिह्वः ।
मुग्धे घोराहिमाथी किमुत खगपतिर्नो हरिः किं कपीन्द्र
इत्थं लक्ष्म्या कृतोसौ प्रतिहतवचनः पातुलक्ष्मीधवो वः ॥

कस्यापि.

131

खेदः किं खलु दयिते न वेत्सि रविमण्डलं जगद्विदितम् ।
न क्रोधः कर्तव्यो जलचरमूर्ध्वं न जातु पश्यामः ॥

132

कोपस्त्यक्तुं योग्यो यस्य पिपासा न संभवति ।
संत्यज मानिनि मानं किं मानेनाधुना ममानेन ॥

अथ कविकाव्यप्रशंसा

133

किं तेन किल काव्येन मृष्यमानस्य यस्य ताः ।
उदधेरिव नायान्ति रसामृतपरम्पराः ॥

जयमाधवस्य.

134

किं कवेस्तस्य काव्येन किं काण्डेन धनुष्मतः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥

135

अप्रगल्भपदन्यासा जननीरागहेतवः ।
सन्त्येके बहुलालापाः कवयो बालका इव ॥

एतौ भट्टविविक्रमस्य.

136

किं तेन काव्यमधुना प्लाविता रसनिर्झरैः ।
जडात्मानोपि नो यस्य भवन्त्यङ्कुरितान्तराः ॥

श्रीकल्लटस्य.

137

नवोर्थो जातिरग्राम्या श्लेषोक्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम् ॥

138

मुखमात्रेण काव्यस्य करोत्यहृदयो जनः ।
छायामच्छामपि श्यामां राहुस्तारापतेरिव ॥

एतौ भट्टबाणस्य.

139

बोद्धारो मत्सरग्रस्ता विभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥

कस्यापि.

140

पदद्वयस्य संधानं कर्तुमप्रतिभाः खलाः ।
तथापि परकाव्येषु दुष्करेष्वप्यसंभ्रमाः ॥

बोधकस्य.

141

क्व दोषोत्र मया लभ्य इति संचिन्त्य चेतसा ।
खलः काव्येषु साधूनां श्रवणाय प्रवर्तते ॥

भट्टनारायणस्य.

142

उपपत्तिभिरम्लाना नोपदेशैः कदर्थिताः ।
स्वसंवेदनसंवेद्यसाराः सहृदयोक्तयः ॥

143

केषांचिद्वाचि शुकवत्परेषां हृदि मूकवत् ।
कस्याप्या हृदयाद्वक्त्रे वल्गु वल्गन्ति सूक्तयः ॥

एतौ भा॰ अर्चितदेवस्य.

144

बहूनि नरशीर्षाणि लोमशानि बृहन्ति च ।
ग्रीवासु प्रतिबद्धानि किंचित्तेषु सकर्णकम् ॥

कस्यापि.

145

साध्वीव भारती भाति सूक्तिसद्व्रतचारिणी ।
ग्राम्यार्थवस्तुसंस्पर्शबहिरङ्गा महाकवेः ॥

प्रभाकरनन्दस्य.

146

ते वन्द्यास्ते महात्मानस्तेषां लोके स्थिरं यशः ।
यैर्निबद्धानि काव्यानि ये वा काव्येषु कीर्तिताः ॥

147

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः ।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ॥

भट्टत्रिविक्रमस्य.

148

कवीनां महतां सूक्तैर्गूढार्थान्तरसूचिभिः ।
विध्यमानश्रुतेर्मा भूद्दुर्जनस्य कथं व्यथा ॥

भा० अमृतदत्तस्य.

149

यास्यति सज्जनहस्तं रमयिष्यति तं भवेच्च निर्दोषा ।
उत्पादितयापि कविस्ताम्यति कथया दुहित्रेव ॥

भट्टनारायणस्य.

150

अवसरपठितं सर्वं सुभाषितत्वं प्रयात्यसूक्तमपि ।
क्षुधि कदशनमपि नितरां भोक्तुः संपद्यते स्वादु ॥

वल्लभदेवस्य.

151

दुर्जनहुताशतप्तं काव्यसुवर्णं विशुद्धिमुपयाति ।
दर्शयितव्यं तस्मान्मत्सरिमनसः प्रयत्नेन ॥

श्रीवराहमिहिरस्य.

152

गणयन्ति नापशब्दं न वृत्तभङ्गं क्षतिं न चार्थस्य ।
रसिकत्वेनाकुलिता वेश्यापतयः कुकवयश्च ॥

कस्यापि.

153

विपुलहृदयाभियोग्ये खिद्यति काव्ये जडो न मौर्ख्ये स्वे ।
निन्दति कञ्चुकमेव प्रायः शुष्कस्तना नारी ॥

अर्गटस्य.

154

ख्यातिं गमयति सुजनः सुकविर्विदधाति केवलं काव्यम् ।
पुष्णाति कमलमम्भो लक्ष्म्या तु रविर्नियोजयति ॥

155

व्याख्यातुमेव केचित्कुशलाः शास्त्रं प्रयोक्तुमलमन्ये ।
उपनामयति करोन्नं रसांस्तु जिह्वैव जानाति ॥

इतौ भदन्तरविगुप्तस्य.

156

जीवित इव कण्ठगते सूक्ते दुःखासिका कवेस्तावत् ।
नयनविकासविधायी सचेतनाभ्यागमो यावत् ॥

भा॰ अवृतवृत्तस्य.

157

प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्त-
माभाति लावण्यमिवाङ्गनासु ।

आनन्दवर्धनस्य.

158

कवेरभिप्रायमशब्दगोचरं
स्फुरन्तमार्द्रेषु पदेषु केवलम् ।
वदद्भिरङ्गैः कृतरोमविक्रियै-
र्जनस्य तूष्णींभवतोयमञ्जलिः ॥

विज्जाकायाः.

159

सहृदयाः कविगुम्फनिकासु ये
कतिपयास्त इमे न विशृङ्खलाः ।
रसमयीषु लतास्विव षट्पदा
हृदयसारजुषो न मुखस्पृशः ॥

कस्यापि.

160

ख्याता नराधिपतयः कविसंश्रयेण
राजाश्रयेण च गताः कवयः प्रसिद्धिम् ।
राज्ञा समोस्ति न कवेः परमोपकारी
राज्ञो न चास्ति कविना सदृशः सहायः ॥

भट्टगोविन्दस्वामिनः.

161

चेतःप्रसादजननं विबुधोत्तमाना-
मानन्दि सर्वरसयुक्तमतिप्रसन्नम् ।
काव्यं खलस्य न करोति हृदि प्रतिष्ठां
पीयूषपानमिव वक्त्रविवर्ति राहोः ॥

हरिचन्द्रस्य.

162

बद्धा यदर्पणरसेन विमर्दपूर्व-
मर्थान्कथं झटिति तान्प्रकृतान्न दद्युः ।
चौरा इवातिमृदवो महतां कवीना-
मर्थान्तराण्यपि हठाद्वितरन्ति शब्दाः ॥

भट्टभल्लटस्य.

163

तत्किं काव्यमनल्पपीतमधुवत्कुर्यान्न यद्धूननं
मात्सर्यावृतचेतसां रसवशादप्युन्नतिं लोमसु ।
कम्पं मूर्ध्नि कपोलयुग्ममरुणं बाष्पाविले लोचने
अध्यारोपितवस्तुकीर्तनपरं वाचः करालम्बनम् ॥

वल्लभदेवस्य.

164

ये तावत्स्वगुणोपबृंहितधियस्तेषामरण्यं जग-
द्येप्येते कृतमत्सराः परगुणं स्वप्नेपि नेच्छन्ति ते ।
अन्येषामनुरागिणां क्वचिदपि स्निग्धं मनो निर्वृता-
वित्थं यान्तु तपोवनानि महतां सूक्तानि मन्येधुना ॥

भा° विठ्ठस्य.

165

या साधूनिव साधुवादमुखरान्मात्सर्यमूकानपि
प्रोच्चैर्नो कुरुते सतां मतिमतां दृष्टिर्न सा वास्तवी ।
या याताः श्रुतिगोचरं च सहसा हर्षोल्लसत्कंधरा-
स्तिर्यञ्चोपि न मुक्तशष्पकवलास्ताः किं कवीनां गिरः ॥

आनन्दवर्धनस्य.

166

स्वेच्छाभङ्गुरभाग्यमेघतडितः शक्या न रोद्धुं श्रियः
प्राणानां सततं प्रयाणपटहश्रद्धा न विश्राम्यति ।
त्राणं येन यशोमये वपुषि वः कुर्वन्ति काव्यामृतै-
स्तानाराध्यपदे विधत्त सुकवीन्निर्गर्वमुर्वीश्वराः ॥

167

हे राजानस्त्यजत सुकविप्रेमबन्धे विरोधं
शुद्धा कीर्तिः स्फुरति भवतां नूनमेतत्प्रसादात् ।
तुष्टैर्बद्धं तदलघु रघुस्वामिनः सच्चरित्रं
रुष्टैर्नीतस्त्रिभुवनजयी हास्यमार्गं दशास्यः ॥

एतौ भट्टश्रीबिह्लणस्य.

168

नमो नमः काव्यरसाय तस्मै
निषिक्तमन्तः पृषतापि यस्य ।
सुवर्णतां वक्त्रमुपैति साधो-
र्दुर्वर्णतां याति च दुर्जनस्य ॥

पद्मगुप्तस्य.

169

अज्ञातपाण्डित्यरहस्यमुद्रा
ये काव्यमार्गे दधतेभिमानम् ।
ते गारुडीयाननधीत्य मन्त्रा-
न्हालाहलास्वादनमारभन्ते ॥

170

सरस्वतीमातुरभूच्चिरं न यः
कवित्वपाण्डित्यघनस्तनंधयः ।
कथं स सर्वाङ्गमनाप्तसौष्ठवो
दिनादिनं प्रौढिविशेषमश्नुते ॥

171

वितीर्णशिक्षा इव हृत्पदस्थ-
सरस्वतीवाहनराजहंसैः ।
ये क्षीरनीरप्रविभागदक्षा
विवेकिनस्ते कवयो जयन्ति ॥

172

काव्यामृतं दुर्जनराहुनीतं
प्राप्यं भवेन्नो सुमनोजनस्य ।
सच्चक्रमव्याजविराजमान-
तैक्ष्ण्यप्रकर्षं यदि नाम न स्यात् ॥

173

विना न साहित्यविदापरत्र
गुणः कथंचित्प्रथते कवीनाम् ।
आलम्बते तत्क्षणमम्भसीव
विस्तारमन्यत्र न तैलबिन्दुः ॥

174

अत्यर्थवक्रत्वमनर्थकं या
शून्या तु सर्वान्यगुणैर्व्यनक्ति ।
अस्पृश्यतादूषितया तया किं
तुच्छश्वपुच्छच्छटयेव वाचा ॥

175

नीचस्तनोत्वभ्रु नितान्तकार्ण्यं
पुष्णातु साधर्म्यभृदञ्जनेन ।
विना तु जायेत कथं तदीय-
क्षोदेन सारस्वतदृक्प्रसादः ॥

176

अर्थोऽस्तिचेन्न पदशुद्धिरथास्ति सापि
नो रीतिरस्ति यदि सा घटना कुतस्त्या ।

साप्यस्ति चेन्न नववक्रगतिस्तदेत-
द्व्यर्थं विना रसमहो गहनं कवित्वम् ॥

177

श्लाघ्यैव वक्रिमगतिर्घनदार्ढ्यबन्धो-
स्तस्याः कविप्रवरसूक्तिधनुर्लतायाः ।
कर्णान्तिकप्रणयभाजि गुणे यदीये
चेतांसि मत्सरवतां झटिति त्रुटन्ति ॥

178

यातास्ते रससारसंग्रहविधिं निष्पीड्य निष्पीड्य ये
वाक्तत्त्वेक्षुलतां पुरा कतिपये तत्त्वस्पृशश्चक्रिरे ।
जायन्तेद्य यथायथं तु कवयस्ते तत्र संतन्वते
येनुप्रासकठोरचित्रयमकश्लेषादिशल्कोच्चयम् ॥

179

परश्लोकान्स्तोकाननुदिवसमभ्यस्य ननु ये
चतुष्पादीं कुर्युर्बहव इह ते सन्ति कवयः ।
अविच्छिन्नोद्गच्छज्जलधिलहरीरीतिसुहृदः
सुहृद्या वैशद्यं दधति किल केषांचन गिरः ॥

एते प॰ मङ्खकस्य.

180

हेम्नो भारशतानि वा मदमुचां वृन्दानि वा दन्तिनां
श्रीहर्षेण समर्पितानि गुणिने बाणाय कुत्राद्य तत् ।
या बाणेन तु तस्य सूक्तिविसरैरुट्टङ्किताः कीर्तय-
स्ताः कल्पप्रलयेपि यान्ति न मनाङ्मन्ये परिम्लानताम् ॥

कस्यापि.

181

धन्याः शुचीनि सुरभीणि गुणोम्भितानि
वाग्वीरुधः स्ववदनोपवनोद्गतायाः ।
उच्चित्य सूक्तिकुसुमानि सतां विविक्त-
वर्णानि कर्णपुलिनेष्ववतंसयन्ति ॥

182

तेनन्तवाङ्मयमहार्णवदृष्टपाराः
सांयात्रिका इव महाकवयो जयन्ति ।
यत्सूक्तिपेलवलवङ्गलवैरवैमि
सन्तः सदः सुवदनान्यधिवासयन्ति ॥

183

त्रैलोक्यभूषणमणिर्गुणिवर्गबन्धु-
रेकश्चकास्ति कविता सविता द्वितीयः ।
शंसन्ति यस्य महिमातिशयं शिरोभिः
पादग्रहं विदधतः पृथिवीभृतोपि ॥

184

शब्दार्थमात्रमपि ये न विदन्ति तेपि
यां मूर्छनामिव मृगाः श्रवणैः पिबन्तः ।
संरुद्धसर्वकरणप्रसरा भवन्ति ।
चित्रस्थिता इव कवीन्द्रगिरं नुमस्ताम् ॥

185

अस्थाने गमिता लयं हतधियां वाग्देवता कल्पते
धिक्काराय पराभवाय महते तापाय पापाय वा ।
स्थाने तु व्ययिता सतां प्रभवति प्रख्यातये भूतये
चेतोनिर्वृतये परोपकृतये प्रान्ते शिवावाप्तये ॥

एते प° जगद्धरस्य.

186

वल्मीकप्रभवेण रामनृपतिर्व्यासेन धर्मात्मजो
व्याख्यातः किल कालिदासकविना श्रीविक्रमाङ्को नृपः ।
भोजश्चित्तपबिह्लणप्रभृतिभिः कर्णोपि विद्यापतेः
ख्यातिं यान्ति नरेश्वराः कविवरैः स्फारैर्न भेरीरवैः ॥

कस्यापि.

187

भुजतरुवनच्छायां येषां निषेव्य महौजसां
जलधिरशना मेदिन्यासीदसावकुतोभया ।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं
प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥

188

येप्यासन्निभकुम्भशायितपदा येपि श्रियं लेभिरे
येषामप्यवसन्पुरा युवतयो गेहेष्वहश्चन्द्रिकाः ।
ताँल्लोकोयमवैति लोकतिलकान्स्वप्नेप्यजातानिव
भ्रातः सत्कविकृत्य किं स्तुतिशतैरन्धं जगत्त्वां विना ॥

एतौ कल्हणस्य.

189

स्फारेण सौरभभरेण किमेणनाभे-
स्तद्दानसारमपि सारमसारमेव ।
स्रक्सौमनस्यपि न पुष्यति सौमनस्यं
प्रस्यन्दते यदि मधुद्रवमुक्तिदेवी ॥

प॰ जगद्धरस्य.

190

प्रयच्छति चमत्कृतिं विरचनाविधौ चेतसः
सभासु पठितो भवत्यसमसाधुवादाप्तये ।
प्रथामुपगतस्तनोत्यतितरामुदारं यशो
न पुष्यति मनोरथं कमिव काव्यचिन्तामणिः ॥

भर्तृसारस्वतस्य.

191

यः सत्पदस्थमिह काव्यमधु प्रसन्नं
मुष्णन्परस्य तनुते निजपद्यमध्ये ।
अस्थानदोषजनितेव पिपीलकाली
काली विभाति लिखिताक्षरपङ्क्तिरस्य ॥

प॰ श्रीवकस्य.

192

यः स्यात्केवललक्ष्यलक्षणरतो नो तर्कसंपर्कभृ-
न्नालंकारविचारचारुधिषणः काव्यज्ञशिक्षोज्झितः ।
तस्माच्चेद्रसशालि काव्यमुदयेदेकान्ततः सुन्दरं
प्रासादो धवलस्तदा क्षितिपतेः काकस्य काष्ण्याद्भवेत् ॥

प॰ श्रीवकस्य.

193

स्वप्रज्ञया कुञ्चिकयेव कंचि-
त्सारस्वतं वाक्रिमभङ्गिभाजम् ।
कवीश्वरः कोपि पदार्थकोश-
मुद्घाट्य विश्वाभरणं करोति ॥

194

दैवीर्गिरः केपि कृतार्थयन्ति
ताः कुण्ठयन्त्येव पुनर्विमूढाः ।
या विप्रुषः शुक्तिमुखेषु दैव्य-
स्ता एव मुक्ता न तु चातकेषु ॥

195

परिश्रमज्ञं जनमन्तरेण
मौनव्रतं बिभ्रति वाग्मिनोपि ।
वाचंयमाः सन्ति विना वसन्तं
पुंस्कोकिलाः पञ्चमचञ्चवोपि ॥

196

व्यालाश्च राहुश्च सुधाप्रसादा-
ज्जिह्वाशिरोनिग्रहमुग्रमापुः ।
इतीव भीताः पिशुना भवन्ति
पराङ्मुखाः काव्यरसामृतेषु ॥

एते जल्हणस्य.

197

साकूतं निजसंविदेकविषयं तत्त्वं सचेता ब्रुव-
न्नमे नूनमबोधमोहितधियां हास्यत्वमायास्यति ।
तद्युक्तं विदुषो जनस्य जडवज्जोषं नु नामासितुं
जात्यन्धं प्रतिरूपवर्णनविधौ कोयं वृथैवोद्यमः ॥

अथ सज्जनवर्णनपद्धतिः

198

जयन्ति जितमत्सराः परहितार्थमभ्युद्यताः
पराभ्युदयसुस्थिताः परविपत्तिखेदाकुलाः ।
महापुरुषसत्कथाश्रवणजातकौतूहलाः
समस्तदुरितार्णवप्रकटसेतवः साधवः ॥

भदन्ताश्वघोषस्य.

199

परपरिवादे मूकः परनारीदर्शनेपि जात्यन्धः ।
पङ्गुः परधनहरणे स जयति लोके महापुरुषः ॥

कस्यापि.

200

संपत्सु महतां चेतो भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥

भर्तृहरेः.

201

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥

रविगुप्तस्य.

202

उपकारेण दूयन्ते न सहन्तेनुकम्पिताम् ।
आपत्स्वपि दुराराध्या नित्यदुःखा मनस्विनः ॥

203

जलसेकेन वर्धन्ते तरवो नाश्मसंचयाः ।
भव्यो हि द्रव्यतामेति क्रियां प्राप्य तथाविधाम् ॥

204

अवृत्तिभयमन्त्यानां मध्यानां मरणाद्भयम् ।
उत्तमानां तु सत्त्वानामवमानात्परं भयम् ॥

एते व्यासमुनेः.

205

तापं हन्ति सुखं सूते जीवयत्युज्ज्वलं यशः ।
अमृतस्य प्रकारोयं दुर्लभः साधुसंगमः ॥

206

रसायनमयी शीता परमानन्ददायिनी ।
नानन्दयति कं नाम साधुसंगतिचन्द्रिका ॥

207

साधुसङ्गतरोर्जातं विवेककुसुमं शुभम् ।
रक्षन्ति ये महात्मानो भाजनं ते फलश्रियः ॥

208

शून्यमाकीर्णतामेति मृत्युरप्युत्सवायते ।
आपत्संपदिवाभाति विद्वज्जनसमागमे ॥

209

हिममापत्सरोजिन्या मोहनीहारमारुतः ।
जयत्येको जगत्यस्मिन्साधुः साधुसमागमः ॥

210

परं विवर्धनं बुद्धेरज्ञानतरुशातनम् ।
समुत्सारणमाधीनां विद्धि साधुसमागमम् ॥

211

यः स्नातः शीतसितया साधुसंगतिगङ्गया ।
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ॥

एते भगवद्वाल्मीकिमुनेः.

212

हृदयानि सतामेव कठिनानीति मे मतिः ।
खलवाग्विशिखैस्तीक्ष्णैर्भिद्यन्ते न मनाग्यतः ॥

तथागतेन्द्रसिंहस्य.

213

आः किमर्थमिदं चेतः सताम्मम्भोधिदुर्भरम् ।
इति क्रुधेव दुर्वेधाः परदुःखैरपूरयत् ॥

गोविन्दराजस्य.

214

काचो मणिर्मणिः काचो येषां तेन्ये हि देहिनः ।
सन्ति ते सुधियो येषां काचः काचो मणिर्मणिः ॥

भट्टमल्लटस्य.

215

दोषानपि गुणीकर्तुं दोषीकर्तुं गुणानपि ।
शक्तो वादी न तत्तथ्यं दोषा दोषा गुणा गुणाः ॥

कस्यापि.

216

गुणराशिमहाभारनिर्भरापूरितान्तराः ।
सन्तो गौरवमायान्ति यदि तत्र किमद्भुतम् ॥

217

स्वात्मन्येव लयं यातु तादृशो गुणिनां गुणः ।
स्वयं प्रख्याप्यमानोपि यस्तृणाय न मन्यते ॥

एतौ राजकुलभट्टस्य.

218

गुणवज्जनसंपर्काद्याति स्वल्पोपि गौरवम् ।
पुष्पमालानुषङ्गेण तृणं शिरसि धार्यते ॥

219

सुवृत्तस्यैकरूपस्य परप्रीत्यै धृतोन्नतेः ।
साधोः स्तनयुगस्येव पतनं कस्य तुष्टये ॥

220

उदेति सविता रक्तो रक्त एवास्तमेति च ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥

221

पातेन कन्दुक इवोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥

222

पातितोपि कराघातैरुत्पतत्येव कन्दुकः ।
प्रायेण हि सुवृत्तानामस्थायिन्यो विपत्तयः ॥

223

च्युतोप्युद्गच्छति पुनः प्रज्ञावान्न तु मूढधीः ।
कन्दुकः पतनोत्थायी न तु कान्ताकुचद्वयी ॥

क्षेमेन्द्रस्य.

224

अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।
सदा लोकहिते युक्ता रत्नदीपा इवोत्तमाः ॥

225

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
नहि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनि ॥

226

नालोकः क्रियते सूर्ये भूः प्रतीपं न धार्यते ।
नहि प्रत्युपकाराणामपेक्षा सत्सु विद्यते ॥

227

अपकुर्वन्नपि प्रायः प्राप्नोति महतः शुभम् ।
दहन्तमप्यौर्वमग्निं संतर्पयति वारिधिः ॥

228

दृष्टापि दृश्यते दृश्यं श्रुत्वापि श्रूयते पुनः ।
सत्यं न साधुवृत्तस्य दृश्यते पुनरुक्तता ॥

कस्यापि.

229

सत्पक्षा ऋजवः शुद्धाः सफला गुणसेविनः ।
तुल्यैरपि गुणैश्चित्रं सन्तः सन्तः शराः शराः ॥

भट्टवासुदेवस्य.

230

लाभप्रणयिनो नीचा मानकामा मनस्विनः ।
मद्गुः सरसि मत्स्यार्थी हंसस्येष्टा प्रसन्नता ॥

क्षेमेन्द्रस्य.

231

परदुःखं समाकर्ण्य स्वभावसरलो जनः ।
उपकारासमर्थत्वात्प्राप्नोति हृदये व्यथाम् ॥

232

ते वन्द्यास्ते कृतिनः श्लाघ्या तेषां हि जन्मनोत्पत्तिः ।
यैरुज्झितात्मकार्यैः सुहृदामर्था हि साध्यन्ते ॥

शाकल्यस्य.

233

अशठमलोलमजिह्मं त्यागिनमनुरागिणं विशेषज्ञम् ।
यदि नाश्रयति नरं श्रीः श्रीरेव हि वञ्चिता तत्र ॥

श्रीहर्षदेवस्य.

234

आरोग्यं विद्वत्ता सज्जनमैत्री महाकुले जन्म ।
स्वाधीनता च पुंसां महदैश्वर्यं विनाप्यर्थैः ॥

दामोदरगुप्तस्य.

235

स्वल्पापि साधुसंपद्भोग्या महतां न पृथ्व्यपि खलश्रीः ।
सारसमेव पयस्तृषमपहरति न वारिधेर्जातु ॥

236

न भवति भवति च न चिरं भवति चिरं चेत्फले विसंवदति ।
मन्युः सत्पुरुषाणां तुल्यः स्नेहेन नीचानाम् ॥

237

दोषो गुणाय गुणिनां महदपि दोषाय दोषिणां सुकृतम् ।
तृणमिव दुग्धाय गवां दुग्धमिव विषाय सर्पाणाम् ॥

238

विषमगता अपि न बुधाः परिभवमिश्रां श्रियं हि वाञ्छन्ति ।
न पिबन्ति भौममम्भः सरजसमिति चातका एते ॥

239

योग्यतयैव विनाशं प्रायोनार्येषु यान्ति गुणवन्तः ।
स्फुटवचना एव शुकाः पञ्जरबन्धं निषेवन्ते ॥

240

सकृदपि दृष्ट्वा पुरुषं प्राज्ञास्तुलयन्ति सारफल्गुत्वम् ।
हस्ततुलयापि निपुणाः पलपरिमाणं विजानन्ति ॥

241

सुजनो न याति वैरं परहितनिरतो विनाशकालेपि ।
छेदेपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥

242

निर्गुणमप्यनुरक्तं प्रायो न समाश्रितं जहति सन्तः ।
सहवृद्धिक्षयभाजं वहति शशाङ्कः कलङ्कमपि ॥

243

अन्त्यावस्थोपि बुधः स्वगुणं न जहाति जातिशुद्धतया ।
न श्वेतभावमुज्झति शङ्खः शिखिभुक्तमुक्तोपि ॥

244

दोषमपि गुणवति जने दृष्ट्वा गुणरागिणो न खिद्यन्ते ।
प्रीत्यैव शशिनि पतितं पश्यति लोकः कलङ्कमपि ॥

एता रविगुप्तस्य.

245

साप्तपदीनं सख्यं भवेत्प्रकृत्या विशुद्धचित्तानाम् ।
किमुतान्योन्यगुणकथाविस्रम्भनिबद्धभावानाम् ॥

हरिभद्रस्य.

246

स्पृहणीयाः कस्य न ते सुमतेः सरलाशया महात्मानः ।
त्रयमपि येषां सदृशं हृदयं वचनं तथाचारः ॥

वल्लभदेवस्य.

247

गुणिनः समीपवर्ती पूज्यो लोकस्य गुणविहीनोपि ।
विमलेक्षणप्रसङ्गादञ्जनमाप्नोति काणाक्षि ॥

भर्गटस्य.

248

सहसिद्धमिदं महतां धनेष्वनास्था गुणेषु कृपणत्वम् ।
परदुःखे कातरता महच्च धैर्यं स्वदुःखेषु ॥

प्रकाशवर्षस्य.

249

अतिकुपिता अपि सुजना योगेन मृदूभवन्ति न तु नीचाः ।
हेम्नः कठिनस्यापि द्रवणोपायोस्ति न तृणानाम् ॥

250

उपकृतिसाहसिकतया क्षतिमपि गणयन्ति नो गुणिनः ।
जनयन्ति हि प्रकाशं दीपशिखाः स्वाङ्गदाहेन ॥

251

रक्तत्वं कमलानां सत्पुरुषाणां परोपकारित्वम् ।
असतां च निर्दयत्वं स्वभावसिद्धं त्रिषु त्रितयम् ॥

252

उपकर्तुमप्रकाशं क्षन्तुं न्यूनेष्वयाचितं दातुम् ।
अभिसंधातुं च गुणैः शतेषु केचिद्विजानन्ति ॥

253

गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः ।
अलिरेति वनात्कमलं न दर्दुरस्तन्निवासोपि ॥

254

आदौ तु मन्दमन्दानि मध्ये समरसानि च ।
अन्ते स्नेहायमानानि संगतानि बुधैः सह ॥

255

इयमुन्नतसत्त्वशालिनां
महतां कापि कठोरचित्तता ।
उपकृत्य भवन्ति दूरतः
परतः प्रत्युपकारशङ्कया ॥

256

उपकारिणि वीतमत्सरे वा
सदयत्वं यदि तत्र कोतिरेकः ।
अहिते सहसापराद्धलब्धे
सघृणं यस्य मनः सतां स धुर्यः ॥

257

आदिमध्यनिधनेषु सौहृदं
सज्जने भवति नेतरे जने ।
छेदताडननिघर्षतापनै-
र्नान्यभावमुपयाति काञ्चनम् ॥

258

दीपाः स्थितं वस्तु विभावयन्ति
कुलप्रदीपास्तु भवन्ति केचित् ।
चिरव्यतीतानपि पूर्वजान्ये
प्रकाशयन्ति स्वगुणप्रकर्षात् ॥

भा० अमृतवर्धनस्य.

259

तुङ्गात्मनां तुङ्गतराः समर्था
मनोरुजं ध्वंसयितुं न नीचाः ।
धाराधरा एव धराधराणां
निदाघदावौघहरा न नद्यः ॥

260

गुणा गुणज्ञेषु गुणीभवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः ।

सुस्वादुतोयप्रभवा हि नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ॥

261

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वशः ।
समुच्छ्रितानेव तरून्प्रबाधते
महान्महत्स्वेव करोति विक्रियाम् ॥

262

चिराय सत्संगमशुद्धमानसो
न यात्यसत्संगतमात्मवान्नरः ।
मनोहरेन्दीवरखण्डगोचरो
न जातु भृङ्गः कुणपे निलीयते ॥

263

अपि विभवविहीनः प्रच्युतो वा स्वदेशा-
न्नहि खलजनसेवां प्रार्थयत्युन्नतात्मा ॥
तनु तृणमुपभुङ्क्ते न क्षुधार्तोपि सिंहः
पिबति रुधिरमुष्णं प्रायशः कुञ्जराणाम् ॥

एते केषामपि.

264

वित्ते त्यागः क्षमा शक्तौ दुःखे दैन्यविहीनता ।
निर्दम्भता सदाचारे स्वभावोयं महात्मनाम् ॥

265

सुखलवदशाहर्षक्लैव्ये खलः खलु खेलते
स्खलति भजते लेशक्लेशे विषादविषूचिकाम् ।
भवति न सतां दर्पोद्दामा न दैन्यमयी मति-
र्दुरभिभवता गम्भीराणां सुखेष्वसुखेषु च ॥

266

स्वाम्ये पेशलता गुणे प्रणयिता हर्षे निरुत्सेकता
मन्त्रे संवृतता श्रुते सुमतिता वित्तोदये त्यागिता ।

साधौ सादरता खले विमुखता पापे परं भीरुता
दुःखे क्लेशसहिष्णुता च महतां कल्याणमाकाङ्क्षति ॥

क्षेमेन्द्रस्य.

267

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुते
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

268

इदं हि माहात्म्यविशेषसूचकं
वदन्ति चिह्नं महतां मनीषिणः ।
मनो यदेषां सुखदुःखसंभवे
प्रयाति नो हर्षविषादवश्यताम् ॥

एतौ भेण्ठकस्य.

269

सुभाषितैः प्रीतिरनुन्नतिः श्रिया
परार्थनिष्पत्तिपटीयसी क्रिया ।
गुणेष्वतृप्तिर्गुणवत्सु चादरो
निगूढमेतच्चरितं महात्मनाम् ॥

हरिभट्टस्य.

270

सत्यं गुणा गुणवतां विधिवैपरीत्या-
द्यत्नार्जिता अपि कलौ विफला भवन्ति ।
साफल्यमस्ति सुतरामिदमेव तेषां
यत्तापयन्ति हृदयानि पुनः खलानाम् ॥

पुण्यस्य.

271

यद्वञ्चनाहितमतिर्बहु चाटुगर्भं
कार्योन्मुखः खलजनः कृतकं ब्रवीति ।

तत्साधवो न न विदन्ति विदन्ति किं तु
कर्तुं वृथा प्रणयमस्य न पारयन्ति ॥

भगवत्तरारोग्बस्य.

272

पापं समाचरति वीतघृणो जघन्यः
प्राप्यापदं सघृण एव तु मध्यबुद्धिः ।
प्राणात्ययेपि न तु साधुजनः सुवृत्तं
वेलां समुद्र इव लङ्घयितुं समर्थः ॥

भदन्तशूरस्य.

273

शुद्धः स एव कुलजश्च स एव धीरः
श्लाघ्यो विपत्स्वपि न मुञ्चति यः स्वभावम् ।
तप्तं यथा दिनकरस्य मरीचिजालै-
र्देहं त्यजेदपि हिमं न तु शीतलत्वम् ॥

274

याच्ञापदं मरणदुःखमिवानुभाव्य
दत्तेन किं खलु भवत्यतिभूयसापि ।
कल्पद्रुमान्परिहसन्त इवेह सन्तः
संकल्पितैरतिददत्यकदर्थितं यत् ॥

प्रकाशवर्षस्य.

275

ते साधवो भुवनमण्डलमौलिभूता
ये साधुतां निरुपकारिषु दर्शयन्ति ।
आत्मप्रयोजनवशीकृतखिन्नदेहः
पूर्वोपकारिषु खलोपि हि सानुकम्पः ॥

रत्नाकरस्य.

276

नान्तर्विचिन्तयति किंचिदपि प्रतीप-
माकोपितोपि सुजनः पिशुनेन पापम् ।
अर्कद्विषोपि हि मुखे पतिताग्रभागा-
स्तारापतेरमृतमेव कराः किरन्ति ॥

277

आकोपितोपि कुलजो न वदत्यवाच्यं
निष्पीडितो मधुरमेव वमेत्किलेक्षुः ।
नीचो जनो गुणशतैरपि सेव्यमानो
हासेषु तद्वदति यत्कलहेषु वाच्यम् ॥

278

निन्दन्तु नीतिनिपुणा अथवा स्तुवन्तु
लक्ष्मीः परापततु गच्छतु वा यथेच्छम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रचलयन्ति पदं न धीराः ॥

एते केषामपि.

279

हेतोः कुतोप्यसदृशाः सुजना गरीयः
कार्यं निसर्गगुरवः स्फुटमारभन्ते ।
उत्थाय किं कलशतोपि न सिन्धुनाथ-
मुद्वीचिमालमपिबद्भगवानगस्त्यः ॥

रत्नाकरस्य.

280

प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेप्यसुकरं
त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्योकृशधनः ।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥

जयादित्यस्य.

281

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधि-
रनुत्सेको लक्ष्म्याप्यनभिभवनीयाः परकथाः ।
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः
श्रुतेत्यन्तासक्तिः पुरुषमभिजातं कथयति ॥

282

कस्यादेशात्क्षपयति तमः सप्तसप्तिः प्रजानां
छायाहेतोः पथि विटपिनामञ्जलिः केन बद्धः ।

अभ्यर्थ्यन्ते जललवमुचः केन वा वृष्टिहेतो-
र्जात्यैवैते परहितविधौ साधवो बद्धकक्ष्याः ॥

283

स्वफलनिचयः शाखाभङ्गं करोति वनस्पते-
र्गमनमलसं बर्हाटोपः करोति शिखण्डिनः ।
चतुरगमनो यो जात्याश्वः स गौरिव वाह्यते
गुणवति जने प्रायेणैते गुणाः खलु वैरिणः ॥

एते केषामपि.

284

ख्यातिं यत्र गुणा न यान्ति गुणिनस्तत्रादरः स्यात्कुतः
किं कुर्याद्बहुशिक्षितोपि पुरुषः पाषाणभूते जने ।
प्रेमारूढविलासिनीमदवशव्यावृत्तकण्ठस्वनः
सीत्कारो हि मनोहरोपि बधिरे कं नाम कुर्याद्गुणम् ॥

सीत्काररत्नस्य.

285

क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोन्मुखाः
स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुष्पूरोदरपूरणाय पिबति स्रोतःपतिं वाडवो
जीमूतस्तु निदाघतापितजगत्संतापविच्छित्तये ॥

286

नम्रत्वेनोन्नमन्तः परगुणनुतिभिः स्वान्गुणान्ख्यापयन्तः
पुष्णन्तः स्वीयमर्थं सततकृतमहारम्भयत्नाः परार्थे ॥
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्मुखान्दुःखयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्थनीयाः ॥

एते केषामपि.

287

सज्जना एव साधूनां प्रथयन्ति गुणोत्करम् ।
पुष्पाणां सौरभं प्रायस्तन्वते दिक्षु मारुताः ॥

288
साधुरेव प्रवीणः स्यात्सद्गुणामृतचर्वणे।
नवचूताङ्कुरास्वादकुशलः कोकिलः किल॥
289
प्रायः सन्त्युपदेशार्हा धीमन्तो न जडाशयाः।
तिलाः कुसुमसौगन्ध्यग्राहिणो न यवाः क्वचित्॥
290
मनस्विहृदयं धत्ते रौक्ष्येणैव प्रसन्नताम्।
भस्मना मकुरः प्रायः प्रसादं लभतेतराम्॥
291
उत्तमः क्लेशविक्षोभं क्षमः सोढुं नहीतरः।
मणिरेव महाशाणघर्षणं न तु मृत्कणः॥
292
जडे प्रभवति प्रायो दुःखं बिभ्रति साधवः।
सितांशावुदिते पद्माः संकोचातङ्कधारिणः॥
293
गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः।
मालतीमल्लिकामोदं घ्राणं वेत्ति न लोचनम्॥
294
स्वभावं नैव मुञ्चन्ति सन्तः संसर्गतोसताम्।
न त्यजन्ति रुतं मञ्जु काकसंपर्कतः पिकाः॥
295
संपत्तौ कोमलं चित्तं साधोरापदि कर्कशम्।
सुकुमारं मधौ पत्त्रं तरोः स्यात्कठिनं शुचौ॥
296
स्वभावं न जहात्यन्तः साधुरापन्नतोपि सन्।
कर्पूरः पावकस्पृष्टः सौरभं भजतेतराम्॥
297
अप्यापत्समयः साधोः प्रयाति श्लाघनीयताम्।
विधोर्विधुंतुदास्कन्दविपत्कालोपि सुन्दरः॥

298

दृष्टदुर्जनदौरात्म्यः सज्जने रज्यते जनः ।
आरुह्य पर्वतं पान्थः सानौ निर्वृतिमेत्यलम् ॥

299

क्षणक्षयिणि सापाये भोगे रज्यन्ति नोत्तमाः ।
संत्यज्याम्भोजकिंजल्कं हंसाः प्राश्नन्ति शैवलम् ॥

300

अधमं बाधते भूयो दुःखावेगो न तूत्तमम् ।
पाणिपादं रुजत्याशु शीतस्पर्शो न चक्षुषी ॥

301

गुणवान्सुचिरस्थायी दैवेनापि न सह्यते ।
तिष्ठत्येकां निशां चन्द्रः श्रीमान्संपूर्णमण्डलः ॥

302

सर्वत्र गुणवान्देशे चकास्ति प्रथतेतराम् ।
मणिर्मूर्ध्नि गले बाहौ पादपीठेपि शोभते ॥

303

उत्तमं सुचिरं नैव विपदोभिभवन्त्यलम् ।
राहुग्रसनसंभूता क्षणं विच्छायता विधोः ॥

304

संतुष्यत्युत्तमः स्तुत्या धनेन महताधमः ।
प्रसीदन्ति जपैर्देवा बलिभिर्भूतविग्रहाः ॥

305

न कदाचित्सतां चेतः प्रसरत्यघकर्मसु ।
जलेषु द्रुतमप्यन्तः सर्पिरादयानतां व्रजेत् ॥

306

नराः संस्कारार्हा जगति किल केचित्सुकृतिनः
समानायां जातावपि वयसि सत्यामपि धियि ।
अयं दृष्टान्तोत्र स्फुटपरिचयादभ्यसनतः
शुकः श्लोकान्वक्तुं प्रभवति न काकः क्वचिदपि ॥

307

धनमपि परदत्तं दुःखमौचित्यभाजां
भवति हृदि तदेवानन्दकारीतरेषाम् ।
मलयजरसबिन्दुर्बाधते नेत्रमन्त-
र्जनयति च स एवाह्लादमन्यत्र गात्रे ॥

एते कुसुमदेवस्य.

308

सद्वंशजस्य परितापनुदः सुवृत्त-
शुद्धात्मनः सकललोकविभूषणस्य ।
छिद्रं प्रजातमपि साधुजनस्य दैवा-
न्मुक्तामणेरिव गुणाय भवत्यवश्यम् ॥

कस्यापि.

309

गेहं दुर्गतबन्धुभिर्गुरुगृहं छात्रैरहंकारिभि-
र्हट्टं पत्तनवञ्चकैर्मुनिजनैः शापोन्मुखैराश्रमान् ।
सिंहाद्यैश्च वनं खलैर्नृपसभां चौरैर्दिगन्तानपि
संकीर्णान्यवलोक्य सत्यसरलः साधुः क्व विश्राम्यति ॥

310

साभिमानमसंभाव्यमौचित्यच्युतमप्रियम् ।
दुःखावमानदीनं वा न वदन्ति गुणोन्नताः ॥

क्षेमेन्द्रस्य.

311

भवति सुभगत्वमधिकं विस्तारितपरगुणस्य सुजनस्य ।
वहति विकासितकुमुदो द्विगुणरुचिं हिमकरोद्योतः ॥

312

गुणिनामपि निजरूपप्रतिपत्तिः परत एव संभवति ।
स्वमहिमदर्शनमक्ष्णोर्मकुरतले जायते यस्मात् ॥

एतौ सुबन्धोः.

313

कोतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥

कस्यापि.

314

अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता भवन्ति योग्या अयोग्याश्च ॥

315

उत्साहसंपन्नमदीर्घसूत्रं
क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च
लक्ष्मीः स्वयं वाञ्छति वासहेतोः ॥

316

कदर्थितस्यापि महाशयस्य
न शक्यते सर्गगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्ने-
र्नाधः शिखा यान्ति कदाचिदेव ॥

एते केषामपि.

317

न्यायः खलैः परिहृतश्चलितश्च धर्मः
कालः कलिः कलुष एव परं प्रवृत्तः ।
प्रायेण दुर्जनजनः प्रभविष्णुरेव
निश्चक्रिकः परिभवास्पदमेव साधुः ॥

318

व्रते विवादं विमतिं विवेके
सत्येतिशङ्कां विनये विकारम् ।
गुणेवमानं कुशले निषेधं
धर्मे विरोधं न करोति साधुः ॥

एतौ क्षेमेन्द्रस्य.

319

वन्द्यः स पुंसां त्रिदशाभिनन्द्यः
कारुण्यपुण्योपचयक्रियाभिः ।
संसारसारत्वमुपैति यस्य
परोपकाराभरणं शरीरम् ॥

कस्यापि.

320

अभेदेनोपास्ते कुमुदमुदरे वा स्थितवतो
विपक्षादम्भोजादुपगतवतो वा मधुलिहः ।
अपर्याप्तः कोपि स्वपरपरिचर्यापरिचय-
प्रबन्धः साधूनामयमनभिसंधानमधुरः ॥

मुरारेः.

321

यैर्वातूलो भवति पुरतः कथ्यमानैर्जनानां
कामप्यन्तर्विदधति रुजं येप्यनुद्गीर्यमाणाः ।
तेभिप्रायाः किमपि हृदये कण्ठलग्नः स्फुरन्तो
यस्याख्येयास्तमिह सुहृदं पुण्यवन्तो लभन्ते ॥

भट्टसारस्वतस्य.

322

उदन्वच्छिन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं कथयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥

राजशेखरस्य.

323

सागसेपि न कुप्यन्ति कृपया चोपकुर्वते ।
बोधं स्वस्यैव नेच्छन्ति ते विश्वोद्धरणक्षमाः ॥

324

पात्रं पवित्रयति नैव गुणान्क्षिणोति
स्नेहं न संहरति नापि मलं प्रसूते ।

दोषावसानरुचिरश्चलतां न धत्ते
सत्संगमः सुकृतसद्मनि कोऽपि दीपः ॥

क्षेमेन्द्रस्य.

325

अणुरपि मणिः प्राणत्राणक्षमो विषभक्षिणां
शिशुरपि रुषा सिंहीसूनुः समाह्वयते गजान् ।
तनुरपि तरुस्कन्धोद्भूतो दहत्यनलो वनं
प्रकृतिमहतां जात्यं तेजो न मूर्तिमपेक्षते ॥

अथ दुर्जनपद्धतिः

326

नमः खलेभ्यः क इवाथवा न ता-
नलं नमस्येदिह यो जिजीविषुः ।
विनैव ये दोषमृषिप्रकाण्डव-
धयन्ति शापेन रसावलं नरान् ॥

प्रकाशवर्षस्य.

327

विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः ।
यदयं नकुलद्वेषी सकुलद्वेषी सदा पिशुनः ॥

328

अतिमलिने कर्तव्ये भवति खलानामतीव निपुणा धीः ।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः ॥

329

विध्वस्तपरगुणानां भवति खलानामतीव मलिनत्वम् ।
अन्तरितशशिरुचामपि सलिलमुचां मलिनिमाभ्यधिकः ॥

330

हस्त इव भूतिमलिनो लङ्घयति यथा यथा खलः सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥

एते सुबन्धोः.

331

जीवनग्रहणे नम्रा गृहीत्वा पुनरुत्थिताः ।
किं कनिष्ठा उत ज्येष्ठा घटीयन्त्रस्य दुर्जनाः ॥

332

सदा खण्डनयोग्याय तुषपूर्णाशयाय च ।
नमोऽस्तु बहुबीजाय खलायोलूखलाय च ॥

333

जिह्वादूषितसत्पात्रः पिण्डार्थी कलहोत्कटः ।
तुल्यतामशुचिर्नित्यं बिभर्ति पिशुनः शुनः ॥

334

अहो बत खलः पुण्यैर्मूर्खोऽप्यश्रुतपण्डितः ।
स्वगुणोदीरणे शेषः परनिन्दासु वाक्पतिः ॥

335

खलः सुजनपैशुन्ये सर्वतोक्षि शिरोमुखः ।
सर्वतः श्रुतिमाँल्लोके सर्वमावृत्य तिष्ठति ॥

336

सत्साधुवादे मूर्खस्य मात्सर्यगलरोगिणः ।
जिह्वा कङ्कमुखेनापि कृष्टा नैव प्रवर्तते ॥

337

मायामयः प्रकृत्यैव रागद्वेषमदाकुलः ।
महतामपि मोहाय संसार इव दुर्जनः ॥

338

खचित्रमपि मायावी रचयत्येव लीलया ।
लघुश्च महतां मध्ये तस्मात्खल इति स्मृतः ॥

339

खलेन धनमत्तेन नीचेन प्रभविष्णुना ।
पिशुनेन पदस्थेन हा प्रजे क्व गमिष्यसि ॥

एते क्षेमेन्द्रस्य.

340

कृतशतमसत्सु नष्टं सुभाषितशतं च नष्टमबुधेषु ।
वचनशतमवचनकरे बुद्धिशतमचेतने नष्टम् ॥

341

नष्टमपात्रे दानं नष्टं हितमफलबुद्ध्यवज्ञाने ।
नष्टो गुणोऽगुणज्ञे नष्टं दाक्षिण्यमकृतज्ञे ॥

342

दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारितार्धासनो
गाढालिङ्गनतत्परः प्रियकथाप्रश्नेषु सक्तोत्तरः ।
अन्तर्गूढविषो बहिर्मधुमयश्चातीव मायामयः
को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः ॥

एते केषामपि.

343

ये श्रमं हर्तुमीहन्ते महतां चिरसंभृतम् ।
वन्ध्यास्तेसरलात्मानो दुर्जनाः सज्जना इव ॥

आनन्दवर्धनस्य.

344

अहो कुटिलबुद्धीनां दुर्गाह्यमसतां मनः ।
अन्यद्वचसि कण्ठेऽन्यदन्यदोष्ठपुटे स्थितम् ॥

कस्यापि.

345

खलेषु सत्सु निर्याता वयमर्जयितुं गुणान् ।
इयं सा तस्करग्रामे रत्नक्रयविडम्बना ॥

346

वर्धेते स्पर्धयेवोभौ संपदा शतशाखया ।
अङ्कुरोऽवस्करोद्भूतः पुरुषश्चाकुलोद्भवः ॥

एतौ भट्टवल्लभस्य.

347

दह्यमानाः सुतीक्ष्णेन नीचाः परयशोऽग्निना ।
अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रचक्रिरे ॥

348

यत्स्मृत्वैव परां यान्ति सन्तः संतापसंततिम् ।
तदसन्तो हसन्तोपि हेलयैव हि कुर्वते ॥

349

गुणदोषावशास्त्रज्ञः कथं विभजते जनः ।
किमन्धस्याधिकारोस्ति रूपभेदोपलब्धिषु ॥

350

प्रायः प्रकाशतां याति मलिनः साधुबाधया ।
नाग्रसिष्यत चेदर्कं कोज्ञास्यत्सिंहिकासुतम् ॥

351

प्रायः परोपतापाय दुर्जनः सततोद्यतः ।
अवश्यकरणीयत्वान्न कारणमपेक्षते ॥

352

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥

353

अहो प्रकृतिसादृश्यं श्लेष्मणो दुर्जनस्य च ।
मधुरैः कोपमायाति कटुकैरुपशाम्यति ॥

354

यथा गजपतिः श्रान्तश्छायार्थी वृक्षमाश्रितः ।
विश्रम्य तं द्रुमं हन्ति तथा नीचः स्वमाश्रयम् ॥

एते केषामपि.

355

दुर्जनः परिहर्तव्यो विद्ययालंकृतोपि सन् ।
मणिना भूषितः सर्पो भवेत्किं न भयंकरः ॥

वाल्मीकेः.

356

चारुता परदारार्थं धनं लोकोपतप्तये ।
प्रभुत्वं साधुनाशाय खले खलतरा गुणाः ॥

357

परोपघातविज्ञानमात्रलाभोपजीविनाम् ।
दाशानामिव धूर्तानां जालाय गुणसंग्रहः ॥

358

दुर्जनेनोच्यमानानि वचांसि मधुराण्यपि ।
अकालकुसुमानीव त्रासं संजनयन्ति मे ॥

एते केषामपि.

359

न लज्जते सज्जनवर्जनीयया
भुजंगवक्रक्रिययापि दुर्जनः ।
धियं कुमायासमयाभिचारिणीं
विदग्धतामेव हि मन्यते खलः ॥

क्षेमेन्द्रस्य.

360

वृत्तिं स्वां बहु मन्यते हृदि गुरुं धत्तेनुकम्पोक्तिभि-
र्व्यक्तं निन्दति योग्यतां मितमतिः कुर्वन्स्तुतीरात्मनः ।
गर्वोपायनिषेवणं कथयति स्थास्नु वदन्व्यापदं
श्रुत्वा दुःखमरुंतुदां वितनुते पीडां जनः प्राकृतः ॥

361

पाकश्चेन्न शुभस्य मेद्य तदसौ प्रागेव नादात्किमु
स्वार्थश्चेन्न मयास्य किं न भजते दीनान्स्वबन्धूनयम् ।
मत्तो रन्ध्रदृशोस्य भीर्यदि न तल्लुब्धः किमेष त्यजे-
दित्यन्तः पुरुषोधमः कलयति प्रायः कृतोपक्रियः ॥

एतौ कल्हणस्य.

362

साश्चर्यं युधि शौर्यमप्रतिहतं तत्खण्डिताखण्डलं
याच्ञोत्तानकरः कृत सभगवान्दानेन लक्ष्मीपतिः ।
ऐश्वर्यं स्वकराप्तसप्तभुवनं लब्धाब्धिपारं यशः
सर्वं दुर्जनसंगमेन सहसा स्पष्टं विनष्टं बलेः ॥

363

शमयति यशः क्लेशं सूते दिशत्यशिवां गतिं
जनयति जनोद्वेगायासं नयत्युपहास्यताम् ।
भ्रमयति मतिं मानं हन्ति क्षिणोति च जीवितं
क्षिपति सकलं कल्याणानां कुलं खलसंगमः ॥

एतौ क्षेमेन्द्रस्य.

364

अविनयभुवामज्ञानानां शमाय भवन्नपि
प्रकृतिकुटिलाद्विद्याभ्यासः खलत्वविवृद्धये ।
फणिभयभृतामस्तु च्छेदक्षमस्तमसामसौ
विषधरफणारत्नालोको भयं तु भृशायते ॥

मुरारेः.

365

करोति पूज्यमानोपि लोकव्यसनदीक्षितः ।
दर्शने दर्शने त्रासं गृहाहिरिव दुर्जनः ॥

366

सत्यधर्मच्युतात्पुंसः क्रुद्धादाशीविषादिव ।
नास्तिकोपि ह्युद्विजते जनः किं पुनरास्तिकः ॥

367

येषां प्राणिवधः क्रीडा नर्म मर्मच्छिदो गिरः ।
कार्यं परोपतापित्वं ते मृत्योरपि मृत्यवः ॥

368

अहो बत महत्कष्टं विपरीतमिदं जगत् ।
येनापत्रपते साधुरसाधुस्तेन तुष्यति ॥

369

न तथेच्छन्त्यकल्याणाः परेषां वेदितुं गुणान् ।
यथैषां ज्ञातुमिच्छन्ति नैर्गुण्यं पापचेतसः ॥

370

वर्जनीयो मतिमतां दुर्जनः सख्यवैरयोः ।
श्वा भवत्युपघाताय लिहन्नपि दशन्नपि ॥

371

अतो हास्यतरं लोके किंचिदन्यन्न विद्यते ।
यत्र दुर्जन इत्याह दुर्जनः सज्जनं जनम् ॥

372

अपकारमसंप्राप्य तुष्येत्साधुरसाधुतः ।
नैष लाभो भुजंगेन वेष्टितो यन्न दश्यते ॥

373

लुब्धः स्तब्धोनृजुर्मूर्खः प्रभुरेकान्तदारुणः ।
बहूनेष खलः साधून्मारयित्वा मरिष्यति ॥

एते श्रीभगवद्व्यासमुनेः.

374

का खलेन सह स्पर्धा सज्जनस्याभिमानिनः ।
भाषणं भीषणं साधुदूषणं यस्य भूषणम् ॥

375

मुखेनैकेन विध्यन्ति पादमेकस्य कण्टकाः ।
दूरान्मुखसहस्रेण सर्वप्राणहराः खलाः ॥

376

निर्माय खलजिह्वाग्रं सर्वप्राणहरं नृणाम् ।
चकार किं वृथा शस्त्रविषवह्नीन्प्रजापतिः ॥

377

यथा परोपकारेषु नित्यं जागर्ति सज्जनः ।
तथा परापकारेषु जागर्ति सततं खलः ॥

एते भट्टपृथ्वीधरस्य.

378

बिभेति पिशुनाद्भीचः प्रकाशनपटीयसः ।
न पुनर्मूढहृदयो निन्दनीयात्स्वकर्मणः ॥

379

वृथाज्वलितकोपाग्नेः परुषाक्षरवादिनः ।
दुर्जनस्यौषधं नास्ति किंचिदन्यदनुत्तरात् ॥

380
खलानां कण्टकानां च द्विधैवास्ति प्रतिक्रिया ।
उपानन्मुखभङ्गो वा दूरतो वापि वर्जनम् ॥

381
जीवन्नपि न तत्कर्तुं शक्नोति सुजनस्तथा ।
दुर्जनो यन्मृतः कुर्यात्परेभ्योहितमुत्तरम् ॥

382
यद्यदिष्टतमं तत्तद्देयं गुणवते किल ।
अत एव खलो दोषान्साधुभ्यः संप्रयच्छति ॥

383
रोगोण्डजोङ्कुरोग्निर्विषमश्वतरो घुणाः क्रिमयः ।
प्रकृतिकृतघ्नश्च नरः स्वाश्रयमविनाश्य नैधन्ते ॥

384
न विना परवादेन रमते दुर्जनो जनः ।
श्वा हि सर्वरसान्भुक्त्वा विनामेध्यं न तृप्यति ॥

385
वरमत्यन्तविफलः सुखसेव्यो हि सज्जनः ।
न तु प्राणहरस्तीक्ष्णः शरवत्सफलः खलः ॥

386
स्वभावेनैव निशितः कृतपक्षग्रहोपि सन् ।
शरवद्गुणनिर्मुक्तः खलः कस्य न भेदकः ॥

387
दुर्जनः सुजनीकर्तुं यत्नेनापि न शक्यते ।
संस्कारेणापि लशुनं कः सुगन्धीकरिष्यति ॥

388
नीचः समुत्थितोवश्यमनवाप्य पराश्रयम् ।
छिद्रेण रतिमाप्नोति दृष्टान्तोत्र कटीभवः ॥

389

परवादे दशवदनः पररन्ध्रनिरीक्षणे सहस्राक्षः ।
सद्वृत्तवृत्तिहरणे बाहुसहस्रार्जुनो नीचः ॥

390

दुर्जनदूषितमनसां पुंसां सुजनेपि नास्ति विश्वासः ।
बालः पायसदग्धो दध्यपि फूत्कृत्य भक्षयति ॥

391

आदौ लज्जयति कृतं मध्ये परिभवति रिक्तमवसाने ।
खलसंगतस्य कथयत यदि सुस्थितमस्ति किंचिदपि ॥

392

परमर्मदिव्यदर्शिषु जात्यैवोचितनिगूढवैरेषु ।
कः खलु खलेषु शङ्कां श्लथयिष्यति दम्भनिरतेषु ॥

केषामपि.

393

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥

भर्तृहरेः.

394

अस्थानाभिनिवेशी प्रायो जड एव भवति नो विद्वान् ।
बालादन्यः कोम्भसि जिघृक्षतीन्दोः स्फुरद्बिम्बम् ॥

395

लब्धोदयोपि हि खलः प्रथमं स्वजनं नयति परितापम् ।
उद्गच्छन्दवदहनो जन्मभुवं दारु निर्दहति ॥

396

अल्पश्रुतलव एव प्रायः प्रकटयति वाग्विभवमुच्चैः ।
सर्वत्र कुनट एव हि नाटकमधिकं विडम्बयति ॥

397

प्रखला एव गुणावतामाक्रम्य धुरं पुरः प्रकर्षन्ति ।
तृणकाष्ठमेव जलधेरुपरि प्लवते न रत्नानि ॥

398

महतां यदेव मूर्ध्नि तदेव नीचास्तृणाय मन्यन्ते ।
लिङ्गं प्रणमन्ति बुधाः काकः पुनरासनीकुरुते ॥

399

सह वसतामप्यसतां जलरुहजलवद्भवत्यसंश्लेषः ।
दूरेपि सतां वसतां प्रीतिः कुमुदेन्दुवद्भवति ॥

400

परिशुद्धामपि वृत्तिं समाश्रितो दुर्जनः परान्व्यथते ।
पवनाशिनोपि भुजगाः परोपतापं न मुञ्चन्ति ॥

401

साधयति यत्प्रयोजनमज्ञस्तत्तस्य काकतालीयम् ।
दैवात्कथमप्यक्षरमुत्किरति घुणोपि काष्ठेषु ॥

402

प्रायः खलप्रकृतयो नापरिभूता हिताय कल्पन्ते ।
पुष्यत्यधिकमशोको गणिकाचरणप्रहारेण ॥

403

परमर्मघट्टनादिषु खलस्य यत्कौशलं न तत्कृत्ये ।
यत्सामर्थ्यमुपहतौ विषस्य तन्नोपकाराय ॥

404

अतिसत्कृता अपि शठाः सहभुवमुज्झन्ति जातु न प्रकृतिम् ।
शिरसा महेश्वरेणापि ननु धृतो वक्र एव शशी ॥

405

वायुरिव खलजनोयं प्रायः पररूपमेति संपर्कात् ।
सन्तस्तु रविकरा इव सदसद्योगेप्यसंश्लिष्टाः ॥

406

प्रेरयति परमनार्यः शक्तिदरिद्रोपि जगदभिद्रोहे ।
तेजयति खड्गधारां स्वयमसमर्था शिला छेत्तुम् ॥

407

दूरेपि परस्यागसि पटुर्जनो नात्मनः समीपेपि ।
स्वं व्रणमक्षि न पश्यति शशिनि कलङ्कं निरूपयति ॥

408

साधुष्वेवातितरामरुंतुदाः स्वां विवृण्वते वृत्तिम् ।
व्याधा निघ्नन्ति मृगान्मृतमपि न तु सिंहमाददते ॥

409

अविकारिणमपि सज्जनमनिशमनार्यः प्रबाधतेत्यर्थम् ।
कमलिन्या किमिह कृतं हिमस्य यत्तां सदा दहति ॥

410

स्वगुणानिव परदोषान्वक्तुं न सतोपि शक्नुवन्ति बुधाः ।
स्वगुणानिव परदोषानसतोपि खलास्तु कथयन्ति ॥

411

कृत्वापि येन लज्जामुपैति साधुः परोदितेनापि ।
तदकृत्वैव खलजनः स्वयमुद्गिरतीति धिग्लघुताम् ॥

412

आत्माप्यात्मविनाशं गणयति न खलः परव्यसनकष्टम् ।
प्रायः सहस्रनाशे समरमुखे नृत्यति कबन्धः ॥

413

प्रकृतिखलत्वादसतां दोष इव गुणोपि बाधते लोकान् ।
विषकुसुमानां गन्धः सुरभिरपि मनांसि मोहयति ॥

414

लब्धोच्छ्रायो नीचः प्रथमतरं स्वामिनं पराभवति ।
पथि धूलिरजो झटादावुत्थापकमेव संवृणुते ॥

415

मृगमदकर्पूरागुरुचन्दनगन्धाधिवासितो लशुनः ।
न त्यजति गन्धमशुभं प्रकृतिमिव सहोत्थितां नीचः ॥

416

उपकृतमनेन सुहृदयमिति दुर्जनेष्वस्ति न क्वचिदपेक्षा ।
होम्रा सह स्वमाश्रयमुद्दतोमिर्दहत्येव ॥

एता रविगुप्तस्य.

417

उपकृतिरेव खलानां दोषस्य गरीयसो भवति हेतुः ।
अनुकूलाचरणेन हि कुप्यन्ति व्याधयोत्यर्थम् ॥

418

न परं फलति हि किंचित्खल एवानर्थमावहति यावत् ।
मारयति सपदि विषतरुराश्रयमाणं श्रमापनुदे ॥

419

स्वार्थनिरपेक्ष एव हि परोपघातोसतां व्यसनमेव ।
अशनायोदन्या वा विरमति फणिनो न दन्दशतः ॥

एताः प्रकाशवर्षस्य.

420

एकीभावं गतयोर्जलपयसोर्मित्रचेतसोश्चैव ।
व्यतिरेककृतौ शक्तिर्हंसानां दुर्जनानां च ॥

दामोदरगुप्तस्य.

421

शल्यमपि स्खलदन्तः सोढुं शक्येत हालहलदिग्धम् ।
धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम् ॥

भट्टरुद्रटस्य.

422

मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥

भर्तृहरेः.

423

प्रारम्भतोतिविपुलं भृशकृशमन्ते विभेदकृन्मलिनम्
महिषविषाणमिवानृजु परुषं भयदं खलप्रेम ॥

424

पात्रमपात्रीकुरुते दहति गुणान्स्नेहमाशु नाशयति ।
अमले मलं प्रयच्छति दीपज्वालेव खलमैत्री ॥

425

समर्पिताः कस्य न तेन दोषा
हठाद्गुणा वा न हृताः खलेन ।
तथापि दोषैर्न वियुज्यतेसौ
स्पृष्टोपि नैकेन गुणेन चित्रम् ॥

श्रीजयवर्धनस्य.

426

आराध्यमानो बहुभिः प्रकारै-
र्नाराध्यते नाम किमत्र चित्रम् ।
अयं त्वपूर्वः प्रतिभाविशेषो
यत्सेव्यमानो रिपुतामुपैति ॥

427

विद्वानुपालम्भमवाप्य दोषा-
न्निवर्ततेसौ परितप्यते च ।
ज्ञातस्तु दोषो मम सर्वथेति
पापो जनः पापतरं करोति ॥

भौण्डस्य.

428

एवमेव नहि जीव्यते खला-
त्तत्र का नृपतिवल्लभे कथा ।
पूर्वमेव हि सुदुःसहो नलः
किं पुनः प्रबलवायुनेरितः ॥

प्रकाशवर्षस्य.

429

अमरैरमृतं न पीतमब्धे-
र्न च हालाहलमुल्बणं हरेण ।

विधिना निहितं खलस्य वाचि
द्वयमेतद्बहिरेकमन्तरन्यत् ॥

भा० अमृतदत्तस्य.

430

निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनो हि यस्य वै
कथं परस्तं परितोषयिष्यति ॥

कस्यापि.

431

इतरदेव बहिर्मुखमुच्यते
हृदि तु यत्स्फुरतीतरदेव तत् ।
चरितमेतदधीरवितारकं
धुरि पयःप्रतिबिम्बमिवासताम् ॥

432

क्व पिशुनस्य गतिः प्रतिहन्यते ।
दशति दृष्टमपि श्रुतमप्यसौ ।
अतिसुदुष्करमव्यतिरिक्तदृ-
क्छ्रुतिभिरप्यथ दृष्टिविषैरिदम् ॥

एतौ भट्टकल्लटस्य.

433

गजतुरगशतैः प्रयान्तु मूर्खा
धनरहिता विबुधाः प्रयान्तु पद्भ्याम् ।
गिरिशिखरगतापि काकपाली
पुलिनगतैर्न समेति राजहंसैः ॥

434

ह्रेपयति प्रियवचनैरादरमुपदर्शयन्खलीकुरुते ।
उत्कर्षयंश्च लघयति मूर्खसुहृत्सर्वथा वर्ज्यः ॥

435

प्रकटमपि न संवृणोति दोषं
गुणलवलम्पट एष साधुवर्गः ।
अतिपरुषरुषं विनापि दोषैः
पिशुनशुनां रुषतां प्रयाति कालः ॥

हरगुप्तस्य.

436

यदा विगृह्णाति तदा हतं यशः
करोति मैत्रीमथ दूषिता गुणाः ।
स्थितिं समीक्ष्योभयथा परीक्षकः
करोत्यवज्ञोपहतं पृथग्जनम् ॥

भारवेः.

437

इष्टो वा सुकृतशतोपलालितो वा
श्लिष्टो वा व्यसनशताभिरक्षितो वा ।
दौःशील्याज्जनयति नैव जात्वसाधु-
र्विस्रम्भं भुजग इवाङ्कमध्यसुप्तः ॥

कस्यापि.

438

रूक्षं विरौति परिकुप्यति निर्निमित्तं
स्पर्शेन दूषयति वारयति प्रवेशम् ।
लज्जाकरं दशति नैव च तृप्यतीति
कौलेयकस्य च खलस्य च को विशेषः ॥

श्रीशिवस्वामिनः.

439

पादाहतोथ दृढदण्डविघट्टितो वा
यं दंष्ट्रया दशति तं किल हन्ति सर्पः ।
कोप्यन्य एव पिशुनोद्य भुजंगधर्मा
कर्णे परं स्पृशति हन्त्यपरं समूलम् ॥

कस्यापि.

440

युक्तं यया किल निरन्तरलब्धवृत्ते-
रस्याभिमानतमसः प्रसरं निरोद्धुम् ।
विद्वत्तया जगति तामवलम्ब्य केचि-
त्तन्वन्त्यहंकृतिमहो शतशाखमान्ध्यम् ॥

मनोरथस्य.

441

मन्वाभयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये वृषलक्ष्मणोथ
कण्ठेधुना वससि वाचि पुनः खलानाम् ॥

भट्टभल्लटस्य.

442

प्रायः स्वभावमलिनो महतां समीपे
तिष्ठन्खलः प्रकुरुतेर्थिजनोपघातम् ।
शीतार्दितैः सकललोकसुखावहोऽपि
धूमे स्थिते नहि सुखेन निषेव्यतेग्निः ॥

443

धूमः पयोधरपदं कथमप्यवाप्य
वर्षाम्बुभिः शमयति ज्वलनस्य तेजः ।
दैवादवाप्य कलुषप्रकृतिर्महत्त्वं
प्रायः स्वबन्धुजनमेव तिरस्करोति ॥

444

उल्लासिताखिलखलस्य विशृङ्खलस्य
प्राग्जातविस्मृतनिजाधमकर्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषोस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥

केषांचित्.

445

नाश्चर्यमेतदधुना हतदैवयोगा-
दुच्चैःस्थितिर्यदधमो न महानुभावः ।
रथ्याकलङ्कशतसंकरसंकुलोपि
पृष्ठे भवत्यवकरो न पुनर्निधानम् ॥

भट्टवासुदेवस्य.

446

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरा-
त्समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम् ।
भुजंगमपि कोपितं शिरसि पुष्पवद्धारये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥

447

लभेत सिकतासु तैलमपि यत्नतः पीडय-
न्पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्छशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥

448

अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं
स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम् ।
श्वपुच्छमवनामितं बधिरकर्णजापः कृतः
कृतान्धमुखमण्डना यदबुधो जनः सेवितः ॥

एते भर्तृहरेः.

449

वृथा दुग्धोनड्वान्स्तनभरनता गौरिति चिरं
परिष्वक्तः षण्डो युवतिरिति लावण्यसहिता ।
कृता वैदूर्याशा विकचकिरणे काचशकले
मया मूढेन त्वां कृपणमगुणज्ञं प्रणमता ॥

450

स्वपक्षच्छेदं वा समुचितफलभ्रंशमथवा
स्वमूर्तेर्भङ्गं वा पतनमशुचौ नाशमथवा ।
शरः प्राप्नोत्येतान्हृदयपथसंस्थोपि धनुष
ऋजोर्वक्राश्लेषाद्भवति खलु सुव्यक्तमशुभम् ॥

451

गुणानां सा शक्तिर्विपदमनुबध्नन्ति यदमी
प्रसन्नस्तद्वेधा मम यदि न तैर्योगमकरोत् ।
विषण्णं दौर्गत्यादिति गुणिनमालोक्य विगुणः
करोति स्वे गेहे ध्रुवमतिसमृद्धयोत्सवमसौ ॥

केषामपि.

452

अवेक्ष्य स्वात्मानं विगुणमपरानिच्छति तथा
फलत्येतन्नो चेद्विलपति न सन्तीह गुणिनः ।
निमार्ष्टुं शर्मु वा परिभवितुमुद्यच्छति ततो-
प्यहो नीचे रम्या सगुणविजिगीषा विधिकृता ॥

वल्लभदेवस्य.

453

यदि परगुणा न क्षम्यन्ते यतस्व तदर्जने
नहि परयशो निन्दाव्याजैरलं परिमार्जितुम् ।
विरमसि न चेदिच्छाद्वेषप्रसक्तमनोरथो
दिनकरकरान्पाणिच्छत्रैर्नुदञ्छ्रममेष्यसि ॥

महेन्द्रस्य.

454

प्रकृष्टे संपर्के भणिभुजगयोर्जन्मजनिते
मणिर्नाहेर्दोषान्भजति न च सर्पो मणिगुणान् ।
असाधुः साधुर्वा भवति ननु जात्यैव पुरुषो
नसङ्गाद्दौर्जन्यं न च सुजनता कस्यचिदपि ॥

455

न विषममृतीकर्तुं शक्यं प्रयत्नशतैरपि
त्यजति कटुतां न स्वां निम्बः स्थितोपि पयोह्रदे ।
गुणपरिचितामार्यां वाणीं न जल्पति दुर्जन-
श्चिरमपि बलाध्माते लोहे कुतः कनकाकृतिः ॥

456

वरमहिमुखे क्रोधाविष्टे करौ विनिवेशितौ
विषमपि वरं पीत्वा सुप्तं कृतान्तनिवेशने ।
गिरिवरतटान्मुक्तश्चात्मा वरं शतधा कृतो
न तु खलजनावाप्तैरर्थैः कृतं हितमात्मनः ॥

457

वर्णस्थं गुरुलाघवं न गणयत्याशङ्कते न क्वचि-
द्रूपं नैव परीक्षते न पुरुषं वृत्तेषु वार्ता कुतः ।
कष्टं नायशसो बिभेति महतो नैवापशब्दान्तरा-
न्मृत्युर्मूर्खकविः खलः कुनृपतिश्चौरश्च तुल्यक्रियाः ॥

458

सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिने-
र्मीमांसाकृतमुन्ममाथ तरसा हस्ती मुनिं जैमिनिम् ।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गल-
मज्ञानावृतचेतसामतिरुषां कोर्थस्तिरश्चां गुणैः ॥

एते केषामपि.

459

वन्द्यान्निन्दति दुःखितानुपहसत्याबाधते बान्धवा-
ञ्छूरान्द्वेष्टि धनच्युतान्परिभवत्याज्ञापयत्याश्रितान् ।
गुह्यानि प्रकटीकरोति घटयन्यत्नेन वैराशयं
ब्रूते शीघ्रमवाच्यमुज्झति गुणान्गृह्णाति दोषान्खलः ॥

प्रकाशवर्षस्य.

460

हसति लसति हर्षात्तीव्रदुःखे परेषां
स्खलति गलति मोहादात्मनः क्लेशलेशे ।
नदति वदति निन्द्यं मानिनां किं च नीचः
परुषवचनमल्पं भाषितो हन्तुमेति ॥

व्यासदासस्य.

461

यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि ।
अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥

कस्यापि.

462

कर्णे तत्कथयन्ति दुन्दुभिरवै राष्ट्रे यदुद्घोषितं
तन्नम्राङ्गतया वदन्ति करुणं यस्मान्नपावान्भवेत् ।
श्लाघन्ते तदुदीर्यते यदरिणाप्युग्रं न मर्मान्तकृ-
द्ये केचिन्ननु शाठ्यमौग्ध्यनिधयस्ते भूभृतां रञ्जकाः ॥

463

भण्डस्ताण्डवमण्डपे चटुकथावीथीषु कन्थाकवि-
र्गोष्ठश्वा स्वगृहाङ्गणे शिखरिभूगर्ते खटाखुः स्फुटम् ।
पिण्डीशूरतया विटश्च पटुतां भूभृद्गृहे गाहते
गच्छन्ति ह्रदकृष्टकच्छपतुलां चित्रं ततोन्यत्र ते ॥

एतौ कह्लणस्य.

464

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेद्गुणवतां यो दुर्जनैर्नाङ्कितः ॥

भर्तृहरेः.

465

आखुः कैलासशैलं तुलयति करटस्तार्क्ष्यमांसाभिलाषी
बभ्रुर्लाङ्गूलमूलं चलयति चपलस्तक्षकाहिं जिघांसुः ।

भेकः पारं यियासुर्भुजगमपि महाघस्मरस्याम्बुराशेः
प्रायेणासन्नपातः स्मरति समुचितं कर्म न क्षुद्रकर्मा ॥

कस्यापि.

466

अगुणकणो गुणराशिर्द्वयमिह दैवात्खलमुखे पतितम् ।
प्रसरति तैलमिवैकः सलिले घृतवज्जडत्वमेत्यन्यः ॥

अथ कदर्याः

467

शरणं किं प्रपन्नानि विषवन्मारयन्ति किम् ।
न त्यज्यन्ते न भुज्यन्ते कृपणेन धनानि यत् ॥

468

कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति ॥

469

या विपत्तिर्धनापाये नवा भोगिवदान्ययोः ।
प्रज्ञापकर्षात्प्रागेव प्राप्ता हि कृपणेन सा ॥

470

त्यागोपभोगशून्येन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥

471

गृहमध्यानिखातेन धनेन रमते यदि ।
स तु तेनानुसारेण रमते किं न मेरुणा ॥

472

किंशुके किं शुकः कुर्यात्फलितेपि बुभुक्षितः ।
अदातरि समृद्धेपि किं कुर्युरुपजीविनः ॥

एते केषामपि.

473

दानोपभोगवन्ध्या या सुहृद्भिर्या न भुज्यते ।
पुंसां यदि हि सा लक्ष्मीरलक्ष्मीः कतमा भवेत् ॥

वररुचेः.

474

अतिसंचयकर्तृणां वित्तमन्यस्य कारणाम् ।
अन्यैः संचीयते यत्नादन्यैश्च मधु पीयते ॥

475

न ददासि विशिष्टेभ्यो यदाभासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥

476

विडम्बनैव पुंसि श्रीः परप्रणयपांसुले ।
कान्तिं कामिह कुर्वीत कुणौ कटककल्पना ॥

477

कृत्वोपकारं यस्तस्माद्वाञ्छति प्रत्युपक्रियाम् ।
दीनस्तृष्णाविधेयत्वाद्वान्तमप्युपलेढि सः ॥

478

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्नाशः ॥

479

दानं भोगं च विना धनसत्तामात्रकेण चेद्धनिनः ।
वयमपि किमिति न धनिनस्तिष्ठति नः काञ्चनो मेरुः ॥

480

धनिनोऽप्यदानभोगा गण्यन्ते धुरि महादरिद्राणाम् ।
हन्ति न यतः पिपासामतः समुद्रोऽपि मरुरेव ॥

481

अभ्युपयुक्ताः सद्भिर्गतागतैरहरहः सुनिर्विण्णाः ।
कृपणजनसंनिकर्षं संप्राप्यार्थाः स्वपन्तीव ॥

482

उपभोगकातराणां पुरुषाणामर्थसंचयपराणाम् ।
कन्यारत्नमिव गृहे तिष्ठन्त्यर्थाः परस्यार्थे ॥

483

ते मूर्खतरा लोके येषां धनमस्ति नास्ति च त्यागः ।
केवलमर्जनरक्षणवियोगदुःखान्यनुभवन्ति ॥

केषामपि.

484

कृपणसमृद्धीनामपि भोक्तारः सन्ति केचिदतिनिपुणाः ।
जलसंपदोम्बुराशेर्यान्ति लयं शश्वदौर्वाग्नौ ॥

प्रकाशवर्षस्य.

485

प्राप्तानपि न लभन्ते भोगान्भोक्तुं स्वकर्मभिः कृपणाः ।
मुखरोगः किल भवति द्राक्षापाके बलिभुजां हि ॥

रविगुप्तस्य.

486

न निर्थियासन्ति कदर्यहस्ता-
द्धनानि पांसोरिव तैललेशाः ।
दैवात्कदाचिद्विनियोक्तुरेव
निर्गन्तुमिच्छन्त्यसुभिः सहैव ॥

487

संचितं क्रतुषु नोपयुज्यते
याचितं गुणवते न दीयते ।
तत्कदर्यपरिरक्षितं धनं
चौरपार्थिवगृहेषु गच्छति ॥

488

वरममी तरवो वनगोचराः
शकुनिसार्थविलुप्तफलश्रियः ॥
न तु धनाढ्यगृहाः कृपणाः फणा-
निहितरत्नभुजंगमवृत्तयः ॥

489

सुसंवृतैर्जीवितवत्सुरक्षितै-
र्निजेपि देहे कृतयन्त्रणस्य च ।

तवानुमार्गं व्रजतो भवान्तरे
शठैर्धनैः पञ्चपदी न पूरिता ॥

490

अहो धनानां महती विदग्धता
सुखोषितानां कृपणस्य वेश्मनि ।
व्रजन्ति न त्यागदशां न भोग्यतां
परां च कांचित्प्रथयन्ति निर्वृतिम् ॥

केषामपि.

491

न शान्तान्तस्तृष्णा धनलवणवारिव्यतिकरैः
क्षतच्छायः कायश्चिरविरसरूक्षाशनतया ।
अनिद्रा मन्दाग्निर्नृपसलिलचौरानलभया-
त्कदर्याणां कष्टं स्फुटमधनकष्टादपि परम् ॥

क्षेमेन्द्रस्य.

492

एकैकातिशयालवः परगुणज्ञानैकवैज्ञानिकाः
सन्त्येते धनिकाः कलासु सकलास्वाचार्यचर्योचणाः ।
अप्येते सुमनोगिरां निशमनाद्बिभ्यत्यहो श्लाघया
धूते मूर्धनि कुण्डले कषणतः क्षीणे भवेतामिति ॥

493

प्रीतिं न प्रकटीकरोति सुहृदि द्रव्यव्ययाशङ्कया
भीतः प्रत्युपकारकारणभयान्नाकृष्यते सेवया ।
मिथ्या जल्पति वित्तमार्गणभयात्स्तुत्यापि न प्रीयते
कीनाशो विभवव्ययव्यतिकरत्रस्तः कथं प्राणिति ॥

भट्टबाणस्य.

494

मत्वा सारं गुणानां शिरसि यदि शशी स्थापितो दैवयोगा-
दीशेन क्षीणबिम्बः सकलमुपनयं किं न नीतः क्षणेन ।

मिथ्यैवं ख्यापयन्तो गुणिनि सरलतां लोकभक्त्यर्थमुच्चै-
राढ्याः कुर्वन्ति वित्तव्ययचकितधियो मानमर्थेन शून्यम् ॥

कस्यापि.

अथोदाराः

495

ब्रह्माण्डमण्डलीमात्रं किं लोभाय मनस्विनः ।
शफरीस्फुरितैर्नाब्धेः क्षुब्धता जातु जायते ॥

भर्तृहरेः.

496

नाल्पीयसि निबध्नन्ति पदमुद्दामचेतसः ।
येषां भुवनलाभेपि निःसीमानो मनोरथाः ॥

497

पुंसामुन्नतचित्तानां सुखावहमिदं द्वयम् ।
सर्वसङ्गनिवृत्तिर्वा विभूतिर्वा सुविस्तरा ॥

एतौ कयोरपि.

498

अयं बन्धुः परो वेति गणना लघुचेतसाम् ।
पुंसामुदारचित्तानां वसुधैव कुटुम्बकम् ॥

भट्टोद्भटस्य.

499

जरामरणदौर्गत्यव्याधयस्तावदासताम् ।
जन्मैव किं न धीरस्य भूयो भूयस्त्रपाकरम् ॥

500

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥

501

अपि नाम स दृश्येत पुरुषातिशयो भुवि ।
गर्वोच्छूनमुखा येन धनिनो नावलोकिताः ॥

502

पृथ्वी पृथ्वी गुणा मान्याः सन्ति भूपा विवेकिनः ।
पराभवापदं यान्ति कस्मादुन्नतबुद्धयः ॥

503

अदृष्टमुखभङ्गस्य युक्तमन्धस्य याचितुम् ।
अहो बत महत्कष्टं चक्षुष्मानपि याचते ॥

एते केषामपि.

504

दारिद्र्यानलसंतापः शान्तः संतोषवारिणा ।
याचकाशाविघातान्तर्दाहं को नाम पद्दयतु ॥

भट्टप्रद्युम्नस्य.

505

परिपूर्णगुणाभोगगरिमोद्गार एव सः ।
त्रिजगत्स्पृहणीयेऽस्मिन्न रुचिर्द्रविणेऽपि यत् ॥

धर्मदत्तस्य.

506

विद्ययैव मदो येषां कार्पण्यं च धने सति ।
तेषां दैवाभिशप्तानां सलिलादग्निरुत्थितः ॥

507

किं तया क्रियते लक्ष्म्या या वधूरिव केवला ।
या न वेश्येव सामान्या पथिकैरपि भुज्यते ॥

विक्रमादित्यस्य.

508

त्यागो गुणो वित्तवतां वित्तं त्यागवतां गुणः ।
परस्परवियुक्तौ तु वित्तत्यागौ विडम्बना ॥

509

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥

510
नृणां धुरि स एवैको यः कश्चित्त्यागपाणिना ।
निर्मार्ष्टि प्रार्थनापांसुधूसरं मुखमर्थिनाम् ॥

511
आकारमात्रविज्ञानसंपादितमनोरथाः ।
धन्यास्ते ये न शृण्वन्ति दीनाः प्रणयिनां गिरः ॥

512
बुद्धिर्या सत्त्वरहिता स्त्रीत्वं तत्केवलं मतम् ।
सत्त्वं चानयसंपन्नं तत्पशुत्वं न पौरुषम् ॥

कयोरपि.

513
कामं प्रियानपि प्राणान्विमुञ्चन्ति मनस्विनः ।
इच्छन्ति न त्वमित्रेभ्यो महतीमपि सत्क्रियाम् ॥

भर्त्रोः.

514
अत्यद्भुतमिमं मन्ये स्वभावममनस्विनः ।
यदुपक्रियमाणोपि प्रीयते न विलीयते ॥

आरराज्ञानकस्य.

515
प्रत्युपकुर्वत्पूर्वं कृतोपकारमपि लज्जयति चेतः ।
यस्तु विहितोपकारादुपकारः सोधिको मृत्योः ॥

516
प्रत्युपकुर्वन्बह्वपि न भवति पूर्वोपकारिणा तुल्यः ।
एकोनुकरोति कृतं निष्कारणमेव कुरुतेन्यः ॥

517
जीवञ्जीवयति हि यो ज्ञातिजनं परिजनं च सुहृदश्च ।
तस्य सफला गृहश्रीर्धिगनुपजीव्यां धनसमृद्धिम् ॥

518
यच्छञ्जलमपि जलदो वल्लभतामेति सर्वलोकस्य ।
नित्यं प्रसारितकरः सवितापि भवत्यचक्षुष्यः ॥

519

नाप्तं यत्केनचिदपि मनोरथा अपि यतो निवर्तन्ते ।
तद्यदि न लभ्यतेऽन्यन्मनस्विनः किमभिमानफलम् ॥

520

घटनं विघटनमथवा कार्याणां भवति विधिनियोगेन ।
उचितेऽनुचिते कर्मणि वृत्तिनिवृत्ती ममायत्ते ॥

521

कल्पस्थायि न जीवितमैश्वर्यं नाप्यते च यदभिमतम् ।
लोकस्तथाप्यकार्यं कुरुते कार्यं किमुद्दिश्य ॥

एते केषामपि.

522

धनबाहुल्यमहेतुः कोपि निसर्गेण मुक्तकरः ।
प्रावृषि कस्याम्बुमुचः संपत्तिः किमधिकाम्बुनिधेः ॥

प्रकाशवर्षस्य.

523

उत्पादिता स्वयमियं यदि तत्तनूजा
तातेन वा यदि तदा भगिनी खलु श्रीः ।
यद्यन्यसंगमवती च तदा परस्त्री
तत्त्यागबद्धमनसः सुधियो भवन्ति ॥

भर्तृहरेः.

524

द्रविणार्जनजः परिश्रमः
फलितोऽप्यस्य जनस्य नीरसः ।
द्रविणार्जनमात्मतुष्टये
परमावर्जयितुं गुणार्जनम् ॥

ज्यौतिषिकभट्टभास्करस्य.

525

यः प्रशंसति नरो नरमन्यं
देवताश्च वरदाश्च सतीषु ।

मुग्धधीर्धनलवस्पृहयालु-
स्तं नृशंसमहमाद्यमवैमि ॥

आनन्दवर्धनस्य.

526

यथा शरीरं किल जीवितेन
विनाकृतं काष्ठमिवावभाति ।
तथैव तज्जीवितमप्यवैमि
लोकोत्तरेण स्फुरितेन शून्यम् ॥

शङ्कुकस्य.

527

सन्तोपि सन्तः क्व किरन्तु तेजः
क्व नोज्ज्वलन्तु क्व नु न प्रथन्ताम् ।
विधाय रुद्धा ननु वेधसैव
ब्रह्माण्डकोशे घटदीपकल्पाः ॥

शिविरधर्मदत्तस्य.

528

कदर्थितस्यापि हि धैर्यवृत्ते-
र्न शक्यते सत्त्वगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्ने-
र्नाधः शिखा यान्ति कदाचिदेव ॥

529

जातश्च नाम न विनङ्क्ष्यति चेत्ययुक्त-
मुत्पाद एव नियमेन विनाशहेतुः ।
तुल्ये च नाम मरणव्यसनोपतापे
मृत्युर्वरं परहितावहिताशयस्य ॥

एतौ भदन्ताश्वघोषस्य.

530

इयत्यप्येतस्मिन्निरवधिमहत्यध्वनि गुणा-
स्त एवामी द्वित्रा जरठजरठा यान्ति गणनाम् ।

अहो ग्राम्यो लोकः स न परममीभिः कृतधृतिः
स्मयस्तब्धो यावत्कलयति समग्रं तृणमिदम् ॥

भदन्तारित्यदत्तस्य.

531

स्वचित्तपरिचिन्तयैव परितापमात्मन्यमी
न बिभ्रति मनस्विनो यदमुना न तावत्क्षतिः ।
अहर्निशमिहैव ये परमनोनुवृत्त्या पुन-
र्वहन्ति विजिगीषुतां किमिव तेनुकम्पास्पदम् ॥

532

विपुलहृदयैरन्यैः कैश्चिज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥

533

अभुक्तायां यस्यां क्षणमपि न यातं नृपशतै-
र्भुवस्तस्या लाभे क इव बहुमानः क्षितिभुजाम् ।
तदंशस्याप्यंशे तदवयवलेशेपि पतयो
विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥

एते भर्तृहरेः.

534

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशकलिलम् ।
प्रसन्ने त्वय्येव स्वयमुदितचिन्तामणिगुणे ।
विविक्तः संकल्पः किमभिलषितं पुष्यति न ते ॥

शङ्कुकस्य.

535

विनाप्यर्थैर्धीरः स्पृशति बहुमानोन्नतिपदं
परिष्वक्तोप्यर्थैः परिभवपदं याति कृपणः ।

स्वभावेनोद्भूतां गुणसमुदयावाप्तिविपुलां
द्युतिं सैंहीं न श्वा धृतकनकमालोपि लभते ॥

कस्यापि.

536

भुज्यन्ते स्वगृहस्थिता इव सुखं यस्यार्थिभिः संपदः
पट्वी यस्य मतिस्तमःप्रहतये द्वावेव तौ प्राणितः ।
यस्यात्मंभरिरुन्नतेपि विभवे हीनश्च विद्वत्तया
तस्यालेख्यमणेरिवाकृतिधृतः सत्ताप्यसत्ता ननु ॥

हरिभद्रस्य.

537

आधाराय धरावकाशविधयेप्याकाशमालोकने
भास्वानात्ममहत्त्वसाधनविधावन्ये गुणाः केचन ।
इत्यस्मिन्नुपकारकारिणि सदा वर्गे परं दुस्त्यजे
दैन्यव्रीडकलङ्कमुज्झतु कथं चेतो महाचेतसाम् ॥

भूमिधरस्य.

538

नित्यं या गुरुभृत्यबन्धुसुजनैर्न स्वेच्छया भुज्यते
पश्यन्ति स्पृहयालवो न रिपवो यां विक्रमासादिताम् ।
यस्याः साधुपरिक्षयेण सुहृदां नाशेन वा संभवो
नो संपद्विपदेव सा गुणवतां प्रीतिस्तथा कीदृशी ॥

539

न्याय्यं मार्गमनुज्झतः सुकृतिनो दैवाद्भवन्त्यापदो
यास्ताः सन्तु बलेरिवादिपुरुषायोर्वीं स्वयं यच्छतः ।
शक्रस्येव जुगुप्सितैः सुबहुभिर्निन्द्यैर्भृशं कर्मभि-
र्देवानामुपरि प्रभुत्वमपि मे मा भूत्त्रपाकारणम् ॥

कयोरपि.

540

शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।

इत्यप्रार्थितसर्वलभ्यविभवे दोषोयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥

श्रीहर्षस्य.

541

अल्पीयसामेव हि जन्मभूमे-
स्त्यागः प्रमादो विदुषां न सोस्ति ।
स्थानादपेता मणयो व्रजन्ति
राज्ञां शिरः काकमुखानि भेकाः ॥

542

शूराश्च कृतविद्याश्च रूपवत्यश्च योषितः ।
यत्र यत्र गमिष्यन्ति तत्र तत्र कृतालयाः ॥

कयोरपि.

543

रुद्रोद्रिं जलधिं हरिर्दिविषदो दूरं विहायः श्रिता
भोगीन्द्राः प्रबला अपि प्रथमतः पातालमूले स्थिताः ।
लीना पद्मवने सरोजनिलया मन्येर्थिसार्थाद्भिया
दीनोद्धारपरायणाः कलियुगे सत्पूरुषाः केवलम् ॥

544

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः सहस्रगुणितैरपि हन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥

अथान्यापदेशाः

तत्रादौ

सूर्येन्दुवर्णनम्.

545

प्रसरद्भिः करैर्यस्य विकसन्ति न सद्गुणाः ।
तस्य दोषाकरस्येयं कथं नित्यास्ति पूर्णता ॥

शङ्कुकस्य.

546

क्षीणः क्षीणः समीपत्वं पूर्णः पूर्णोतिदूरताम् ।
उपैति मित्राच्चन्द्रो युक्तं यन्मलिनः सदा ॥

547

कथं न लज्जितस्तादृक्सविता तेजसां निधिः ।
ब्रह्माण्डखण्डिकां प्राप्य कुर्वन्पादप्रसारिकाम् ॥

कयोरपि.

548

रवेरेवोदयः श्लाघ्यः कोन्येषामुदयग्रहः ।
न तमांसि न तेजांसि यस्मिन्नभ्युदिते सति ॥

549

किमनेन न पर्याप्तं कान्तत्वं शशलक्ष्मणा ।
सुसंतप्तापि नलिनी यद्विश्वासमुपागमत् ॥

550

करान्प्रसार्य रविणा दक्षिणाशावलम्बिना ।
न केवलमनेनात्मा दिवसोपि लघूकृतः ॥

551

वर्तते येन पातङ्गिः षण्मासान्द्वौ च वत्सरौ ।
राशिः स एव चन्द्रस्य न याति दिवसत्रयम् ॥

एते भट्टनारायणस्य.

552

शिरसा धार्यमाणोपि सोमः सोमेन शंभुना ।
तथापि कृशतां धत्ते कष्टः खलु पराभवः ॥

कस्यापि.

553

कथं स दन्तरहितः सूर्यः सूरिभिरुच्यते ।
यो मीनराशिं भुक्त्वैव मेषं भोक्तुं समुद्यतः ॥

प° पाजकस्य.

तवानुमार्गं व्रजतो भवान्तरे
शठैर्धनैः पञ्चपदी न पूरिता ॥

490

अहो धनानां महती विदग्धता
सुखोषितानां कृपणस्य वेश्मनि ।
व्रजन्ति न त्यागदशां न भोग्यतां
परां च कांचित्प्रथयन्ति निर्वृतिम् ॥

केषामपि.

491

न शान्तान्तस्तृष्णा धनलवणवारिव्यतिकरैः
क्षतच्छायः कायश्चिरविरसरूक्षाशनतया ।
अनिद्रा मन्दाग्निर्नृपसलिलचौरानलभया-
त्कदर्याणां कष्टं स्फुटमधनकष्टादपि परम् ॥

क्षेमेन्द्रस्य.

492

एकैकातिशयालवः परगुणज्ञानैकवैज्ञानिकाः
सन्त्येते धनिकाः कलासु सकलास्वाचार्यचर्याचणाः ।
अप्येते सुमनोगिरां निशमनाद्बिभ्यत्यहो श्लाघया
धूते मूर्धनि कुण्डले कषणतः क्षीणे भवेतामिति ॥

493

प्रीतिं न प्रकटीकरोति सुहृदि द्रव्यव्ययाशङ्कया
भीतः प्रत्युपकारकारणभयान्नाकृष्यते सेवया ।
मिथ्या जल्पति वित्तमार्गणभयात्स्तुत्यापि न प्रीयते
कीनाशो विभवव्ययव्यतिकरत्रस्तः कथं प्राणिति ॥

भट्टबाणस्य.

494

मत्वा सारं गुणानां शिरसि यदि शशी स्थापितो दैवयोगा-
दीशेन क्षीणबिम्बः सकलमुपनयं किं न नीतः क्षणेन ।

मिथ्यैवं ख्यापयन्तो गुणिनि सरलतां लोकभक्त्यर्थमुच्चै-
राढ्याः कुर्वन्ति वित्तव्ययचकितधियो मानमर्थेन शून्यम् ॥

कस्यापि.

अथोदाराः

495

ब्रह्माण्डमण्डलीमात्रं किं लोभाय मनस्विनः ।
शफरीस्फुरितैर्नाब्धेः क्षुब्धता जातु जायते ॥

भर्तृहरेः.

496

नाल्पीयसि निबध्नन्ति पदमुन्नामचेतसः ।
येषां भुवनलाभेपि निःसीमानो मनोरथाः ॥

497

पुंसामुन्नतचित्तानां सुखावहमिदं द्वयम् ।
सर्वसङ्गनिवृत्तिर्वा विभूतिर्वा सुविस्तरा ॥

एतौ कयोरपि.

498

अयं बन्धुः परो वेति गणना लघुचेतसाम् ।
पुंसामुदारचित्तानां वसुधैव कुटुम्बकम् ॥

भट्टोद्भटस्य.

499

जरामरणदौर्गत्यव्याधयस्तावदासताम् ।
जन्मैव किं न धीरस्य भूयो भूयस्त्रपाकरम् ॥

500

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥

501

अपि नाम स दृश्येत पुरुषातिशयो भुवि ।
गर्वोच्छूनमुखा येन धनिनो नावलोकिताः ॥

502

पृथ्वी पृथ्वी गुणा मान्याः सन्ति भूपा विवेकिनः ।
पराभवापदं यान्ति कस्मादुन्नतबुद्धयः ॥

503

अदृष्टमुखभङ्गस्य युक्तमन्धस्य याचितुम् ।
अहो बत महत्कष्टं चक्षुष्मानपि याचते ॥

एते केषामपि.

504

दारिद्र्यानलसंतापः शान्तः संतोषवारिणा ।
याचकाशाविघातान्तर्दाहं को नाम पद्दयतु ॥

भट्टप्रद्युम्नस्य.

505

परिपूर्णगुणाभोगगरिमोद्गार एव सः ।
त्रिजगत्स्पृहणीयेऽस्मिन्न रुचिर्द्रविणेऽपि यत् ॥

धर्मदत्तस्य.

506

विद्ययैव मदो येषां कार्पण्यं च धने सति ।
तेषां दैवाभिशप्तानां सलिलादग्निरुत्थितः ॥

507

किं तया क्रियते लक्ष्म्या या वधूरिव केवला ।
या न वेश्येव सामान्या पथिकैरपि भुज्यते ॥

विक्रमादित्यस्य.

508

त्यागो गुणो वित्तवतां वित्तं त्यागवतां गुणः ।
परस्परवियुक्तौ तु वित्तत्यागौ विडम्बना ॥

509

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥

510
नृणां धुरि स एवैको यः कश्चित्त्यागपाणिना ।
निर्मार्ष्टि प्रार्थनापांसुधूसरं मुखमर्थिनाम् ॥

511
आकारमात्रविज्ञानसंपादितमनोरथाः ।
धन्यास्ते ये न शृण्वन्ति दीनाः प्रणयिनां गिरः ॥

512
बुद्धिर्या सत्त्वरहिता स्त्रीत्वं तत्केवलं मतम् ।
सत्त्वं चानयसंपन्नं तत्पशुत्वं न पौरुषम् ॥

कयोरपि.

513
कामं प्रियानपि प्राणान्विमुञ्चन्ति मनस्विनः ।
इच्छन्ति न त्वमित्रेभ्यो महतीमपि सत्क्रियाम् ॥

भल्लटस्य. भक्षोः.

514
अत्यद्भुतमिमं मन्ये स्वभावममनस्विनः ।
यदुपक्रियमाणोपि प्रीयते न विलीयते ॥

आरराज्ञानकस्य.

515
प्रत्युपकुर्वन्पूर्वं कृतोपकारमपि लज्जयति चेतः ।
यस्तु विहितोपकारादुपकारः सोधिको मृत्योः ॥

516
प्रत्युपकुर्वन्बह्वपि न भवति पूर्वोपकारिणा तुल्यः ।
एकोनुकरोति कृतं निष्कारणमेव कुरुतेन्यः ॥

517
जीवञ्जीवयति हि यो ज्ञातिजनं परिजनं च सुहृदश्च ।
तस्य सफला गृहश्रीर्धिगनुपजीव्यां धनसमृद्धिम् ॥

518
यच्छञ्जलमपि जलदो वल्लभतामेति सर्वलोकस्य ।
नित्यं प्रसारितकरः सवितापि भवत्यचक्षुष्यः ॥

519

नाप्तं यत्केनचिदपि मनोरथा अपि यतो निवर्तन्ते ।
तद्यदि न लभ्यतेन्यन्मनस्विनः किमभिमानफलम् ॥

520

घटनं विघटनमथवा कार्याणां भवति विधिनियोगेन ।
उचितेनुचिते कर्मणि वृत्तिनिवृत्ती ममायत्ते ॥

521

कल्पस्थायि न जीवितमैश्वर्यं नाप्यते च यदभिमतम् ।
लोकस्तथाप्यकार्यं कुरुते कार्यं किमुद्दिश्य ॥

एते केषामपि.

522

धनबाहुल्यमहेतुः कोपि निसर्गेण मुक्तकरः ।
प्रावृषि कस्याम्बुमुचः संपत्तिः किमधिकाम्बुनिधेः ॥

प्रकाशवर्षस्य.

523

उत्पादिता स्वयमियं यदि तत्तनूजा
तातेन वा यदि तदा भगिनी खलु श्रीः ।
यद्यन्यसंगमवती च तदा परस्त्री
तत्त्यागबद्धमनसः सुधियो भवन्ति ॥

भर्तृहरेः.

524

द्रविणार्जनजः परिश्रमः
फलितोप्यस्य जनस्य नीरसः ।
द्रविणार्जनमात्मतुष्टये
परमावर्जयितुं गुणार्जनम् ॥

ज्यौतिषिकभट्टभास्करस्य.

525

यः प्रशंसति नरो नरमन्यं
देवताश्च वरदाश्च सतीषु ।

मुग्धधीर्धनलवस्पृहयालु-
स्तं नृशंसमहमाद्यमवैमि ॥

आनन्दवर्धनस्य.

526

यथा शरीरं किल जीवितेन
विनाकृतं काष्ठमिवावभाति ।
तथैव तज्जीवितमप्यवैमि
लोकोत्तरेण स्फुरितेन शून्यम् ॥

शङ्कुकस्य.

527

सन्तोपि सन्तः क्क किरन्तु तेजः
क्क नोज्ज्वलन्तु क्क नु न प्रथन्ताम् ।
विधाय रुद्धा ननु वेधसैव
ब्रह्माण्डकोशे घटदीपकल्पाः ॥

शिविरधर्मदत्तस्य.

528

कदर्थितस्यापि हि धैर्यवृत्ते-
र्न शक्यते सत्त्वगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्ने-
र्नाधः शिखा यान्ति कदाचिदेव ॥

529

जातश्च नाम न विनङ्क्ष्यति चेत्ययुक्त-
मुत्पाद एव नियमेन विनाशहेतुः ।
तुल्ये च नाम मरणव्यसनोपतापे
मृत्युर्वरं परहितावहिताशयस्य ॥

एतौ भदन्ताश्वघोषस्य.

530

इयत्यप्येतस्मिन्निरवधिमहत्यध्वनि गुणा-
स्त एवामी छिन्ना जरठजरठा यान्ति गणनाम् ।

अहो ग्राम्यो लोकः स न परममीभिः कृतधृतिः
स्मयस्तब्धो यावत्कलयति समग्रं तृणमिदम् ॥

भदन्तादित्यदत्तस्य.

531

स्वचित्तपरिचिन्तयैव परितापमात्मन्यमी
न बिभ्रति मनस्विनो यदमुना न तावत्क्षतिः ।
अहर्निशमिहैव ये परमनोनुवृत्त्या पुन-
र्वहन्ति विजिगीषुतां किमिव तेनुकम्पास्पदम् ॥

532

विपुलहृदयैरन्यैः कैश्चिज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥

533

अभुक्तायां यस्यां क्षणमपि न यातं नृपशतै-
र्भुवस्तस्या लाभे क इव बहुमानः क्षितिभुजाम् ।
तदंशस्याप्यंशे तदवयवलेशेपि पतयो
विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥

एते भर्तृहरेः.

534

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशकलिलम् ।
प्रसन्ने त्वय्येव स्वयमुदितचिन्तामणिगुणे ।
विविक्तः संकल्पः किमभिलषितं पुष्यति न ते ॥

शङ्कुकस्य.

535

विनाप्यर्थैर्धीरः स्पृशति बहुमानोन्नतिपदं
परिष्वक्तोप्यर्थैः परिभवपदं याति कृपणः ।

स्वभावेनोद्भूतां गुणसमुदयावाप्तिविपुलां
द्युतिं सैंहीं न श्वा धृतकनकमालोपि लभते ॥

कस्यापि.

536

भुज्यन्ते स्वगृहस्थिता इव सुखं यस्यार्थिभिः संपदः
पद्वी यस्य मतिस्तमःप्रहतये द्वावेव तौ प्राणितः ।
यस्त्वात्मंभरिरुन्नतेपि विभवे हीनश्च विद्वत्तया
तस्यालेख्यमणेरिवाकृतिधृतः सत्ताप्यसत्ता ननु ॥

हरिभट्टस्य.

537

आधाराय धरावकाशविधयेप्याकाशमालोकने
भास्वानात्ममहत्त्वसाधनविधावन्ये गुणाः केचन ।
इत्यस्मिन्नुपकारकारिणि सदा वर्गे परं दुस्त्यजे
दैन्यव्रीडकलङ्कमुज्झतु कथं चेतो महाचेतसाम् ॥

भूमिधरस्य.

538

नित्यं या गुरुभृत्यबन्धुसुजनैर्न स्वेच्छया भुज्यते
पश्यन्ति स्पृहयालवो न रिपवो यां विक्रमासादिताम् ।
यस्याः साधुपरिक्षयेण सुहृदां नाशेन वा संभवो
नो संपद्विपदेव सा गुणवतां प्रीतिस्तथा कीदृशी ॥

539

न्याय्यं मार्गमनुज्झतः सुकृतिनो दैवाद्भवन्त्यापदो
यास्ताः सन्तु बलेरिवादिपुरुषायोर्वीं स्वयं यच्छतः ।
शक्रस्येव जुगुप्सितैः सुबहुभिर्निन्द्यैर्भृशं कर्मभि-
र्देवानामुपरि प्रभुत्वमपि मे मा भूत्त्रपाकारणम् ॥

कवेरपि.

540

शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।

इत्यप्रार्थितसर्वलभ्यविभवे दोषोयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥
श्रीहर्षस्य.

541

अल्पीयसामेव हि जन्मभूमे-
स्त्यागः प्रमादो विदुषां न सोस्ति ।
स्थानादपेता मणयो व्रजन्ति
राज्ञां शिरः काकमुखानि भेकाः ॥

542

शूराश्च कृतविद्याश्च रूपवत्यश्च योषितः ।
यत्र यत्र गमिष्यन्ति तत्र तत्र कृतालयाः ॥
कयोरपि.

543

रुद्रोद्रिं जलधिं हरिर्दिविषदो दूरं विहायः श्रिता
भोगीन्द्राः प्रबला अपि प्रथमतः पातालमूले स्थिताः ।
लीना पद्मवने सरोजनिलया मन्येर्थिसार्थाद्भिया
दीनोद्धारपरायणाः कलियुगे सत्पूरुषाः केवलम् ॥

544

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः सहस्रगुणितैरपि हन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥

अथान्यापदेशाः

तत्रादौ

सूर्येन्दुवर्णनम्.

545

प्रसरद्भिः करैर्यस्य विकसन्ति न सद्गुणाः ।
तस्य दोषाकरस्येयं कथं नित्यास्ति पूर्णता ॥
शङ्कुकस्य.

546

क्षीणः क्षीणः समीपत्वं पूर्णः पूर्णोतिदूरताम् ।
उपैति मित्राद्यच्चन्द्रो युक्तं यन्मलिनः सदा ॥

547

कथं न लज्जितस्तादृक्सविता तेजसां निधिः ।
ब्रह्माण्डखण्डिकां प्राप्य कुर्वन्पादप्रसारिकाम् ॥

कयोरपि.

548

रवेरेवोदयः श्लाघ्यः कोन्येषामुदयग्रहः ।
न तमांसि न तेजांसि यस्मिन्नभ्युदिते सति ॥

549

किमनेन न पर्याप्तं कान्तत्वं शशलक्ष्मणा ।
सुसंतप्तापि नलिनी यद्विश्वासमुपागमत् ॥

550

करान्प्रसार्य रविणा दक्षिणाशावलम्बिना ।
न केवलमनेनात्मा दिवसोपि लघूकृतः ॥

551

वर्तते येन पातङ्गिः षण्मासान्द्वौ च वत्सरौ ।
राशिः स एव चन्द्रस्य न याति दिवसत्रयम् ॥

एते भट्टनारायणस्य.

552

शिरसा धार्यमाणोपि सोमः सोमेन शंभुना ।
तथापि कृशतां धत्ते कष्टः खलु पराश्रयः ॥

कस्यापि.

553

कथं स दन्तरहितः सूर्यः सूरिभिरुच्यते ।
यो मीनराशिं भुक्त्वैव मेषं भोक्तुं समुद्यतः ॥

प° पाजकस्य.

554

पततु वारिणि यातु दिगन्तरं
विशतु वह्निमथो व्रजतु क्षितिम् ।
रविरसावियतास्य गुणेषु का
सकललोकचमत्कृतिषु क्षतिः ॥

भट्टभल्लटस्य.

555

तत्तावदेव शशिनः स्फुरितं महीयो
यावन्न तीक्ष्णरुचिमण्डलमभ्युपैति ।
अभ्युद्यते सकलधामनिधौ च तस्मि-
न्निन्दोः सिताभ्रशकलस्य च को विशेषः ॥

प्रकाशवर्षस्य.

556

सद्वृत्तयः सदसदर्थविवेकिनो ये
ते पश्य कीदृशममुं समुदाहरन्ति ।
चौरासतीप्रभृतयो ब्रुवते यदस्य
तद्गृह्यते यदि कृतं तदहस्करेण ॥

भट्टभल्लटस्य.

557

एकैव सामृतमयी सुतरामनर्घा
काप्यस्त्यसौ शशधरस्य कला यथैव ।
आरोपितो गुणविदा परमेश्वरेण
चूडामणौ न गणितोस्य कलङ्कदोषः ॥

कस्यापि

558

उद्यन्त्यमूनि सुबहूनि महामहांसि
चन्द्रोप्यलं भुवनमण्डलमण्डनाय ।
सूर्यावृते न तदुदेति न चास्तमेति
येनोदितेन दिनमस्तमितेन रात्रिः ॥

559

लोकानन्दाद्विरमति न यः क्षीयमाणोपि भूयः
स्वःस्थे तस्मिन्किल दिनमुखं नूतनं नाभविष्यत् ।
दैवं कीदृक्कथमपि यथा भर्तुमात्मानमेव
व्यग्रः कालं गमयति सखे सोप्ययं पश्य चन्द्रः ॥

एतौ आनन्दवर्धनस्य.

560

क्षीणश्चन्द्रो विशति तरणेर्मण्डलं मासि मासि
लब्ध्वा कांचित्पुनरपि कलां दूरदूरानुवर्ती ।
संपूर्णश्चेत्कथमपि तथा स्पर्धयोदेति भानो-
र्नो दौर्जन्याद्विरमति जडो नापि दैन्याद्व्यरंसीत् ॥

धाराधरस्य.

561

पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षपिततमसा मध्यमं धाम विष्णोः ।
सोयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै-
र्दूरारोहो भवति महतामप्युपभ्रंशनिष्ठः ॥

कालिदासस्य.

562

क्व तत्तेजस्तादृग्ज्वलनमहसो नाशपिशुनं
पराभूतिः क्वासौ विसदृशतराद्राहुशिरसः
विधेर्योगादेतत्समुचितमिदं तु व्यथयति
त्रपाहीनो मित्रात्तदपि गगने यद्विहरति ॥

कलशकस्य.

563

प्रातः पूष्णो भवति महते नोपतापाय यस्मा-
त्कालेनास्तं क इव न गता यान्ति यास्यन्ति चान्ये ।
एतावत्तु व्यथयति यदालोकबाह्यैस्तमोभि-
स्तस्मिन्नेव प्रकृतिमहति व्योम्नि लब्धोवकाशः ॥

भट्टभल्लटस्य.

564

आ सर्गात्प्रतिवासरं रसशतैर्या बोधिता पोषिता
कल्पान्तावसरेऽथ सैव पृथिवी स्वैरेव दग्धा करैः ।
कृत्वेत्थं किमपि स्वकर्म नियतेः पूर्वापरोपप्लुतं
कष्टं सोऽपि दिनान्तवीतकिरणस्तिग्मांशुरस्तं गतः ॥

भवानीनन्दनस्य.

565

येनोन्मथ्य तमांसि मांसलघनस्पर्धीनि सर्वं जग-
च्चक्षुष्मत्परमार्थतः कृतमिदं देवेन तिग्मत्विषा ।
तस्मिन्नस्तमिते विवस्वति कियान्क्रूरो जनो दुर्जनो
यद्बध्नाति धृतिं शशाङ्कशकलालोकेऽथ दीपेऽथवा ॥

कस्यापि.

566

शोच्यस्तावदुमापतिः प्रभुतया यो मूर्ध्नि गङ्गोक्षिते
सच्छिद्रं नृशिरःकपालममलं चन्द्रं च धत्ते समम् ।
चन्द्रः शोच्यतरस्ततः परिभवेऽप्येवंविधे यः सति
ज्योत्स्नाहासविकासपाण्डुरवपुर्मुख्यां मुदं पुष्यति ॥

567

पूर्णं वीचिभुजैः स्ववृद्धिरभसादिन्दुं समालिङ्गति
क्षीणं दूरत एव मुञ्चति पिता भूत्वा जलानां निधिः ।
प्रक्षीणस्य तु येन तस्य वसुना कृत्वा क्रमेणोदयं
पूर्णत्वे च दवीयसि स्थितमहो मित्राय तस्मै नमः ॥

568

ध्वान्तेन प्रथितैर्महक्षितिपतेर्देवस्य दूरस्थितैः
सच्चक्रप्रमदावहाभ्युदितता कैर्नाम नाकाङ्क्षिता ।
एतेनाभ्युदितेन संप्रति पुनः कष्टं तथा चेष्टितं
लोकस्तीक्ष्णकरोऽयमित्यभिमुखं नैनं यथा प्रेक्षते ॥

569.

दृष्टैव यं करसहस्रहतान्धकारं
भीत्यापयान्त्यनुदिनं शतशः पिशाचाः ।
क्षीणे विधौ हरिविलूनकरोति चित्रं
गृह्णाति तं द्युमणिमभ्रपिशाच एकः ॥

570

तमोग्रस्तं जगत्सर्वं त्रातुं भानुः सदोद्यतः ।
तं तु त्रातुं तमोग्रस्तं जगत्येकोपि न क्षमः ॥

571

रात्रौ गुणनिधेः पद्मात्कुमुदं यदनक्षरम्
प्राप्ता लक्ष्मीः स महिमा राज्ञो जडनिधेर्ध्रुवम् ॥

572

आभाति चन्द्ररहिता न कदापि रात्रि-
श्चन्द्रोपि रात्रिरहितो गतकान्तिरेव ।
किं कारणं यदनयोः प्रतिमासमेको
जातो निरन्तरतया परिरम्भयोगः ॥

573

गगनशयनलीनां रात्रिमुत्सृज्य चन्द्रो
व्रजति धवलपक्षे कृष्णपक्षे तु रात्रिः ।
अपसरति यदीन्दोर्व्योमतल्पे प्रसुप्ता-
त्त्रुटति तदनयोः किं तावता दम्पतित्वम् ॥

574

आशाः प्रकाशयति यस्तिमिराणि भङ्क्त्वा
बोधं दृशां दिशति भूरिगुणेष्वभीष्टः ।
खेदाय यस्य न परोपकृतिष्वटाट्या
धीमान्नमस्यति न कस्तमिनं प्रशस्यम् ॥

द्युतिधरस्य.

575

विचारस्तथ्यो वा भवतु वितथो वा किमपरं
तथाप्युच्चैर्धाम्नो भवति बहुजल्पो जनरवः ।
तुलोत्तीर्णस्यापि प्रथितमहिमध्वस्ततमसो
रवेस्तादृक्तेजो न भवति हि कन्यां गत इति ॥

576

उडुगणपरिवारो नायकोप्योषधीना-
ममृतमयशरीरः कान्तियुक्तोपि चन्द्रः ।
भवति विगतरश्मिर्मण्डलं प्राप्य भानोः
परसदननिविष्टः को लघुत्वं न याति ॥

कस्यापि.

577

उच्चैः सत्फलदो यथायमहमप्येतादृगेतावता
स्पर्धी मन्द मदोद्धतः स्वजनकेनार्केण मा मा कृथाः ।
दूरादेव भवादृशोस्य महसा ध्वस्ताः समस्ताः स्वयं
नैवेच्छत्ययमत्ययं गुणिसखः कस्यापि तेजोनिधिः ॥

प॰ श्रीवकस्य.

578

तुल्या सुखस्थितिरमुष्य ममेति राशि
स्पर्धी निजेपि जनके जनकेलिहेतौ ।
मा राजनन्दन कृथाः स हि सर्वलोक-
ध्वान्तान्तकारिशिहस्तपवित्रितात्मा ॥

आराध्यकर्पूरस्य.

579

मात्सर्येण जहद्गुहान्विसदृशी धूमध्वजे योग्यतां
ज्ञात्वा स्वां विदधत्स्विषं दिनपतिर्हास्यप्रशान्त्युन्मुखः ।
दैवं वेत्ति न यः शिखी स परतो नामास्तु तत्संभवाः
स्युर्दीपा अपि यद्दशेन जगतां तिग्मांशुविस्मारकाः ॥

कह्लणस्य.

580

पद्मा ये मदनुव्रता दधति ते क्लान्ति तुषाराहता
येप्येते दिवसा मदेकशरणाः कार्श्यं परं यान्ति ते ।
गच्छन्नित्थमसौ समाश्रितजनप्रीत्येव दूरां दिशं
हेमन्ते भगवानहर्पतिरहो लोके गतः सेव्यताम् ॥

अथ प्राणिनः

तत्र सिंहाः

581

नाभिषेको न संस्कारः सिंहस्य क्रियते वने ।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥

582

एकोहमसहायोहं कृशोहमपरिच्छदः ।
स्वप्नेप्येवंविधा चिन्ता मृगेन्द्रस्य न जायते ॥

कयोरपि.

583

मत्तेभकुम्भनिर्भेदकठोरनखराशनिः ।
मृगारिरिति नाम्नैव लघुत्वं याति केसरी ॥

584

पतन्ति नैव मातङ्गकुम्भपाटनलम्पटाः ।
वल्गत्स्वपि कुरङ्गेषु मृगारेर्नखराः खराः ॥

एतौ चीआकस्य.

585

किं कुर्मः क उपालभ्यो यत्रेदमसमञ्जसम् ।
काकिण्यपि न सिंहस्य मूल्यं कोटिस्तु दन्तिनः ।

श्रीमुक्तापीडस्य.

586

लीलादलितधृष्टेभकुम्भपीठस्य निर्भयैः ।
कथं केसरिणः क्रान्तं सुप्तस्यापि मृगैः पदम् ॥

पुण्यस्य.

587

मत्तेभकुम्भनिर्भेदरुधिरारुणपाणिना ।
हरिणा हरिणः स्पर्धां वराकः कुरुते कथम् ॥

588

तावद्गर्जति मातङ्गो वने मदभरालसः ।
शिरोविलग्नलाङ्गूलो यावन्नायाति केसरी ॥

589

शौर्यदर्पबलाध्मातभ्रसद्गण्डान्तशोभिनः ।
सटामुत्पाट्य सिंहस्य किं नराः सुखमासते ॥

590

कोपादेकतलाघातनिपतन्मत्तदन्तिनः ।
हरेर्हरिणयुद्धेस्य कियान्व्याक्षेपविस्तरः ॥

591

यावदस्थिषु संलग्नाः कराः केसरिणः क्षणम् ।
यूथस्य प्राणितं तावत्तदरण्यनिवासिनः ॥

592

सगर्वगर्जेद्गजगण्डमण्डली-
विखण्डनोड्डामरविक्रमक्रमः ।
अनन्तविभ्रान्तकुरङ्गसंगर-
प्रसङ्गमङ्गीकुरुते कथं हरिः ॥

एते केषामपि.

593

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥

श्रीवज्रायुधस्य.

594

एकाकिनि वनवासिन्यराजलक्ष्मण्यनीतिशास्त्रज्ञे ।
सत्त्वोच्छ्रिते मृगपतौ राजेति गिरः परिणमन्ति ॥

595

सिंहः करोति विक्रममलिझांकाराङ्किते करे करिणः ।
न पुनर्नखमुखविलिखितभूधरकुहरस्थिते नकुले ॥

596

समदकरिकुम्भदारणमदपङ्कच्छुरितकेसरसटस्य ।
सिंहस्य क इव वक्रे करतलमाधातुमुत्सहते ॥

केषामपि.

597

निष्प्रयहेषु करिपोतशतेषु मोहा-
द्धल्मत्सु बालिशतया पुरतोप्यटत्सु ।
मत्तेभकुम्भदलनोचितचित्तवृत्तेः
सिंहस्य लोचननिमीलनमेव युक्तम् ॥

चीभाकरस्य.

598

दृष्ट्वैव रोषवशघूर्णितकेसरांस-
मायान्तमन्तकसमं पुरतो मृगारिम् ।
मांसं चिखादिषुभिरेत्य पतत्रिपूगै-
र्भ्रान्तं मदान्धगजयूथपमस्तकेषु ॥

ललितानुरागस्य.

599

यः केसरी खरनखक्रकचोग्रपाणि-
निर्दारितेभवरकुम्भसमुद्भवेन ।
नव्येन शोणितचयेन निरस्ततृष्णो
नित्यं बभूव धिगहोद्य तृणेन सोर्थी ॥

600

विस्रं वपुः परवधप्रवणा च बुद्धि-
स्तिर्यक्तयैव कथितः सदसद्विवेकः ।
इत्थं न किंचिदपि साधु मृगाधिपस्य
तेजस्तु तत्स्फुरति येन जगद्वराकम् ॥

601

सिंहोस्तु शत्रुरथवाधिपतिर्मृगाणां
शंसास्पदं तदपि न द्वयमेव मन्ये ।
तस्य स्फुरत्करजवज्रशिरोभिघात-
हेलानिपातितमतङ्गजजङ्गमाद्रेः ॥

एते केषामपि.

602

प्रेङ्खन्मयूखनखपातशिखानिखात-
विख्यातवारणगणस्य हरेर्गुहायाम् ।
क्रोष्टा निकृष्टसरमाप्लुतदृष्टिनष्ट-
धाष्टर्यो निविष्ट इति कष्टमिहाद्य दृष्टम् ॥

उपाध्यायधनवर्मणः.

603

मत्तेभकुम्भदलनाकुललोलवल्ग-
दन्तः क्वणत्करजवज्रशिखाभिघातः ।
किं केसरी जगति माननिधिस्तृणेन
प्राणात्ययेपि कुरुते स्वशरीरयात्राम् ॥

भट्टवासुदेवस्य.

604

विश्वस्य स्थितये धनुर्धरतया गर्जन्तमुच्चैः पदे
मेघं दन्तिमदान्तदुर्ललितधीर्मा सिंह लालङ्घिषीः ।
अस्माद्वज्रविदारितक्षितिभृतो मा पाति वर्षोपलै-
र्झम्पालम्पटभावभाविपतनाच्चिन्त्योङ्गभङ्गः स्वयम् ॥

श्रीराजानकजोनराजस्य.

605

खरनखरनिखातोत्तुङ्गमातङ्गकुम्भ-
स्थलविगलितमुक्तालंकृतक्ष्मातलस्य ।
हरति हरिणवृन्दं किं हरेर्वैरमाजौ
मिलितमपि समन्तादेककार्येण कृत्स्नम् ॥

कस्यापि.

606

अनुकृतगण्डशैलमदमण्डितगण्डतट-
भ्रमदलिमण्डलीनिविडगुंगुमघोषजुषः ।
दलयति हेलयैव हरिरुमकरान्करिण-
स्त्रिजगति तेज एव गुरु नो विकृताकृतिता ॥

भट्टवासुदेवस्य.

607

शैलश्रेणिगुहागृहेषु निवसञ्जीवन्निजाडम्बरै-
रव्याजोर्जितविक्रमो मृगपतिर्वीरेन्द्र मा कुप्यताम् ।
अस्मात्कुञ्जरकुम्भसंभववसापानैकहेवाकिनो
यल्लब्धं व्यसनाकुलेन मनसा स्वेनैव तच्चिन्त्यताम् ॥

प० मल्लुकस्य.

608

कश्मीरान्गतुकामस्य मीरशाहाख्यभूपतेः ।
शाहाबुद्दीनभूमीन्द्रः प्राहिणोदिति लेखकम् ॥

609

किमेवमविशङ्कितः शिशुकुरङ्ग लोलक्रमं
परिक्रमितुमीहसे विरम नैव शून्यं वनम् ।
स्थितोत्र गजयूथनाथमथनोच्छलच्छोणित-
च्छटापटलभासुरोत्कटसटाभरः केसरी ॥

भा° अमृतदत्तस्य.

610

कठोरनखराहतद्विरदकुम्भपीठस्थली-
लुठद्रुधिररञ्जितोल्लसितकेसरः केसरी ।
गभीररवकातरातुरतरातुरव्याहतैः
पतन्हरिणकैः समं समरभूमिकां लज्जते ॥

611

चरत वृषभा जालीमांसं यथेच्छमभीरवः
पिबत नलिनीकच्छेष्वच्छं पुनर्महिषाः पयः ।

वहत करिणो भूयः शोभां मदेन कपोलयो-
रसहनतया दूरीभूतो विधेर्बत केसरी ॥

612

लब्धा डम्बरमम्बरे जलधरं गर्जन्तमालोक्य य-
द्दूरादुच्छलितोसि सिंह महतां तेनैव खिन्नं मनः ।
यत्त्रासारभयेन संप्रति दरीसांमुख्यमालम्बसे
तद्दृष्ट्वैव वयं ह्रिया किमपरं पातालमूलं गताः ॥

केषामपि.

613

यस्यानेकमदान्धवारणघटाकुम्भस्थलीभेदन-
व्यापारैकविनोददुर्ललितया कालोगमल्लीलया ।
उद्गर्जज्जलभारवामनघनस्पर्धी स एवाधुना
सिंहः पञ्जरपातपुञ्जिततनुर्धत्ते दशामीदृशीम् ॥

614

क्षुत्क्षामोपि जराकृशोपि शिथिलप्राणोपि कष्टां दशा-
मापन्नोपि विपन्नधीधृतिरपि प्राणेषु नश्यत्स्वपि ।
दर्पाध्मातकरीन्द्रकुम्भदलनप्रेङ्खन्नखामाशनिः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥

एतौ रतिसेनस्य.

615

नास्योच्छ्रायवती तनुर्न दशनौ नो दीर्घदीर्घः करः
सत्यं वारण नैष केसरिशिशुस्त्वाडम्बरैः स्पर्धते ।
तेजोबीजमसह्यमस्य हृदये न्यस्तं पुरा वेधसा
तादृक्तादृशमेव येन सुतरां भोज्यं पशुं मन्यते ॥

आनन्दवर्धनस्य.

616

माद्यन्मातङ्गकुम्भस्थलबहलवसावासनाविस्रगन्ध-
व्यासङ्गव्यक्तमुक्ताफलशकललसत्केसरालीकरालः ।

व्याधीवैधव्यवेधाः स्वभुजबलमदग्रस्ततेजस्विधामा
विभ्यत्सारङ्गसार्थः सततमसहनः केसरी केन दृष्टः ॥

617

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः ।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते ॥

618

आ बाल्यादपि यो विदारितमदोन्मत्तेभकुम्भस्थली-
स्थालीमध्यकवोष्णरक्तरसवन्मुक्तापुलाकप्रियः ।
हस्तस्तस्य कथं प्रसर्पतु पुरः कृच्छ्रेप्यवस्थान्तरे
गर्तावर्तविवर्तमानशशकप्राणापहारे हरेः ॥

619

रक्ताक्तयन्नखरकोटिनिभादिभानां
यूथाः पलाशवनतोपि पलाय्य जग्मुः ।
सिंहस्य तस्य जरतो विषमा दशा य-
द्रोमायवैरवयवैरपि नास्ति वृत्तिः ॥

620

पर्जन्यं प्रति गर्जतः प्रतिनिधीन्विन्ध्यस्य वातोद्धता-
नम्भोधीनिव धावतः सरभसं हत्वा रणे वारणान् ।
वृक्षाद्वृक्षमुपेयुषोल्पवपुषः शाखामृगस्योपरि
क्रुद्धः सोपि भवानहो बत गतः पञ्चास्य हास्यां दशाम् ॥

जह्लणस्य.

621

हुंकारैः स्तनितानुकारचतुरैर्न्यक्कारमाकारित-
क्षौणीभृच्छिखरश्रियो गजघटा नीत्वा मदाटोपिनीः ।
सिंहः संहतभावतो दशदिशः क्लिश्यत्सु दुर्वाशितै-
र्गोमायुष्वपि विश्वविश्वविदितप्रौढिः किमुद्यच्छते ॥

रा° जोनराजस्य.

अथ गजाः

622

करिकलभ विमुञ्च लोलतां
चर विनयव्रतमानताननः ।
मृगपतिनखकोटिभङ्गुरो
गुरुरुपरि क्षमते न तेङ्कुशः ॥

बाणभट्टस्य.

623

केलिं कुरुष्व परिभुङ्क्ष्व सरोरुहाणि
गाहस्व शैलतटनिर्झरिणीपयांसि ।
भावानुरक्तकरिणीकरलालिताङ्ग
मातङ्ग मुञ्च मृगराजरणाभिलाषम् ॥

आनन्दवर्धनस्य.

624

उच्छृङ्खलेन निरपेक्षतयोन्मदेन
येनाकुलीकृतमिदं करिणा बभूव ।
दत्त्वा पदं शिरसि हस्तिपकार्भकेण
मन्दः कथं गमित एष वशं प्रसह्य ॥

प्रकाशवर्षस्य.

625

विन्ध्याद्रिसानुतरुपुष्पपतत्पराग-
संपुञ्जपूजितकरः करियूथसेव्यः ।
योभूत्स एव नृनिदेशकरः करीन्द्रो
जातः कथं किमथवा प्रभुरत्र कालः ॥

श्रुतधरस्य.

626

अन्तःसमुत्थविरहानलतीव्रताप-
संतापिताङ्ग करिपुङ्गव मुञ्च शोकम् ।

धात्रा स्वहस्तलिखितानि ललाटपट्टे
को वाक्षराणि परिमार्जयितुं समर्थः ॥

कस्यापि.

627

भो भोः करीन्द्र दिवसानि कियन्ति ताव-
दस्मिन्मरौ समतिवाहय कुत्रचित्त्वम् ।
रेवाजलैर्निजकरेणुकरप्रयुक्तै-
र्भूयः शर्म गमयितासि निदाघकाले ॥

गोविन्दराजस्य.

628

अस्मिञ्जडे जगति को नु बृहत्प्रमाण-
कर्णः करी ननु भवेद्दुरितस्य पात्रम् ।
इत्यागतं तमपि योऽलिनमुन्ममाथ
मातङ्ग एव किमतः परमुच्यतेऽसौ ॥

भट्टवासुदेवस्य.

629

न गृह्णाति ग्रासं नवकमलकिंजल्किनि जले
न पङ्केराह्लादं व्रजति बिसभङ्गार्धशकलैः ।
ललन्तीं प्रेमार्द्रामपि विषहते नान्यकरिणीं
स्मरन्दावभ्रष्टां हृदयदयितां वारणपतिः ॥

630

लतान्तान्नादत्ते शशिशकलशीतं न च जलं
भ्रमद्भृङ्गासङ्गाः परिहरति कान्ताः कमलिनीः ।
दधद्भाराकारं करमपि करी जातविरहो
वितन्वन्नुच्छ्वासान्क्षणमपि वनान्ते न रमते ॥

631

नदीवप्रान्भित्त्वा किसलयवदुत्पाट्य च तरू-
न्मदोन्मत्ताञ्जित्वा करचरणदन्तैः प्रतिगजान् ।

जरां प्राप्यानार्थी तरुणजनविद्वेषजननीं
स एवायं नागः सहति कलभेभ्यः परिभवम् ॥

632

वरमियमङ्कुशक्षतिरलक्षितमापतिता
विनयविधित्सया शिरसि ते गजयूथपते ।
न पुनरपश्चिमा करजवज्रशिखाभिहतिः
प्रसभसमुत्थितस्य निशिता वनकेसरिणः ॥

भट्टबाणस्य.

633

स्वाधीनां प्रविहाय शैलकटकप्रान्ते करेणुं वने
यत्ते नागरिकाजने निपतितं सद्भावशून्ये मनः ।
तस्यैतद्दृढरज्जुबन्धनवधव्यापारखेदात्मकं
हे मत्तद्विप कर्मणः परिणतं रागानुरूपं फलम् ॥

634

क्वाकारो गिरिसंनिभः क्व च गतिर्वेगेन लीला च सा
हेलाकुड्मलितेक्षणाः क्व नु दृशस्तद्वा क्व ते बृंहितम् ।
वप्राघातरसः क्व ते क्व च करः कष्टं यदेवंविधं
त्वामारुह्य शिशुः पदा परवशं संचारयत्याज्ञया ॥

635

पादाघातविघूर्णिता वसुमती त्रासालसाः पक्षिणः
पङ्काङ्कानि सरांसि गण्डकषणक्षोदक्षताः शाखिनः ।
प्राप्येदं करिपोतकैर्विधिवशाच्छार्दूलशून्यं वनं
तत्तन्नाम कृतं विशृङ्खलतया वक्तुं न यत्पार्यते ॥

एते केषामपि.

636

पुण्ड्रेक्षूनपि भक्षयन्घृतभृतो मांसौदनादीनपि
प्रावृण्वन्विविधाः कुथा अपि वहन्नक्षत्रमाला अपि ।

कर्णे चामरमालिकामपि दधद्दन्ती तथापि स्मर-
न्वैन्ध्यीनां वनसल्लकीवनभुवामास्ते सदा दुःखितः ॥

कस्यापि.

637

नीवारप्रसवाग्रमुष्टिकवलैर्यो वर्धितः शैशवे
पीतं येन सरोजपत्रपुटके होमावशेषं पयः ।
तं दृष्ट्वा मदमन्थरालिवलयव्यालुप्तगण्डं गजं
सोत्कण्ठं सभयं च पश्यति मुहुर्दूरे स्थितस्तापसः ॥

भर्तॄः.

638

दन्ते न्यस्य करं प्रलम्बितशिराः संमील्य नेत्रद्वयं
किं त्वं वारण तप्यसे गणिकया को नाम नो वञ्चितः ।
ग्रासं शान्तमना गृहाण सततं शोकोऽधुना त्यज्यतां
ये मत्ता अविवेकिनश्चलधियस्ते प्राप्नुवन्त्यापदम् ॥

639

पत्युर्यत्कवलावशेषपतितग्रासेन वृत्तिः कृता
पीतं यच्च करावगाहकलुषं तत्पीतशेषं पयः ।
प्राणान्पूर्वतरं विहाय तदिदं प्राप्तं करिण्या फलं
यद्बन्धार्पणकातरस्य करिणः क्लिष्टं न दृष्टं मुखम् ॥

एतौ कयोरपि.

640

घासग्रासं गृहाण त्यज गजकलभ प्रेमबन्धं करिण्याः
पाशग्रन्थिव्रणानामभिमतमधुना देहि पङ्कानुलेपम् ।
दूरीभूतास्तवैते शबरवरवधूविभ्रमोद्भ्रान्तरम्या
रेवाकूलोपकण्ठद्रुमकुसुमरजोधूसरा विन्ध्यपादाः ॥

हस्तिपकस्य.

641

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।

श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥
कस्यापि.

642

यद्विन्ध्यः शिखरी तदन्तरपि यत्पीलुप्रियः पिप्पलः
सोत्कण्ठा रभसागमादभिपतद्रेणुः करेणुश्च यत् ।
तत्किं भद्रतया स्मरत्यपि करी दैवं हि सर्वंकषं
तन्मृत्योरपि दुःसहं तु यदयं मन्दो धुरि स्थापितः ॥

643

मध्येविन्ध्यमुदूर्मिनार्मदनदीवातूलवातावली-
हेलोद्धूलितमल्लिकाकिसलयैर्यो वृद्धिमभ्यागतः ।
सोयं दैववशाद्दशाविरहितः शूत्कारकारी करी
निर्मज्जद्गजरज्जुपाशविवशः कष्टं किमाचेष्टताम् ॥

644

हे गन्धकुञ्जर महागिरिकुञ्जराजि-
मद्यापि मा स्मर सलीलनिमीलिताक्षः ।
मुञ्चाभिमानमधुना भज वर्तमानं
वक्त्रं विधेरुपरि शासनमङ्कुशं च ॥
बह्लणस्य.

645

स्वच्छस्वादुजला विहाय सरितो हर्तुं तृषं दुःसहां
मा मत्त द्विरदाक्षि निक्षिप शरत्कृष्टे तडागाम्बुनि ।
पीतेस्मिन्सकलेपि गच्छति न ते शान्तिं पिपासा जले
मामस्यैकगतेरमुष्य नियतं स्याज्जीविते संशयः ॥
कस्यापि.

अथ मृगवर्णनम्

646

दूर्वाङ्कुरतृणाहारा धन्यास्तात वने मृगाः ।
विभवोन्मत्तचित्तानां न पश्यन्ति मुखानि यत् ॥

647

अमृता विगतप्राणा सान्तःशल्याकृतव्रणा ।
अबद्धा निश्चलेवास्ते कूटसंस्थे मृगे मृगी ॥

कवेरपि.

648

रज्ज्वा दिशः प्रवितताः सलिलं विषेण
पाशैर्मही हुतभुजा ज्वलिता वनान्ताः ।
व्याधाः पदान्यनुसरन्ति गृहीतबाणाः
कं देशमाश्रयति यूथपतिर्मृगाणाम् ॥

मुक्तापीडस्य.

649

द्रुततरमितो गच्छ प्राणैः कुरङ्ग वियुज्यसे
किमिति वलितग्रीवं स्थित्वा मुहुर्मुहुरीक्षसे ।
विदधति हतव्याधानां ते मनागपि नार्द्रतां
कठिनमनसामेषामेते विलोचनविभ्रमाः ॥

650

स्थलीनां दग्धानामुपरि मृगतृष्णामनुसरँ-
स्तृषार्तः सारङ्गो विरमति न खिन्नेपि मनसि ।
अजानानस्तत्त्वं न स मृगयतेन्यत्र सरसी-
मभूमौ प्रत्याशा न च फलति विघ्नं च कुरुते ॥

651

हे सारङ्ग तृणान्यशान सलिलैः प्राणान्पुषाणाथवा
यद्वा स्याः पवनाशनस्तदपि ते साविष्कृति प्राणितम् ।
येनेयं भवतोच्छ्वसत्कुवलयप्रस्तारचारुद्युति-
र्दृष्टिर्वित्तमदोद्धताक्षिणि मुखे मूर्खस्य नायासिता ॥

652

अल्पीयःस्खलनेन यत्र पतनं कृच्छ्रेण यत्रोन्नति-
र्दूरे वेत्रलतावितानगहने कष्टः प्रवेशक्रमः ।

हे सारङ्ग मनोरमा वनभुवस्त्यक्त्वा विशेषार्थिना
किं भूभृत्कटकस्थितिव्यसनिना व्यर्थं खुराः शातिताः ॥

कस्यापि.

653

नैतास्ता मलयस्य काननभुवः स्वच्छस्रवन्निर्झरा-
स्तृष्णा यासु निवर्तते तनुभृतामालोकमात्रादपि ।
रूक्षध्वाङ्क्षपरिग्रहो मरुरयं स्फारीभवद्भ्रान्तय-
स्ता एता मृगतृष्णिका हरिण हे नेदं पयो गम्यताम् ॥

सातलस्य.

654

त्यक्तं जन्मवनं तृणाङ्कुरवती मातेव मुक्ता स्थली
विस्रम्भस्थितिहेतवो न गणिता बन्धूपमाः पादपाः ।
बालापत्यवियोगदुःखविधुरा नापेक्षिता सा मृगी
मार्गन्तः पदवीं तथाप्यकरुणा व्याधा न मुञ्चन्त्यमी ॥

655

छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुरां
पर्यस्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरादपि जवेनोत्प्लुत्य धावन्मृगः
कूपान्तः पतितः करोति विधुरे किं वा विधौ पौरुषम् ॥

एतौ मुक्तापीडस्य.

656

स्वैरी भ्राम्यसि नाथ काम्यसि परद्वाराणि नोत्ताम्यसि
नाद्यामामनिमित्तकोपकुटिलालापं मुखं पश्यसि ।
मुञ्चस्येकमपि क्षणं प्रकटितप्रेमां च न प्रेयसीं
हे सारङ्ग तवातिसुन्दरमिदं केनोपदिष्टं व्रतम् ॥

कस्यापि.

657

स्वच्छन्दं हरिणेन या विहरता दैवात्समासादिता
भङ्गप्रस्रुतदुग्धबिन्दुनिसरा शालेर्नवा मञ्जरी ।

निःश्वासानलदग्धकोमलतृणप्रख्यापितान्तर्व्यथ-
स्तामेव प्रतिवासरं मुनिरिव ध्यायन्वने शुष्यति ॥

धर्मकीर्तेः.

658

सारङ्गो न लतागृहेषु रमते नो पांसुले भूतले
नो रम्यासु वनोपकण्ठहरितच्छायासु शीतास्वपि ।
तामेवायतलोचनामनुदिनं ध्यायन्मुहुः प्रेयसीं
शैलेन्द्रोदरकंदरेषु गतधीः शृङ्गारिवेषः स्थितः ॥

659

शृङ्गेणाङ्गं मृगाणां कषति परिचयप्राप्तये निःस्पृहाणां
मन्दस्वच्छन्दचारी परिहरति भयादालयं यूथपस्य ।
दृष्टस्तिष्ठत्यलक्ष्यो झगिति निपतितैस्तत्कुरङ्गीकटाक्षैः
सारङ्गो दुःखमास्ते विधुरविधिवशादन्ययूथप्रविष्टः ॥

660

आदाय मांसमखिलं स्तनवर्जमङ्गा-
न्मां मुञ्च वागुरिक याहि कुरु प्रसादम् ।
अद्यापि घासकवलग्रसनानभिज्ञो
मन्मार्गवीक्षणपरस्तनयो मदीयः ॥

केषामपि.

661

पुरो रेवा पारे गिरिरतिदुरारोहशिखरः
सरः सव्ये वामे दवदहनदाहव्यतिकरः ।
धनुष्पाणिः पश्चाच्छबरहतको धावतितरां
न यातुं न स्थातुं हरिणशिशुरेष प्रभवति ॥

श्रीजयापीडस्य.

662

क्व क्रीडति क्व चरति क्व करोति तृप्तिं
वारि क्व नाम पिबति स्वपिति क्व नाम ।

इत्थं मृगं निरपराधमबाधमानं
व्याधोनुधावति वधाय धनुर्दधानः ॥

663

चन्द्रः सुधांशुरयमत्रिसुतो द्विजेशः
पुण्यैरवापि शरणाय मयेति तोषम् ।
मुग्धैणशाव भज मा त्यज पापमेनं ॥
मीनं प्रभुज्य सहसा कृतमेषभोगम् ॥

पं॰ पाजकस्य.

अथ करभाः

664

करभ यदि कदाचित्प्रभमन्दैवयोगा-
न्मधुकरकुलतस्त्वं प्रापयेथा मधूनि ।
विरम विरम तेभ्यः सन्ति शष्पाण्यरण्ये
प्रथममुखरसास्ते शोषयन्त्येव पश्चात् ॥

कस्यापि.

665

विकचकुमुदैः फुल्लाम्भोजैः सरोभिरलंकृतां
मरकतमणिश्यामां शष्पैर्विहाय वनस्थलीम् ।
स्मरति करभो यद्वृक्षाणां चरन्मरुधन्वनां
परिचयरतिः सा दुर्वारा न सा गुणवैरिता ॥

श्रीवनागस्य.

666

करभदयिते यत्तत्पीतं सुदुर्लभमेकदा
मधु वनगतं तस्यालाभे विरौषि किमुत्सुका ॥
कुरु परिचितैः पीलोः पत्रैर्धृतिं मरुगोचरे
जगति सकले कस्यावाप्तिः सुखस्य निरन्तरा ॥

667

करभदयिते योसौ पीलुस्त्वया मधुलुब्धया
व्यपगतघनच्छायस्त्यक्तो न सादरमीक्षितः ।
चलकिसलयः सोपीदानीं प्ररूढनवाङ्कुरः
करभदयितावृन्दैरन्यैः सुखं परिभुज्यते ॥

668

करभ किमिदं दीर्घोच्छ्वासैः क्षिणोषि शरीरकं
विरम शठ हे कस्यात्यन्तं सखे सुखमागतम् ।
चर किसलयं स्वस्थः पीलोर्विमुञ्च मधुस्पृहां
पुनरपि भवान्कल्याणानां भविष्यति भाजनम् ॥

केषामपि.

669

करभ रभसात्क्रोष्टुं वाञ्छस्यहो श्रवणज्वरः
शरणमथवानृज्वी दीर्घा तवैव शिरोधरा ।
पृथुगलबिलावृत्तिभ्रान्तोच्चरिष्यति वाङ्मुखा-
दियति समये को जानीते भविष्यति कस्य किम् ॥

भट्टभल्लटस्य.

670

तथा संतुष्टः सञ्ज्वलतृणशमीपीलुबदरै-
श्चरन्स्वस्थोरण्ये करभशिशुकः शोकरहितः ।
कृतो मध्वास्वादप्रवणहृदयो मुग्धविधिना
यथा नान्यद्भुङ्क्ते न पिबति न शेते न रमते ॥

671

यस्यासीन्नवपीलुपल्लवदरमासोपि संतुष्टये
दीर्घाध्वन्यनुगम्यते न पदवी यस्य स्वयूथ्यैरपि ।
सोयं संप्रति याति बालकरभः क्षीणोद्यमः क्षामतां
मन्ये नूनमनेन दैवहतकेनास्वादितं भ्रामरम् ॥

672

पीलूनां हि फलं कषायरहितं रोमन्थयित्वा मरौ
शाखाग्रं यदखादि चारु करभीवक्त्रार्पितं प्रेमतः ।
तत्स्मृत्वा करभेन खेदविधुरं दीर्घं तथा कूजितं
प्राणानामभवत्तदेव सहसा प्रस्थानतूर्यं यथा ॥

एते केषांचित्.

673

क्रमेलकं निन्दति कोमलेच्छुः
क्रमेलकः कण्टकलम्पटस्तम् ।
प्रीतौ तयोरिष्टभुजोः समायां
मध्यस्थता नैकतरोपहासः ॥

नैषधकर्तुः.

अथ खगाः

तत्रादौ

मयूराश्चातकाश्च.

674

एक एव खगो मानी वने वसति चातकः ।
पिपासितो वा म्रियते याचते वा पुरंदरम् ॥

कस्यापि.

675

अयि चकितमुग्धचातक मरुभुवि धावसि मुधा किमुद्ग्रीवम् ।
ग्रीष्मे दवाग्निवलितस्तापिच्छोऽयं न विद्युत्वान् ॥

भट्टवासुदेवस्य.

676

पिपासुरप्येव जलं शिखण्डी
प्रतीक्षते प्राणसमां पिबन्तीम् ।
नूनं प्रियास्नेहनिबद्धदृष्टिः
स्वल्पं पयः पश्यति निम्नगासु ॥

677

अत्युन्नतिव्यसनिनः शिरसोऽधुनैष
स्वस्यैव चातकशिशुः प्रणयं विधत्ताम् ।

अस्यैतदिच्छति नहि प्रततासु दिक्षु
ताः स्वच्छशीतमधुराः क नु नाम नापः ॥
भट्टभल्लटस्य.

678

केकाः कला वनभुवस्तिलकायमानो
रम्यः कलापमहिमैष शिखण्डिनोस्य ।
दुर्लक्षणं ननु विहायसि वायसादि-
क्षुण्णेप्ययं चटकतुल्यगतिर्न जातः ॥
भा° जयवर्धनस्य.

679

नीलाब्जपुञ्जरजसारुणितान्विमुच्य
स्वच्छाम्बुधाधिकरसानपि वारिराशीन् ।
यच्चातकः पिबति वारिधरोदबिन्दू-
न्मन्ये तदानतिभयाच्छिरसोभिमानी ॥

680

भूमिस्थमम्बु यदि चातक पातुमिच्छेः
कण्ठव्रणं प्रकटयेस्तदयोग्यतां च ।
दिव्याम्बुपाननियमस्तव मोहयेत्कं
दोषोपि संवृतिमतां भजते गुणत्वम् ॥
भर्तृसारस्वतस्य.

681

किं नैव सन्ति नवतामरसावतंसा
हंसावलीवलयिनो जलसन्निवेशाः ।
कोपि ग्रहो गुरुरयं बत चातकस्य
पौरंदरीं यदभिवाञ्छति वारिधाराम् ॥

682

किं दूरेण पयोधरा उपरि किं नान्ये रटन्तः श्रुता
निन्द्याः पापतया स्वकुक्षिषु गताः किं नाम पक्षाः क्षयम् ।

रम्यं वा गगने न किं विहरणं किं तूग्रकाकावली-
पर्यायप्रतिपत्तिलाघवभयाद्भूमौ स्थिता बर्हिणः ॥

केषामपि.

683

नो ताण्डवेन नयनामृतनिर्झरेण
केकारवेण न च कर्णरसायनेन ।
बर्हेण चापि सुरचापरुचा तवाय-
मोतुर्न तुष्यति शिखिन्वधमन्तरेण ॥

कस्यापि.

684

चातक तात कियद्भवता पातकमतुलमकारि ।
नवजलदादपि चञ्चुपुटे यत्तव न पतति वारि ॥

685

जलकणवितरणरहितः प्रकटितधवलितवेषः ।
चातक रटसि वृथा किं जलदः शारद एषः ॥

चर्पटीनाथस्य.

686

सन्ति कूपाः स्फुरद्रूपाः परितः सरितः शुभाः ।
तथापि चातकस्यैकः फलदो जलदोदयः ॥

687

केकानिभाद्घटयसे पटुचाटुकानि
चञ्चत्कलापमपि नृत्यसि रञ्जनाय ।
हे चातक प्रयतसे जलदं प्रतीत्थं
बिन्दुं जलस्य लभसे न च लज्जसे च ॥

688

वाहत्वमीश्वरसुतस्य विधाय बर्हि-
न्नम्लायितः स निजपक्षकलाप एव ।
नाराधितः स भवता पुरुषोत्तमः किं
यस्ते तृषं प्रशमयेत्कचमेघवर्षैः ॥

अथ हंसाः सारसाश्च

689

वसतोतिशयप्रीत्या मानसोचितसंस्थितेः ।
पल्वलाम्भसि हंसस्य हंसतैव विकल्प्यते ॥

690

पिबन्ति मधु पद्मेभ्यो भृङ्गाः केसरधूसराः ।
हंसाः शैवालमश्नन्ति धिग्दैवमसमञ्जसम् ॥

कयोरपि.

691

यदि नाम दैवयोगाज्जगदसरोजं कदाचिदपि जातम् ।
अवकरनिकरं विकिरति तत्किं कृकवाकुरिव हंसः ॥

भट्टवासुदेवस्य.

692

कटु रटति निकटवर्ती वाचाटष्टिट्टिभः पटुर्यत्र ।
अपसरणमेव शरणं मौनं वा तत्र हंसस्य ॥

693

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम् ।
रमते न मरालस्य मानसं मानसं विना ॥

कस्यापि.

694

क्षुधितोपि पद्मखण्डे जहाति रजसावृतं हि किंजल्कम् ।
गुणिनि कृतपक्षपातो बिसं तु बहु मन्यते हंसः ॥

भट्टमुक्तिकोषकस्य.

695

तरलयसि दृशं किमुत्सुका-
मकलुषमानसवासलालिते ।
अवतर कलहंसि वापिकां
पुनरपि यास्यसि पङ्कजालयम् ।

भट्टवापस्य.

696

भृङ्गाङ्गनाजनमनोहरहारिगीत-
राजीवरेणुकणकीर्णपिशङ्गतोयाम् ।
रम्यां हिमाचलनदीं प्रविहाय हंस
हे हे हताश वद कां दिशमुत्सुकोसि ॥

697

हे हंस मेलितपयःसलिलं विवेक्तुं
शक्तस्य संप्रति मतिः क्व नु तेद्य याता ।
कासारवारिणि कलां पतितां यदिन्दो-
रादातुमिच्छसि बिसाङ्कुरवाञ्छया त्वम् ॥

698

शीतांशुशेखरशिरोरुहसंश्रितानि
पुण्यानि पावितजगन्ति मनोरमाणि ।
भ्रान्त्वा चिरं सुरसरित्सलिलानि दैवा-
ल्लब्धानि हातुमिह वाञ्छसि नासि हंसः ॥

699

स्थित्वा चिरं नभसि निश्चलतारकेण
मातङ्गसङ्गकलुषां नलिनीं निरीक्ष्य ।
उत्पन्नमन्युपरिघर्घरनिःस्वनेन
हंसेन साश्रु परिवृत्य गतं न लीनम् ॥

700

येनोज्झितं सहचरीवदनोपनीतं
रम्यं मृणालशकलं हिमशङ्खशुभ्रम् ।
सोयं खगो हतविधे तव चेष्टितेन
शेवालनाललवलम्पटतां विधत्ते ॥

701

रटसि कटु किमुच्चैर्वायस स्पर्धया मे
विहगहतक विष्टारक्तवक्त्रान्तरालः ।

विततधवलपक्षाक्षेपविक्षोभिताम्भाः
कमलवनविहारी सारसोऽहं न काकः ॥

702

हंसोऽध्वगः श्रममपोहयितुं दिनान्ते
कारण्डकाकबकभासवनं प्रविष्टः ।
मूकोऽयमित्युपहसन्ति लुनन्ति पक्षा-
न्नीचाश्रयो हि महतामवमानभूमिः ।

एते केषामपि.

703

क कठिनमहो पीलोः पत्रं मृदुः क बिसाङ्कुरः
क कटु लवणं कौपं चाम्भः क तामरसासवः ।
क कुसुमरजो हर्म्यं रूक्षाः क चोषरपांसवः
क मरुविषयो ध्वाङ्क्षेत्रं क हंस भवादृशाः ॥

श्रीभण्डकस्य.

704

भो राजहंस किमिति त्वमिहागतोऽसि
योऽसौ बकः स इह हंस इति प्रतीतः ।
तद्गम्यतां त्वरितमेव ततः प्रभाते
यावद्वदन्ति बक एष न मूढलोकाः ॥

705

अये वापीहंसा निजवसतिसंकोचपिशुनं
कुरुध्वं मा चेतो वियति वहतो वीक्ष्य विहगान् ।
अमी ते सारङ्गा भुवनमहनीयव्रतभृतो
निरीहाणामेषां तृणमिव भवन्त्यम्बुनिधयः ॥

706

तरौ तीरोद्भूते क्वचिदपि दलाच्छादिततनुः
पतद्धारासारां गमय विषमां प्रावृषमिमाम् ।
निवृत्तायां स्वस्थां सरसि सरसोत्फुल्लनलिने
स एव त्वं हंसः पुनरपि विलासास्त इह ते ॥

707

गतं तद्गाम्भीर्यं जलमपि वृतं जालकशतैः
सखे हंसोत्तिष्ठ प्रथममुतो दग्धसरसः ।
स यावत्पङ्काम्भःकलुषितवपुर्भूरिविलप-
न्न काको वाचाटश्चरणयुगलं मूर्ध्नि कुरुते ॥

708

स्पृशति न बिसं चञ्च्वा भूयस्तया सह खण्डितं
पिबति न जलं याति स्वप्नं न शैवलजालकम् ।
कमलकलिकाभङ्गक्रीडां करोति न सारसः
क्वणति करुणं शोकग्रस्तः प्रियाविरहाकुलः ॥

709

सरसि बहुशस्ताराछायां दशन्परिवञ्चितः
कुमुद विटपान्वेषी हंसो निशास्वविचक्षणः ।
दशति न पुनस्ताराशङ्की दिवापि सितोत्पलं
कुहकचकितो लोकः सत्येप्यपायमपेक्षते ॥

एते केषामपि.

710

मुक्ताभानि पयांसि भङ्गविलसद्दुग्धा बिसग्रन्थयः
स्फीतास्तामरसासवा विहरणक्रीडासहं सैकतम् ।
सन्त्येव प्रतिदेशमत्रविषमे हे हंस पङ्काङ्किते
धृष्टोत्क्रुष्टबके जरत्सरसि ते कोयं निवासग्रहः ॥

श्रीशिवस्वामिनः.

711

आपूर्येत पुनः स्फुरच्छफरिकासारोर्मिभिर्वारिभि-
र्भूयोपि प्रविभज्यमाननलिनं पश्येम तोयाशयम् ।
इत्याशाशततन्तुबद्धहृदयो नक्तंदिनं दीनधीः
शुष्यत्यातपशोषितस्य सरसस्तीरे जरत्सारसः ॥

712

तावद्दोलितपङ्कजच्युतरजःपिङ्गाङ्गरागोज्ज्वलो
यः शृण्वन्कलकूजितं मधुलिहां संजातहर्षोत्सवः ।
कान्ताचञ्चुपुटापवर्जितबिसग्रासग्रहेप्यक्षमः
सोयं संप्रति हंसको मरुगतः कष्टं तृणं वाञ्छति ॥

713

यां स्मृत्वा सहसैव मानससरस्त्यक्त्वा विशेषार्थिन-
स्तामेवोत्सुकचेतसः कमलिनीं दृष्ट्वा बकाध्यासिताम् ।
लीयन्ते विगताभिमानलघवस्तत्रैव भूयोपि ये
हंसास्ते न भवन्ति हंसधवलाः प्रायो बका एव ते ॥

केषामपि.

714

यामालिङ्ग्य बका रटन्ति कटुकं दीर्घोच्छ्वसत्कंधरा
यस्यामंसतटावघट्टितजलं वल्गन्त्यमी मद्गवः ।
या शश्वन्मलिनात्मकैरपि बकैर्नक्तंदिनं सेव्यते
सा हंसेन मनस्विना कमलिनी युक्तं यदि त्यज्यते ॥

अर्थवर्मणः.

715

रूपं हारि मनोहरा सहचरी पानाय पाद्मं मधु
क्रीडा चाप्सु सरोरुहेषु वसतिस्तेषां रजो मण्डनम् ।
वृत्तिः साधुमता बिसेन सुहृदश्चारुस्वनाः षट्पदाः
सेवादैन्यविमाननाविरहितो हंसः सुखं जीवति ॥

यशःस्वामिनः.

716

मत्स्या अपि हि जानन्ति क्षीरनीरविवेचनम् ।
प्रसिद्धं राजहंसानां यशः पुण्यैरवाप्यते ॥

717

क्रुद्धोलूकनखप्रपातविगलत्पक्षा अपि स्वाश्रयं
ये नोज्झन्ति पुरीषपुष्टवपुषस्ते केचिदन्ये द्विजाः ।

ये तु स्वर्गतरङ्गिणीबिसलतालेशेन संवर्धिता
गङ्गानीरमपि त्यजन्ति कलुषं ते राजहंसाः कुतः ॥

कस्यापि.

अथ कोकिलाः

718

समुद्गिरसि वाचः किं पुंस्कोकिल सुकोमलाः ।
श्वभ्रेस्मिञ्जडपाषाणगुरुनिर्घोषभैरवे ॥

भा० अमृतदत्तस्य.

719

काकैः सह विवृद्धस्य कोकिलस्य कला गिरः ।
खलसङ्गेपि नैष्ठुर्यं कल्याणप्रकृतेः कुतः ॥

तक्षकस्य.

720

श्रोत्रोत्सवं तव कलं कलकण्ठ कोत्र
नादं शृणोति रतिविग्रहसंधिदूतम् ।
दावाग्निदग्धघनपादपकोटरान्त-
राविर्भवत्कटुरवासु वनस्थलीषु ॥

कस्यापि.

721

मूकीभूय तमेव कोकिल मधुं बन्धुं प्रतीक्षस्व हे
हेलोल्लासितमालतीपरिमलामोदानुकूलानिलम् ।
यत्रैतास्तव सूक्तयः सफलतामायान्त्यमी तूल्लस-
त्पांसूत्तम्भभृतो निदाघदिवसाः संतापसंधायिनः ॥

भट्टवृद्धेः.

722

भ्रातः कोकिलकूजितैरलमलं नार्घन्ति यस्माद्गुणा-
स्तूष्णीमास्व विशीर्णपर्णनिचयच्छन्नः क्वचित्कोटरे ।
उद्यानद्रुमवाटिकाकटुरटत्काकावलीसंकुलः
कालोयं शिशिरस्य संप्रति सखे नायं वसन्तोत्सवः ॥

723

क्वचिज्झिल्लीनादः क्वचिदतुलकाकोलकलहः
क्वचित्कङ्कारावः क्वचिदपि कपीनां कलकलः ।
क्वचिद्घोरः फेरुध्वनिरयमहो दैवघटना
कथंकारं तारं क्वणतु चकितः कोकिलयुवा ॥

अथ भ्रमराः

724

केतकीकुसुमं भृङ्गः पीड्यमानोपि सेवते ।
दोषाः किं नाम कुर्वन्ति गुणापहृतचेतसः ॥

कस्यापि.

725

कृत्वापि कोषपानं भ्रमरयुवा पुरत एव कमलिन्याः ।
अभिलषति बकुलकलिकां मधुलिहि मलिने कुतः सत्यम् ॥

726

मदनमवलोक्य निष्फलमनित्यतामपि च बन्धुजीवानाम् ।
गुरुमुपगम्य भ्रमरः संप्रति जातो जपासक्तः ॥

727

भ्रमर भ्रमता दिगन्तराणि
क्वचिदासादितमीक्षितं श्रुतं वा ।
वद सत्यमपास्य पक्षपातं
यदि जातीकुसुमानुकारि पुष्पम् ॥

728

कमलं भवनं रजोऽङ्गरागो
मधु पानं मधुराः प्रियाप्रलापाः ।
शयनं मृदु केसरोपधानं
भ्रमरस्याम्भसि का न राजलीला ॥

729

पतितमुत्पतितं स्थितमक्रियं
सकरुणं क्वणितं गतमागतम् ।
कमलिनीमलिना तुहिनाहतां
नहि तदस्ति विलोक्य न यत्कृतम् ॥

कस्यापि.

730

कमलिनीमलिनी दयितं विना
न सहते सह तेन निषेविताम् ।
तमधुना मधुना निहितं हृदि
स्मरति सा रतिसारमहर्निशम् ॥

भट्टरुद्रस्य.

731

मदं न लिप्सेत शिलीमुखो यदि
द्विपाद्म कर्णाग्रनिपातमाप्नुयात् ।
परोपसर्पी सुखलेशलिप्सया
नरो भवत्येव पराभवास्पदम् ॥

732

मधुकर बहुशस्त्वया निरस्ताः
कुसुमलतास्तृणवत्सुपुष्पिताग्राः ।
फलमनुभव कण्टकावृताभ्य-
स्तदिदमपत्रप केतकीलताभ्यः ॥

733

फुल्लेषु यः कमलिनीकमलोदरेषु
चूतेषु यो विलसितः कलिकान्तरस्थः ।
पश्याद्य तस्य मधुपस्य शरद्व्यपाये
कृच्छ्रेण वेणुविवरे दिवसाः प्रयान्ति ॥

734

पुष्पासवं सुरभि गन्धिरजोङ्गरागः
पीत्वा लतासु मधुपः कमले निषण्णः ।
बद्धोधुना शशिकरैः करुणं विरौति
संतोषहीनमिह कं न भजन्त्यनर्थाः ॥

एते केषांचित्.

735

अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः सुमनोलतासु ।
मुग्धाननामरजसं कलिकामकाले
बालां कदर्थयसि किं नवमालिकायाः ॥

विकटनितम्बायाः.

736

ऐरावणाननमदाम्बुकणावपात-
संसक्ततामरसरेणुपिशङ्गिताङ्गः ।
चण्डानिलाहततुषारविशीर्णपक्षः
क्षीणः क्षितौ मधुकरो विवशोत्र शेते ॥

भट्टनायकस्य.

737

सोत्कः परिभ्रमसि किं व्यवपातिधैर्यः
कूजन्द्विरेफ करुणं कुसुमासवार्थी ।
अन्यासु पादपलतासु धृतिं बधान
भग्ना हि सा कुसुमिता सहकारवल्ली ॥

धर्मकीर्तेः.

738

स्वामोदवासितसमग्रदिगन्तराला
रक्ता मनोहरमुखा सुकुमारमूर्तिः ।
सेव्या सरोजकलिका तु यदैव जाता
नीतस्तदैव विधिना मधुपोन्यदेशम् ॥

कस्यापि.

739

जात्युज्ज्वले मधुरकोमलवाग्विलासौ
द्वौ पुष्करे मधुकरौ युगपत्प्रविष्टौ ।
एकस्तयोर्मधुभराकुलपूर्णदेहः
कष्टे विधौ न रजसापि युतो द्वितीयः ॥

चाटस्य·

740

मधुकरगणश्चूतं त्यक्त्वा गतो नवमालिकां
पुनरपि गतो रक्ताशोकं कदम्बतरुं ततः ।
तदपि सुचिरं स्थित्वा तेभ्यः प्रयाति सरोरुहं
परिचितगुणद्वेषी लोको नवं नवमीहते ॥

741

लिखितकमले सौन्दर्येण प्रकामहृतात्मना
किमिव न कृतं तत्र भ्रान्त्वा मधुस्पृहयालिना ।
अधिगतरसः सोभूत्तस्मान्मनागपि नाल्पधी-
र्धुरि तु लिखितस्तृष्णान्धानां जनेन विवेकिना ॥

742

भ्रमति बकुले मन्दं कुन्दे न विन्दति निर्वृतिं
प्रकृतिसुरभौ रक्ताशोके न याति विशोकताम् ।
सुरभिकुसुमामोदोत्कण्ठापनीतमना वने
वहति तनुतामङ्गे भृङ्गः स्मरन्नवमालिकाम् ॥

743

स्पृशति शनकैश्चुम्बत्यङ्गैः करोति निपीडनं
चरणपतनं मुद्राभेदं विधातुमपीहते ।
समयमुचितं चित्तौत्सुक्यात्प्रतीक्षितुमक्षमो
मधुकरयुवा पुण्यैर्लब्ध्वा नवां नवमालिकाम् ॥

744

हिमोत्सन्नां दृष्ट्वा हतकमलनालां कमलिनीं
द्विरेफाः संवृत्ताः सपदि गजगण्डप्रणयिनः ।
अहो धिग्भूतानां प्रकृतिरियमप्रत्ययकरी
न कश्चित्क्षीणार्थे प्रथमगुणगन्धं गणयति ॥

745

किमामोदभ्रान्त्या भ्रमसि सुचिरं भृङ्ग ननु हे
न जानीषे तत्त्वं प्रतपतितरां ग्रीष्मसमयः ।
स्थितं शून्यं पुष्पैः प्रकटविटपं पश्य विपिनं
गतः सौरभ्याढ्यः प्रकृतिसुभगश्चैत्रविभवः ॥

746

केनाघ्रातमुदारमस्य कुसुमं कैश्चुम्बितं केसरं
पीतः केन रसोस्य केन रजसा चोद्वेल्लितं केन वा ।
हे हे मुग्धमधुव्रत व्रज जवादन्याँस्तरून्पुष्पिता-
नुत्तालेत्र वृथैव पिप्पलतरौ किं किंचिदासाद्यते ।

747

प्रत्यग्रोत्र यथासुखं मधुरसः पातव्य इत्युत्सुक-
स्तृष्णाविभ्रमविप्रलब्धहृदयस्तत्त्वावबोधं विना ॥
निर्विण्णोप्यफलभ्रमो न विरमत्यालेख्यपद्माकरे
दुर्बुद्धिर्व्यसनी तथापि मधुपस्तृष्णाशयोद्भ्राम्यति ॥

748

यस्याः संगमवाञ्छया न गणिता वाप्यो विनिद्रोत्पला
यामालिङ्ग्य समुत्सुकेन मनसा यातः परां निर्वृतिम् ।
भग्नां तामवलोक्य चन्दनलतां भृङ्गेण यज्जीव्यते
धैर्यं नाम तदस्तु तस्य न पुनः स्नेहानुरूपं कृतम् ॥

749

येनामोदिनि केसरस्य मुकुले पीतं मधु स्वेच्छया
नीता येन निशा शशाङ्कधवला पद्मोदरे शारदे ।

भ्रान्तं येन मदप्रवाहमलिने गण्डस्थले दन्तिनां
सोयं भृङ्गयुवा करीरविटपे बध्नातु तुष्टिं कुतः ॥

केषामपि.

750

मा भून्नाम सहामुनैव निधनं दैवात्कथंचित्पुन-
स्तृष्णा वा हतजीविते यदि तदा किं पुष्पशून्यं जगत् ।
येनैवोन्मथितः स एव दयितः पद्माकरो निर्दयं
दानाम्भःस्पृहयानुयात्यलिरहो लोलस्तमेव द्विपम् ॥

शङ्कुकस्य.

751

सोपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं
दृष्टिः सा मदविस्मृतस्वपरदिक्किं भूयसोक्तेन वा ।
सर्वं निश्चितवानसि भ्रमर हे यद्वारणोप्यसा-
वन्तःशून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः ॥

भट्टभल्लटस्य.

752

रे रे भृङ्ग मदान्धवारणचलत्कर्णानिलान्दोलन-
क्लेशक्लान्ततनो मुधैव भवता दुःखं किमित्यास्यते ।
उत्कूजत्समदद्विरेफवलयप्यालुप्तकोशश्रियः
सामोदाः प्रकटाशयाः प्रतिपदं सन्त्येव पद्माकराः ॥

सुखविष्णोः.

753

गन्धाढ्यां नवमालिकां मधुकरस्त्यक्त्वा गतो यूथिकां
तां त्यक्त्वापि गतः स चन्दनतरुं तस्मात्सरोजं गतः ।
बद्धस्तत्र निशाकरेण सुचिरं क्रन्दत्यसौ मन्दधीः
संतोषेण विना पराभवशतं प्राप्नोति लुब्धो जनः ॥

754

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मिनी च ।

एवं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उन्ममाथ ॥

755

भ्रमन्वनान्ते वनमञ्जरीषु
न षट्पदो गन्धफलीमजिघ्रत् ।
सा किं न रम्या स च किं न रन्ता
बलीयसी केवलमीश्वरेच्छा ॥

एते केषामपि.

756

अङ्के वृद्धिमुपागतं शिशुतया सर्वाङ्गमालिङ्गितं
मत्स्यः श्रीपरिरम्भनिर्भरतरव्याकोशकोषोन्मुखैः ।
आशाप्तैः परिपीयमानमनिशं निःस्पन्दमिन्दिन्दिरै-
र्दूरादेव निमेषशून्यनयनः पद्मं समुद्वीक्षते ॥

क्षेमेन्द्रस्य.

अथ बकाः

757

जीवतो निगिरन्मत्स्यान्मुनिवद्दृश्यते बकः ।
मृतानपि न गृध्रस्तु धिगाकारमुनीन्द्रताम् ॥

कस्यापि.

758

नालेनेव स्थित्वा पादेनैकेन कुञ्चितग्रीवम् ।
जनयति कुमुदभ्रान्तिं वृद्धबको बालमत्स्यानाम् ॥

वृद्धेः.

759

एष बकः सहसैव विपन्नः
शाठ्यमहो क्व नु तद्गतमस्य ।
साधु कृतान्तक कश्चिदपि त्वां
वञ्चयितुं न कुतोपि समर्थः ॥

कस्यापि.

760

१११ निजकुलोचितचेष्टितमात्मनो
यदपहाय वियाससि हंसताम् ।
बक चर व्रतमेव तथापि ते
फलति तत्तदिदं यततां नृणाम् ॥

भट्टगोविन्दराजस्य.

761

न कोकिलानामिव मञ्जु कूजितं
न लब्धलास्यानि गतानि हंसवत् ।
न बर्हिणानामिव चित्रपक्षता
गुणस्तथाप्यस्ति बके बकव्रतम् ॥

भा° श्रीजयवर्धनस्य.

762

तद्वैदग्ध्यं समुदितपयस्तोयतत्त्वं विवेक्तु-
मालापास्ते स च मृदुपदन्याससहृद्यो विलासः ।
आस्तां तावद्बक यदि तथा वेत्सि किंचिच्छ्लथाशां
तूष्णीमेवासितुमपि सखे त्वं कथं मे न हंसः ॥

भट्टभल्लटस्य.

763

कस्त्वं लोहितलोचनास्यचरणो हंसः कुतो मानसा-
त्किं तत्रास्ति सुवर्णपङ्कजवनान्यम्भः सुधासंनिभम् ।
मुक्ताशुक्तिरथास्ति शङ्खनिचयो वैदूर्यरोहाः क्वचि-
च्छम्बूकाः किमु सन्ति नेति च बकैराकर्ण्य हीहीकृतम् ॥

अथ काकाः

764

तुल्यवर्णच्छदः कृष्णः कोकिलैः सह संगतः ।
केन विज्ञायते काकः स्वयं यदि न भाषते ॥

वाल्मीकेः.

765

आत्मरुतादपि विरुतं कुर्वाणाः स्पर्धया सह मयूरैः ।
किं जानन्ति वराकाः काकाः केकारवान्कर्तुम् ॥

कस्यापि.

766

कृष्णं वपुर्वहतु चुम्बतु सत्फलानि
रम्येषु संचरतु चूतवनान्तरेषु ।
पुंस्कोकिलस्य चरितानि करोतु नाम
काकः किल ध्वनिविधौ ननु काक एव ॥

भा° अयवर्धनस्य.

767

संप्राप्य कोकिलकुलैः कमनीयकान्तिः
कान्तस्वरैरपि बलात्खलु संनिकर्षम् ।
वैधुर्यभाजि हतवेधसि किं वराकः
काकः करोत्वनुकृतिं न ययौ यदेषाम् ॥

गोविन्दराजस्य.

768

इयं पल्ली भिल्लैरनुचितसमारम्भरसिकैः
समन्तादाक्रान्ता विषविषमबाणप्रणयिभिः ।
तरोरस्य स्कन्धे गमय समयं कीर निभृतं
न वाणी कल्याणी तदिह मुखमुद्रैव शरणम् ॥

769

किरति मुखगृहीतं भुक्तशेषं पुरीषं
विलिखति चरणाग्रैर्देवतानां शिरांसि ।
व्रजति च हतमानः साधुमूर्धस्वशङ्कः
किमिव न कुरुते खं प्राप्य काको वराकः ॥

770

दौर्भाग्यं वचसां तनोर्मलिनता चेष्टास्वहो चापलं
शङ्कायास्तदुपज्ञतैव विदिता वृत्तिस्त्ववाच्यैव सा ।

इत्थं दुष्कृतशाखिनः फलमिव स्फीतं तथाप्यातुरः
काकः कोकिललाञ्छनच्छविरुचा कष्टं मुहुर्मूर्छति ॥

वासुदेवस्य.

771

नृत्यन्तः शिखिनो मनोहरममी श्रव्यं पठन्तः शुका
वीक्ष्यन्ते न त एव खल्विह रुषा वार्यन्त एवाथवा ।
पान्थस्त्रीगृहमिष्टलाभकथनाल्लब्धान्वयेनामुना
संप्रत्येतदनर्गलं बलिभुजा मायाविना भुज्यते ॥

772

रे रे ध्वाङ्क्ष विरूक्षतास्तु वचसः काणाक्षिता क्षम्यते ।
लौल्यं नाम तवेति कात्र गणना भाण्ड्यं विभूषैव ते ।
सर्वं सोढमिदं स्वभावविहितं वह्नेरिवौष्ण्यं हि ते
यत्त्वेवं विगुणस्य कापि भवतो ग्रीवा न तत्सह्यते ॥

773

काकः कोकिलमुन्नमय्य कुरुते चूते फलास्वादनं
भुङ्क्ते राजभुकं निवार्य कुररः क्रीडापरो दाडिमम् ।
घूको बर्हिणमस्य शाखिशिखरे शेते सजानिः सुखं
हा जातं विपरीतमद्य विपिने श्येने परोक्षं गते ॥

कस्यापि.

774

किं केकीव शिखण्डमण्डिततनुः किं कीरवत्पाठकः
किं पुंस्कोकिलवत्स्वनेन मधुरः किं हंसवत्सद्गतिः ।
किं सामान्यशकुन्तशावक इव क्रीडाविनोदाकरः
काकः केन गुणेन काञ्चनमये व्यापारितः पञ्जरे ॥

775

उत्पत्तिर्मरुतां प्रभोर्युगदिने प्रख्याप्यविश्वोत्सवे
पुण्याहश्रुतिषु प्रसिद्धिरधिका पूर्णं वयः पौरुषम् ।
काकुत्स्थेन समं सपत्नकलहो दैवज्ञता तादृशी
काकस्तेन गुणेन काञ्चनमये व्यापारितः पञ्जरे ॥

776

आद्यः प्रवेशसमयः स कलेर्युगस्य
प्राप्तस्तिरस्कृतबहूदकहंससार्थः ।
आहूय सादरतया तपसोन्तिमोह्नि
काणो द्विजः प्रतिगृहं बत यत्र पूज्यः ॥

अथ कीटमणयः

777

सूर्यादन्यत्र यच्चन्द्रेप्यर्थसंस्पर्शि तत्कृतम् ।
खद्योत इति कीटस्य नाम तुष्टेन केनचित् ॥

778

घनसंतमसमलीमसदशदिशि निशि यद्विराजसि तदन्यत् ।
कीटमणे दिनमधुना तरणिकरान्तरितचारुसितकिरणम् ॥

भल्लटस्य.

779

जर्जरतृणाग्रमदहन्सर्षपकणमप्रकाशयन्नूनम् ।
कीटत्वमात्मतन्त्रः खद्योतः ख्यापयन्भाति ॥

780

भ्राजिष्णवो नभसि भूरिहतान्धकार-
स्वल्पप्रभाः स्वतनुमात्रनिबद्धभासः ।
खद्योतकाः प्रकटतीव्रगुरुप्रभावा-
स्तावन्न सप्ततुरगः समुदेति यावत् ॥

किशोरकस्य.

781

युष्मादृशाः कृपणकाः क्रिमयोपि यस्यां
भान्ति स्म संतमसमभ्युगमन्निशासौ ।
सूर्यांशुदीप्रदशदिग्दिवसोधुनायं
भात्यत्र नेन्दुरपि कीटमणे किमु त्वम् ॥

782

इन्दुः प्रयास्यति विनङ्क्ष्यति तारकश्रीः
स्थास्यन्ति लीढतिमिरा न मणिप्रदीपाः ।
अन्धं समग्रमपि कीटमणे भविष्य-
दुन्मेषमेष्यति भवानिति दूरमेतत् ॥

कयोरपि.

783

सत्त्वान्तः स्फुरिताय वा कृतगुणाध्यारोपतुच्छाय वा
तस्मै कातरमोहनाय महसो लेशाय मा स्वस्ति भूत् ।
यच्छायास्फुरणारुणेन खचता खद्योतनाम्नामुना
कीटेनाहितयापि जङ्गममणिभ्रान्त्या विडम्ब्यामहे ॥

भल्लटस्य.

अथ वृक्षाः

784

प्रत्यग्रैः पर्णनिचयैस्तरुर्यैरेव शोभितः ।
जहाति जीर्णास्तानेव किं वा चित्रं कुजन्मनः ॥

उपाध्यायोद्भवस्य.

785

यथापल्लवपुष्पाढ्या यथापुष्पफलर्द्धयः ।
यथाफलर्द्धिस्वारोहा हा मातः क्वागमन्द्रुमाः ॥

786

साध्वेव तद्विधावस्य वेधाः क्लिष्टो न यन्मुधा ।
स्वरूपाननुरूपेण चन्दनस्य फलेन किम् ॥

भल्लटस्य.

787

मया बदरलुब्धेन वृक्षाणामनभिज्ञया
वने कण्टकसादृश्यात्खदिरः पर्युपासितः ॥

788

महातरुर्वा भवति समूलो वा विनश्यति ।
नाङ्कुरप्रक्रियामेति न्यग्रोधकणिकाङ्कुरः ॥

789

पुष्पपत्रफलच्छायामूलवल्कलदारुभिः ।
धन्या महीरुहा येषां विमुखा यान्ति नार्थिनः ॥

790

पतत्यङ्गारवर्षे वा वाति वा प्रलयानिले ।
तालः स्तब्धतयारब्धस्तथैव सह नश्यति ॥

791

छायावन्तो गतव्यालाः स्वारोहाः फलदायिनः ।
मार्गद्रुमा महान्तश्च परेषामेव भूतये ॥

792

अगतीनां खलीकाराद्दुःखं नैवोपजायते ।
भवन्त्यशोकाः प्रायेण साङ्कुराः पादताडिताः ॥

केषामपि.

793

यद्यपि चन्दनविटपी विधिना फलकुसुमवर्जितो विहितः ।
निजवपुषैव परेषां तथापि संतापमपहरति ॥

भट्टादित्यकस्य.

794

प्राप्ते वसन्तमासे वृद्धिं प्राप्नोति सकलवनराजिः ।
यन्न करीरे पत्रं तत्किं दोषो वसन्तस्य ।

795

फलितघनविटपविघटितपटुदिनकरमहसि लसति कल्पतरौ ।
छायार्थी कः पशुरपि भवति जरद्वीरुधां प्रणयी ॥

भल्लटस्य.

796

फलकुसुमकिसलयोज्ज्वलविटपशतान्तरिततरणिकिरणौघे ।
मार्गतरौ निकटस्थे कः पथिकः क्लान्तिमनुभवति ॥

भा° अमृतदत्तस्य.

797

दूरीकृतस्वार्थलवा जनस्य
समुद्यता ये भुवि तापशान्त्यै ।
द्रुमास्त एवागतिका न विद्मः
प्रजापतेराशयलेशमत्र ॥

प्रकाशवर्षस्य.

798

चन्दने विषधरान्सहामहे
वस्तु सुन्दरमगुप्तिमत्कुतः ।
रक्षितुं वद किमात्मसौष्ठवं
संचिताः खदिर कण्टकास्त्वया ॥

भल्लटस्य.

799

माथित एष मिथः कृतभृङ्खलो-
विषधरैरधिरुह्य महाजडः ।
मलयजः सुमनोभिरनाश्रितो
यदत एव फलेन न युज्यते ॥

800

यत्किंचनानुचितमप्युचितानुबन्धि
किं चन्दनस्य न कृतं कुसुमं फलं वा ।
लज्जामहे भृशमपक्रम एव यातु-
स्तस्यान्तिकं परिगृहीतबृहत्कुठारः ॥

भल्लटस्य.

801

हे बालचम्पकतरो तरुणीकपोल-
लावण्यचुम्बनसुखोचितचारुपुष्प ।
किं पुष्पितेन विजहीहि विकासहास-
मुद्दामपामरगणा मरुभूमिरेषा ॥

नरेन्द्रस्य.

802

अन्तःप्रतप्तमरुसैकतदह्यमान-
मूलस्य चम्पकतरोः क्व विकासचिन्ता ।
प्रायो भवत्यनुचितस्थितिदेशभाजां
श्रेयः स्वजीवपरिपालनमात्रमेव ॥

803

दौर्जन्यमात्मनि परं प्रथितं विधात्रा
भूर्जद्रुमस्य विफलत्वसमर्पणेन ।
किं चर्मभिर्निशितशस्त्रशतावकृत्तै-
राशां न पूरयति सोर्थिपरम्पराणाम् ॥

गोविन्दराजस्य.

804

किं कण्टकैकरसिकेन फलद्विषा किं
वैरस्यसीमनि किमु स्थिरकौतुकेन ।
छायाविलासविमुखेन सतां किमङ्ग
धात्रा खलेन खादिरद्रुम एष सृष्टः ॥

वामनस्य.

805

लब्धं चिरादमृतवत्किममृत्यवे स्या-
द्दीर्घं रसायनवदायुरुत प्रदद्यात् ।
एतत्फलं यदयमध्वगशापदग्धः
स्तब्धः फलं फलति वर्षशतेन तालः ॥

भल्लटस्य.

806

हे वृक्ष शोभित महाफलभारलक्ष्म्या
क्षुत्तापशान्तिजनकैकजगत्प्रसिद्ध ।
त्वत्तो मया कथमपीदमधो निरस्त-
मेकं फलं शकुनिखण्डितमल्पमाप्तम् ॥

कस्यापि.

807

अत्यन्तशीतलतया सुभगस्वभाव
सत्यं न कश्चिदपि ते तरुरस्ति तुल्यः ।
छायार्थिनामपि पुनर्विकटद्विजिह्व-
सङ्गेन चन्दन विषद्रुमनिर्विशेषः ॥

भा० असुतरस्य.

808

कथमियति वनान्ते कश्चिदेको न तादृ-
ग्वरवनतरुरुद्धैः पुष्पवल्लीफलाढ्यः ।
जगदसुखविधातुर्दग्धधातुर्नियोगा-
द्धवखदिरपलाशाः केवलं वृद्धिभाजः ॥

809

शाखासंततिसंनिरुद्धगगनाभोगस्य लब्ध्वा तरो-
श्छायां यस्य भवद्भिरेव शमिता घर्मापदोनेकशः ।
भोः पान्था ननु दृश्यतां विधिगतिस्तस्यैव कालक्षय-
प्रक्षीणस्य तलेद्य तप्तसिकताङ्गारैः परं दह्यते ॥

कवेरपि.

810

चित्रैर्यस्य पतत्त्रिभिर्दशदिशो भ्रान्त्वा समेतैः सुखं
विश्रान्तं शयितं प्रभुक्तमुषितं स्कन्धे फलैः प्रश्रिते ।
तस्यैवोन्मथितस्य दुष्टकरिणा मार्गद्रुमस्याधुना
कारीषाय कषन्ति शोषपरुषां गोपालबालास्त्वचम् ॥

शिवस्वामिनः.

811

संतोषः किमशक्तता किमथवा तस्मिन्नसंभावना
शोभैवाथ च काननस्थितिरियं प्रद्वेष एवाथवा ।
आस्तां खल्वनुरूपया सफलया पुष्पश्रिया दुर्विधे
संबन्धोननुरूपयापि न कृतः किं चन्दनस्य त्वया ॥

812

सन्मूलः प्रथितोन्नतिर्घनलसच्छायः स्थितः सत्पथे
सेव्यः सद्भिरितीदमाकलयता तालोऽध्वगेनाश्रितः ।
पुंसः शक्तिरियत्यसौ स तु फलेदद्याथवा श्वोथवा
काले क्वाप्यथवा कदाचिदथवा नेत्यत्र वेधाः प्रभुः ॥

813

यज्जातोसि चतुष्पथे घनलसच्छायोसि किं छायया
संयुक्तः फलितोसि किं यदि फलैः पूर्णोसि किं संनतः ।
हे सद्वृक्ष सहस्व संप्रति सखे शाखाशिखाकर्षण-
क्षोभामोटनभञ्जनानि जनतः स्वैरेव दुश्चेष्टितैः ॥

भदन्तज्ञानवर्मणः.

814

सुस्कन्धस्य विसारिसौरभगुणाक्रान्ताखिलाशस्य ते
तन्वीचारुपयोधरान्तरकृतस्पर्शस्य गोप्याकृतेः ।
दोषः कोपि भुजंगसंगमकृतः प्रोद्भूत एषोधुना
येन त्वां परिहृत्य चन्दनतरो यान्त्यध्वगा दूरतः ॥

कस्यापि.

815

छिन्नस्तप्रसुहृत्स चन्दनतरुर्यूयं पलाय्यागता
भोगाभ्याससुखासिकाः प्रतिदिनं ता विस्मृतास्तत्र वः ।
दंष्ट्राकोटिविषोल्कया प्रतिकृतं तस्य प्रहर्तुर्न चे-
त्किं तेनैव सह स्वयं न निधनं याताः स्थ भो भोगिनः ॥

816

त्वन्मूले पुरुषायुषं गतमिदं कालेन संशुष्यतां
क्षोदीयांसमपि क्षणं परमतः शक्तिः कुतः प्राणितुम् ।
तत्स्वस्त्यस्तु विवृद्धिमेहि महतीमद्यापि का नस्त्वरा
कल्याणैः फलितासि तालविटपिन्पुत्रेषु पौत्रेषु वा ॥

एतौ भट्टभल्लटस्य.

817

छायास्यैव घना सुगन्धिरयमेवापन्नतापच्छिदा-
ममेस्यैव गुणग्रहः सगुणता किं चन्दनस्योच्यताम् ।
आ मूलात्पुनरेष बद्धवृतिभिर्व्यालैस्तथा दूषितो
जाने येन वरं धवोथ खदिरोप्यन्योथवा न त्वयम् ॥

योभाकस्य.

818

न श्लाघ्यानि फलानि पल्लवकृता छाया न वाञ्छापि सा
नो पुष्पं सुमनोहरं न विहगाः शब्दामृतस्यन्दिनः ।
काकव्रातपुरीषनिर्भरजरन्मूर्तेरशुद्धात्मनो
निःस्तब्धस्य तरोरधः कथमहो सृष्टोसि दुर्वेधसा ॥

819

नास्य स्वादुफलं न चारु कुसुमं न स्निग्धपर्णा लता
न च्छाया क्लमहारिणी न च कलक्वाणास्तथा पत्रिणः ।
एषोसौ खदिरद्रुमः किमथवा पान्थेन दृष्टस्त्वया
तत्किं पान्थ कठोरकण्टकमुखैर्गात्रक्षतार्थी भवान् ॥

भट्टवृद्धेः.

820

स्निग्धाः पल्लविनः प्रकामविटपव्याविद्धचण्डातपा
नम्राः स्वादुफलाः समाश्रितजनक्षुत्तापविच्छेदिनः ।
दग्धास्ते तरवः प्रयान्तु पथिकास्तेष्वेव मार्गेष्वमी
रूक्षाः कण्टकिनः ससर्पविवरा भूयः प्ररूढा द्रुमाः ॥

821

छाया नात्मन एव या कथमसावन्यस्य निष्प्रग्रहा
ग्रीष्मोष्मापदि शीतलस्तलभुवि स्पन्दोनिलादेः कुतः ।
वार्ता वर्षशते गते किल फलं भावीति वर्तैव सा
द्राघिम्णा मुषिताः कियच्चिरमहो तालेन बाला वयम् ॥

822

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते ।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायापि परोपकारकृतये मार्गस्थितस्यापि मे ॥

823

आमोदैर्मरुतो मृगाः किसलयैर्लम्बैस्त्वचा तापसाः
पुष्पैः षट्चरणाः फलैः शकुनयो घर्मार्दिताश्छायया ।
स्कन्धैर्गन्धगजाश्च विभ्रमरुजाः शश्वद्विभक्तास्त्वया
प्राप्तस्त्वं द्रुम बोधिसत्त्वपदवीं सत्यं कुजाताः परे ॥

824

भ्राम्यद्भृङ्गभरावनम्रकुसुमच्योतन्मधूद्गन्धिषु
च्छायावत्सु तलेषु पान्थनिवहा विश्रम्य गेहेष्विव ।
नित्यं निर्झरवारिवारिततृषस्तृप्यन्ति येषां फलै-
स्ते नन्दन्तु फलन्तु यान्तु च परामत्युन्नतिं पादपाः ॥

825

हे हे मण्डितमार्ग मार्गविटपिञ्जीव्याः समाः शाश्वती-
रथाप्यावृणु दिक्तटानि विटपैः सालैश्चुचुम्बाम्बरम् ।
मूले विश्रमणाशयैव लुठिता यत्र त्वया केवलं
घर्मार्तैः परिमोचिताः फलशतैर्यावद्वयं तर्पिताः ॥

826

वृद्धिर्यस्य तरोर्मनोरथशतैराशावता प्रार्थिता
जातोसौ सरसः प्रवासिफलदः सर्वाश्रितोपाश्रयः ।
नानादेशसमागतैरविदितैराक्रान्तमन्यैः खगै-
स्तं लब्धावसरोपि वृद्धशकुनिर्दूरे स्थितो वीक्षते ॥

827

दावाग्निप्लोषदुःखं खरपवनजलक्लेशमर्कोग्रतापं
मातङ्गाकर्षणानि व्यसनमपि गुरु प्राप्तवन्तोपि वशात्

दारुच्छायाफलानि त्वचमपि कुसुमं मञ्जरीः पल्लवान्वा
नार्थिभ्यो वारयन्ति प्रतिदिवसमहो साधु वृत्तं तरूणाम् ॥

828

हंसाः पद्मवनाशया बलिभुजो गृध्राश्च मांसाशया
पान्थाः स्वादुफलाशया मधुलिहः सौरभ्यगन्धाशया ।
दूरान्निष्फलरक्तपुष्पनिचयैर्निःसार रथ्योन्नते
रे रे शल्मलिपादप प्रतिदिनं के न त्वया वञ्चिताः ॥

829

भ्रातर्भीममरुभ्रमश्रमशमथ्यापारपारंगमं
मत्वा चन्दनपादपं पथिक मा विश्रान्तये शिश्रियः ।
एतस्यान्तिकवर्तिभिर्घनविषज्वालावलीभीषणै-
राश्वास्य स्मृतिशेषतां विषधरैर्नीताः कियन्तोध्वगाः ॥

830

उच्चैर्यो मधुपानलुब्धमनसां भृङ्गाङ्गनानां गणै-
रुद्गीतो रचितालयः खगकुलैर्देशान्तरादागतैः ।
आसीद्यश्च निषेवितोध्वगशतैर्ग्रीष्मोष्मतान्तिच्छिदे
सोयं संप्रति दुर्मदेन दलितश्छायातरुर्दन्तिना ॥

831

भुक्तं स्वादुफलं कृतं च शयनं शाखाग्रजैः पल्लवै-
स्त्वच्छायापरिशीतलं च सलिलं पीतं विनीतः क्लमः ।
विश्रान्तं सुचिरं ततोपि मनसा प्राप्ता परा निर्वृति-
स्त्वं सन्मार्गतरुर्वयं च पथिका भूयात्पुनः संगमः ॥

अथ मेघाः

832

अस्त्येव भूभृतां मूर्ध्नि दिवि वा द्योततेम्बुदः ।
मरुद्भिर्भज्यमानोपि स किमेति रसातलम् ॥

पुण्यस्व.

833

अम्बुदः कृतपदो नभस्तले
तोयपूरपरिपूरितोदधिः ।
गोष्पदस्य भरणेप्यशक्तिमा-
नित्यसत्यमभिधीयते कथम् ॥

महर्षेः.

834

एतदत्र पथिकैकजीवितं
पश्य शुष्यति कथं महत्सरः ।
धिङ्मुधाम्बुधर रुद्धसन्तति-
र्वर्धिता किमिह हट्टवाहिनी ॥

प्रकाशवर्षस्य.

835

स्वार्थानपेक्षं जनतापशान्त्यै
नित्योदिताः सन्ति पयोमुचोमी ।
विवर्षिणस्तानवगृह्णते ये
सन्त्येव ते केपि महानुभावाः ॥

836

क्व दृष्टमन्धेन बलाहकेन
घ्रातुं गवा यत्र तृणं निघृष्टम् ।
महातरुर्बन्धुरिवाध्वगाना-
मायात्यवश्यायकणैर्दरिद्रः ॥

कस्यापि.

837

उत्तुङ्गशैलशिखराश्रयणेन केचि-
दुद्दामवीचिवलिताः सरितो भवन्ति ।
अन्ये पुनर्जलकणास्तृणलोष्टपाता-
दम्भोमुचां पयसि न क्षयमाप्नुवन्ति ॥

कस्यापि.

838

यत्रोषितोसि चिरकालमकिंचनः स-
वर्णःप्रतिग्रहधनग्रहणाधमर्णः ।
निर्लज्ज गर्जसि समुद्रतटेपि तत्र
धृष्टोधमस्तव समो ब्रन नैव दृष्टः ॥

839

आस्यं निरस्य रसितैः सुचिरं विहस्य
गात्रान्तरेषु घन वर्षसि चातकस्य ।
तच्चञ्चुकोटिकुटिलायतकंधरस्य
प्राणात्ययोस्य भवतः परिहासमात्रम् ॥

अह्लणस्य.

840

आक्रम्योच्चैः शिरसि वसतिर्भूभृतामुन्नतानां
तोयादानं तदपि जलधेर्लोकसंतापशान्त्यै ।
दीर्घा छाया प्रकृतिमहति व्योम्नि चाभोगबन्धो
हे हे मेघ स्पृहयति न ते कः किलेत्थं व्रताय ॥

841

कृत्वा चुम्बनमम्बरेतिगहने विद्योत्य विद्युल्लता
जाड्यादूर्जितगर्जितेन बहुधा स्पर्धां च कृत्वा घनैः ।
तत्पश्चान्नयता रजोपि न शमं भूमौ घनेनामुना
हासायैव कृतं यथोन्नतिभृतः सर्वे चिरं लज्जिताः ॥

वृद्धेः

842

साधूत्पातघनौघ साधु सुधियां ध्येयं धरायामिदं
कोन्यः कर्तुमलं तवैव घटते कर्मेदृशं दुष्करम् ।
सर्वस्यौपयिकानि यानि कतिचित्क्षेत्राणि तत्राशनिः
सर्वानौपयिकेषु दग्धसिकतारण्येष्वपां वृष्टयः ॥

843

भेकैः कोटरशायिभिर्मृतमिव क्ष्मान्तर्गतं कच्छपैः
पाठीनैः पृथुपङ्ककूटलुठितैर्यस्मिन्मुहुर्मूर्छितम् ।
तस्मिञ्छुष्कसरस्यकालजलदेनागत्य तच्चेष्टितं
येना कण्ठनिमग्नवन्यकरिणां यूथैः पयः पीयते ॥

दाक्षिणात्यस्य.

844

बद्धभृतो लघुगुणैरपि बद्धमूल-
मापादितानि सहसैव तृणैः शिरांसि ।
अम्भोमुचः प्रचुरवर्षविसृष्टकूलस्य
यच्चेष्टितं दुरवधारगतेर्जलस्य ॥

श्रीजयवर्धनस्य.

845

कृच्छ्राद्दत्ते विरलविरलान्वारिबिन्दून्प्रवृद्धो
गर्जत्येकः सरभसतरं पश्य तन्मात्रलाभात् ।
नृत्यत्यन्योऽप्यतुलमहिमश्लाघ्यभूमिर्न जाने
मध्यादाभ्यां विपुलहृदयश्चातकः किं नु मेघः ॥

कस्यापि.

846

गवास्ते जीमूताः स्फुरदलिकुलश्यामवपुषः
श्रिया येषां लोके स्थलजलविभागोऽप्यपहृतः ।
वृथा तृष्णान्धः किं भ्रमसि विधुरश्चातकशिशो
शरज्जीमूतेभ्यं कुव इह पयोबिन्दुरपि ते ॥

विश्रान्तिवर्मणः.

847

पश्यामः किमयं विचेष्टत इति स्वल्पाभ्रसिद्धिक्रियै-
र्दर्पाद्दूरमुपेक्षितेन बलवत्कर्मेरितैर्मन्त्रिभिः ।
लब्धात्मप्रसरेण रक्षितुमथाशक्येन मुक्ताशनि
स्फीतस्तावदहो घनेन रिपुणा दग्धो गिरिग्रामकः ॥

भट्टभल्लटस्य

848

गर्जित्वा बहु संनिरुध्य गगनं प्रच्छाद्य दिङ्मण्डलं
संपाद्योद्दलितेन्द्रनीलशकलश्यामाभिरामं वपुः ।
प्राप्ते वारिधरागमेपि सलिलं तस्त्यक्तमम्भोमुचा
चञ्चूश्चातकपोतकस्य सकला सिक्ता न येन स्वयम् ॥

कस्यापि.

849

अत्रोत्पातघनेन मन्त्रिविकले शून्याम्बरव्यापिना
धृष्टस्वप्रकृतिक्रियासमुचिते ग्रामे तथा जृम्भितम् ।
रथ्याकर्दमवाहिनामतिशुचिस्वच्छात्मनामन्तरं
नाप्यज्ञायि जनैर्यथौघपयसां स्रोतोजलानामपि ॥

भट्टवृद्धेः.

850

रे मेघाः स्वशरीरदानगुरु किं बौद्धं यशो न श्रुतं
युष्माभिः किमु पारिजातचरितं नाकर्णितं वा क्वचित् ।
येनैतत्सुखलभ्यमम्बु ददतां युष्माकमुद्गर्जतां
नो लज्जाप्यभिजायतेतिरभसाद्व्योम्न्युद्धतं धावताम् ॥

कलशकस्य.

851

स्थाने वर्षति नैव गर्जति वृथा क्लान्तिं हरत्यञ्जसा
क्षेत्राणां परितापजर्जररुचां क्षेमंकरः क्ष्मातले ।
यद्यद्भद्रकसान्द्रतां हृदि दधात्यन्यत्करोत्युल्लस-
न्सन्मेघोयममोघदर्शनघनास्निग्धच्छविर्वर्धताम् ॥

852

नो गर्जत्यम्बुराशिस्त्रिजगदधिपतिप्रार्थितार्थप्रदान-
व्यापारस्फीतकीर्तिः स्फुरदनलशिखानर्घरत्नैकपूर्णः ।
तत्तोयस्तोकमात्रव्यपहृतविकृतिः प्राकृतोयं प्रकृत्या
शून्ये क्षिप्ताम्बु गर्जत्यगणितनिधनो वारिवाहः सगर्वम् ॥

एतावमृतवर्धनस्य.

अथ समुद्रः

853

न पालयति मर्यादां वेलाख्यामम्बुधिस्तथा ।
तृष्यतां नोपकर्तव्यमितीमामपरां यथा ॥

भा॰ अमृतदत्तस्य.

854

गवादीनां पयोन्येद्युः सद्यो वा दधि जायते ।
क्षीरोदधेस्तु नाद्यापि महतां विकृतिः कुतः ॥

855

यद्यपि स्वच्छभावेन दर्शयत्युदधिर्मणीन् ।
तथापि जानुदघ्नोयमिति चेतसि मा कृथाः ॥

856

यस्याम्बुकणिकाप्यास्ये न पतत्यर्थिनां क्वचित् ।
कष्टमम्भोनिधिः सोपि नदीन इति कथ्यते ॥

857

यातु नाशं समुद्रस्य महिमा स भुवि श्रुतः ।
वाडवः क्षुत्पिपासार्तो येनैकोपि न तर्पितः ॥

858

अमृतरसविसरवितरणमरणोत्तारितसुरे सति पयोधौ ।
कस्य स्फुरन्ति हृदये मीष्मतडाका भुवि वराकाः ॥

एते केषांचित्.

859

यदयं शशिशेखरो हरो
हरिरप्येष यदीशिता श्रियः ।
अमरा अपि यत्सुरा अमी
तदिमास्तस्य विभूतिविप्रुषः ॥

रत्नाकरस्य.

860

क्षारतैव हि गुणस्तथास्ति ते
येन न व्रजति कश्चिदन्तिकम् ।
भीषणाकृति बिभर्षि यादसां
चक्रमर्णव किमर्थमग्रतः ॥

प्रकाशवर्षस्य.

861

अपास्य लक्ष्मीहरणोत्थवैरिता-
मचिन्तयित्वा च तदद्रिमन्थनम् ।
ददौ निवासं हरये महोदधि-
र्विमत्सरा धीरधियां हि वृत्तयः ॥

कस्यापि.

862

जितेन्दुभासो नयतां मणीनध-
स्तृणानि मूर्ध्ना बिभृतां जलेश्वरः ।
प्रभोर्न कश्चित्प्रभुरस्ति तत्त्वतो
रत्नानि रत्नानि तृणं तृणं पुनः ॥

पुण्यस्य.

863

ग्रीष्मं द्विषन्तु जलदागममर्थयन्तां
ते संकटप्रकृतयः कृपणास्तडागाः ।
अब्धेस्तु मुग्धशफरीचटुलाचलेन्द्र-
निष्कम्पकुक्षिपयसो द्वयमप्यचिन्त्यम् ॥

कस्यापि.

864

ग्रावाणो मणयो हरिर्जलचरो लक्ष्मीः पयोमानुषी
मुक्तौघः सिकता प्रवाललतिकाः शेवालमम्भः सुधा ।
तीरे कल्पमहीरुहाः किमपरं नामापि रत्नाकरो
दूरात्कर्णरसायनं निकटतस्तृष्णापि नो शाम्यति ॥

कस्यापि.

865

आस्तां क्लमापहरणं जलधेर्जलेन
दूरे दवाग्निपरिदीपितमानसानाम् ।
एतावदस्तु यदि तोयकणैर्न जिह्वा
दन्दह्यते द्विगुणतां च न याति तृष्णा ॥

रत्नाकरस्य.

866

रत्नान्यमूनि मकरालय मावमंस्थाः
कल्लोलवेल्लितदृषत्परुषप्रहारैः ।
किं कौस्तुभेन विहितो भवतो न नाम
याच्ञाप्रसारितकरः पुरुषोत्तमोपि ॥

भा॰ त्रिविक्रमस्य.

867

लज्जामहे वयमहो भृशमप्यनेके
सांयात्रिकाः सलिलराशिममी विशन्ति ।
स्कन्धाधिरोपिततदीयतटोपकण्ठ-
कौलेयकाम्बुदृतयो यदुदीर्णतृष्णाः ॥

प्रकाशवर्षस्य.

868

आ स्त्रीशिशुप्रथितयैष पिपासितेभ्यः
संरक्ष्यतेम्बुधिरपेयतयैव दूरात् ।
दृष्ट्वा करालमकरालिकरालिताभिः
किं भाययस्यपरमूर्मिपरम्पराभिः ॥

भल्लटस्य.

869

धिग्धिग्धिगम्बुधिममी निरपत्रपस्य
यस्याध्वगा मरुभुवीव नितान्ततान्ताः ।
तृड्दाहशुष्कगलनिर्गतदीर्घजिह्वा
दीना विवर्तितदृशोनुतटं प्रयान्ति ॥

870

निर्मथ्यते यदि सुरासुरसैन्यसंघै-
रापूर्यते यदि जलैर्जलदापगाभिः ।
पेपीयते च वडवामुखवह्निना चे-
न्न क्षुभ्यति स्म जलधिर्न तनुत्वमेति ॥

871

मैनाकादिभिरद्रिभिर्मघवतः संत्रस्य यत्रास्यते
चण्डार्चिर्भगवानुदेति च यतो यत्रास्तमभ्येति च ।
शेते क्वापि निलीय यस्य जगतां कुक्ष्येकदेशे पति-
र्गाम्भीर्यश्रियमस्य कस्तुलयितुं वारां निधेरर्हति ॥

872

उपकृतवता श्रीरत्नाभ्यां हरेः शशिलेखया
मनसिजरिपोः पीयूषेणाप्यशेषदिवौकसाम् ।
कथमितरथा तेन स्थेयं यशोभरमन्थरं
यदि न मथनायासं धीरः सहेत पयोनिधिः ॥

एते केषांचित्.

873

विषमभिमुखं मुक्तं रौद्रं दिशो दश संश्रिताः
शशितरुमणिप्रायैः प्रायः प्रलोभनमाहितम् ।
किमिव न कृतं मन्थारम्भे शठेन पयोधिना
तदपि निपुणैर्नास्य क्षान्तं सुरैरमृतं विना ॥

874

यदिह भवतो गाम्भीर्येण प्रयाति महत्तया-
प्यनुचितगुणारम्भः कालः किमेतदनन्तरम् ।
अयि जलनिधे किं कल्लोलैरलब्धसमाभिभि-
र्विरम सरितामेतत्तोयं न तेऽस्ति मनागपि ॥

एतौ शङ्कुकस्य.

875

समाश्रित्योत्सङ्गं विवृतवदनस्यास्य वसतः
क्षणेनैकस्यान्तर्ज्वलितवपुषो यत्क्षणमपि ।
न तृष्णामौर्वाग्नेरपनयति पुष्टेपि विभवे
नृशंसस्याम्भोधेर्व्रजतु विलयं सोस्य महिमा ॥

876

अहो बत सरित्पतेरिदमनार्यरूपं परं
यदुज्ज्वलरुचीन्मणीन्सुचिरचर्चितास्थागुणान् ।
जडैरनुपयोगिभिः परत एत्य लब्धास्पदैः
क्षिपत्यनिशमूर्जितैर्झगिति तन्मयत्वं गतः ॥

कयोरपि.

877

इहैकश्चूडालोभ्यजनि कलशाद्यस्य सकलैः
पिपासोरम्भोभिश्चुलुकमपि नो भर्तुमशकः ।
स्वमाहात्म्यश्लाघागुरुगहनगर्जाभिरभितः
कुषित्वा क्लिश्नासि श्रुतिकुहरमब्धे किमिति नः ॥

भल्लटस्य.

878

रूक्षं क्षारमपेयमत्र सलिलं लब्ध्वा परं तप्यते
व्यालग्राहभियावगाहनमपि स्वस्थेन नासाद्यते ।
तत्किं पान्थ पयोधिनामनि मरौ तृष्णाविमूढो भवा-
नन्तर्निह्नुतिनाशितामलमणिव्राते मुधा धावसि ॥

वृद्धेः.

879

सर्वासां त्रिजगत्यपामियमसावाधारता तावकी
प्रोल्लासोयमसौ तवाम्बुनिलये सेयं महासत्त्वता ।
सेवित्वा बहुभङ्गभीषणतनुं त्वामेव वेलाचल-
ग्रावस्रोतसि पाप तापकलहो यत्क्वापि निर्वाप्यते ॥

भल्लटस्य.

880

कल्लोलैर्विकिरत्वसौ गिरिवरान्वेलाविलासोत्थितैः
शब्दैर्वा बधिरीकरोतु ककुभो धत्तां च विस्तीर्णताम् ।
पान्थानां रवितापतप्तवपुषां तृष्णातिरेकच्छिदः
किं साम्यं प्रतनोः करोतु सरसोप्यब्धिः कृताडम्बरः ॥

881

दत्तं येन सुधानिधानमसमं सत्त्वाधिकेनार्थिने
श्रीवासोपि महामणिर्विधुरसौ कल्पद्रुमो गौस्तथा ।
शापात्क्षारजलस्तथापि जलधिः प्राप्तायशा इत्यहो
लोकोयं तृणवद्गुणं विगणयन्दोषमहैकाग्रधीः ॥

एतौ कलशकस्य.

882

हा कष्टं तटवासिनोपि विफलप्राग्भारमालोक्य मा-
मन्यत्रैव पिपासवः प्रतिदिनं गच्छन्त्यमी जन्तवः ।
इत्थं व्यर्थजलातिभारवहनप्रोद्भूतखेदादिव
स्वां मूर्तिं वडवानले जलनिधिर्मन्ये जुहोत्यन्वहम् ॥

883

मर्यादापरिपालनेन महतां क्षौणीभृतां रक्षणा-
द्विभ्रान्त्या मधुसूदनस्य सुचिरं यत्किंचिदासादितम् ।
गाम्भीर्योचितमात्मनो जलधिना मन्थव्यथासंभ्रमा-
द्देवेष्वर्पयतामृतं द्रुतमहो सर्वं तदुत्पुंसितम् ॥

884

आश्चर्यं वडवानलः स भगवानाश्चर्यमम्भोनिधि-
र्यत्कर्मातिशयं विचिन्त्य मनसः कम्पः समुत्पद्यते ।
एकस्याश्रयघस्मरस्य पिबतस्तृप्तिर्न जाता जलै-
रन्यस्यापि महात्मनो न वपुषः स्वल्पोपि जातः श्रमः ॥

885

नोद्वेगं यदि यासि यद्यवहितः कर्णं ददासि क्षणं
त्वां पृच्छामि यदम्बुधे किमपि तन्निश्चित्य देह्युत्तरम् ॥

नैराश्यानुशयातिमात्रनिशितं निःश्वस्य यद्दृश्यसे
तृष्यद्भिः पथिकैः कियत्तदधिकं स्यादौर्वदाहादतः ॥

886

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनां शिखरिणां गणाः शेरते ।
इतश्च वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥

887

वैकुण्ठायश्रियमभिनवं शीतभानुं भवाय
प्रादादुच्चैःश्रवसमपि वा वज्रिणे तत्क गण्यम् ।
तृष्णार्ताय स्वमपि मुनये यद्ददाति स्म देहं
कोन्यस्तस्माद्भवति भुवनेष्वम्बुधेर्बोधिसत्त्वः ॥

888

रत्नोज्ज्वलाः प्रविकिरल्लँहरीः समीरै-
रब्धिः क्रियेत यदि रुद्धतटाभिमुख्यः ।
दोषोर्थिनः स खलु भाग्यविपर्ययाणां
दातुर्मनागपि न तस्य तु दातृतायाः ॥

889

अन्तर्ये सततं लुठन्त्यगणितास्तानेव पाथोधरै-
रात्तानापततस्तरङ्गवलयैरालिङ्ग्य गृह्णात्यसौ ।
व्यक्तं मौक्तिकरत्नतां जलकणान्संप्रापयत्यम्बुधिः
प्रायोन्येन कृतादरो लघुरपि प्राप्नोच्यते स्वामिभिः ॥

वल्लणस्य.

890

स्वस्त्यस्तु विद्रुमलताद्रुमनोमणिभ्यः
कल्याणिनी भवतु मौक्तिकशुक्तिपङ्क्तिः ।
प्राप्तं मया सकलमेव फलं पयोधे-
र्यद्दारुणैर्जलचरैर्न विदारितोस्मि ॥

956

गन्धैकसारो विफलः सेव्यश्चन्दनपादपः ।
भुजंगाः पवनाहाराः सेवकाः सदृशो विधिः ॥

लुट्टकस्य.

957

क्व गतो मृगो न जीवत्यनुदिनमश्नंस्तृणानि विविधानि ।
स्वयमाहतगजभोक्तुः सिंहस्य तु दुर्लभा वृत्तिः ॥

भट्टार्कस्य.

958

वक्रमशय्यासंस्थितमन्तःकोटरमनेकदुर्ग्रन्थि ।
प्रगुणीकर्तुं शक्तो दुर्दारु न विश्वकर्मापि ॥

कस्यापि.

959

न तदनुकृतं मनागपि न वा जलं सुचिरसेवितैः शीतम् ।
अन्धीकृते कुदीपैः प्रत्युत धूमेन मे नयने ॥

प्रकाशवर्षस्य.

960

उत्सन्नमापणममुं द्रक्ष्यामो निर्मलैः कदा नयनैः ।
चिन्तामणिकाचकणौ विपरीतगुणागुणौ यत्र ॥

भट्टवासुदेवस्य.

961

उज्ज्वलचम्पकमुकुलाशङ्कितया यः प्रदीपकं स्पृशति ।
कज्जलकलङ्कदाहं मुक्त्वान्यत्तस्य किं घटताम् ॥

कस्यापि.

962

शिखरी चितशिखरशिखः स्फुरदौर्वशिखाकदम्बकोम्बुनिधिः ।
कस्यापि लङ्घनीयौ न तु नगरावकरनिकरोयम् ॥

भट्टवृद्धेः.

963

फणमणिभासुरगुरुतरसमर्थबहुमस्तके शेषे ।
कः क्षितिभरमुद्वोढुं प्रार्थयते कृपणफणिकीटान् ।

964

यत्नादपि कः पश्येच्छिखिनामाहारनिःसरणमार्गम् ।
यदि जलदनिनदमुदितास्त एव मूढा न नृत्येयुः ॥

कयोरपि.

965

शरदि समग्रनिशाकरकरशतहततिमिरसंचया रजनी ।
जलदान्तरितार्कामपि दिवसच्छायां न पूरयति ।

विद्याधिपतेः.

966

मृदुसुभगपरिकररुचोऽप्यनुचितमिदमेकमेव मदनस्य ।
यदनेन कृतः केतौ मकरो दंष्ट्राकरालमुखः ॥

भा॰ अमृतदत्तस्य.

967

हेमकार सुधिये नमोऽस्तु ते
दुस्तरेषु बहुशः परीक्षितुम् ।
काञ्चनाभरणमश्मना समं
यत्त्वयैतदधिरोप्यते तुलाम् ॥

968

वृत्त एव स घटोऽन्धकूप य-
स्त्वत्प्रसादमपनेतुमक्षमः ।
मुद्रितं त्वधमचेष्टितं त्वया
तन्मुखाम्बुकणिकाः प्रतीच्छता ॥

969

शतपदी सति पादशते क्षमा
यदि न गोष्पदमप्यतिवर्तितुम् ।
किमियता द्विपदस्य हनूमतो
जलधिविक्रमणे विवदामहे ॥

970

न गुरुवंशपरिग्रहशौण्डता
न च महागुणसंग्रहणादरः ।

नास्त्येव हि त्वदधिरोपणपुण्यबीजं
सौभाग्ययोग्यमिह कस्यचिदुत्तमाङ्गम् ॥

903

चिन्तामणेस्तृणमणेश्च कृतं विधात्रा
केनोभयोरपि मणित्वमदः समानम् ।
नैकोर्थितानि ददर्थिजनाय खिन्नो
गृह्णञ्जरत्तृणलवं न तु लज्जितोन्यः ॥

भल्लटस्य.

904

मनोरथशतैर्वृतो भुवननाथचूडोचित-
स्तृणैरलमधः कृतः कृतपदः क्वचिद्ग्रावसु ।
व्रजत्यपि सचेतसां विषयमीदृशां यो दृशो
लुठत्यचलकंदरे विधुर एष चिन्तामणिः ॥

आनन्दवर्धनस्य.

905

परामृषति सस्पृहं मुहुरपेलवं वीक्षते
महत्किमपि रत्नमित्यसमसंमदं गूहते ।
कुतोपि परिलेपवच्छविमवाप्य काचोपले
वहत्यतिकदर्थनां बत वराककः पामरः ॥

कह्लणस्य.

906

किरणनिकरैराशाचक्रं चिरं परिपूरय-
न्किमिह गहने भ्रातर्व्यर्थं समुल्लसितो भवान् ।
क इह भवतो वेत्त्यत्यन्तं निसर्गमहार्घतां
मरकतमणे दग्धग्रामे हतादरपामरे ॥

भट्टगोविन्दराजस्य.

907

दूरे कस्यचिदेष कोप्यकृतधीर्नैवास्य वेत्त्यन्तरं
मानी कोपि न याचते मृगयते कोप्यल्पमल्पाशयः ।

इत्थं प्रार्थितदानदुर्व्यसनिनो नौदार्यरेखोज्ज्वला
जाता नैपुणदुस्तरेषु निकषा स्थानेषु चिन्तामणेः ॥

भल्लटस्य.

908

ये गृह्णन्ति हठात्तृणानि मणयो ये चाप्ययःपिण्डिकां ।
ते दृष्टाः प्रतिधाम दग्धमणयो विच्छिन्नसंख्याश्चिरम् ।
नो जाने किमभावतः किमथवा दैवादिह श्रूयते
नामाप्यत्र न तादृशस्य तु मणे रत्नानि गृह्णाति यः ॥

शङ्कुकस्य.

909

यन्मुक्तामणयोम्बुधेरुदरतः क्षिप्ता महावीचिभिः
पर्यन्तेषु लुठन्ति निर्मलरुचा स्पष्टाट्टहासा इव ।
तत्तस्यैव परिक्षयाज्जलनिधेर्द्वीपान्तरालम्बिनां
रत्नानां तु परिग्रहव्यसनिनः सन्त्येव सांयात्रिकाः ॥

कस्यापि.

910

माणिक्योयं महार्घः क्षितितलमहितो दीप्तिमानुच्चजन्मा
दृष्ट्वैनं नूनमाराद्व्यपसरतितरां कापि दौर्गत्यनीतिः ।
इत्थं भ्रान्तिप्रपञ्चैर्विपदपहतये केनचित्स्थापितः स-
न्नन्ते दृष्टः स एव व्रणशतपरुषः कोपि पाषाणखण्डः ॥

अर्थवर्मणः.

911

यामः स्वस्ति तवास्तु रोहणगिरे मत्तः स्थितिप्रच्युता
वर्तिष्यन्त इमे कथं कथमिति स्वप्नेपि मैवं कृथाः ।
श्रीमंस्ते मणयो वयं यदि भवल्लब्धप्रतिष्ठास्तदा
ते शृङ्गारपरायणाः क्षितिभुजो मौलौ करिष्यन्ति नः ॥

गोविन्दराजस्य.

अथ शङ्खः

912

उच्चैरुच्चरतु चिरं चीरी वर्त्मनि तरुं समारुह्य ।
दिग्व्यापिनि शब्दगुणे शङ्खः संभावनाभूमिः ॥

आ° जयवर्धनस्य.

913

शङ्खोस्थिशेषः स्फुटितो मृतो य-
दुच्छ्वासितेनोच्छ्वसते नु सत्यम् ।
किं तूच्चरत्येव न सोस्य शब्दः
श्रव्यो न यो यो न सदर्थशंसी ॥

भल्लटस्य.

914

प्राणान्विहाय धवलत्वगुणोचितानि
प्राप्तानि यज्जगतिवक्रविशेषयोगात् ।
शङ्खैर्महाविभवशब्दविजृम्भितानि
तज्जीवितं सहृदयाः प्रभवन्ति येषाम् ॥

915

धीरः श्रोत्रसुखावहोपि सदृशः सत्यं परं मङ्गलं
क्वापि ग्रामसुराङ्गणे स तु लसन्संध्यासु शङ्खध्वनिः ।
माद्यन्मेदुरसारमेयसरलग्रीवाग्रदीर्घीभव-
न्नादो नाम कृतानुकारमुदितग्राम्याट्टहासाहतः ॥

जयवर्धनस्य.

916

रत्नाकराज्जनिभुवोप्यपचीयमानः
शुष्कास्थिशेषतनुतामपि लम्बमानः ।
श्वासैः सफूत्कृतिभिरप्युपहन्यमानः
शुद्धाशयो वदति मङ्गलमेव शङ्खः ॥

कस्यापि.

917

शङ्खाः सन्ति सहस्रशो जलनिधेर्वीचिच्छटाघट्टिताः
पर्यन्तेषु लुठन्ति ये दलशतैः कल्माषितक्ष्मातलाः ।
एकः कोपि स पाञ्चजन्य उदभूदाश्चर्यभूतः सतां
यः संवर्तभरक्षमैर्मधुरिपोः श्वासानिलैः पूर्यते ॥

कविरत्नकस्य.

918

सर्वाशापरिपूरि हुंकृतमदो जन्मापि दुग्धोदधे-
र्गोविन्दाननचुम्बि सुन्दरतरं पूर्णेन्दुबिम्बाद्वपुः ।
श्रीरेषा सहजा गुणाः किमपरं भण्यन्त एते हि य-
त्कौटिल्यं हृदि पाञ्चजन्य भवतस्तेनातिलज्जामहे ॥

भट्टेन्दुराजस्य.

अथ पद्माः

919

वरमश्रीकतैवास्तु नेतरश्रीसमानता ।
इति कैरवकोड्रेदे कमलं मुकुलायते ॥

जयवर्धनस्य.

920

लक्ष्मीसंपर्करूपोयं दोषः पद्मस्य निश्चितम् ।
यदयं गुणसंदोहधामनीन्दौ पराङ्मुखः ॥

प्रकाशवर्षस्य.

921

अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य मा भूवन्भङ्गुरा गुणाः ॥

भट्टभल्लटस्य.

922

किं दीर्घदीर्घेषु गुणेषु पद्म
सितेष्ववच्छादनकारणं ते ।

अस्त्येव तान्पश्यति चेदनार्या
ग्रस्तेव लक्ष्मीर्न पदं विधत्ते ।

भल्लटस्य.

923

स्थलकुशेशय संचिनु कण्टका-
न्प्रथय पङ्ककुलोद्भवतां मुदा ।
अपि बधान धृतिं जलसंगमे
व्रजसि येन परास्पदतां श्रियः ॥

924

अक्षेष्वियं व्यसनिता हृदये यदेते
रागो घनो मधुमदोत्कटमाननं च ।
पद्मस्तथापि परमास्पदमेव लक्ष्म्या-
स्तदैन्यमेव किल दुर्भगता यदेभिः ॥

लुहकस्य.

925

पद्मादयो बहुगुणा अपि यन्निशासु
नाशं न यान्ति विरहेण दिवाकरस्य ।
तत्पङ्कसंकरजलाशयजन्मजाड्य-
ज्यायोविजृम्भितमिदं त्रिजगत्प्रतीतम् ॥

926

लक्ष्मीं विशेषय कुशेशय कौशलाङ्कां
जृम्भां जहीहि चलतां च विमुञ्च किंचित् ।
आशागतान्यलिकुलानि मुदं नयेह
मित्रे विधौ सति विधत्स्व यथेष्टमेतत् ॥

एतौ धर्मदेवस्य.

927

नित्यं तथा शृणु कुशेशय मद्वचांसि
स्नेहेन यानि भवतः कथयामि किंचित् ।

कान्त्यामया विमलया भ्रमरैर्गुणैर्वा
किं यासि रम्यतमतामुत कण्टकर्द्धैः ॥

भा° श्रीशूरस्य.

928

संकोचमेहि बिसपुष्प जहीहि शोभां
दोषाकरोयमधुना समुदेति पश्य ।
वक्रात्मनि प्रभवति क्रमशो विचिन्त्य
प्रच्छन्नता गुणवतां स्वयमेव योग्या ॥

929

त्रुटद्गुणोपि बहुकण्टकतां गतोपि
रन्ध्रान्वितोपि हतकर्दमसंभवोपि ।
भृङ्गोपभोग्यविभवोपि तथापि पद्मो
मित्रोदये विकसनं लभते सदैव ॥

कयोरपि.

930

कामं भवन्तु मधुलम्पटषट्पदौघ-
संघट्टघुंघुमघनध्वनयोब्जखण्डाः ।
गायन्नतिश्रुतिसुखं विधिरेव यत्र
भृङ्गः स कोपि धरणीधरनाभिपद्मः ॥

भट्टवासुदेवस्य.

931

तापापहे सहृदये रुचिरे प्रबुद्धे
मित्रानुरागनिरते धृतसद्गुणौघे ।
स्वाङ्गप्रदानपरितोषितषट्पदेस्मि-
न्युक्तं तवेह कमले कमले स्थितिर्यत् ॥

श्रुतधरस्य.

932

न पङ्कादुद्भूतिर्न जडसहवासव्यसनिता
वपुर्दिग्धं कान्त्या स्थलनलिन रत्नद्युतिमुषा ।

व्यधास्यद्दुर्वेधा हृदयलघिमानं यदि न ते
त्वमेवैकं लक्ष्म्याः परममभविष्यः पदमिह ॥

श्रीजयवर्धनस्य.

933

उत्पन्ना बहवस्तलेषु सरसामम्भोरुहाणां चयाः
ये यामिन्यधिपानुकारिरमणीवक्त्रोपमानं गताः ।
नाभौ भीमरिपोरजायत महापद्मः स कोऽप्येकको
यस्त्रैलोक्यसमुद्भवप्रभवितुर्जन्मावनित्वं गतः ॥

934

पुष्पेऽन्यत्रावकाशो निपुणमपहृतः सौरभालोभनाभिः
स्वाभोगेन्तःप्रवेशोऽप्यशिथिलनिविडः कोशभावाच्च दत्तः ।
नीत्वा नैराश्यमित्थं गलितगतिरसौ मुग्धबुद्धिः प्रदोषे
पद्मेन श्रीमतापि प्रसभमुभयतो भ्रंशितः पश्य भृङ्गः ॥

कस्यचित्.

935

भ्रातः पङ्कज संकोचः कंचित्कालं विषह्यताम् ।
सैव प्रभाते शोभा ते भाते दिनकरे भवेत् ॥

936

अधोगतिं च संप्राप्य बिसाः पङ्ककलङ्किताः ।
गुणिनो निर्गुणैर्दोषैः कृशाः स्वाङ्कुरदर्शिताः ॥

937

तदङ्कुराणि पद्मानि गुणैर्युक्तानि मानिभिः ।
शिरसा धार्यमाणानि मीलितानि जडात्मना ॥

अथ मरुः

938

मरौ नास्त्येव सलिलं कृच्छ्राद्यद्यपि लभ्यते ।
तत्कटु स्तोकमुष्णं च न करोति वितृष्णताम् ॥

कस्यापि.

939

चटुलचातकचञ्चुपुटात्पत-
ज्जलकणोपि मरोरतिगोचरः ।
स पुनरद्य घनागमबन्धुना
जलधरेण जलैरपरः कृतः ॥

छांकस्य.

940

किं पान्थ निर्मथनसिद्ध्युपयोगिवस्तु-
संभारशालिनि मरौ सुगृहीतनाम्नि ।
संदृश्यतेतिविपरीतमिदं हि तत्र
कूपोस्ति तत्र च जलं यदयत्नलभ्यम् ॥

अमृतदत्तस्य.

941

अस्मिन्मरौ किमपरं वचसामवाच्यं
मा मुञ्च पान्थ मुहुराश्रितवत्सलो भूः ।
एतत्त्वया जललवामिषलालसेन
दृष्टं ज्वलत्परिकरं सिकतावितानम् ॥

जयमाधवसूनीलोठकस्य.

942

सत्पादपान्विपुलपल्लवपुष्पभार-
संपत्परीतवपुषः फलभारनम्रान् ।
यो मञ्जुशिञ्जितशकुन्तशताश्रितोरु-
शाखान्मरौ मृगयते न ततोस्ति मुग्धः ॥

सुखशर्मणः.

943

जलतरुतृणशून्यः भ्राम्यतामध्वगानां
किमपि किल वताहं नोपकर्तुं समर्थः ।
इति न परमभीक्ष्णं नानुशेते न याव-
च्छंठमरुरनृताम्भःप्राप्तये तान्प्रयुङ्क्ते ॥

श्री हस्त्युच्यमानानन्दस्य.

944

गतमतिजवाक्रान्तं भ्रान्तं समुत्कषिता च भू-
श्चिरतरमथो निःश्वस्याथो सदैन्यमवस्थितम् ।
किमिव न कृतं पान्थेनेत्थं तथापि शठो मरुः
प्रकृतिविरसः कष्टं यातो मनागपि नार्द्रताम् ॥

945

इतः काकानीकं प्रतिभयमितः कौशिककृता-
दितोमी गृध्राद्याः कुलमिदमितः कङ्कवयसाम् ।
श्मशानस्थानेस्मिन्नखिलगुणवन्ध्ये हततरा-
वपि क्लिन्नाः केचिन्न खलु कलवाचः शकुनयः ॥

कयोश्चित्.

946

किमसि विमतिः किं वोन्मादी क्षणादभिलक्ष्यसे
पुनरपि पुनः प्रेक्षापूर्वा न काचन ते क्रिया ।
स्वयमजलकां जानानोपि प्रविश्य मरुस्थलीं
शिशिरमधुरं वारि प्राप्तुं यदध्वग वाञ्छसि ॥

नरसिंहस्य.

947

परार्थे यः पीडामनुभवति भङ्गेपि मधुरो
यदीयः सर्वेषामिह खलु विकारोप्यभिमतः ।
न संप्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षोर्दोषोसौ न पुनरगुणाया मरुभुवः ॥

यशसः.

948

तापः स्वात्मनि संश्रितद्रुमलतादोषोध्वगैर्वर्जनं
सत्यं तीव्रतया तृषस्तव मरो कोसावनर्थोदयः ।
नन्वर्थः सुमहानयं जललवस्वाम्यस्मयोर्गर्जिनः
संनह्यन्ति यतस्तवोपकृतये धाराधराः प्राकृताः ॥

ईश्वरसूनोर्लोठकस्य

949

एवं चेद्विधिना कृतोस्युपकृतौ कस्यांचिदप्यक्षमः
कामं मोपकृथास्ततस्त्वं मरो वाच्यं न धीरो भव ।
किं त्वारान्मृगतृष्णयोपजनयन्नम्भोमुचां वञ्चनां
प्रेम्णा कर्षसि तर्षमूर्छितधियोप्यन्यानतः शोच्यसे ॥

भा° अमृतदत्तस्य.

950

आम्राः किं फलभारनम्रशिरसो रम्याः किमूष्मच्छिदः
सच्छायाः कदलीद्रुमाः सुरभयः किं पुष्पिताश्चम्पकाः ।
एतास्ता निरवग्रहोग्रकरभोल्लीढावरूढाः पुनः
शम्यो भ्राम्यसि मूढ निर्मरुति किं मिथ्यैव मर्तुं मरौ ॥

भल्लटस्य.

अथ संकीर्णवस्तुपद्धतिः

951

जलान्तराणि श्वभ्रेषु तिष्ठन्तु क्वापि यान्तु वा ।
सुरसिन्धुप्रवाहस्य सृतौ रत्नाकरोवधिः ॥

952

क्रान्तः शून्यो नडः क्वेक्षुस्तथापि सदृशाकृती ।
विवेकशून्यमनसां विप्रलम्भाय निर्मितौ ॥

953

नास्य भारग्रहे शक्तिर्न च वाहगुणः कृषौ ।
देवागारबलीवर्दस्तथाप्यश्नाति शोभनम् ॥

954

नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानाच्छुनापि परिभूयते ॥

955

वरमुन्नतलाङ्गूलात्सटाधूननभीषणात् ।
सिंहात्पादप्रहारोपि न सृगालाधिरोहणम् ॥

केषामपि.

956

गन्धैकसारो विफलः सेव्यश्चन्दनपादपः ।
भुजंगाः पवनाहाराः सेवकाः सदृशो विधिः ॥

लुब्धकस्य.

957

क्व गतो मृगो न जीवत्यनुदिनमश्नंस्तृणानि विविधानि ।
स्वयमाहतगजभोक्तुः सिंहस्य तु दुर्लभा वृत्तिः ॥

भट्टार्कस्य.

958

वक्रमशय्यासंस्थितमन्तःकोटरमनेकदुर्ग्रन्थि ।
प्रगुणीकर्तुं शक्तो दुर्दारु न विश्वकर्मापि ॥

कस्यापि.

959

न तदनुकृतं मनागपि न वा जलं सुचिरसेवितैः शीतम् ।
अन्धीकृते कुदीपैः प्रत्युत धूमेन मे नयने ॥

प्रकाशवर्षस्य.

960

उत्सन्नमापणममुं द्रक्ष्यामो निर्मलैः कदा नयनैः ।
चिन्तामणिकाचकणौ विपरीतगुणागुणौ यत्र ॥

भट्टवासुदेवस्य.

961

उज्ज्वलचम्पकमुकुलाशङ्कितया यः प्रदीपकं स्पृशति ।
कज्जलकलङ्कदाहं मुक्त्वान्यत्तस्य किं घटताम् ॥

कस्यापि.

962

शिखरी चितशिखरशिखः स्फुरदौर्वशिखाकदम्बकोम्बुनिधिः ।
कस्यापि लङ्घनीयौ न तु नगरावकरनिकरोयम् ॥

भट्टवृद्धेः.

963

फणमणिभासुरगुरुतरसमर्थबहुमस्तके शेषे ।
कः क्षितिभरमुद्वोढुं प्रार्थयते कृपणफणिकीटान् ।

964

यत्नादपि कः पश्येच्छिखिनामाहारनिःसरणमार्गम् ।
यदि जलदनिनदमुदितास्त एव मूढा न नृत्येयुः ॥

कयोरपि.

965

शरदि समग्रनिशाकरकरशतहततिमिरसंचया रजनी ।
जलदान्तरितार्कामपि दिवसच्छायां न पूरयति ।

विद्याधिपतेः.

966

मृदुसुभगपरिकररुचोप्यनुचितमिदमेकमेव मदनस्य ।
यदनेन कृतः केतौ मकरो दंष्ट्राकरालमुखः ॥

भा॰ अमृतदत्तस्य.

967

हेमकार सुधिये नमोस्तु ते
दुस्तरेषु बहुशः परीक्षितुम् ।
काञ्चनाभरणमश्मना समं
यत्त्वयैतदधिरोप्यते तुलाम् ॥

968

वृत्त एव स घटोन्धकूप य-
स्त्वत्प्रसादमपनेतुमक्षमः ।
मुद्रितं त्वधमचेष्टितं त्वया
तन्मुखाम्बुकणिकाः प्रतीच्छता ॥

969

शतपदी सति पादशते क्षमा
यदि न गोष्पदमप्यतिवर्तितुम् ।
किमियता द्विपदस्य हनूमतो
जलधिविक्रमणे विवदामहे ॥

970

न गुरुवंशपरिग्रहशौण्डता
न च महागुणसंग्रहणादरः ।

फलविधानकथापि न मार्गणे
किमिह लुब्धकबाल गृहेधुना ॥

971

तृणमणेर्मनुजस्य च तद्वतः
किमुभयोर्विपुलाशय तोच्यते ।
ननु तृणाग्रलवावयवैर्ययो-
रवसिते ग्रहणप्रतिपादने ॥

972

भ्रातः सुवर्णमयरूपकतारचित्रा-
लंकारयत्नघटनासु सुवर्णकार ।
दूरीकुरु भ्रममिहाद्य सुवर्णपात्रे
दुर्वर्णयोजयितुरस्ति महार्घलाभः ।

प° पाञ्चकस्य.

973

तनुतृणाग्रधृतेन हृताश्चिरं
क इह येन न मौक्तिकशङ्कया ।
स जलबिन्दुरतो विपरीतदृ-
ग्जगदिदं वयमत्र सचेतनाः ॥

974

रे दन्दशूक तदयुक्तमपीश्वरस्त्वां
वाल्लभ्यतो नयति नूपुरधाम सत्यम् ।
आवर्जितालिकुलसत्कृतिमूर्छितानि
किं शिञ्जितानि भवतः क्षम एष कर्तुम् ॥

एतौ भल्लटस्य.

975

सुवर्णकार श्रवणोचितानि
वस्तूनि विक्रेतुमिहागतोसि ।
अद्यापि नाभावि यदत्र पल्ल्यां
पल्लीपतिर्नूनमविद्धकर्णः ॥

976

तानुन्नतान्क्षितिभृतो ननु रूपयामः
पक्षक्षयव्यतिकरे मथितं तदोजः ।
युक्तं किमौर्वशिखिनः परिकोपितस्य
तेजस्विनोप्युदधिनिर्मथनं विसोढुम् ॥

जयवर्धनस्य.

977

चित्रं कियद्यदयमम्बुधिरम्बुदौघ-
सिन्धुप्रवाहपरिपूर्णतया महीयान् ।
त्वं त्वर्थिनामुपकरोषि यदल्पकूप
निष्पीड्य कुक्षिकुहरं हि महत्त्वमेतत् ॥

वल्लभदेवस्य.

978

धिग्वाडवं दहनमार्थितया विपक्ष-
मभ्येति यः स्वजठरप्रतिपूरणाय ।
धिग्वारिराशिमपि यस्तु तथाविधस्य
शत्रोर्जलैरपि न पूरयतेभिलाषम् ॥

979

शावान्कुलायकगतान्परिपातुकामा
नद्याः प्रगृह्य लघु पक्षपुटेन तोयम् ।
दावानलं किल सिषेच मुहुः कपोती
स्निग्धो जनो न खलु चिन्तयते स्वपीडाम् ॥

980

काकः स्वभावचपलः परिशुद्धवृत्ति-
र्लब्ध्वा बलिं स्वजनमाह्वयते परांश्च ।
चर्मास्थिमांसवति हस्तिकलेवरेपि
श्वा द्वेष्टि हन्ति च परान्कृपणस्वभावः ॥

केषामपि.

991

गृहं श्मशानं गजचर्म चाम्बरं
विलेपनं भस्म वृषश्च वाहनम् ।
कुबेर हे वित्तपते न लज्जसे
प्रियस्य ते सख्युरियं दरिद्रता ॥

992

नैकत्र शक्तिविरतिः क्वचिदस्ति सर्वे
भावाः स्वभावपरिनिष्ठिततारतम्याः ।
आकल्पमौर्वदहनेन निपीयमान-
मम्भोधिमेकचुलकेन पपावगस्त्यः ॥

993

विष्णुर्बिभर्ति भगवानखिलां धरित्रीं
तं पन्नगस्तमपि तत्सहितं पयोधिः ।
कुम्भोद्भवस्तमपिबत्खलु हेलयैव
सत्यं न कश्चिदवधिर्महतां महिम्नः ॥

कस्यापि.

994

आरोपितः पृथुनितम्बतटे तरुण्या
कण्ठे च बाहुलतया निविडं गृहीतः ।
उत्तुङ्गपीनकुचनिर्भरपीडितोयं
कुम्भः करीषदहनस्य फलानि भुङ्क्ते ॥

भट्टवर्धनस्य.

995

आबद्धकृत्रिमसटावलितांसभित्ति-
रारोप्यते मृगपतेः पदवीं यदि श्वा ।
मत्तेभकुम्भतटपाटनलम्पटस्य
नादं करिष्यति कथं हरिणाधिपस्य ॥

भल्लटस्य.

996

मुखमपि परिशिष्टं यस्य तेजःप्रसूतिं
खरकिरणमथेन्दुं ग्रासपात्रीकरोति ।
यदि किल वपुरस्य प्राभविष्यत्समग्रं
किमिव किमिव राहुर्नाकरिष्यत्तदानीम् ॥

कलशकस्य.

997

यत्पुष्पपल्लवफलाहितसाम्यमोहै-
र्न ज्ञायते शुक तव स्थितिरस्थितिर्वा ।
तद्दाडिमं त्यजसि नैव फलाशया त्व-
मर्थातुरो न गणयत्यपकर्षदोषम् ॥

कस्यापि.

998

वरमिह रवितापैः किं न शीर्णासि गुल्मे
किमु दवदहनैर्वा सर्वदाहं न दग्धा ।
यदहृदयजनौघैर्वृन्तपर्णानभिज्ञै-
रितरकुसुममध्ये मालति प्रोज्झितासि ॥

भट्टगोविन्दराजस्य

999

किमिदमुचितं शुद्धेः स्पष्टं सपक्षसमुन्नतेः
फलपरिणतेर्युक्तं प्राप्तुं गुणप्रणयस्य ते ।
क्षणमुपगतः कर्णोपान्तं परस्य पुरः स्थिता-
न्विशिख निपतन्क्रूरं दूरान्नृशंस निहंसि यत् ॥

भल्लटस्य.

1000

स हेमालंकारः क्षितिपतनलग्नेन रजसा
तथा दैन्यं नीतो नरपतिशिरःश्लाघ्यविभवः ।
यथा लोष्टभ्रान्तिव्यवहितविवेकव्यतिकरो
विलोक्यैनं लोकः परिहरति पादक्षतिभयात् ॥

1001

आहूतेषु विहंगमेषु मशको नायान्पुरोवार्यते
मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम् ।
खद्योतोपि न कम्पते प्रचलितुं मध्येपि तेजस्विनां
धिक्सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम् ॥

1002

एवं चेत्सरसस्वभावपरता जाड्यं किमेतादृशं
यद्यस्त्येव निसर्गतः सरलता किं ग्रन्थिमत्तेदृशी ।
मूलं चेच्छुचि पङ्कजश्रुतिरियं कस्माद्गुणा यद्यमी
किं छिद्राणि सखे मृणाल भवतस्तत्त्वं न मन्यामहे ॥

1003

त्वं भोगी यदि कुण्डली यदि भवांस्त्वं चेद्भुजंगः सखे
धत्से चेन्मुकुटं सरत्नमुरग स्वस्त्यस्तु ते किं ततः ।
अस्थाने यदि कञ्चुकं त्यजसि तन्नास्माकमत्र स्पृहा
किं तु क्रूरविषोल्कया दहसि यज्ज्ञातः क एष महः ॥

प° जगद्धरस्य.

1004

मौली सन्मणयो गृहं गिरिगुहा त्यागः किलात्मत्वचो
निर्यत्नोपनतैश्च वृत्तिरनिलैरेकत्र चर्येदृशी
अन्यत्रानृजु वर्त्म वाग्द्विरसना दृष्टौ विषं दृश्यते
यादृक्तामनु दीपको ज्वलति किं भोगिन्सखे किन्विदम् ॥

1005

भूयांस्यस्य मुखानि नाम विदितैवास्ते महासत्त्वता
कद्र्वाः प्राक्प्रसवोयमत्र कुपिते चिन्त्यं यथेदं जगत् ।
त्रैलोक्याद्भुतमीदृशं तु चरितं शेषस्य येनास्य सा
प्रोन्मृज्येव निवार्तिता विषधरज्ञानेपि दुर्वर्णिका ॥

1006

किं तेन हेमगिरिणा रजताद्रिणा वा
यस्याश्रयेण तरवस्तरवस्त एव ।

मन्यामहे मलयमेव यदाश्रितानि
शाखोटनिम्बकुटजान्यपि चन्दनानि ॥

1007

यान्दिग्ध्वैव कृता विषेण कुसृतिर्येषां कियद्गण्यते
लोकं हन्तुमनागसं द्विरसना रन्ध्रेषु ये जाग्रति ।
व्यालास्तेपि दधत्यमी सदसतोर्मूढा मणीन्मूर्धभि-
र्नौचित्याद्गुणशालिनां क्वचिदपि भ्रंशोस्त्यलं चिन्तया ॥

1008

तल्पत्यस्त्रतया धृतो न तु कृतः सम्यक्स्वतन्त्रो भया-
त्स्वस्थस्तान्प्रतिघातयेदिति यथाकामं न संपोषितः ।
संशुष्यन्वृषदंश एष कुरुतां मूकः स्थितोप्यत्र किं
गेहे किं बहुनाधुना गृहपतेश्चौराश्चरन्त्याखवः ॥

1009

स्वात्मीयान्न ददासि चेत्फणमणीन्मा दाः परार्थं परै-
र्यत्किंचिन्निहितं रुणत्सि किमिदं निध्यादि दुष्टाशय ।
एतत्तावदलं भवन्तमपरं पृच्छामि कस्माद्दहे
फूत्कारैर्विषवह्निवेगगुरुभिर्दन्दह्यसेमुं जनम् ॥

1010

निःसाराः सुतरां लघुप्रकृतयो योग्या न कार्ये क्वचि-
च्छुष्यन्तोद्य जरत्तृणाद्यवयवाः प्राप्ताः स्वतन्त्रेण ये ।
अन्तःसारपराङ्मुखेण धिगहो ते मारुतेनामुना
पश्यात्यन्तचलेन वर्त्म महतामाकाशमारोपिताः ॥

1011

ये जात्या लघवः सदैव गणनां याता न ये कुत्रचि-
त्पद्भ्यामेव विमर्दिताः प्रतिदिनं भूमौ निलीनाश्चिरम् ।
उत्क्षिप्ताश्चपलाशयेन मरुता पश्यान्तरिक्षे सखे
तुङ्गानामुपरि स्थितिं क्षितिभृतां कुर्वन्त्यमी पांसवः ॥

1012

अनीर्ष्याः श्रोतारो मम वचसि चेद्वच्मि तदहं
स्वपक्षाद्गेतव्यं बहु न तु विपक्षात्प्रभवतः ।
तमस्याक्रान्ताशे कियदपि हि तेजोवयविनः
स्वशक्त्या भासन्ते दिवसकृति सत्येव न पुनः ॥

1013

सांमुख्यं वस्तुजातं नयति ननु चिदीशस्य यद्दर्शनार्थं
नेत्रद्वन्द्वं किलैतद्विमलमिति ततोन्याङ्गसङ्गं विहाय ।
घ्राणं वंशाभिरामं परिमलनिरतं चक्षुषोर्मध्यभागे
नित्यं लीनं न चास्मिन्मृगसि नयनयोः श्वासमामुञ्च खिन्ने ॥

प° प्रशस्तकस्य.

1014

एतत्तस्य मुखात्कियत्कमलिनीपत्त्रे कणं पाथसो
यन्मुक्ताफलमित्यमंस्त स जडः शृण्वन्यदस्मादपि ।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनै-
स्तत्रोड्डीय गते हहेत्यनुदिनं निद्राति नान्तःशुचा ॥

1015

आस्तेत्रैव सरस्यहो बत कियान्संतोषपक्षग्रहो
हंसस्यास्य मनाङ्न धावति मतिः श्रीधाम्नि पद्मे क्वचित् ।
सुप्तोप्यापि विबुध्यते न तदितस्तावत्प्रतीक्षामहे
वेलामित्युषसि प्रिया मधुलिहः सोढुं त एव क्षमाः ॥

1016

वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः ।
तेपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै-
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते ॥

1017

नामाप्यन्यतरोर्निमीलितमभूत्तत्तावदुन्मीलितं
प्रस्थाने स्खलतः स्ववर्त्मनि विधेरन्यैर्गृहीतः करः ।

लोकश्चायमदृष्टदर्शनदशादृग्वैशसादुद्धृतो
युक्तं काष्ठिक लूनवान्यदसितामाम्रालिमाकालिकीम् ॥

1018

ऊढा येन महाधुरः सुविषमे मार्गे सदैकाकिना
सोढो येन कदाचिदेव न निजे गोष्ठेऽन्यशौण्डध्वनिः ।
आसीद्यश्च गवां गणस्य तिलकस्तस्यैव संप्रत्यहो
धिक्कष्टं धवलस्य जातजरसो गोः पण्यमुद्घोष्यते ॥

1019

भेकेन क्वणता सरोषपरुषं यत्कृष्णसर्पानने
दातुं कर्णचपेटमुज्झितभिया हस्तः समुल्लासितः ।
यच्चाधोमुखमक्षिणी पिदधता नागेन तत्र स्थितं
तत्सर्वं विषमन्त्रिणो भगवतः कस्यापि लीलायितम् ॥

1020

नित्यं तीर्थे निवासः प्रकृतिरतितरां स्निग्धमुग्धस्वभावा
वृत्तिर्दैवाद्धि वक्त्रे गगननिपतितैर्निर्मलैर्वारिलेशैः ।
इत्थं सर्वं विलोक्य प्रकटमिह तिमे मुग्धलोकेन लोके
साधुत्वं दर्शितं ते बहिरबहिरमी कण्टकाः केन दृष्टाः ॥

1021

मृत्योरास्यमिवाततं धनुरमी चाशीविषाभाः शराः
शिक्षा सापि जितार्जुना प्रतिभयं सर्वाङ्गनिम्ना गतिः ।
अन्तः क्रौर्यमहो शठस्य मधुरं हा हारि गेयं मुखे
व्याधस्यास्य यथा भविष्यति तथा मन्ये वनं निर्मृगम् ॥

एते भल्लटस्य.

1022

धिग्व्योम्नो महिमानमेतु दलशः प्रोच्चैस्तदीयं पदं
निन्द्यां दैवगतिं प्रयात्वभवनिस्तस्यास्तु शून्यस्य वा ।
येनोत्क्षिप्तकरस्य नष्टमहसः भ्रान्तस्य संतापिनो ।
मित्रस्यापि निराश्रयस्य न कृतं धृत्यै करालम्बनम् ॥

कस्यापि.

1023

दिग्दाहैकरते वनान्तकर ते ज्वाला न मे रोचते
दग्धुं स्वाश्रयमुद्यतस्य भवतो नेच्छन्ति वृद्धिं जनाः ।
मूलान्यस्य महीभृतो दलयितुं दुर्वेधसा निर्मितः
को वा न त्वयि शङ्कते खल जगत्खेदावहे दाव हे ॥

अमृतवर्धनस्य

1024

क्षुत्क्षामेण कथं कथंचिदनिशं गात्रं कृशं बिभ्रता
भ्रान्तं येन गृहे गृहे गृहवतामुच्छिष्टपिण्डार्थिना ।
अस्थ्नः खण्डमवाप्य दैवपतितं शून्यां त्रिलोकीमिमां
मन्वानो धिगहो स एव सरमापुत्रोद्य सिंहायते ॥

भट्टापराजितस्य

1025

शुष्कस्नायुवसावसेकमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधः शान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥

पञ्चतन्त्रे

1026

कालुष्यं पयसां विलोक्य शनकैरुड्डीय हंसा गता
धाराजर्जरकेसरास्फुटरुचः पद्मा निमग्ना जले ।
सा सर्वर्तुसुखावतारपदवी छन्ना तृणैर्नूतनैः
कष्टं तादृगपि स्वभावविमलं वृष्ट्यैव नष्टं सरः ॥

भट्टवृद्धेः

1027

ये संतोषसुखप्रबुद्धमनसस्तेषामभिन्नो मुदो
येप्येते धनलोभसंकुलधियस्तेषां तु दूरे नृणाम् ।
इत्थं कस्य कृते कृतः स विधिना तादृक्पदं संपदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥

कुलसूनोर्विद्याधरस्य

1028

द्रव्याणामधरोत्तरव्यतिकरो भग्नाशयानामधो
बीजानां नयनं स्वयं च निजवच्छिद्रक्रियान्वेषणम् ।
व्यूहाबन्धविधायिभिर्गतभयैर्मुग्धप्रसुप्तार्भकं
शून्यं प्राप्य निवासमाखुभिरहो किं किं न यद्यत्कृतम् ॥

धर्मदत्तस्य.

1029

अन्योन्यस्य लयं भयादिव महाभूतेषु यातेष्वलं
कल्पान्ते परमेक एव स तरुः स्कन्धोच्चयैर्जृम्भते ।
विन्यस्य त्रिजगन्ति कुक्षिकुहरे देवेन यस्यास्यते
शाखाग्रे शिशुनेव सेवितजलक्रीडाविलासालसम् ॥

त्रिविक्रमस्य.

1030

त्रैलोक्योपकृतिप्रसक्तमनसो देवस्य शंभोः प्रिया
जाता शैलकुले वरैरभिमतैरानन्दयन्ती सुरान् ।
म्लेच्छानामपि वाञ्छितार्पणपरा स्वस्यास्पदस्याम्बिका
विन्ध्यस्योन्नतिमातनोति न निजां दैवस्य कीदृग्बलम् ॥

भा॰ अमृतदत्तस्य.

1031

किं त्वं हालिक मूढधीर्हतफलं मा मा कृथा लाङ्गले
क्षेत्रं नैव भवत्यधः कठिनता नैवात्र दृष्टा त्वया ।
उल्लेखोपि न जायतेत्र विरम क्लेशः फलं केवलं
निर्बीजा बहवो गताश्च सततं दृष्टाः श्रुता वा न किम् ॥

कस्यापि.

1032

कोयं भ्रान्तिप्रकारस्तव पवन घनावस्करस्थानजातं
तेजस्विव्रातसेव्ये नभसि नयसि यत्पांसुपूरं प्रतिष्ठाम् ।
यस्मिन्नुत्थाप्यमाने जननयनपथोपद्रवस्तावदास्तां
केनोपायेन सह्यो वपुषि मलिनतादोष एष त्वयैव ॥

भा॰ अमृतदत्तस्य.

1033

जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं
श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम् ।
संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो
ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः ॥

कस्यापि.

1034

कटु रटसि किमेवं कर्णयोः कुञ्जरारे-
रविदितनिजबुद्धे किं न विज्ञातमस्ति ।
शितरकरदंष्ट्राटङ्कनिर्भिन्नकुम्भं
मशक गलकरन्ध्रे हस्तियूथं ममज्ज ॥

कस्यापि.

1035

उद्गर्जन्कुटिलस्तटाश्रयतरुप्रोन्मूलनोड्डामरो
मा गर्वीः सरितः प्रवाह जलधिं प्रक्षोभयामीति भोः ।
स्वां सत्तां यदि वाञ्छसि भ्रम मरुष्वेवाःस्व तत्रैव वा
दूरे वाडववह्निरत्र तु महासत्त्वैर्विशन्पीयसे ॥

1036

स्थैर्यं तुङ्गशिरा जगत्स्थितिकृते वेलामहीभृच्छ्रितो
दूरात्प्रेरणया कलावत इमं क्रान्तुं जलानां पते ।
मिथ्या वाञ्छसि किं ततस्तव परं स्याद्ब्रह्मसत्त्वक्षयो
नूनं घट्टनमाप्य पादतलगस्त्वस्यैव चान्ते लुठेः ॥

1037

आन्दोलयस्यविरतं गगनार्कमङ्के
तारागणं च शशिनं च तथेतराणि ।
तेजांसि भासुरतडित्प्रभृतीनि साधो
चित्रं तथापि न जहासि यदान्ध्यमन्तः ॥

अथ शृङ्गारपद्धतिः

तत्रादौ

विप्रलम्भः

1038

अयं स भुवनत्रयप्रथितसंयमः शंकरो
बिभर्ति वपुषाधुना विरहकातरः कामिनीम् ।
अनेन किल निर्जिता वयमिति प्रियायाः करं
करेण परिपीडयञ्जयति जातहासः स्मरः ॥

1039

भ्रूशार्ङ्गाकृष्टमुक्ताः कुवलयमधुपव्योमलक्ष्मीमुषो ये
क्षीवा ये कृष्णशारा नरहृदयभिदस्तारकक्रूरशल्याः ।
ते दीर्घापाङ्गपुङ्खाः स्मितविषविषमाः पक्ष्मलाः स्त्रीकटाक्षाः
पायासुर्वोतिवीर्यास्त्रिभुवनजयिनः पञ्चबाणस्य बाणाः ॥

तत्रादौ विप्रलम्भशृङ्गारे

दयितगमनपद्धतिः

1040

गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥

1041

हस्तमाक्षिप्य यातोसि बलादिति किमद्भुतम् ।
हृदयाद्यदि निर्यासि पौरुषं गणयामि ते ॥

1042

यामीति प्रियपृष्टायाः प्रियायाः कण्ठलग्नयोः ।
वचोजीवितयोरासीत्पुरोनिःसरणे रणः ॥

1043

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ॥

1044

स्मर्तव्योहं त्वया कान्ते न स्मरिष्याम्यहं तव ।
येन त्वां संस्मरिष्यामि हृदयं तत्त्वया हृतम् ॥

1045

लज्जां विहाय रुदितं विधृतः पटान्ते
मा गास्त्वमित्युदितमञ्जलयो मुखेस्ताः ।
स्थित्वा पुरः पतितमेव निवर्तनाय
प्राणेश्वरे व्रजति किं न कृतं कृशाङ्ग्या ॥

केषामपि.

1046

अलमलमनुगम्य प्रस्थितं प्राणनाथं
प्रथमविरहशोके न प्रतीकार एषः ।
सपदि रमणयात्रा श्रेय इत्यारटन्त्या
चरणपतनपूर्वं सा निरुद्धेव कान्त्या

माघस्य.

1047

कृतकमधुराचारे त्यक्त्वा रुषा परुषीकृते
चरणपतनप्रत्याख्यानप्रकोपपराङ्मुखे ।
व्रजति रमणे निःश्वस्योष्णं स्तनार्पितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निपातिता ॥

अमरुकस्य.

1048

प्रहरविरतौ मध्ये वाह्नस्ततोपि परेण वा
किमुत सकले याते वाह्नि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पझलज्झलैः ॥

झलज्झलिकावासुदेवस्य.

1049

मा याहीत्यपमङ्गलं व्रज किल स्नेहेन शून्यं वच-
स्तिष्ठेति प्रभुता यथारुचि कुरुष्वैषाप्युदासीनता ।

नो जीवामि विना त्वयेति वचनं संभाव्यते वा न वा
तन्मां शिक्षय नाथ यत्समुचितं वक्तुं त्वयि प्रस्थिते ॥

दाक्षिणात्यस्य कस्यचित्.

1050

यामीत्यध्यवसाय एव हृदये बध्नातु नामास्पदं
वक्तुं प्राणसमासमक्षमघृणेनेत्थं कथं पार्यते ।
उक्तं नाम तथापि निर्भरगलद्बाष्पं प्रियाया मुखं
दृष्ट्वापि प्रवसन्त्यहो धनलवप्राप्तिस्पृहा मादृशाम् ॥

मोरिकायाः.

1051

या बिम्बौष्ठरुचिर्न विद्रुममणिः स्वप्नेपि तां दृष्टवा-
न्हासश्रीः सुदृशस्तपोभिरपि किं मुक्ताफलैः प्राप्यते ।
तत्कान्तिः शतशोपि वह्निपतनैर्हेम्नः कुतः सेत्स्यति
त्यक्त्वा रत्नमयीं प्रयासि दयितां कस्मै धनायाध्वग ॥

श्रीशिवस्वामिनः.

1052

आयाते श्रुतिगोचरं प्रियतमप्रस्थानकाले पुर-
स्तल्पान्तःस्थितया तदाननमलं दृष्ट्वा चिरं मुग्धया ।
सोच्छ्वासं दृढमन्युनिर्भरगलद्बाष्पाम्बुधौतं तया
स्वं वक्त्रं विनिवेश्य भर्तृहृदये निःशब्दकं रुद्यते ॥

कस्यापि.

1053

मा गच्छ प्रमदाप्रिय प्रियशतैर्भूयस्त्वमुक्तो मया
बाला प्राङ्गणमागतेन भवता प्राप्नोति निष्ठां पराम् ।
किं चान्यत्कुचभारपीडनसहैर्यत्नप्रबद्धैरपि
त्रुट्यत्कञ्चुकजालकैरनुदिनं निःसूत्रमस्मद्गृहम् ॥

मोरिकायाः.

1054

आपृष्टासि विनिर्गतोध्वगजनस्तन्वङ्गि गच्छाम्यहं
स्वल्पैरेव दिनैर्ममागतिरिति ज्ञात्वा शुचं मा कृथाः ।

इत्याकर्ण्य वचः प्रियस्य सहसा तन्मुग्धयानुष्ठितं
येनाकाण्डसमाप्तसर्वकरणक्लेशः कृतोन्यो जनः ॥

1055

लोलाक्ष्या गुरुसंनिधौ मम कृतं नो वक्त्रमन्यादृशं
संलापास्त्रपया न चातिकरुणाः कर्तुं नवा पारिताः ।
प्रस्थानाभिमुखस्य संततगलद्बाष्पौघया मुग्धया
दीर्घोष्णश्वसितैरसह्यमदनव्याधिः समावेदितः ॥

1056

आ दृष्टिप्रसरात्प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विच्छिन्नेषु पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति ।
दत्त्वैकं सशुचा गृहं प्रति पदं पान्थस्त्रियास्मिन्क्षणे
मा भूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितम् ॥

अमरुकस्य.

1057

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशोर्पिता
नो वा पादयुगे मुहुर्निपतिता तिष्ठेति नोक्तं वचः ।
काले केवलमम्बुदालिमलिने गन्तुं समभ्युद्यत-
स्तन्व्या बाष्पजलौघपूरितनदीपूरेण रुद्धः पतिः ॥

1058

वस्त्रान्ते करपल्लवेन विधृतः सास्रं चिरं वीक्षितो
मा गास्त्यक्तघृणेति मोहकरुणं बध्वाञ्जलिं याचितः ।
उत्सृज्यैवमुपस्थितामपि यदा गन्तुं प्रवृत्तः शठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥

1059

गन्तव्यं यदि नाम निश्चितमहो गन्तासि केयं त्वरा
द्वित्राण्येव पदानि तिष्ठतु भवान्पश्यामि यावन्मुखम् ।
संसारे घटिकाप्रणालविगलद्वारा समे जीविते
को जानाति पुनस्त्वया सह मम स्याद्वा न वा संगमः ॥

1060

लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः परै-
रन्यास्ता विनिवारयन्ति कृपणाः प्राणेश्वरं प्रस्थितम् ।
पुण्याहं व्रज मङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत्स्नेहोचितमीहितं प्रिय गृहात्तन्निर्गतः श्रोष्यसि ॥

1061

आयास्यस्यवधावपर्यवसिते गत्वेति संभाव्यते
संप्राप्ते त्वयि तानि तान्यपि सुखान्यप्यपरोक्षाणि नः ।
किं तु ज्ञात वियोगवेदनमिदं सद्यस्त्वयि प्रस्थिते
चेतः किं नु करिष्यतीत्यविदितं सम्यङ्ग निश्चीयते ॥

1062

मुग्धे प्रेषय यामि यान्ति पथिकाः कालोवधेर्बध्यता-
मुद्विग्ना किमकाण्ड एव भवती तूष्णीं किमेवं स्थिता ।
इत्युक्त्वोपनतां प्रियेण दयितामालिङ्ग्य तादृक्कृतं
दत्तो येन समस्तपान्थविरहिप्राणान्तकृड्डिण्डिमः ॥

1063

दूरं सुन्दरि निर्गतासि नगरादेष द्रुमः क्षीरवा-
नस्मादेव निवर्त्यतामिति शनैरुक्ताध्वगेन प्रियाम् ।
गाढालिङ्गनमन्थरस्तनतटाभोगस्फुरत्कञ्चुकं
वीक्ष्योरस्तलमश्रुपूरितदृशा प्रस्थानभङ्गः कृतः ॥

एते केषामपि.

1064

यास्यामीति गिरः श्रुता अवधिरप्यारोपितश्चेतसि
गेहे यत्नवती भविष्यसि सदेत्येतत्समाकर्णितम् ।
बाले मा शुच इत्युदीरितवतः पत्युर्निरीक्ष्याननं
निःश्वस्य स्तनपायिनि स्वतनये दृष्टिश्चिरं पातिता ॥

धीरनागस्य.

अथ विरहिण्यवस्था

1065

रामा नितान्तरक्तेन लोचनानन्दकारिणम् ।
उवाह मनसा कान्तं पाणिना मुखपङ्कजम् ॥

1066

दीनायां दीनवदनो रुदत्यां साश्रुलोचनः ।
पुरः सखीजनस्तस्याः प्रतिबिम्बवदाबभौ ॥

1067

दह्यमानेपि हृदये मृगाक्ष्या मन्मथाग्निना ।
स्नेहस्तथैव यत्तस्थौ तदाश्चर्यमिवाभवत् ॥

शकवृद्धेः.

1068

तस्याः स्तनान्तरन्यस्तं चन्दनं तापशोषितम् ।
मनोभवाग्निदग्धस्य बभौ भस्मेव चेतसः ॥

कस्यापि.

1069

तापोपशमदक्षाणि मृणालानि नतभ्रुवः ।
नाभूवन्दीर्घसूत्रेभ्यः प्रार्थितं लभ्यते कुतः ॥

भट्टवृद्धेः.

1070

विरमत विरमत सख्यो नलिनीदलतालवृन्तपवनेन ।
हृदयगतोयं वह्निर्झटिति कदाचिज्ज्वलत्येव ।

कस्यापि.

1071

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥

दामोदरगुप्तस्य.

1072

लिखति न गणयति रेखा निर्भरबाष्पाम्बुधौतगण्डतला ।
अवधिदिवसावसानं माभूदिति शङ्किता बाला ॥

मोरिकायाः.

1073

विकासिपद्मास्तरणे निरस्तं
तत्पाणिपद्मद्वयमायताक्ष्याः ।
व्यक्तिं ययौ संततविस्तृतेन
सकज्जलेनाश्रुजलेन सिक्तम् ॥

गङ्गाधरस्य.

1074

न निष्ठुरत्वं हृदयं वियोगे
न सौकुमार्यं च बिभर्ति तस्याः ।
विभेद्यमानं स्मरमार्गणैर्य-
न्न दार्ढ्यमाप्नोति न दीर्यते च ॥

रत्नाकरस्य.

1075

वियोगिनी चन्दनपङ्कपाण्डु-
मृणालिकाहारनिबद्धजीवा ।
बाला चलाम्भःकणदन्तुरेषु
हंसीव शिश्ये नलिनीदलेषु ॥

बाणस्य.

1076

विवृद्धतापोपशमार्थमङ्गे
न्यस्तं यदिन्दीवरदाम तस्याः ।
मुक्तेषुणा पञ्चशरेण भाति
व्यापारितं धौतमिवासिपत्त्रम् ॥

1077

उद्भाव्यमानो नलिनीपलाशैः
समीरणस्तद्धृदयास्पदस्य ।
करोति दाहस्य निवारणं नु
संधुक्षणं वा स्मरपावकस्य ॥

देवगुप्तस्य.

1078

परिच्युतस्तत्कुचभारमध्या-
त्किं शोषमायासि मृणालहार ।
न सूत्रतन्तोरपि तावकस्य
तत्रावकाशो भवतः किमु स्यात् ॥

श्रीहर्षस्य.

1079

मन्मथाग्निपरितप्तमनस्का
चन्दनेन किमु लिम्पसि गात्रम् ।
किं न वेत्सि बहिरङ्गविधाना-
दन्तरङ्गविधिरेव बलीयान् ॥

कस्यापि.

1080

नलिनीदलमाहितं सखीभिः
परितापोपशमाय यद्यदङ्गे ।
अकृतप्रतिकारलज्जयेव
क्षणतो ग्लानिमुपैति तत्तदस्याः ॥

श्रीविभाकरवर्मणः.

1081

प्रियवियोगकृशे प्रमदाजने
कृपणशूर विमुञ्चसि सायकान् ।
पशुपतेर्यदि लोचनगोचरं
व्रजसि मन्मथ दास्यमुपैमि ते ॥

कस्यापि.

1082

किमनया कथया कथयाथवा
समुपयामि न याम्युत यामि वा ।
स्वपिमि किं स्वपिमीति मनस्विनी
मनसिजेन सुदुर्ललिता कृता ॥

1083

धृतमपि मधु पारितं न पातुं
नयनसुखोपि न वीक्षितः शशाङ्कः ।
श्रुतिसुखमपि न श्रुतं च गीतं
गतवति भर्तरि भर्तृदेवताभिः ॥

1084

कर्पूरचन्दनरजो धवलं वहन्ती-
माश्यानचन्दनविलेपनमङ्गमङ्गम् ।
अन्तर्गतस्य दहतो महतः स्मराग्ने-
रिन्धस्य संक्षयवशादिव भस्मशेषम् ॥

भट्टगोविन्दस्वामिनः.

1085

कण्ठग्रहे शिथिलतां गमिते कथंचि-
द्यो मन्यते मरणमेव सुखाभ्युपायम् ।
गच्छन्स एष न बलाद्विधृतो युवाभ्या-
मित्युज्झिते भुजलते वलयैरिवास्याः ॥

कङ्कणस्य.

1086

स्मर्तुं वियोगिदयिता दिवसस्य यां यां
रेखां चकार भुवि ताम्ररुचा करेण ।
तां तामरालचलपक्ष्मशिखाविमुक्तै-
र्मुक्ताफलद्युतिभिरश्रुभिरुन्ममार्ज ॥

1087

हारो जलार्द्रवसनं नलिनीदलानि
प्रालेयशीकरमुचश्च हिमांशुभासः ।
यस्येन्धनानि सरसानि च चन्दनानि
निर्वाणमेष्यति कथं स मनोभवाग्निः ॥

बाणकवेः.

1088

सर्वात्मना प्रभवतापि मनोभवेन
संदर्शितं परमकौशलमायताक्ष्याः ।
लावण्यविभ्रमविलासविचेष्टितानि
नैवेक्षितानि गमिता च तनुस्तनुत्वम् ॥

भट्टावलोकितस्य.

1089

संत्यज्यैतां प्रथमविरहत्रासभीतां कृतघ्नै-
र्यातं सर्वैः स्मृतिमतिमनोविभ्रमैर्लीलया च ।
नूनं मोहात्किमपि गहनं निःश्वसद्भिर्वराक्याः
प्राणैः कण्ठे निभृतनिभृतं लीनमेवं विचिन्त्य ॥

जयमाधवसूनोर्लोठकस्य.

1090

प्रयातेऽस्तं भानौ श्रितशकुनिलीढेषु तरुषु
स्फुरत्संध्यारागे शशिनि शनकैरुल्लसति च ।
प्रियप्रत्याख्यानाद्द्विगुणविरहोत्कण्ठितदृशा
तदारब्धं तन्व्या मरणमपि यत्रोत्सवपदम् ॥

लुट्टकस्य.

1091

तन्वङ्ग्या गुरुसंनिधौ नयनयोर्यद्बाष्पमुत्तम्भितं
तेनान्तर्गलितेन मन्मथशिखी सिक्तो वियोगोद्भवः ।
मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता
श्वासायासशतागतालिसरणिव्याजेन धूमावली ॥

कस्यापि.

1092

वक्त्रे या मृगनाभिपङ्करचनां खिन्नेव धत्ते परं
यस्याः सान्द्रमुरःस्थले निपतितं भारायते चन्दनम् ।
अङ्गान्यप्यतिपेलवा वहति या क्लेशेन तस्यामपि
न्यस्तः शोकभरोपरः कथमहो निस्त्रिंशता वेधसः ॥

श्रीभानुषेणस्य.

1093

नितम्बप्राग्भारो गुरुरवधिरेखां न तु गतः
कृशो मध्यः किंचित्तदपि तनिमानं मृगयते ।
स्तनाभोगः स्तोको न तु विरलवृत्तिस्तु कलया
विलासैस्तन्वङ्ग्याः स्फुरितमिव विभ्रान्तमिव च ॥

कस्यापि.

1094

काचित्पुरा विरहिणी परिवृद्धिहेतो-
र्यस्यै दिदेश सलिलं नवमालिकायै ।
सा पुष्पितैव जलमम्बुवशाद्वियोगे
तस्यै प्रदाय कथमप्यनृणीबभूव ॥

अथ सखीप्रश्नाः

1095

गोपायन्ती विरहजनितं दुःखमग्रे गुरूणां
किं त्वं मुग्धे नयनविसृतं बाष्पपूरं रुणत्सि ।
नक्तं नक्तं नयनसलिलैरेष आर्द्रीकृतस्ते
शय्यैकान्तः कथयति दशामातपे दीयमानः ॥

1096

मुखं पाण्डुच्छायं नयनयुगलं बाष्पधवलं
तनुः क्षामक्षामा गतमविशदं धैर्यविगमः ।
ह्रियं मुक्त्वा मूढे कथयसि न मे सारवचना-
न्यवस्था येनेयं तव सखि मुहूर्तेन रचिता ॥

कस्यापि.

1097

चटुलनयने शून्या दृष्टिः कृता खलु केन ते
क इह सुकृती प्रष्टव्यानामुवाह धुरं पराम् ।
यमभिलिखितप्रख्यैरङ्गैर्न मुञ्चसि चेतसा
वदनकमलं पाणौ कृत्वा निमीलितलोचना ॥

अमरुकस्य.

1098

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती कोयं मुग्धे त्वयाद्य विलोक्यते ॥

कस्यापि.

1099

अन्योन्यग्रथितारुणाङ्गुलिनमत्पाणिद्वयस्योपरि
न्यस्योच्छ्वासविकम्पिताधरदलं निर्वेदशून्यं मुखम् ।
आमीलन्नयनान्तवान्तसलिलं श्लाघ्यस्य निन्द्यस्य वा
कस्येदं दृढसौहृदं प्रतिदिनं दीनं त्वया स्मर्यते ॥

अमरुकस्य.

1100

आसन्नामवलम्ब्य केसरलतामेकेन पुष्पोज्ज्वलां
सव्यं निःसहया नितम्बफलके कृत्वा कराम्भोरुहम् ।
उद्ग्रीवं वद दुर्दिनेद्य चरणावुन्नम्य मार्गस्त्वया
बालोद्भ्रान्तमृगेक्षणे सुकृतिनः कस्यायमालोक्यते ॥

1101

बाले नाथ कृशासि किं ज्वरवशात्कस्मादपथ्याज्ज्वरो
जीर्णे नैव मया सरोजनयने किं तन्न यत्पार्यते ।
वक्तुं ब्रूहि विमुक्तलज्जमधुना तस्यापरारागिणः
प्रेङ्खत्पूर्णशशाङ्कतुल्यवदनं कंदर्पकान्तं वपुः ॥

1102

अभ्यस्तेपि नितम्बभारफलके खेदालसेयं गतिः
किंचित्संवलिता न पक्ष्मविरलालोका दृशोन्तर्गताः ।
तन्मन्ये निभृतं त्वयाद्य हृदये कश्चिद्धृतो वल्लभो
निश्वासाः कथमन्यथा द्विगुणतामेते तवैवं गताः ॥

केषामपि.

1103

पाण्डुच्छायं क्षामं वक्त्रं कमलमुखि लुलितमलकं करे स्थितमाननं
शून्यालोका दीना दृष्टिः शिखरमभिपतितरशना तनुस्तनुतां गता ।
ध्यानैकामा मन्दा बुद्धिर्मदजननि रहसि रमसे करोषि न सत्कथां
को नामायं रम्यो व्याधिस्तव सुतनु कथय किमिदं न खल्वसि नातुरा ॥

वररुचेः.

1104

को धन्यः सखि सुस्थितेन मनसा को वेधसा निर्मितः
कः प्रेयान्मदनस्य कस्य फलितः प्राचीनकर्मद्रुमः ।
इत्थं यस्य कृते दिवानिशमविश्रान्तैः स्खलद्धारिभि-
र्मीनाक्षीचनगडुकैः स्नपयसे वक्षोजलिङ्गद्वयम् ॥

कस्यापि.

अथ विरहिणीप्रलापाः

1105

रोदितुं नैव जानामि नैव जानामि शोचितुम् ।
स्वच्छन्दमश्रु पतति सत्यं सत्यं न रोदिमि ॥

1106

अद्यापि हि नृशंसस्य पितुस्ते दिवसो गतः ।
तमसा पिहितः पन्था एहि पुत्रक शेवहे ॥

1107

चक्षुः किं कम्पसे मूढ त्वयि दीनेश्रुवाहिनि ।
यो मां त्यक्त्वा गतः सोद्य कथमेष्यति सस्फुरे ॥

1108

अयि लङ्घितमर्याद स्मर स्मर हरानलम् ।
दग्धं दग्धुमयुक्तं ते जनं विरहकातरम् ॥

1109

स्वयमज्ञातदुःखो यद्दुनोतीति न विस्मयः ।
त्वं पुनः प्राप्तदाहो यद्दहसीति किमुच्यताम् ॥

केषामपि.

1110

अहं नश्यामि मानेन मानेन कलहं कृथाः ।
विरोधमेत्य कान्तेन कान्ते न परितप्यते ॥

जीवनागस्य

1111

हृदय स्थीयतां सम्यक्किमेवं परितप्यते ।
वल्लभस्ते जनो योसौ न भवांस्तस्य वल्लभम् ॥

1112

यत्पराधीनयोः प्रेम दैवात्समुपजायते ।
तत्रानुत्सृज्य लज्जां वा जीवितं वा कुतः सुखम् ॥

एतौ वीरभद्रस्य

1113

अरतिरियमुपैति मां न निद्रा
प्रथयति तस्य मनो गुणाश्च दोषान् ।
विरमति रजनी न संगमाशा
व्रजति तनुस्तनुतां न चानुरागः ॥

1114

वरमसौ दिवसो न पुनर्निशा
ननु निशैव वरं न पुनर्दिनम् ।
उभयमप्यथवा व्रजतु क्षयं
प्रियतमेन न यत्र समागमः ॥

1115

रथ्यारजोरुणित धूसरिताङ्गयष्टे
कच्चित्पितुः स्मरसि पुत्रक निर्घृणस्य ।
उक्त्वैवमङ्कगतमर्भकमायताक्ष्या
पान्थस्त्रिया प्ररुदितं करुणं दिनान्ते ॥

1116

अनृतमनृतमेतद्यत्सुधासूतिरिन्दु-
र्नियतमयमनार्यो निर्गतः कालकूटात् ।

हृदयदहनदक्षा दारुणा चान्यथेयं
वद सखि मधुरत्वे मोहशक्तिः कुतोस्य ॥

1117

अनुदिनमतितीव्रं रोदिषीति त्वमुच्चैः
सखि किल कुरुषे त्वं वाच्यतां मे मुधैव ।
हृदयमिदमनङ्गाङ्गारसङ्गाद्विलीय
प्रसरति बहिरम्भः सुस्थिते नैतदश्रु ॥

एते केषामपि.

1118

सखि स सुभगो मन्दस्नेहो ममेति न मे व्यथा
विधिविरचितं यस्मात्सर्वो जनः सुखमश्नुते ।
मम तु सततं संतापोयं जने विमुखेपि य-
त्क्षणमपि हतव्रीडं चेतो न याति विरागताम् ॥

कस्यापि.

1119

आलि कल्पय पुरः करदीपं
चन्द्रमण्डलमिति प्रथितेन ।
नन्वनेन पिहितं मम चक्षु-
र्मञ्जुपाण्डुरतमोगुलकेन ॥

1120

कोटरे तिमिरमेष कलङ्क-
च्छद्मना वहति हन्त शशाङ्कः ।
यत्कणैरिव विलुम्पति दृष्टिं
मादृशां दयितदीपवियोगे ॥

1121

कालकूटमिह निन्दति लोको
येन शंभुरजरामर एव ।
अन्तकं विरहिणीषु सुधांशुं
स्तौत्यमुं तु विरलो हि विवेकः ॥

का लज्जा मुषितासि किं प्रकटितैरेभिर्विलक्षस्मिते-
राः पापे विरहानलस्य न शिखा जानासि मर्मच्छिदः ॥

कस्यापि.

1175

नार्याः सा रतिशून्यता नयनयोर्यद्दृष्टिपाते स्थितः
कामी प्राप्तरतार्थ एव न भवत्यालिङ्गितुं वाञ्छति ।
आश्लेषादपि यापरं मृगयते धिक्कामयोग्यां स्त्रियं
श्रोणीगोचरमागतो रतिफलं प्राप्नोति तिर्यङ्नु किम् ॥

विज्जकायाः.

1176

चपलहृदये किं स्वातन्त्र्यात्तथा गृहमागत-
श्चरणपतितः प्रेमार्द्रार्द्रः प्रियः समुपेक्षितः ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्जातानां सहस्व रुषां फलम् ॥

अमरुकस्य.

1177

किञ्चित्प्राप्तनखेन बाष्पसलिलं विक्षिप्य विक्षिप्य हे
किं त्वं रोदिषि कोपने बहुतरं विक्षिप्य रोदिष्यसि ।
यस्यास्ते पिशुनोपदेशवचनैर्मानेतिभूमिं गते
निर्विण्णोनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥

कस्यापि.

1178

भ्रश्यन्ति यानि विरहे विदलन्ति यानि
योगे प्रियेण सखि किं वलयैः फलं तैः ।
नैवास्ति यैर्विपदि संपदि चोपयोग-
स्तैः संगमं न खलु वाञ्छति कोपि मर्त्यः ॥

उत्प्रेक्षावल्लभस्य.

अथ दूतीप्रेषणम् ॥

1179

अद्य भौमदिनं सत्यं सत्यमप्रस्तुतं तव ।
तथापि दूति गन्तव्यं नार्तः कालमपेक्षते ॥

1180

संपदो जलतरङ्गविलोला
यौवनं त्रिचतुराणि दिनानि ।
शारदाभ्रपरिपेलवमायु-
र्गच्छ दूति वद सत्वरमेतत् ॥

कवीरपि.

1181

उच्यतां स वचनीयमशेषं
नेश्वरे परुषता सखि साध्वी ।
आनयैनमनुनीय कथं वा
विप्रियाणि जनयन्ननुनेयः ॥

1182

द्वारि चक्षुरधिपाणि कपोलो
जीवितं त्वयि कुतः कलहोस्याः ।
कामिनामिति वचः पुनरुक्तं
प्रीतये नवनवत्वमियाय ॥

भारवेः.

1183

कृतसरसमृणालीसूत्रसंधानबन्धः
कुचमुकुलमुखाङ्कश्चन्दनोपात्तमुद्रः ।
स्मरशबरशराणामेष लक्ष्यीभवन्तीं
कथयति खलु लेखस्तामनुद्घाटितोपि ॥

कस्यापि.

1184

सोपालम्भकृतप्रणाममलसैः श्वासानिलैर्लाञ्छितो
बाष्पोत्खातकपोलचन्दनरसेनाक्षिप्तबाह्याक्षरः ।

1133

निशि शशिन्भज कैतवभानुता-
मसति भास्वति तापय पाप माम् ।
अहमहन्यवलोकयितास्मि हे
पुनरहर्पतिनिर्धुतदर्पताम् ॥

1134

त्वमिव कोपि परापकृतौ कृती
न ददृशे न च मन्मथ शुश्रुवे ।
स्वमदहो दहनाज्ज्वलतात्मना
ज्वलयितुं परिरभ्य जगन्ति यः ॥

1135

असमये मतिरुन्मिषति ध्रुवं
करगतैव गता यदियं कुहूः ।
पुनरुपैति निबध्य निधास्यते
सखि विधोर्न पुनर्मुखमीक्ष्यते ॥

एते नैषधकर्तुः.

1136

प्रकृतिसरलं पश्यत्येवं तथापि न सस्पृहं
मधुरमधुरं वक्ति प्रेयान्पुरेव न नर्मतः ।
घटयति घनं कण्ठाश्लेषं तथापि न भावतः
सखि स भजते मामप्येवं तथापि न जीव्यते ॥

1137

चरणपतनं सान्त्वालापा मनोहरचाटवः
पुलकिततनोर्गाढाश्लेषो हठाच्च कचग्रहः ।
इति बहुफलो मानारम्भस्तथापि हि नोत्सहे
हृदयदयितः कामं प्रेयान्करोम्यहमत्र किम् ॥

एतौ पुण्ड्रकस्य.

1138

इदं कृष्णं कृष्णं प्रियतम ननु श्वेतमथ किं
गमिष्यामो यामो भवतु गमनेनाथ भवतु ।

पुरा येनैवं मे चिरमनुसृता चित्तपदवी
स एवान्यो जातः सखि परिचिताः कस्य पुरुषाः ॥

कस्यापि.

1139

परिष्वक्तस्तावद्गुरुजनभयाद्भूति न मया
न चोक्तस्तिष्ठेति प्रियगमनबाष्पार्द्रगलया ।
द्रुतं गच्छामीति प्रियसखि सुदृष्टोपि न कृतो
निरुद्धो यावन्मे नयनसलिलैर्दृष्टिविषयः ॥

भस्थिभङ्गस्य.

1140

गतोस्तं घर्मांशुर्व्रज सहचरीनीडमधुना
सुखं भ्रातः सुप्याः सुजनचरितं वायस कृतम् ।
मयि स्नेहाद्बाष्पस्थगितनयनायामपघृणो
रुदत्यां यो यातस्त्वयि स विलपत्येष्यति कथम् ॥

शिवस्वामिनः.

1141

गते प्रेमाबन्धे हृदयबहुमानेपि गलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तथा चैवोत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसा-
न्न जाने को हेतुर्दलति शतधा यन्न हृदयम् ॥

विज्जाकायाः.

1142

मया बद्धा वेणी निवसितमशुक्लं च वसनं
श्रुताः शोचन्तीनां परिजनसखीनामपि गिरः ।
निवृत्तास्ते दृष्टा गतमनुगता येस्य सुहृद-
स्तथाप्येते प्राणा दयितमनुयाता न कृपणाः ॥

भदन्तधीरनागस्य.

1143

कथमपि सखि व्रीडाकोपाद्व्रजेति मयोदिते
कठिनहृदयस्त्यक्त्वा शय्यां बलाद्गत एव सः ।

इति सरभसं ध्वस्तप्रेम्णि व्यपेतघृणे स्पृहां
पुनरपि हतव्रीडं चेतः करोति करोमि किम् ॥

कस्यापि.

1144

भ्रातः पान्थ व्रजसि यदि हे तां दिशं पुण्यभाजो
वक्तासीत्थं कठिनहृदयं तं जनं किं यथेति ।
पृष्टा यावत्कथयति च सा वाञ्छितं नैव बाला
तावत्सर्वैर्वदनकमलं रुद्धमश्रुप्रवाहैः ॥

हर्षटस्य.

1145

भ्रातः पान्थ पथि त्वया नु पथिकः कश्चित्समासादितो
बालेनेकशतानि कीदृश इति प्रख्यायतां वल्लभः ।
यं दृष्ट्वा प्रमदाजनस्य भवतः स्फारे मुदा लोचने
स ज्ञेयो दयितो ममेति पथिकायावेद्य मोहं गता ॥

1146

तैलाक्तानलकान्कपोलपतितानुत्क्षिप्य कर्णान्तिकं
वस्त्रार्धेन विलम्बिना सरभसं प्रच्छाद्य पीनौ स्तनौ ।
बाला वायसमेवमाह रुदती दास्यामि यत्ते प्रियं
चूतात्केसरपादपं व्रज शनैर्यद्येति मे वल्लभः ॥

1147

संपूर्णानि दिनानि तानि जलदश्यामं नभो वर्तते
मर्तव्यव्यवसायिनीमपि सतीं प्राणा न मुञ्चन्ति माम् ।
वाल्लभ्यं क्क नु नाम तत्क्क विरहे तस्याधुना जीव्यते
तत्सत्यं सखि लज्जितास्मि वितथेनानेन बाष्पाम्बुना ॥

1148

आस्तां विश्वसनं सखीषु विदिताभिप्रायसारे जने
तत्राप्यर्पयितुं दृशं स्वरुचितां शक्नोमि न व्रीडया ।
लोकोप्येष परोपहासचतुरः सूक्ष्मेङ्गितज्ञोप्यलं
मातः कं शरणं व्रजामि हृदये जीर्णोनुरागज्वरः ॥

1149

धन्या सा विरहे सखीजनपुरस्त्यक्त्वा त्रपां निर्वृता
निःश्वासं न परं विमुञ्चति कथाः कृत्वापि या रोदिति ।
पापायाः सभियः सदा गुरुजने शङ्काकुलायास्तु मे
दीपज्वालनहेतुना निशि परं निःश्वासमोक्षः क्षणम् ॥

1150

यात्रामङ्गलसंनिधानरचनाव्यग्रे सखीनां गणे
बाष्पाम्भःपिहितेक्षणे गुरुजने तद्वत्सुहृन्मण्डले ।
प्राणेशस्य मदीक्षणार्पितदृशः कृच्छ्रादपक्रामतः
किं व्रीडाहतया मया भुजलतापाशो न कण्ठेर्पितः ॥

1151

प्रस्थानं वलयैः कृतं प्रियसखैर्बाष्पैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
गन्तुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवितप्रियसुहृत्सार्थः किमु त्यज्यते ॥

एते केषामपि.

1152

उत्कम्पोपि सकम्प एव हृदये चिन्तापि चिन्तान्विता
निःश्वासा अपि निःश्वसन्ति निभृतं बाष्पोपि बाष्पायते ।
कान्तस्य स्मरणे स्मराहिवमतेः कष्टं हि रक्तात्मनः
शरोहा इव निःसरन्ति हृदये दुःखस्य धिग्वल्लभम् ॥

शार्वटस्य.

1153

यास्यामीति समुद्यतस्य वदतो विस्रब्धमाकर्णितं
गच्छन्दूरमुपेक्षितो मुहुरसौ व्यावृत्य पश्यन्नपि ।
तच्छून्ये पुनरागतास्मि शयने प्राणास्त एव स्थिताः
सख्यस्तिष्ठत जीवितव्यसनिनी दम्भादहं रोदिमि ॥

1154

पुष्पैरेव शरैः स्मरेण जनितः शीतांशुना वर्धितः
प्रालेयाचलसंनिधानशिशिरैः श्वासानिलैः पोषितः ।
आलापेन परामृतद्रवमयेनाप्यायितः कोकिलैः
संतापो मम सोयमस्य कतरः शीतोपचारक्रमः ॥

कस्यापि.

1155

योसावाननवीक्षणैकरसिको नित्यं ममासीज्जनः
प्राणानामपि नान्यसक्तमनसो यस्याहमालम्बनम् ।
सख्यः पश्यत तस्य संप्रति कथं वार्तापि न श्रूयते
जीव्येतापि च चित्रमेतदपरं शोके कथा वर्तते ॥

कवेरपि.

1156

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोत्युत्सुकं
गाढं प्रेम नवं वयोतिकठिनाः प्राणाः कुलं निर्मलम् ।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालः कृतान्तोक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः ॥

भट्टशङ्कुकस्य.

1157

निःश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मथ्यते
निद्रा नैति न दृश्यते प्रियमुखं नक्तंदिनं रुद्यते ।
अङ्गं शोषमुपैति पादपतितः प्रेयांस्तदोपेक्षितः
सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः ॥

1158

उत्कम्पो हृदये स्खलन्ति वचनान्यावेगलोलं मनो
गात्रं सीदति चक्षुरश्रुकलुषं चिन्ता मुखं शुष्यति ।
यस्यैषा सखि पूर्वरङ्गरचना मानः स मुक्तो मया
धन्यास्ता अपि योषितः क्षितितले यासामयं संमतः ॥

1159

अद्यारभ्य यदि प्रिये पुनरहं मानस्य वान्यस्य वा
गृह्णीयां विषरूपिणः शठमतेर्नामापि संक्षोभिणः ।
तत्तेनैव विना शशाङ्ककिरणस्वच्छाट्टहासा निशा-
प्येको वा दिवसः पयोदमलिनो यायन्मम प्रावृषि ॥

1160

मानव्याधिनिपीडिताहमधुना शक्नोमि तस्यान्तिकं
नो गन्तुं न सखीजनोस्ति चतुरो यो मां बलान्नेष्यति ।
मानी सोपि जनो न लाघवभयादभ्येति मातः स्वयं
कालो याति चलं च जीवितमिति क्षुण्णं मनश्चिन्तया ॥

1161

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरीकुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥

अमरुकस्य.

1162

सख्यः किं परुषैर्विमुञ्चत रुषं तस्यापराधः सकृ-
त्क्षन्तव्यश्चपलस्य मां प्रति पुनः कर्ता प्रियो नाप्रियम् ।
इत्थं मानपरिग्रहव्यतिकराद्भीता तथा प्रत्युत
प्रारब्धानुनया यथा परिजनेनैवाकुला हस्यते ॥

विग्रहराजस्य.

1163

यावन्नो सखि गोचरं नयनयोरायाति तावद्द्रुतं
गत्वा ब्रूहि यथाद्य ते दयितया मानः समालम्बितः ।
दृष्टे धूर्तविचेष्टिते तु दयिते तस्मिन्नवश्यं मम
स्वेदाम्भः प्रतिरोधनिर्भरतनोः स्मेरं मुखं जायते ॥

बुद्धकस्य.

1164

आकृष्यादावमन्दग्रहमलकचयं वक्त्रमासज्य वक्त्रे
कण्ठे लग्नस्वकण्ठः प्रभवति कुचयोर्दत्तगाढाङ्गसङ्गः ।
बद्धासक्तिर्नितम्बे पतति चरणयोर्यः स तादृक्प्रियो मे
बाले लज्जा निरस्ता नहि नहि सरले चोलकः किं त्रपाकृत् ॥

कस्यापि-

1165

मातर्नो सन्ति तस्मिञ्शिशिरजलकणाकर्षिणो गन्धवाहा
विद्युद्भासा सिताङ्गाः प्रचुरतरपयःस्यन्दिनो वा घनौघाः ।
केका वा बर्हिणानां गिरिवरशिखरस्थायिनां वा निशीथे
येनासौ जीवितेशः स्मरति परिजनस्यास्य वै दुःखितस्य ॥

विक्रमादित्यस्य

अथ सखीवाच्यता

1166

या कामुककरस्पृष्टा न कृतार्थैव लक्ष्यते ।
सा गौरिव तरौ बद्धा यवसैः किं न चार्यते ॥

1167

समयोचितकोपविभ्रमा
भव भीरु प्रविमुञ्च मार्दवम् ।
मधुरैकरसः प्रियः सदा
विरलः स्यात्सरले न वा पुनः ॥

1168

जघनमुन्नतमाकुलमेखलं
मुखमपाङ्गविसर्पिततारकम् ।
इदमपोह्य गतो यदि निर्घृणो
ननु वरोरु स एव हि वञ्चितः ॥

1169

पादान्ते प्रणयपेशलवाचि कान्ते
त्यक्तस्त्वया यदतिकोपनया न मन्युः ।

तीव्रानुतापगलितः स्वयमेव मन्ये
निर्याति ते तदयमश्रुभरच्छलेन ।

1170

अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृद-
स्त्वयाकाण्डे मानः किमिति सरले संप्रति धृतः ।
समाकृष्टा ह्येते प्रलयदहनोद्भासुरशिखाः
स्वहस्तेनाङ्गारास्तदलमधुना तस्य रुदितैः ॥

केषामपि.

1171

सखि विवृणुते संतापस्ते तनुस्तनुतां गता
कठिनहृदये धैर्यक्षेपाद्रतिर्गलितक्रमा ।
कथय विषमामन्तर्दाहव्यथां सहते न तां
मदनदहनज्वालावल्लीविलीढमिदं मनः ॥

दर्शनीयस्य.

1172

कस्माद्दोर्लतिके निधाय न चिरं द्वारोपरोधः कृतो
लग्ना वा किमु न स्थितापि रुदती रुद्धोत्तरीयांशुका ।
कालेस्मिन्कुसुमाकरे द्विगुणितप्रेम्णि प्रिये रागिणां
गच्छन्नग्रत एव मूढहृदये मुक्तस्त्वया वल्लभः ॥

दोर्लतिकादर्शनीयस्य.

1173

आयाते रभसाद्यदि प्रियतमे प्रत्युद्गता नो चिरं
नो वा मण्डलितोन्नतस्तनतटं गाढं समालिङ्गितः ।
आश्लिष्य स्वभुजावलम्बमथवा प्रेमार्द्रया नो गिरा
संभाव्याभिहितो हतासि सरले स्वैरेव दुश्चेष्टितैः ॥

रत्नमित्रस्य.

1174

कान्तः पुत्रि हठाद्गतश्चरणयोर्न त्वं निपत्य स्थिता
बद्धो मेखलयानया रतिरहःसख्या न वा फूत्कृतम् ।

का लज्जा मुषितासि किं प्रकटितैरेभिर्विलक्षस्मितै-
राः पापे विरहानलस्य न शिखा जानासि मर्मच्छिदः ॥

कस्यापि.

1175

नार्याः सा रतिशून्यता नयनयोर्यद्दृष्टिपाते स्थितः
कामी प्राप्तरतार्थ एव न भवत्यालिङ्गितुं वाञ्छति ।
आश्लेषादपि यापरं मृगयते धिक्कामयोग्यां स्त्रियं
श्रोणीगोचरमागतो रतिफलं प्राप्नोति तिर्यङ्ङ किम् ॥

विज्जिकायाः.

1176

चपलहृदये किं स्वातन्त्र्यात्तथा गृहमागत-
श्चरणपतितः प्रेमार्द्रार्द्रः प्रियः समुपेक्षितः ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्जातानां सहस्व रुषां फलम् ॥

अमरुकस्य.

1177

किञ्चित्प्राप्तनखेन बाष्पसलिलं विक्षिप्य विक्षिप्य हे
किं त्वं रोदिषि कोपने बहुतरं विक्षिप्य रोदिष्यसि ।
यस्यास्ते पिशुनोपदेशवचनैर्मानेतिभूमिं गते
निर्विण्णोनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥

कस्यापि.

1178

भ्रश्यन्ति यानि विरहे विदलन्ति यानि
योगे प्रियेण सखि किं वलयैः फलं तैः ।
नैवास्ति यैर्विपदि संपदि चोपयोग-
स्तैः संगमं न खलु वाञ्छति कोपि मर्त्यः ॥

उत्प्रेक्षावल्लभस्य.

अथ दूतीप्रेषणम् ॥

1179

अद्य भौमदिनं सत्यं सत्यमप्रस्तुतं तव ।
तथापि दूति गन्तव्यं नार्तः कालमपेक्षते ॥

1180

संपदो जलतरङ्गविलोला
यौवनं त्रिचतुराणि दिनानि ।
शारदाभ्रपरिपेलवमायु-
र्गच्छ दूति वद सत्वरमेतत् ॥

कबीरपि.

1181

उच्यतां स वचनीयमशेषं
नेश्वरे परुषता सखि साध्वी ।
आनयैनमनुनीय कथं वा
विप्रियाणि जनयन्ननुनेयः ॥

1182

द्वारि चक्षुरधिपाणि कपोलो
जीवितं त्वयि कुतः कलहोस्याः ।
कामिनामिति वचः पुनरुक्तं
प्रीतये नवनवत्वमियाय ॥

भारवेः.

1183

कृतसरसमृणालीसूत्रसंधानवन्धः
कुचमुकुलमुखाङ्कश्चन्दनोपात्तमुद्रः ।
स्मरशबरशराणामेष लक्ष्यीभवन्तीं
कथयति खलु लेखस्तामनुद्घाटितोपि ॥

कस्यापि.

1184

सोपालम्भकृतप्रणाममलसैः श्वासानिलैर्लाञ्छितो
बाष्पोत्खातकपोलचन्दनरसेनाक्षिप्तबाह्याक्षरः ।

स्विन्नाग्राङ्गुलिना करेण लिखितो व्यामृष्टवर्णावलि-
र्लेखः शेषमवाचितोपि कथयत्यङ्गेषु तस्या व्यथाम् ॥

वज्रवर्मणः.

1185

पत्त्रं न श्रवणेस्ति बाष्पगुरुणोर्नो नेत्रयोः कज्जलं
रागो पूर्व इवाधरे चरणयोस्तन्व्या न चालक्तकः ।
वार्तोच्छित्तिषु निष्ठुरेति भवता मिथ्यैव संभाव्यते
सा लेखं लिखतु च्युतोपकरणा न्यायेन केनाधुना ॥

अमरुकस्य.

1186

जीवामीति वियोगिनी यदि लिखेदत्रैव वृत्ताः कथा
अद्य श्वोथ मरिष्यतीति मरणे कालात्ययः किं कृतः ।
आगन्तव्यमिहेति मां प्रति सखे संभावना निष्फला
भ्रातः संप्रति याहि नास्ति लिखितं तद्ब्रूहि यत्ते क्षमम् ॥

लोठितकस्य.

1187

यस्मिन्बाष्पतरङ्गिताश्रुकलुषा दृष्टिर्न सिद्धिं गता
यो हस्तेन विवर्तमानवलयेनालिङ्गितो न स्थितः ।
येन स्त्रीहृदयस्य पद्ममृदुनः संभावितो नात्ययो
भो गत्वापि किमश्मसारहृदये त्वं दूति वक्तुं क्षमा ॥

कस्यापि.

1188

दूति त्वं तरुणी युवा स चपलः श्यामास्तमोभिर्दिशः
संदेशः सरहस्य एव विपिने संकेतकावासकः ।
भूयो भूय इमे वसन्तमरुतश्चेतो हरन्त्यन्यतो
गच्छ क्षेमसमागमाय निपुणे रक्षन्तु ते देवताः ॥

शीलाभट्टारिकायाः.

1189

संदिष्टस्वजनावमानवदिमामप्रस्मरन्त्या त्वया
शीतस्नानमिव प्रियं प्रति सखे कार्यः प्रयाणोद्यमः ।

मन्युस्तन्मनसो मितंपचगृहादर्थीव कार्यो बहि-
र्विप्रस्येव हि भोजनार्थमटतः कालस्य तूर्णा गतिः ॥

अथ विरहिणां प्रलापाः

1190

वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश ।
बह्वेतत्कामयानस्य शक्यमेतेन जीवितुम् ॥

1191

बह्वेतत्कामयानस्य नैतदल्पं विजानतः ।
यदहं सा च वामोरूरेकां धरणिमाश्रितौ ॥

1192

हारोपि नार्पितः कण्ठे संभोगस्पर्शभीरुणा ।
आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः ।

1193

न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति सा ।
एतदेवानुशोचामि वयस्तत्रातिवर्तते ॥

1194

कदा न्वहं सुदन्तोष्ठं मुखं पद्मदलेक्षणम् ।
ईषदुन्नाम्य पास्यामि रसायनमिवोत्तमम् ॥

एते भगवद्वाल्मीकिमुनेः.

1195

प्रियामुखं तत्संस्मृत्य दीर्घचारुविलोचनम् ।
न याति शतधा येन मनस्तेन नपुंसकम् ॥

1196

प्राणानां च प्रियायाश्च मूढाः सादृश्यकारिणः ।
प्रिया कण्ठगता रत्यै प्राणा मरणहेतवः ॥

कवेरपि.

1197

प्रियाविरहितस्याद्य हृदि चिन्ता ममागता ।
इति मत्वा गता निद्रा के कृतघ्नमुपासते ॥

शीलाभट्टारिकायाः.

1198

क्षणभङ्गि जगत्सर्वमिति तथ्यं मुनेर्वचः ।
कोन्यथा हरिणाक्षीणां सहेत विरहव्यथाम् ॥

कस्यापि.

1199

स्फुटमाचक्षते तज्ज्ञाः शब्दानामिह नित्यताम् ।
प्रिययोक्ता यदद्यापि हृदि तिष्ठन्ति मे गिरः ॥

1200

पदे वाक्ये प्रमाणे च परां निष्ठामुपागता ।
अतो विद्वज्जनस्यास्य स्पृहणीया मृगेक्षणा ॥

1201

मध्येनैकेन तन्वङ्ग्याः क्षामेण क्षपिता वयम् ।
उन्नतं कुचयुग्मं तु न जाने किं करिष्यति ॥

केषामपि.

1202

नूनं यां पश्यतो मेभून्निमेषो विघ्नकारकः ।
स्वप्नेपि दुर्लभा साद्य जीवामि कथमाः सखे ॥

1203

निर्दयं हृदयं तन्व्या दुर्वारा मारमार्गणाः ।
जीवितं वज्रकठिनं हा हा दुःखपरम्परा ॥

1204

उत्कण्ठितं मनो बाला सुदूरस्था नवं वयः ।
विधिर्वामो रिपुः कामो हा हा दुःखपरम्परा ॥

एते रैरुपकस्य.

1205

अनया जघनाभोगगुरुमन्थरयातया ।
अन्यतोपि व्रजन्त्या मे हृदये निहितं पदम् ॥

1206

मनः प्रकृत्यैव चलं दुर्लक्ष्यं च तथापि मे ।
अनङ्गेन कथं विद्धं समं सर्वशिलीमुखैः ॥

एतौ श्रीहर्षदेवस्य.

1207

अन्तर्मलीमसे वक्रे चले कर्णान्तसर्पिणि ।
तस्या नेत्रयुगे दृष्टे दुर्जने च कुतः सुखम् ॥

कस्यापि.

1208

दिव्यचक्षुरहं जातः सरागेणापि चेतसा ।
इहस्थो येन पश्यामि देशान्तरगतां प्रियाम् ॥

धैर्यमित्रस्य.

1209

रूपातिशयकर्तृणां प्रतिच्छन्दो हि कारणम् ।
विलोलनयनां धात्रा सृजता किं निरीक्षितम् ॥

1210

माधुर्यं मृगशावाक्ष्या यदि धात्रा विनिर्मितम् ।
तदित्युक्तिविरुद्धेन लावण्येन किमुच्छ्रितम् ॥

1211

गतानि हन्त हंसीनां हरन्ती हरिणेक्षणा ।
करोति मामगतिकमहो स्त्रीवृत्तमद्भुतम् ॥

एते केषामपि.

1212

सा यौवनमदोन्मत्ता वयमस्वस्थचेतसः ।
तस्या लावण्यमङ्गेषु दाहोस्मासु विजृम्भते ॥

भमरुकस्य.

1213

यतो यतः क्षिपत्यक्षि क्षिप्रमायतलोचना ।
ततस्ततः प्रक्षिपति पञ्च पञ्चशरः शरान् ॥

1214

एतत्कान्तमिदं कान्तमित्यावसथतृष्णया ।
तस्या भ्रमति सर्वाङ्गं मन्ये मूढ इव स्मरः ॥

1215

मध्यदेशात्पुनः काञ्चीदेशं गच्छद्भिराकुलैः ।
तस्या वपुषि लोकस्य लोचनैः पथिकायितम् ॥

1216

प्रियादर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः ।
प्राप्यते येन निर्वाणं सरागेणापि चक्षुषा ॥

1217

अपूर्वः कोपि तन्वङ्ग्या मम मार्गः प्रदर्शितः ।
योगं चिन्तयतो येन राग एव विवर्धते ॥

1218

दूरस्था यस्य दयिता नवा पीनपयोधरा ।
तस्य संतापशमने न वापी न पयोधराः ॥

1219

आभोगिनौ मण्डलिनौ तत्क्षणोन्मुक्तकञ्चुकौ ।
वरमाशीविषौ स्पृष्टौ न तु तन्व्याः पयोधरौ ॥

1220

विहारो मृगशावाक्ष्याः सुगताधिष्ठितो यदि ।
कथं वसति तत्रैव स्मरो विततकार्मुकः ॥

1221

सखे समं प्रयातेषु समस्तेष्विन्द्रियेषु मे ।
मनो गृहीतं तन्वङ्ग्या कस्यचित्किंचिदीप्सितम् ॥

1222

यो यः पश्यति तन्नेत्रे रुचिरे वनजायते ।
तस्य तस्यान्य नेत्रेषु रुचिरेत्र न जायते ॥

1223

कथं मुग्धे कथं वक्रे कान्तायास्ते विलोचने ।
कथं जनानुरागाय कथं जनविपत्तये ॥

1224

मम कामशरासारव्रणिते चेतसि स्थिता ।
कथं सलवणा तन्वी संतापं न करिष्यति ॥

1225

स्मृता भवति तापाय दृष्टा चोन्मादवर्धिनी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ॥

1226

मां प्राप्य दैवहतकं मुनेरप्यनृतं वचः ।
यतः प्रियावियोगेन क्षणभङ्गो न दृश्यते ॥

1227

नूनमाज्ञाकरस्तस्याः सुभगो मकरध्वजः ।
यतस्तन्नेत्रसंचारसूचितेषु प्रवर्तते ॥

1228

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
इति विन्नस्तसारङ्गनेत्रया को न वञ्चितः ॥

1229

यस्य केशेषु जीमूता नद्यः सर्वाङ्गसंधिषु ।
कुक्षौ समुद्राश्चत्वारः स जयेद्विरहानलम् ॥

1230

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्
कृत्स्नं व्याकरणं प्रोक्तं स तन्व्याः कथयेद्गुणान् ॥

1231

यदि नामास्य कायस्य यदन्तस्तद्बहिर्भवेत् ।
अयत्नेनैव तन्वङ्गी बहिर्दृश्येत सर्वदा ॥

1232

नपुंसकमिति ज्ञात्वा त्वां प्रति प्रेषितं मया ।
मनस्तत्रैव रमते हताः पाणिनिना वयम् ॥

एते केषांचित्.

1233

गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥

1234

गुरुणा स्तनभारेण सोपदिष्टा तथा तथा ।
यथा तत्क्षणमेवाप्ता तयान्यायसमागतिः ॥

शङ्कुकस्य.

1235

सति प्रदीपे सत्यग्नौ सत्सु तारामणीन्दुषु ।
विरामे मृगशावाक्ष्यास्तमोभूतमिदं जगत् ॥

अमरुकस्य.

1236

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।
पाणिभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥

1237

क्षिपतोप्यन्यतश्चित्तं सैव सारङ्गलोचना ।
शङ्केव कृतपापस्य हृदयान्नापसर्पति ॥

कयोरपि.

1238

यः प्रदोषः प्रदोषोसौ कालः कालः किमुच्यते ।
दोषा दोषाकरवती विना तन्व्याः समागमात् ॥

1239

एकमुत्कण्ठया व्याप्तमन्यद्दयितया हृतम् ।
चेतनां हृदयं धत्ते कियन्ति हृदयानि मे ॥

विच्छित्रपयोः.

1240

नियतं यदि नास्माकं निसर्गविधुरो विधिः ॥
किमिन्दुवदना नीता क्षणं नयनगोचरम् ॥

गोविन्दस्वामिनः.

1241

यदि सा चारुसर्वाङ्गी चित्ते वसति मे प्रिया ।
तत्कथं शून्यचित्तोहमहो विधिविपर्ययः ॥

कस्यापि.

1242

दिक्षु भूमौ तथा व्योम्नि सर्वत्रैव विभाव्यते ।
स्मर्यते प्राणसंदेहे तन्वी नारायणायते ॥

भा° विनीतदेवस्य.

1243

अहो अहं नमो मह्यं यदहं वीक्षितोनया ।
बालया त्रस्तसारङ्गचपलायतनेत्रया ॥

1244

तावदेवामृतमयी यावल्लोचनगोचरे ।
चक्षुष्पथादतीता तु विषादप्यतिरिच्यते ॥

1245

एकतो दिवसान्बाला गणयत्येकतोन्तकः ।
न विद्मः प्रथमं कस्य यास्यामो वयमन्तिकम् ॥

कयोरपि.

1246

मर्तव्यपक्षनिःक्षिप्ता यदि नाम विधेर्वयम् ।
उपायाः किमु नान्ये स्युर्दर्शिता यन्मृगेक्षणा ॥

भदन्तकम्बलकस्य.

1247

तन्वङ्ग्या विप्रयुक्तस्य दिवसा यान्ति ये मम ।
निर्घृणस्तानपि यमः प्रायेण गणयिष्यति ॥

1248

विरहे मृगशावाक्ष्या तयैवोपकृतं मम ।
यदन्यस्त्रीपरिष्वङ्गप्रार्थनाशल्यमुद्धृतम् ॥

1249

मूढाः संयोगमिच्छन्ति वियोगस्तु मयेष्यते ।
एकैव संगमे बाला वियोगे तन्मयं जगत् ॥

केषामपि.

1250

एकैव संगमे बाला वियोगे तन्मयं जगत् ।
कृतोपकार एवायं वियोगः केन निन्द्यते ॥

1251

यदि स्मरामि तन्वङ्गीं जीविताशा कुतो मम ।
अथ विस्मृत्य जीवामि जीवितव्यसनेन किम् ॥

एतौ दीपकस्य.

1252

अपेहि हृदयाद्वा मे वामे दर्शनमेहि वा
अदूराविरहोत्कण्ठादुःखं दुःखेन सह्यते ॥

कस्यापि.

1253

स मे समासमो मासो सा मे माससमा समा ।
यो यातया तया याति या यात्यायातया तया ॥

चतुरक्षरः ॥ शाश्वतस्य.

1254

सा दृष्टा यैर्न वा दृष्टा मुषिताः सममेव ते ।
हृतं हृदयमेकेषामन्येषां चक्षुषः फलम् ॥

शङ्करदेवस्य.

1255

यदि प्रियावियोगेपि रुद्यते दीनदीनकम् ।
तदिदं दग्धमरणमुपयोगं क्व यास्यति ॥

दग्धमरणस्य.

1256

कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।
मा संचर मनःपान्थ तत्रास्ति स्मरतस्करः ॥

कस्यापि.

1257

मनःशुक निवर्तस्व कामिनीगण्डदाडिमात् ।
कामव्याधेन विन्यस्तं तत्रास्त्यलकजालकम् ॥

रामानकाङ्कविक्रस्य.

1258

मनोभृङ्ग निवर्तस्व कामिनीवदनाम्बुजात् ।
मदनेन्दौ समुदिते बन्धनं प्राप्स्यसि ध्रुवम् ॥

रैरुपकस्य.

1259

अयि हृदय दयां मयि कुरु कुरङ्गनयनां विना बधान धृतिम् ।
टसदिति झटिति स्फुट वा स्फुटमिदमुक्तं गतिर्नान्या ॥

कस्यापि.

1260

पाण्डुरसि निशि न शेषे प्रतिदिनमाविष्करोषि तनिमानम् ।
वयमिव किं त्वमपि सखे शशाङ्क तामेव चिन्तयसि ॥

हरगणस्य.

1261

कान्ता ददाति मदनं मदनः संतापमनुपमं च ।
संतापो मरणमहो तथापि शरणं नृणां सैव ॥

1262

अलसयति गात्रमधिकं भ्रमयति चेतस्तनोति संतापम् ।
मोहं च मुहुः कुरुते विषविषमं वीक्षितं तन्व्याः ॥

भट्टकर्णाटकस्य.

1263
निर्विण्णे निर्विण्णा मुदिते मुदिता समाकुलाकुलिते ।
प्रतिबिम्बसमा कान्ता संक्रुद्धे केवलं भीता ॥

1264
यावद्वाञ्छितसुरतव्यायामसहाविरुद्धसंयोगा ।
चित्तानुवृत्तिकुशला पुण्यवतामेव जायते जाया ॥
शामीरगुप्तस्य.

1265
नूनमयं मे शापः कान्ताविरहो रसायनीभूतः ।
वर्षसहस्राभ्यधिकान्नयामि कथमन्यथा दिवसान् ॥

1266
अवलोकनमपि सुखयति कुवलयदलचारुचपलनयनायाः ।
किं पुनरलकचलद्युति सरभसमालिङ्गनं तन्व्याः ॥

1267
चारुमधुप्रतनयनमधरदलं दशनकेसरं तस्याः ।
मुखकमलमनुस्मरतः स्मरहरमनसः कुतो निद्रा ॥

1268
स्तनयुगमत्युत्तुङ्गं निम्नो मध्यः समुन्नतं जघनम् ।
इति विषये हरिणाक्ष्या वपुषि नवे क इव न स्खलति ॥

1269
उपप्लवोऽसौ किमु राजपुत्री
ज्योत्स्नाद्रवोऽसावुत वज्रपातः ।
अलं तया सैव हि जीवितं मे
धिङ्मामहं वा चरितार्थ एकः ॥

1270
यदा प्रकृत्यैव जनस्य रागिणो
ज्वलेत्प्रदीप्तो हृदि मन्मथानलः ।
तदत्र भूयः किमनर्थपण्डितैः
कुकाव्यगव्याहुतयो निपातिताः ॥
एते केषामपि.

1271

त्यागो हि सर्वव्यसनानि हन्ती-
त्यलीकमेतद्भुवि संप्रतीतम् ।
जातानि सर्वव्यसनानि तस्या-
स्त्यागेन मे मुग्धविलोचनायाः ॥

शूद्रकस्य.

1272

कालक्रमं प्रत्यकथैव ताव-
त्क्षणं वियोगो मरणेन तुल्यः ।
प्रियामुखोद्वीक्षणलालसाना-
मक्ष्णोर्निमेषोपि हि विघ्नभूतः ॥

कस्यापि.

1273

मुहुरङ्गुलिसंवृताधरौष्ठं
प्रतिषेधाक्षरविक्लवाभिधानम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः
कथमप्युन्नमितं न चुम्बितं नु ॥

कालिदासस्य.

1274

अयि वरोरु हतस्मरदीपिके
यदि गतासि मदीक्षणगोचरात् ।
असमसायकसायककीलिता
वद गमिष्यसि मे हृदयात्कथम् ॥

वसुनागस्य.

1275

कुङ्कुमपङ्ककलङ्कितदेहा
गौरपयोधरलम्बितहारा ।
नूपुरहंसरणत्पदपद्मा
कं न वशीकुरुते भुवि रामा ॥

1276

सनूपुरालक्तकपादताडितो
द्रुमोपि यासां विकसत्यचेतनः ।
तदङ्गसंस्पर्शरसद्रवीकृतो
विलीयते यन्न नरस्तदद्भुतम् ॥

1277

चन्द्रश्चण्डकरायते मृदुगतिर्वातोपि वज्रायते
माल्यं सूचिकुलायते मलयजालेपः स्फुलिङ्गायते ।
आलोकस्तिमिरायते विधिवशात्प्राणोपि भारायते
हा हन्त प्रमदावियोगसमयः कल्पान्तकालायते ॥

1278

अद्यापि तां सुरतलब्धयशःपताकां
लम्बालकां विरहपाण्डुरगण्डभित्तिम् ।
स्वप्नेपि लोलनयनां क्षणदृष्टनष्टां
विद्यां प्रसादगुणितामिव संस्मरामि ॥

एते केषांचित्

1279

तप्ते महाविरहवह्निशिखावलीभि-
रापाण्डुरस्तनघने हृदये प्रियायाः ।
मन्मार्गवीक्षणनिवेशितदीनदृष्टे-
र्नूनं छमच्छमिति बाष्पकणाः पतन्ति ॥

छमच्छमिकारकस्य.

1280

निद्रार्धमीलितदृशो मदमन्थराया
नाप्यर्थवन्ति न च यानि निरर्थकानि ।
अद्यापि मे मृगदृशो मधुराणि तस्या-
स्तान्यक्षराणि हृदये किमपि ध्वनन्ति ॥

कलशकस्य.

1281

अम्भोजगर्भसुकुमारतनुस्तदासौ
कण्ठग्रहप्रसृमरापघने निलीय ।
सद्यः पतन्मदनमार्गणरन्ध्रमार्गै-
र्नूनं मम प्रियतमा हृदये प्रविष्टा ॥

श्रीहर्षदेवस्य.

1282

तीक्ष्णं कटाक्षविशिखं मयि पातयन्ती
मर्माणि मुग्धवदना न तथा दुनोति ।
क्रोधात्सवेपथु यथा प्रतिसंहरन्ती
पातादसह्यतरमुद्धरणे हि शल्यम् ॥

कस्यापि.

1283

कचग्रहोत्थानितमर्धकुड्मलं
त्रपाचलत्तारकमन्दलोचनम् ।
बलाद्गृहीताधरवेदनाकुलं
कदा पिबेयं ननु तत्प्रियामुखम् ॥

वसुनागस्य.

1284

तत्तादृशं सकलचन्द्रकलाकलाप-
लावण्यनिर्मितमिवायतलोचनायाः ।
रूपं प्रविश्य हृदयं दहतीव मन्ये
वामे विधौ न खलु यो विपदां न पन्थाः ॥

1285

पीतो यदाप्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः ।
तृष्णा तदाप्रभृति मे द्विगुणत्वमेति
लावण्यमस्ति बहु तत्र किमत्र चित्रम् ॥

कयोरपि.

1286

बाला च सा विदितपञ्चशरप्रपञ्चा
तन्वी च सा स्तनभरोपचिताङ्गयष्टिः ।
लज्जां समुद्वहति सा सुरतावसाने
हा कापि सा किमिव किं कथयामि तस्याः ॥

भासस्य.

1287

नूनं हि ते कविवरा विपरीतवाचो
ये नित्यमाहुरबला इति कामिनीनाम् ।
याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयोपि विजिता अबला कथं ताः ॥

1288

लम्बालकं विरहपाण्डुरगण्डभित्ति
मुग्धं मनोहरमनङ्गगृहं प्रियायाः ।
पक्ष्मान्तवान्तघनबाष्पजलार्द्रगण्डं
ध्यायन्मुखं हृदय यासि न खण्डखण्डम् ।

1289

कान्तामुखं सुरतकेलिविमर्दखेद-
संजातघर्मकणविच्छुरितं रतान्ते ।
आपाण्डुरं तरलतारनिमीलिताक्षं
संस्मृत्य हे हृदय किं शतधा नयासि ॥

1290

बाष्पाविलेन निभृतेन सुदीनदीन-
मुन्मीलितेन शनकैररुणेन गाढम् ।
निःश्वस्य लोचनयुगेन निमीलितं त-
त्तन्व्याः सदा गुरुसमक्षमहं स्मरामि ॥

1291

अद्यापि तत्प्रचलकुण्डलघृष्टिगौरं
वक्त्रं स्मरामि विपरीतरताभियोगे ।

आन्दोलनभ्रमजलस्फुटसान्द्रबिन्दु-
मुक्ताफलप्रकरविच्छुरितं प्रियायाः ॥

बिल्हणस्य.

1292

मत्तेभकुम्भपरिणाहिनि कुङ्कुमार्द्रे
कान्तापयोधरतटे रतिखेदखिन्नः ।
वक्षो निधाय भुजपञ्जरमध्यवर्ती
धन्यः क्षपां क्षपयति क्षणलब्धनिद्रः ॥

1293

आ कर्णमूलमपकृष्य धनुः सबाणं
मय्येव किं प्रहरसि स्मर बद्धकोपः ।
तस्यां मुहुः क्षिप शरान्हरिणेक्षणायां
तन्मन्मथोपि भव मन्मथ एव मा भूः ॥

1294

प्राप्ते निदाघसमये मदनाग्नितापो
निर्वापितो मम यया हि सुशीतलाङ्ग्या ।
सान्तर्गता दहति मां तरलायताक्षी
वामे विधौ प्रियतमापि विपक्षभूता ॥

1295

नभसि जलदलक्ष्मीं साम्रया वीक्ष्य दृष्ट्या ।
प्रवससि यदि कान्तेत्यर्धमुक्त्वा कथंचित् ।
मम पटमवलम्ब्य प्रोल्लिखन्ती धरित्रीं
यदनु कृतवती सा तत्र वाचो निवृत्ताः ॥

1296

विरहपवनवेगात्कम्पिताभिः शिखाभि-
र्दहति मम शरीरं निर्घृणो मन्मथाग्निः ।
अपसर मृगनेत्रे दह्यमानात्प्रतूर्णं
हृदयहतकगेहाद्दह्यसे त्वं न यावत् ॥

केषामपि.

1297

अलसवलितमुग्धस्निग्धनिःस्पन्दमन्दै
रभसविकसितान्तर्विस्मयस्मेरतारैः ।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षै-
रपहृतमपविद्धं पीतमुन्मूलितं वा ॥

भवभूतेः.

1298

तव कुसुमशरत्वं शीतलत्वं हिमांशो-
र्द्वयमिदमयथार्थं दृश्यतेऽस्मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान्वज्रसारीकरोषि ॥

1299

ललितललितैरत्युत्पन्नैर्विलोक्य विलोकितै-
र्गुरुजनभयान्मन्दं मन्दं व्रजत्यवगण्य माम् ।
कतिपयपदन्यासं कृत्वा समुत्सुकमानसा
झटिति वलितग्रीवं बाला मुहुर्मुहुरीक्षते ॥

कस्यापि.

1300

हेलोत्तानितवामहस्तपिहितस्मेरास्यमुद्राङ्गुलि-
च्छिद्रान्तर्दरदृश्यमानविकसद्दन्तांशुसंशोभितम् ।
पादाङ्गुष्ठविलिख्यमानवसुधं किंचिन्नमत्कंधरम् ।
साचिक्षिप्तदृशो न मोहयति कं संभाषणं सुभ्रुवः ॥

1301

न्यक्कारेण बहिः प्रियेण हृदये गूढार्थसंसूचिना
साकूतेन विदग्धनर्मवचसां संजातमिथ्याक्रुधाम् ।
बालानां हसितानुविद्धरुदितश्रीमन्मुखीनां गिरः
कार्कश्येऽप्यविलुप्तमार्दवजुषः कुर्वन्ति कं नोत्सुकम् ॥

1302

नैरन्तर्यमुपैति गात्रलतिका छन्नेव यत्रांशुकैः
शुष्यन्नेव बिभर्ति मूर्तिमधरो यस्मिन्नसस्यन्दिनीम् ।
यस्मिन्विस्मृतमेव सुष्ठु विहितं कंदर्पतन्त्रं भवे-
न्मन्ये तस्य रतस्य चर्वितरसैः प्राप्तं फलं जन्मनः ॥

1303

संदष्टेधरपल्लवे सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेतिकोपवचनैरानर्तितभ्रूलता ।
सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं वृथैव मथितो मूढैः सुरैः सागरः ॥

1304

आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किंचिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसः सीकरैः ।
तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥

1305

रतक्रीडा रण्डां रमयति चिरब्रह्मचरणा-
न्नवीनत्वात्कन्यामपि च पतिवत्नीं भयवशात् ।
विना त्वेतैर्वेश्या बहुलजनसंभोगरसवि-
द्धवेद्यस्य प्रीता ननु सुभगवाच्यः स पुरुषः ॥

1306

यः कंदर्पवसन्तयोरविरहो लोकप्रसिद्ध्या स्थित-
श्चित्तोन्माथिनि कामिनां स वपुषि व्यक्तं बतालक्ष्यते ।
यन्मुग्धाब्जमनोहरं स्तनयुगं बाहू लतालासिनौ
रोमाली भ्रमरावलिः किसलयाकारा नखश्रेणयः ॥

1307

तारुण्योष्मणि यत्पयोधरभरः कामप्युपैत्युन्नतिं
तस्मिन्नुन्नतिभाजि यन्मुखशशी भाति प्रसीदद्युतिः ।

तस्मिन्भाति यदीक्षणाम्बुजयुगं धत्ते विकासश्रियं
तन्मोहाय न कल्पतेऽद्भुतमिदं कस्य स्वरूपं तव ॥

1308

त्रिभिर्नेत्रैः कोपाकुलितहृदयो यं पशुपतिः
प्रयत्नेनाधाक्षीत्क्षपणमुररीकृत्य तपसः ।
हसन्तीनां हेलालसमभिपतत्पक्ष्मलदृशां
तृतीयो दृग्भागो झटिति तमनङ्गं जनयति ॥

1309

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥

1310

हर हर करुणापराङ्मुखोयं
गणयति तान्यपि वासराणि वेधाः ।
कुवलयनयनास्तनान्तरेषु
क्षणमपि येषु न शेरते युवानः ॥

केषामपि.

1311

तरुणी रमणी रतिरम्यतरा
प्रमदा समदा सुखदा च सदा ।
दयिता यदि सा हृदये वसति
क्व जपः क्व तपः क्व समाधिविधिः ॥

कस्यापि.

1312

स्वप्रेम प्रापितायाः प्रतिरजनि तव भ्रीषु मग्नाः कटाक्षाः
श्रोत्रे गीतामृताब्धौ त्वगपि तनुतनूमञ्जरीसौकुमार्ये ।
नासा श्वासाधिवासेधरमधुनि रसज्ञा चरित्रेषु चित्तं
तन्मस्तन्वङ्गि कैश्चिन्न करणहरिणैर्वागुरा लङ्घितासि ॥

श्रीहर्षस्य.

अन्ये तु व्यसनं क्षिपन्ति पशवः कान्तावियोगोद्भवै-
श्चिन्ताग्लानिविषाददैन्यजनितैर्बाष्पैरनाहारिणः ॥

कस्यापि.

1366

यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारः शशी ।
येपि त्वद्गमनानुकारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥

श्रीयशोवर्मणः.

1667

तैस्तैश्चाटुभिराज्ञया किल तया वृत्ते रतिव्यत्यये
लज्जामन्थरया तया निवसिते भ्रान्त्या मदीयांशुके ।
तत्पट्टांशुकमुद्वहन्नहमपि स्थित्वा यदुक्तोधुना
वेषो युज्यत एष एव हि तवेत्येतन्न विस्मर्यते ॥

अमरुकस्य.

1368

आश्लिष्टापि करोति सा मम तनुं कण्ठग्रहोत्कण्ठितां
दृष्टापि प्रियदर्शना नियमयत्यक्ष्णोर्दिदृक्षां पुनः ।
अन्तश्चेतसि संस्थितापि हृदयं भूयो विशत्येव मे
रूढप्रेमसमागमापि नवतां धत्ते प्रिया प्रत्यहम् ॥

गोपादित्यस्य.

1369

तन्व्या संप्रतिपत्तिदुःसहतरैर्वाक्यैर्विषण्णानने
मय्यन्योन्यपरीक्षणात्परिजने मूकस्मितं कुर्वति ।
तत्पादप्रणतिप्रसङ्गरभसानस्मान्विलोक्याकुलं
धृष्टेत्येतदवादि यन्मृगदृशा तेनाहमाश्वासितः ॥

1370

स्वाधीनेति न चुम्बितातिनिपुणं पीतोधरो नो तृषा
नो तस्या गतिरीक्षिता न हसितं नालिङ्गिता यत्नतः ।

1319

धीशालिनां वचनपुण्ड्रकगोलकैः किं
तन्व्या वियोगविषमूर्छितचेतसो मे ।
ब्रूते जनो निगडबन्धनमस्य योग्यं
चेतो हठाद्व्रजति पादनिबन्धनं किम् ॥

1320

अपूर्वोयं कान्ते ज्वलति मुखदीपस्तव चिरं
तमो द्रष्टॄणां यो जनयतितरां याति सुतनो ।
अधस्ताद्यत्रेयं बत सुरभिधूमालकतति-
र्यदीया वर्तीव ज्वलयति पतंगानिव जनान् ॥

1321

मनश्चकोर को राकाशीतांशुरिति तन्मुखे ।
भ्रमो जिताब्जेपि दिवा द्युतिमांश्चन्द्रमाः कथम् ॥

एते रैरुपकस्य.

1322

प्रसादपरतन्त्रयोर्मधुमदोज्झितव्रीडयो-
श्चिरं मयि निरस्तयोः शिथिलहासहेलाजुषोः ।
प्रियानयनयोस्तदा यदनुभूतमन्तर्मया
सखे विगतवाचिकं तदलमेव किं ब्रूमहे ॥

कलशकस्य.

1323

पुरस्तन्व्या गोत्रस्खलनचकितोहं नतमुखः
प्रवृत्तो वैलक्ष्यात्किमपि लिखितुं दैवहतकः ।
स्फुटो रेखान्यासः कथमपि स तादृक्परिणतो
गता येन व्यक्तिं पुनरवयवैः सैव तरुणी ॥

1324

ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा
मनस्विन्या रूढप्रणयगरिमोद्गद्गदगिरा ।

अहो चित्रं चित्रं स्फुटमिति निगद्याश्रुकलुषं
रुषा कामाखं मे शिरसि निहितो वामचरणः ॥

दुर्वहकस्य.

1325

कृशासीत्यालीना मलिनवसनासीत्यवनता
चिराद्दृष्टासीति स्तनकलशकम्पं प्ररुदिता ।
परिष्वक्ता यावत्प्रणयपदवीं कामपि गता
ततः सारङ्गाक्ष्या हृदयमिदमापीतमिव मे ॥

कस्यापि.

1326

कृशा केनासि त्वं प्रकृतिरियमङ्गस्य ननु मे
मलाधूम्रा कस्माद्गुरुजनगृहे पाचकतया ।
स्मरस्यस्मान्कच्चिन्नहि नहि नहीत्येवमगम-
त्स्मरोत्कम्पं बाला मम हृदि निपत्य प्ररुदिता ॥

मारुलायाः.

1327

क्वचिन्मोहात्पश्याम्यविरचितलम्बालकमुखीं
क्वचित्संकल्पस्तां सुहृदिव पुरः स्थापयति मे ।
क्वचिद्रष्टव्याशा सुखयति मुहूर्तं ह्यनुसृता
नमस्तस्यै यस्या रमयति वियोगोपि हृदयम् ॥

1328

शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत्साखं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय परितापं वहसि किम् ॥

1329

विकल्परचिताकृतिं सततमेव तामीक्षसे
सदा समभिभाषसे समुपगूहसे सर्वदा ।
प्रमोदमुकुलेक्षणं पिबसि पाययस्याननं
तथापि च दिवानिशं हृदय हे किमुत्कण्ठसे ॥

1330

प्रसीद प्राणेशे कुरु मम वचः सुन्दरमुखि
त्यजैतत्संतप्तं मदनशिखिना दग्धहृदयम् ।
मदीयं बालत्वं प्रकृतिसुकुमाराङ्गलतिकं
वहन्तीमाशङ्के मदनहुतभुक्तामपि दहेत् ॥

एते केषामपि.

1331

सखे सत्यं सत्यं विरहदहनः कोपि हृदये
ज्वलत्यस्मिन्नर्क्कदिनमपि न मे ताम्यति मतिः ।
अलं बालोन्मीलत्कमलकलिकाकोमलतनु-
र्वसत्यस्मिन्कान्ता सुचिरमिति चिन्ता दहति माम् ॥

भट्टवृत्तिकारस्य.

1332

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनामुक्तं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिव समुपस्थास्यत इति ॥

कालिदासस्य.

1333

अनारब्धाक्षेपं परमकृतबाष्पव्यतिकर-
मनुक्तान्तस्तापं हृदयविनिपीतव्यवसितम् ।
कृशाङ्ग्या यत्पापे व्रजति मयि नैराश्यपिशुनं
स्थैरङ्कैरुत्कं हृदयमिदमुन्मूलयति तत् ॥

लुट्टकस्य.

1334

इदं किं ते न्यस्तं वलयिनि करे वक्त्रकमलं
न युक्तः कोपोयं प्रणयिनि निरागस्यपि जने ।
ब्रुवाणे मय्येवं श्वसनविषमोत्कम्पितकुचं
मृगाक्ष्यास्तत्कालं नयनजलमेवोत्तरमभूत् ॥

1335

व्रीडायोगान्नतवचनया संनिपाते गुरूणां
बद्धोत्कम्पं स्तनयुगलके मन्युमन्तर्नियम्य ।
तिष्ठेत्युक्तं किमिव न तया यत्समुत्सृज्य बाष्पं
मय्यासक्तश्चिरविरहिणीहारिनेत्रत्रिभागः ॥

बन्धःस्वामिनः.

1336

श्यामास्वङ्गं चकितहरिणप्रेक्षिते दृष्टिपातं
गण्डच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा-
न्हन्तैकस्थं क्वचिदपि न ते भीरु सादृश्यमस्ति ॥

1337

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालिप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥

एतौ कालिदासस्य.

1338

स्वप्नेपि दुर्लभमहो तव दर्शनं मे
चञ्चच्चकोरनयनेस्मि यतो विनिद्रः ।
बाष्पेण रुद्धमपि मार्गनिदर्शनं मे
वामो विधिर्न सहते सुखमल्पमेव ॥

1339

अवधीरणां कृतवती भवती
मयि यत्कुकर्ममहिमा स हि मे ।
यदि चातको न लभतेम्बु घना-
द्वचनीयता भवति काम्बुमुचः ॥

एतौ रैरुपकस्य.

1340

प्रम्लाने नयने विपाण्डुरधरः क्षामं कपोलद्वयं
स्रस्ते बाहुलते शिरोरुहचयो व्यस्तास्थितिः सर्वतः ।
यैवं मद्गमवार्तयापि हि दशामन्यां समारोपिता
याते सा मयि जीवतीति वचनं भ्रातर्न संभाव्यते ॥

1341

दूराभोगभरेण भुग्नगतिना स्पृष्टा नितम्बस्थली
धत्ते स्वर्णसरोजकुड्मलतुलां मुग्धं स्तनद्वन्द्वकम् ।
आलापाः स्मितसुन्दराः परिचितभ्रूविभ्रमा दृष्टय-
स्तस्यास्तर्जितशैशवव्यतिकरं रम्यं वयो वर्तते ॥

1342

याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥

अमरुकस्य.

1343

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा
दोषाणां प्रशमाय मे श्रुतमहो कोपेपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योधरं पास्यति ॥

कालिदासस्य.

1344

उद्वृत्तस्तनभारभङ्गुरमुरो नोत्कञ्चुकं कारिता
संयोगस्तु यथा तथेति सकला नीवी न विस्रंसिता ।
भूयः संगम आवयोः क्व नु भवेदेवं च नोल्लापिता
संभ्रान्तत्वरितेन भीतसुरतेनैवं वयं वञ्चिताः ॥

1345

केशैः केसरमालिकामपि चिरं या बिभ्रती खिद्यति
या गात्रेषु घनं विलेपनमपि न्यस्तं न सोढुं क्षमा ।
दीपस्यापि शिखां न वासभवने शक्नोति या वीक्षितुं
सा तापं विरहानलस्य महतः सोढुं कथं शक्ष्यति ॥

1346

सा बाला वयमप्रगल्भवचसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरभरं धत्ते सखेदा वयम् ।
साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यसमाश्रयैरपटवो जाताः स्म इत्यद्भुतम् ॥

1347

यासि त्वं विरहादहं हतमनाः प्राणाः कठोरक्रियाः
कष्टो मन्मथवह्निरेष विषमे मग्नास्मि या संकटे ।
इत्युक्त्वा कठिनस्तनाहतिवशश्याशीर्णबाष्पा प्रिया
यन्मत्कण्ठविलम्बिबाहुलतिकारोदीद्विलीये ततः ॥

1348

त्वं तस्यां यदि नाम रागविधुरं यातं समुत्सृज्य मां
तत्केनाहमिदं किमप्यनुभवाम्यन्तः समुत्कण्ठितम् ।
स्वस्थीभूय ननु क्षणं हृदय हे त्वं भावमाचक्ष्व मे
किं संतापविखण्डितस्य भवतो वृत्तिर्द्विधा जायते ॥

1349

उद्ग्रीवं खलु वीक्षितं वपुरिदं लज्जालसं यत्तदा
गच्छन्त्या सखिसंनिधौ किमपि यन्निर्वर्णकं भाषितम् ।
हे प्राणा विरहेण यात किमिदं नैर्घृण्यमालम्बितं
तत्स्मृत्वा यदि युक्तमासितुमहो यूयं प्रमाणं मम ॥

श्रीकल्याणदत्तस्य.

1350

यास्यामीति वचोनयापि परुषं श्रुत्वा नमय्याननं
पादाङ्गुष्ठतलेन लोचनजलक्लिन्नां लिखन्त्या भुवम् ।

यत्प्रोक्तोऽहमपि क्व मन्यत इति व्यावृत्य वक्त्रं तया
तन्मे शल्यमिवाद्य मर्मपतितं मृत्योः परं कारणम् ॥

1351

कोपात्कोमललोलबाहुलतिकापाशेन बध्वा दृढं
नीत्वा वासनिकेतनं दयितया तासां सखीनां पुरः ।
भूयो नैवमिति स्खलन्मृदुपदं संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान्रुदत्या हसन् ॥

कयोरपि.

1352

चक्षुर्द्रक्ष्यति रूपमन्तिकगतं वक्षः परिष्वक्ष्यते
पर्याप्तं रसना नवाधररसं पानोत्तमं पास्यति ।
श्रोत्रं श्रोष्यति हंसगद्गदकलं काले मितं भाषितं
त्वं चिन्तास्पद मूढ किं नु हृदय प्राप्तावपि प्राप्स्यसि ॥

ईशानदेवस्य.

1353

दुःखार्ते मयि दुःखिता भवति या हृष्टे प्रहृष्टा तथा
दीने दैन्यमुपैति रोषपरुषे पथ्यं वचो भाषते ।
कालं वेत्ति कथाः करोति निपुणा मत्संस्तवे रज्यति
भार्या मन्त्रिवरः सखा परिजनः सैका बहुत्वं गता ॥

भासस्य.

1354

उद्वृत्तः स्तनभार एष तरले नेत्रे चले भ्रूलते
रागाधिष्ठितमोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ।
सौभाग्याक्षरमालिकेव लिखिता पुष्पायुधेन स्वयं
मध्यस्थापि करोति तापमधिकं रोमावली केन मे ॥

कस्यचित्.

1355

पञ्चत्वं तनुरेतु भूतनिवहाः स्वांशान्विशन्तु प्रभो
धातस्त्वां शिरसा प्रणम्य कुरु मामित्यद्य याचे पुनः ।

तद्वापीषु पयस्तदीयमकुरे ज्योतिस्तदीयालय-
व्योम्नि व्योम तदीयवर्त्मनि धरां तत्तालवृन्तेनिलम् ॥

दाक्षिणात्यस्य कस्यापि.

1356

कोशद्वन्द्वमियं दधाति नलिनी कादम्बचञ्चुक्षतं
धत्ते चूतलता नवं किसलयं पुंस्कोकिलास्वादितम् ।
इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे
चेलान्तेन तिरोदधे स्तनतटं बिम्बाधरं पाणिना ॥

कस्यापि.

1357

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
कालात्मा कुटिलः करोतु कवरीभारोपि मारोद्यमम् ।
मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवा-
न्सद्वृत्तः स्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥

श्रीजयदेवस्य.

1358

तद्वक्त्राब्जजितः प्रसह्य भजते क्षैण्यं क्षपावल्लभ-
स्तद्भ्रूविभ्रमतर्जितं च विनतिं धत्ते धनुर्मान्मथम् ।
तस्याः पेलवपल्लवद्युतिमुषा शोणाधरेणार्दितं
नूनं प्राप्य विरक्ततां वनमहीं बिम्बं समालम्बते ॥

क्षेमेन्द्रस्य.

1359

संतापी मलयानिलो न रतये सौधस्थिता चन्द्रिका
खेदायैव चिरं द्विरेफचलितोत्फुल्लाम्बुजा दीर्घिका ।
सर्वत्राहितविप्रतीपचरितस्यैवं मनोजन्मनः
केयं वृत्तिरदृष्टरूपविषमप्रस्थायिनी दृश्यते ॥

1360

दृष्टा सा वरबालिका गुरुजनाद्भीता वियोगातुरा
वैजन्ये सखि किं कृशासि किमभूत्पीडेति पृष्टा मया ।

सस्नेहं सभयं विलोक्य मिषतो मत्संनिकर्षागता-
नङ्गो वेत्ति यदित्यवोचदुदितोच्छ्वासं ततो मे व्यथा ॥

1361

ईषन्मन्थरलोललोचनयुगं व्यावर्तितभ्रूलतं
संदष्टाधरवेदनाप्रलपितं हा हेति मन्दाक्षरम् ।
कान्तायाः सुरतावसानसमये दृष्टं मुखं यन्मया
स्वेदार्द्रीकृतपाण्डुगण्डपुलकं तत्केन विस्मार्यते ॥

1362

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता ततः ।
नो यावत्परिरभ्य चाटुकशतैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रः कृतः ॥

निद्रादरिद्रस्य.

1363

रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं
नो दृष्टेव मयेति कम्पयसि किं वातावधूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छद-
स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोयं कुतः ॥

वसुनागस्य.

1364

रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणै-
स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि ।
कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ॥

श्रीयशोवर्मणः.

1365

एकः स व्यसनी पुमानचरमैर्निःश्वासवातैः समं
हा मे सा दयितेति यस्य वदतः प्राणाः समं निर्गताः ।

अन्ये तु व्यसनं क्षिपन्ति पशवः कान्तावियोगोद्भवै-
श्चिन्ताग्लानिविषाददैन्यजनितैर्बाष्पैरनाहारिणः ॥

कस्यापि.

1366

यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारः शशी ।
येपि त्वद्गमनानुकारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥

श्रीयशोवर्मणः.

1667

तैस्तैश्चाटुभिराज्ञया किल तया वृत्ते रतिव्यत्यये
लज्जामन्थरया तया निवसिते भ्रान्त्या मदीयांशुके ।
तत्पट्टांशुकमुद्वहन्नहमपि स्थित्वा यदुक्तोधुना
वेषो युज्यत एष एव हि तवेत्येतन्न विस्मर्यते ॥

अमरुकस्य.

1368

आश्लिष्टापि करोति सा मम तनुं कण्ठग्रहोत्कण्ठितां
दृष्टापि प्रियदर्शना नियमयत्यक्ष्णोर्दिदृक्षां पुनः ।
अन्तश्चेतसि संस्थितापि हृदयं भूयो विशत्येव मे
रूढप्रेमसमागमापि नवतां धत्ते प्रिया प्रत्यहम् ॥

गोपादित्यस्य.

1369

तन्व्या संप्रतिपत्तिदुःसहतरैर्वाक्यैर्विषण्णानने
मय्यन्योन्यपरीक्षणात्परिजने मूकस्मितं कुर्वति ।
तत्पादप्रणतिप्रसङ्गरभसानस्मान्विलोक्याकुलं
धृष्टेत्येतदवादि यन्मृगदृशा तेनाहमाश्वासितः ॥

1370

स्वाधीनेति न चुम्बितातिनिपुणं पीतोधरो नो तृषा
नो तस्या गतिरीक्षिता न हसितं नालिङ्गिता यत्नतः ।

संक्रुद्धापि न तोषिता प्रियतमा मूढेन यावन्मया
तावद्दैवदुरात्मना कथमहं नीतो वियोगं सखे ॥

1371

श्वो गन्तव्यमिति प्रजागरदृशा मां वीक्ष्य यात्रोन्मुखं
बाष्पेणाकुललोचना स्मितवती मन्मङ्गलाशंसिनी ।
श्रुत्वा प्रत्युषसि प्रभातपटहं प्रत्यूषवाताहता
हा रात्रिस्त्वरिता गतेति पतिता कान्ता प्रियस्योरसि ॥

एते केषामपि.

1372

काञ्चीदामकबन्धनं सललिता कर्णोत्पलैस्ताडना
हेलालिङ्गनविघ्नमाहितरुषा मौनेन निर्भर्त्सनम् ।
किं पूर्वोचितमेतदत्र सहसा विस्मृत्य मन्योर्भरा-
न्मय्युत्कण्ठमनस्यदर्शनपथं यातास्यहो कोपने ॥

1373

तद्रूपामृतपानदुर्ललितया दृष्ट्या क्व विश्रम्यतां
तद्वाक्यश्रवणाभियोगपरयोः श्रव्यं कुतः श्रोत्रयोः ।
एतैस्तत्परिरम्भनिर्भररसैरङ्गैः कथं स्थीयतां
कष्टं तद्विरहेण संप्रति वयं कष्टामवस्थां गताः ॥

1374

सैका दिक्कृतपुण्यतामुपगता यत्रास्ति मुग्धेक्षणा
स्थानं तद्वसुधा बिभर्ति सफलं यत्तत्पदाध्यासितम् ।
धन्यं तन्नभसोन्तरं व्रजति यत्तच्चक्षुषोर्गोचरं
तेभ्यो धन्यतरं ममैव हृदयं यत्तन्मयं वर्तते ॥

1375

पश्यामः किमियं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मामालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ।
इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया ॥

1376

दैवाद्यद्यसौ पराधी यदि भवति ततस्ताड्यते बध्यते वा
मौनेनानेन मानप्रकटनपटुना नीयते किंकरत्वम् ।
इत्थं तस्या मयोक्तं तरलतरदृशाप्यङ्कपालीप्रसक्तं
मुक्तं मुक्ताफलालीधवलरुचि तया निर्वचो लोचनाम्भः ॥

1377

पादाङ्गुष्ठेन भूमिं किसलयमृदुना सापदेशं लिखन्ती
भूयो भूयः क्षिपन्ती मयि सितशबले लोचने लोलतारे ।
वक्त्रं ह्रीनम्रमीषत्स्फुरदधरपुटं वाक्यगर्भं दधाना
यत्सा नोवाच किंचित्स्थितमपि हृदये तन्मनो मे दुनोति ॥

1378

अद्यापि तन्मनसि संपरिवर्तते मे
रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या ।
जीवेति मङ्गलवचः परिहृत्य पश्चा-
त्कर्णे कृतं कनकपत्रमनालपन्त्या ॥

अयं बिल्हणस्य.

1379

स्थानान्निर्गत्य दूरं व्रजति मयि चिरं मुक्तकण्ठं रुदित्वा
पश्चान्निर्मृज्य नेत्रे प्रणतिमुपगता वेपमानाङ्गयष्टिः ।
कान्ता यन्मामवोचत्प्रलयघनघटाटोपबद्धान्धकारे
काले कापालिकोपि प्रवसति न गृहात्तन्मनो मे दुनोति ॥

कस्यापि.

1380

किं बाले मुग्धतेयं प्रकृतिरियमथो रौद्रता किं नु कोपः
किं वा चापल्यमुच्चैर्व्रतमुत किमु ते यौवनारम्भदर्पः ।
यत्केशालापवक्त्रस्मितललितकुचभ्रूविलासावलग्नैः
स्वस्थो लोकस्त्वदीयैर्मनसि विनिहितैर्दह्यतेमीभिरार्यः ॥

अमरुकस्य.

अथ दूत्युक्तयः

1381

हस्ते कपोलममलं पथि चक्षुर्मनस्त्वयि ।
न्यस्तमास्ते चिरं तस्या मानस्यावसरः कुतः ॥

वररुचेः.

1382

प्रकटयति क्षणभङ्गं पश्यति सर्वं जगद्गतं शून्यम् ।
आचरति स्मृतिबाह्यं जाता सा बौद्धबुद्धिरिव ॥

1383

गुणवृद्धिवर्णलोपद्वन्द्वनिपातोपसर्गसंकीर्णा ।
दुर्घटपदवाक्यार्था व्याकरणप्रक्रियेवासौ ॥

1384

अतिपरिगृहीतमौना वर्जितमाल्यानुलेपनस्नाना ।
दूरोत्सारितलज्जा निर्ग्रन्थग्रन्थरचनेव ॥

1385

अस्तमितविषयसङ्गा मुकुलितनयनोत्पला मृदुश्वसिता ।
ध्यायति किमप्यलक्ष्यं नित्यं योगाभियुक्तेव ॥

1386

अनवरतनयनविगलितजललवघटिताक्षसूत्रवलयेन ।
मृत्युंजयमिव जपति त्वद्गोत्रं विरहिणी बाला ॥

कस्यापि.

1387

सा सुन्दर तव विरहे सुतनुरियन्मात्रलोचना सपदि ।
एतावतीमवस्थां याता दिवसैरियन्मात्रैः ॥

भट्टरुद्रटस्य.

1388

कुमुदामोदी पवनः पिककूजितभृङ्गसार्थरसितानि ।
इयमियती सामग्री घटिता दैवेन तद्विनाशाय ॥

दामोदरगुप्तस्य.

1389

अकृतप्रेमैव वरं न पुनः संजातविघ्नितप्रेमा ।
उद्धृतनयनो हि यथा ताम्यत्येवं न जात्यन्धः ॥

रविगुप्तस्य.

1390

दुःखदशां प्रविशन्त्यास्तस्याः कण्ठे मुहुर्मुहुर्बाष्पः ।
स्वल्पावशेषजीवितनिर्याणभियेव निरुणद्धि ॥

बाणस्य.

1391

मन्मथशरयातितया याति तया त्वयि सुदूरमध्वानम् ।
अध्वानमेव रुदितं सखे सखेदं सखीषु पुरः ॥

अम्बकस्य.

1392

मौने निषण्णा कृतभूरिरक्षा
खट्वाङ्गलीना दधती जटाश्च ।
सा त्वत्कृते ध्यानपरा वराकी
व्रतं महापाशुपतं प्रपन्ना ॥

1393

त्वदर्थिनी चन्दनभस्मदिग्धा
ललाटलेखाश्रुजलाभिषिक्ता ॥
मृणालचीरं दधती स्तनाभ्यां
स्मरोपदिष्टं चरति व्रतं सा ॥

कयोरपि.

1394

खे खेदमन्दां विनिवेश्य दृष्टि-
मालोक्यशोभातिशयं घनानाम् ।
नेदीयसा सा मरणेन किंचि-
दाश्वासिता प्राणिति मा स्म भैषीः ॥

शकवृद्धस्य.

1395

मूर्छानुबन्धश्वसितप्रलाप-
प्रजागरोत्कम्पविजृम्भणानि ।
फलान्यवाप्तानि तया सुखार्थ-
मात्मार्पणं त्वय्यपि नाम कृत्वा ॥

रत्नाकरस्य.

1396

प्रियतमस्त्वमिमामनघार्हसि
प्रियतमा च भवन्तमिहार्हति ।
नहि विभाति निशारहितः शशी
न च विभाति निशापि विनेन्दुना ॥

गौरिकायाः.

1397

झगिति वीक्ष्य न यः पुनरीक्षितो
वरमवीक्षित एव स तादृशः ।
व्रजति वल्लभतां च सुदुर्लभो
विषमहो बहलामृतमिश्रितम् ॥

1398

स्वप्नान्तरे समुपलभ्य च सा भवन्तं
मिथ्योपगूहनविषक्तभुजावबुध्य ।
दृष्टेसि यत्र शयनेच तदध्यशेत
मुग्धा पुनः पुनरलीकनिमीलिताक्षी ॥

1399

तस्या महाशिखरवह्निशिखाकलाप-
तप्ते स्थितोसि हृदये सततं प्रियायाः ।
प्रालेयसीकरसमे हृदि सा कृपालो
बाला क्षणं वसति नैव खलु त्वदीये ॥

एते केषामपि.

1400

ये निर्दहन्ति दशनश्वसितावलोकैः
क्रूरा द्विजिह्वकुटिलाः क्व विलासिनस्ते ।
भीष्मोष्मभिः स्मरणमात्रविषैस्तवेय-
मन्याल मारयति कापि भुजंगमाङ्गिः ॥

महपाल्हदेवस्य.

1401

बाला तन्वी मृदुरियमिति त्यज्यतामत्र शङ्का
दृष्टा काचिद्भ्रमरभरतो मञ्जरी भग्नपुष्पा ।
तस्मादेषा रहसि भवता निर्दयं पीडनीया
मन्दाक्रान्ता विसृजति रसं नेक्षुयष्टिः कदाचित् ॥

विकटनितम्बायाः,

1402

किं पृष्टेन द्रुततरमितो गम्यतां सा प्रिया ते
दृष्टा प्रातर्दिवसमखिलं सासमेकं मयैव ।
पान्थे पान्थे त्वमिति रभसोद्ग्रीवमालोकयन्ती
दृष्टे दृष्टे न भवति भवानित्युदस्रं वलन्ती ॥

1403

विमुञ्चन्त्या प्राणांस्तव विरहदुःखासहनया
तया संदिष्टं ते कठिनहृदयापश्चिममिदम् ।
अपत्यं बालैका मम विधिहतायाः सलिलदा
यथा नेयं सेवाव्यसनरुचये दीयत इति ॥

ममयशःस्वामिनः.

1404

त्वां ध्यात्वा विजने प्रयाति सहसा भित्त्वा निकामं हता
संज्ञां प्राप्य कथं गतो गतघृणः प्रत्येकमाभाषते ।
किं वा यत्र करोति दैवहतिका प्रामाणिकस्त्वं तु ता-
मुन्मत्तामपराध साधुचरितास्त्वन्याज्ञ मध्ये स्थितः ॥

1405

१३६

हस्तन्यस्तकपोलया दयितया तिर्यङ्नतग्रीवया
आसाम्यस्थितनेत्रवारिविसरैः संसिच्यमानाङ्गया ।
मन्युस्तम्भितबाष्पगद्गदगिरा प्रोच्चारितार्धाक्षरं
संदिष्टं तव यत्तया सकरुणं वक्तुं न तत्पार्यते ॥

1406

ग्रीष्माभा श्वसितैर्घनोन्नतिनिभा स्थूलाश्रुभिः संततैः
क्षामा पाण्डुपयोधरा शरदियं हेमन्तवत्कम्पितैः ।
विन्यस्ताननपङ्कजा शिशिरवत्स्वेदैर्मधुश्रीरहो
तस्यास्त्वद्विरहेण कौतुककृता सर्वर्तवो दर्शिताः ॥

हरिगणस्य.

1407

अच्छिन्नं नयनाम्बु बन्धुषु कृतं तापः सखीष्वाहितो
न्यस्तं दैन्यमशेषतः परिजने चिन्ता गुरुभ्योर्पिता ।
अद्य श्वः किल निर्वृतिं व्रजति सा श्वासैः परं खिद्यते
विस्रब्धो भव विप्रयोगजनितं दुःखं विभक्तं तया ॥

अमरुकस्य.

1408

किं वा बाहुलताकवाटफलकैर्नैवार्गला कल्पिता
किं वा प्रावरणाञ्चले न विधृतः किं वा न मिथ्या क्षुतम् ।
किं पादेषु निपत्य वातिकरुणं नोत्कण्ठया क्रन्दितं
गेहादुच्चलिते किमन्यदबलालोकः करोतु प्रिये ॥

श्रीडामरस्य.

1409

भ्रातः पान्थ गृहं व्रज द्रुततरं दृष्टा मया ते प्रिया
त्वद्वार्ताश्रवणोत्सुका प्रतिपथं पान्थं समेत्यादरात् ।
बाष्पव्याकुलकण्ठगद्गदतया वक्तुं न शक्ता सती
सोच्छ्वासं स्फुटिताधरं च वलितग्रीवं चिरं रोदिति ॥

कस्यापि.

1410

नेत्रे त्वन्मार्गलोले गलदलसलसद्वारिधाराकराले
श्वासायासभ्रमार्तं स्फुरदधरदलं लोलुपं त्वन्मुखाब्जे ।
चेतश्चिन्तैकतानं त्वयि कृतमथवा सर्वमेव त्वयास्तं
शेषः शोकः कृशाङ्ग्याश्चास्तमपि विधिहता चेष्टते ते प्रदातुम् ॥

भट्टगोविन्दराजस्य.

1411

दाहोम्भः प्रसृतिंपचः प्रचयवान्बाष्पः प्रणालोचितः
श्वासाः प्रेङ्खितदीप्रदीपलतिकाः पाण्डिम्नि मग्नं वपुः ।
किंचान्यत्कथयामि रात्रिमखिलां त्वन्मार्गवातायने
हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते ॥

राजशेखरस्य.

1412

किंजल्कामोदमाद्यन्मधुकरमधुरे साधुना माधवेस्मि-
न्नास्तां दूरेण तावद्विरहहुतभुजा दह्यमाना वराकी ।
क्षामक्षामामिमां त्वां तनुमतिचपल प्रेक्षसे किं स्वयं नो
कोयं मानग्रहस्ते कुरु वचनमिदं दूतिकायाः प्रयाहि ॥

शशिवर्धनस्य.

1413

स्वप्नेपि नाथ सुखदं मुखदर्शनं ते
बालाकुला न लभते विरहाद्विनिद्रा ।
त्वन्मार्गवीक्षणसुखं परमेव तस्या
आसीद्यदश्रुनिवहेन निवारितं तत् ॥

प॰ श्रीवकस्य.

1414

माल्यं शल्यं गृहकमलिनीकूलमेतत्कुकूलं
वल्ली भल्ली हिमरसमयी वापिका तापिकापि ।
वातः पातः खरशरभरस्योन्मृणाली मृणाली
सारङ्गाक्ष्या रमणविरहे हन्त हारः प्रहारः ॥

1415

आहारं प्रति यत्कथापि शमिता यन्मौनमुद्रा मुखे
यच्चक्षुर्विनिमीलनं तनुलता यत्तानवे वर्तते ।
एकान्ते यदवस्थितिर्यदपि च ध्यानैकतानं मन-
स्तन्मन्ये सुभग त्वदर्थमनया तप्येत तीव्रं तपः ॥
संजी॰.

अथ सखीप्रश्नाः

1416

उल्लापयन्त्या दयितस्य दूतीं
बध्वा विभूषां च निवेशयन्त्याः ।
प्रसन्नता कापि मुखस्य जज्ञे
वेषाभिया नु प्रियवार्तया नु ॥
शिवस्वामिनः.

1417

मर्मणि स्पृशति भाषते प्रियं
प्रेम संस्मरति रन्ध्रमीक्षते ।
ईदृशस्य बहुचित्रकारिणो
विक्रियापि न शठस्य लक्ष्यते ॥

1418

अलमलमघृणस्य तस्य नाम्ना
पुनरपि सैव कथा गतः स कालः ।
कथय कथय वा तथापि दूति
प्रतिवचनं द्विषतोपि माननीयम् ॥
एतौ वासुदेवस्य.

1419

निःस्पन्दलोचनविलोकितकान्तदूत्यां
विन्यस्तहाररशनागुणभूषणायाम् ।
केयूरनूपुरविपर्ययभाजि जाता
कान्तिर्नवेव दयिताहितलोचनायाम् ॥
श्रीचिन्दराजस्य.

1420

कथय निपुणं कस्मिन्दृष्टः कथं नु कियच्चिरं
किमभिलषितं किं तेनोक्तं कदा स इहैष्यति ।
इति बहुविधप्रेमालापप्रकल्पितविस्तराः
प्रियतमकथाः स्वप्नेप्यर्थे प्रयान्ति न नेष्टताम् ॥

1421

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम् ।
पश्याद्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणै-
रुत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥

1422

जानेन्यासहितं विलोक्य कुटिलं तं कूटवेषं त्वया
प्रत्यक्षागसि निह्नवासहनया कोपेन दष्टोधरः ।
श्वासायासविसंस्थुला न च कुचोत्कम्पं विमुञ्चस्यहो
मोहाद्दुःसहविप्लवे चपलया किं प्रेषिता त्वं मया ॥

क्षेमेन्द्रस्य.

1423

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमा
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥

कस्यापि.

1424

किं त्वं दूति गता गतास्मि सुभगे तस्यान्तिकं कामिनः
किं दृष्टः सुचिरं करोति किमसौ वीणाविनोदक्रियाम् ।
सौभाग्योदयगर्वितः किमवदन्नैवोत्तरं दत्तवा-
न्किं गर्वान्नहि बाष्पगद्गदतया धूर्तस्य माया हि सा ॥

अथोपहासाः

1425

नायातः सामदानाभ्यामिति भेदेपि दर्शिते ।
साधु यद्दुर्विनीतस्य त्वया दण्डो निपातितः ॥

1426

विहारः कण्ठदेशोयं कषाये तव लोचने ।
मुखं विगतरागं च दूति प्रव्रजितासि किम् ॥

1427

अनेन वीतरागेण बुद्धेनेवाधरेण ते ।
दूति निर्व्याजमाख्याता सर्ववस्तुषु शून्यता ॥

1428

किं त्वं निगूहसे दूति स्तनौ वक्त्रं च पाणिना ।
खण्डिता एव शोभन्ते शूराधरपयोधराः ॥

1429

दूति किं तेन पापेन शास्त्रातिक्रमकारिणा ।
पञ्च पञ्चनखा भक्ष्याः षष्ठी त्वं येन भक्षिता ॥

1430

पार्श्वाभ्यां सप्रहाराभ्यामधरे व्रणखण्डिते ।
दूति सङ्ग्रामयोग्यासि न योग्या दूतिकर्मणि ॥

1431

नखदन्तक्षतक्षामे क्षन्तव्यं दूति मे त्वया ।
अक्षौहिण्यो दशाष्टौ च मित्रार्थे निधनं गताः ॥

1432

त्वया कर्म कृतं दूति यत्तदन्येन दुष्करम् ।
शरणागतविध्वंसी छिद्रान्वेषी निपातितः ॥

1433

क्षामा तनुर्गतिः खिन्ना नेत्रे तरलतारके ।
वागस्पष्टा श्लथं वासो दूति त्वं ज्वरितासि किम् ।

केषामपि.

1434

बहुनात्र किमुक्तेन दूति मत्कार्यसिद्धये ।
स्वमांसान्यपि दत्तानि वस्तुष्वन्येषु का कथा ॥

वररुचेः.

1435

वेल्लितालकसमृद्धि ललाटं
पाटलद्युति कपोलयुगं च ।
वेपते तनुरियं तव जाने
वाडितैव भवती रमणेन ॥

जयमाधवस्य.

1436

सवेपथुं कण्टकिनीं स्खलद्गतिं
कलं क्वणन्तीं शयनैकतत्पराम् ।
अशेषगात्रप्रभविष्णुतां गतः
कथं ज्वरस्त्वां वनजाक्षि मोक्ष्यति ॥

कस्यापि.

1437

रजन्यामन्यस्यां सुरतपरिवर्तादनुचितं
मदीयं यद्वासः कथमपि हृतं तेन सुहृदा ।
त्वया प्रत्यानीतं स्वनिवसनदानात्पुनरिदं
कुतस्त्वादृग्दूति स्खलितशमनोपायनिपुणा ॥

बीजकस्य.

1438

नायातो यदि तादृशं स शपथं कृत्वापि दूति प्रिय-
स्तत्किं कोपनया त्वया स्वदशनैरधरः खण्डितः ।
स्वेदाम्भःकणदायि वेपितमिदं त्यक्त्वा भज स्वस्थतां
लोकः कस्य सखि स्वभावकुटिलस्यान्तर्गतं ज्ञास्यति ॥

कस्यापि.

अथ स्त्रीविलोकनम्

1449

स्त्रीति नामापि मधुरं कं न कुर्यात्स्मरातुरम् ।
किमुतौदार्यचातुर्यप्रसादमधुरं वचः ॥

1450

अमृतस्येव कुण्डानि सुखानामिव राशयः ।
रतेरिव निधानानि योषितः केन निर्मिताः ॥

1451

स्त्रीत्येव गलितं धैर्यं सुरूपेति किमुच्यते ।
कष्टं सहृदया सा चेत्सस्पृहेत्यतिदुःसहम् ॥

भट्टसारस्वतस्य.

1452

किं नु लीना विलीना किं सुप्ता किं नु मृता नु किम् ।
परिष्वक्तैव कुरुते सा मे शङ्काशतं प्रिया ॥

1453

अकृत्रिमप्रेमरसा विलासालसगामिनी ।
असारे दग्धसंसारे सारं सारङ्गलोचना ॥

1454

अभ्यासः कर्मणां सत्यमुत्पादयति कौशलम् ।
विधिना तावदभ्यस्तं यावत्सृष्टा मृगेक्षणा ॥

केषामपि.

1455

अस्याः कान्तस्य रूपस्य सर्वौपम्यातिशायिनः ।
एकैव गच्छेत्सादृश्यं स्वच्छाया दर्पणाश्रिता ॥

मणिभद्रस्य.

1456

मारयन्त्या जनं त्वस्या निरागसमवज्ञया ।
मातङ्गानां गतिर्यादृक्तादृगासीदसंशयम् ॥

शकवृद्धेः.

1457

धाता यदि न चक्षुष्मान्केनेयं निर्मितेदृशी ।
अथ चेद्दृष्टिरस्त्यस्य को हेतुरपरिग्रहे ॥

कस्यापि.

1458

अमृतरससारभूतः सकलकलो मकरकेतुसर्वस्वम् ।
अखिलजननयनसुखकृत्कथमिन्दुर्वासरेऽभ्युदितः ॥

शशिवर्धनस्य.

1459

निःस्सङ्गमङ्गैर्मदनानलोत्थं
संतापहालाहलपाण्डुगौरैः ।
बद्धापि संदश्य तनोति जीव-
मजातपूर्वेयमहो भुजंगी ॥

गोविन्दस्वामिनः.

1460

अस्याः सर्गविधौ प्रजापतिरहो चन्द्रो न संभाव्यते
नो देवः कुसुमायुधो न च मधुर्दूरे विरिञ्चिः प्रभुः ।
एतन्मे मतमुत्थितेयममृतात्काचित्स्वयं सिन्धुना
या मन्थाचललोडितेन हरये दत्त्वा श्रियं रक्षिता ॥

1461

भास्वद्बिम्बाधरा कृष्णकेशी सितकरानना ।
हरिमध्या शिवाकारा सर्वदेवमयीव सा ॥

कह्लणस्य.

1462

जनमजितमपीच्छता विजेतुं
निशितदशार्धशरं धनुर्विमुच्य ।
अतिरभसतयोद्यता स्मरेण
ध्रुवमसियष्टिरिहाङ्गनाभिधाना ॥

मेण्ठकस्य.

1463

किं कौमुदीः शशिकलाः सकला विचूर्ण्य
संयोज्य चामृतरसेन पुनः प्रयत्नात् ।
कामस्य घोरहरहुंकृतिदग्धमूर्तेः
संजीवनौषधिरियं विहिता विधात्रा ॥

भट्टोद्भटस्य.

1464

एकान्तसुन्दरविधानजडः क्व धाता
सर्वाङ्गकान्तिचतुरं क्व नु रूपमस्याः ।
मन्ये महेश्वरभयान्मकरध्वजेन
प्राणार्थिना युवतिरूपमिदं गृहीतम् ॥

कस्यापि.

1465

किं सुन्दरैरिदमतोथ बहूनि तानि
वेधाः करोति बत नैव विवेचयामः ।
लावण्यमत्र किमु मूर्तमिदं नु तद्वा
निर्माणशिष्टममृतं वपुषः किमस्याः ॥

कलशस्य.

1466

अमृतममृतं चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं
रतिरपि रतिः कामः कामो मधूनि मधून्यपि ।
इति न भजते वस्तु प्रायः परस्परसंकरं
तदियमबला लक्ष्मीं धत्ते कुतः सकलात्मिकाम् ॥

रा° श्रीविजयपालस्य.

1467

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं स विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोतिगमिदं रूपं पुराणो मुनिः ॥

कालिदासस्य.

1468

लक्ष्मीः स्याद्यदि तादृशी मधुरिपुर्मूर्ध्ना वहेन्नो रमां
गौरी वा सकलं हरेत्पशुपतेर्नार्धं शशाङ्काङ्कितम् ।
सीता वा नलकूबरान्न गणयेद्धीर्तिं स रक्षःपतिः
पश्येत्तां कमलासनो यदि भवेन्न ब्रह्मचारी पुनः ॥

1469

निर्मातुं कुशलोप्यदृष्टविषये रूपे न जातु क्षमो
दृष्ट्वा वस्तु करोति तत्प्रतिकृतिं संदर्शनानुक्रमात् ।
तां सृष्ट्वाप्यसमानरूपचरितां नान्या कृता तादृशी
धात्रा यत्सुकरं तदेव न कृतं यद्दुष्करं तत्कृतम् ॥

1470

पीनेन स्तनमण्डलेन गुरुणा सैका नितम्बेन च
द्वाभ्यां मन्दगतिः कृता यदि जनास्तन्वी न तत्कौतुकम् ।
एतत्पश्यत चित्रमत्र सहसा यद्बालयाप्येकया
द्रष्टारः सकला निरुद्धगतयो निःसङ्गगात्राः कृताः ॥

केषामपि

1471

किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा मञ्जरी
लीलाप्रोच्छलितस्य किं लहरिका लावण्यवारां निधेः ।
उद्गाढोत्कलिकावतां स्वसमयोपन्यासविस्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः ॥

बन्धोः.

1472

लावण्यद्रविणव्ययो न गणितः क्लेशो महान्स्वीकृतः
स्वच्छन्दस्य सुखं जनस्य वसतश्चिन्तानलो दीपितः ।
एषापि स्वयमेव तुल्यरमणाभावाद्वराकी हता
कोर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता ॥

धर्मकीर्तेः.

1473

असामान्योल्लेखं विरसहतहेवाकिनमलं
विधिं वन्दे निन्दाम्युत बत न जाने किमुचितम् ।
अनर्घं निर्माणं ललिततनु यस्येह भवती
न यः कृत्वापि त्वां परिहरति सर्गव्यसनिताम् ॥

मुक्तिकलशस्य.

1474

येनेयं ग्लपिताखिलान्यललनासौन्दर्यरम्याकृतिः
शिल्पोत्कर्षवशाद्विशालनयना निष्पादिता वेधसा ।
वक्त्राम्भोजविलोकनोत्थमदनव्याधिः स मन्ये मृतो
येनास्याः सदृशी न काचिदपरा स्रष्टुं पुनः पारिता ॥

कस्यापि.

1475

इन्दोः संक्षयरक्षिणाक्षतसुधा किं वेधसा निर्मिता
किं धैर्यापहरा हरस्य विहिता कामेन कान्ता तनुः ।
किं तारुण्यवसन्तकान्तिललिता शृङ्गारसिक्ता लता
किं लावण्यतरङ्गिणी पुनरियं जन्मान्तराप्ता रतिः ॥

अथ स्त्रीप्रशंसा

1476

जये धरित्र्याः पुरमेव सारं
पुरे गृहं सद्मनि चैकदेशः ।
तत्रापि शय्या शयने वरस्त्री
रत्नोज्ज्वला राज्यसुखस्य सारम् ॥

1477

क्रतुं धनानां फलमभ्यमाहुः
फलं क्रतूनामविवादि पुण्यम् ।
पुण्यस्य पूर्णं फलमिन्द्रलोको
द्विरष्टवर्षाः स्त्रिय एव नाकः ॥

1478

इमे पद्मे नाम्भः पुलिनतटमेतन्न तटिनी
खमेतन्न व्याप्तिः स्तबकयुगमेतन्न लतिका ।
प्रवालोयं नाब्धिः शिशिरकिरणोयं न रजनी
घनोयं न प्रावृट्टिव शिव विधेः शिल्परचना ॥

सार्वभौमस्य.

1479

तमस्तोमः पूर्वं तदनु सकलः शीतकिरण-
स्ततः कोकद्वन्द्वं तदपि न वियुक्तं प्रतिनिशम् ।
अनम्भस्यावर्तः कनककदलीकाण्डयुगलं
सदावाची पद्मे शिव शिव विधेः शिल्परचना ।

कस्यापि.

अथ स्त्रीरूपवर्णनम्

तत्रादौ

केशाः

1480

अस्या मनोहराकारकवरीभारतर्जिताः ।
लज्जयेव वने वासं चक्रुश्चमरबर्हिणः ॥

वररुचेः.

1481

गेहं परित्यज्य निपीय धूमं
कान्ताकचा मोक्षपथं प्रपन्नाः ।
नितम्बसङ्गात्पुनरेव बद्धा
अहो दुरन्ता विषयेषु सक्तिः ॥

1482

किंजल्केन व्यपनुदति नो यस्तृषं पद्मखण्ड-
स्त्वत्कान्त्यासौ भवति विफलश्रीरमुं मा मिमीलः ।
एवं वक्तुं मधुकरभरः प्रार्थनापूर्वमस्या-
श्चन्द्रभ्रान्त्या मुखमुपगतो न त्वयं केशपाशः ॥

1483

अस्मद्वैरी शशभृदमुना जीयते ह्यन्धकारः
सारङ्गाक्ष्या मुखमनुगतः केशपाशच्छलेन ।
तं संश्रुत्य प्रगलितमहाः शीतरश्मिस्तदैव
प्राप्तः सेवाघटनविधये मालतीदामभङ्ग्या ॥

केषामपि.

1484

विकचकचपताकः किंचिदाकुञ्चितोयं
कुचकलशनिवेशी शोभते श्यामलाक्ष्याः ।
मधुरसपरिपोषादीषदुत्फुल्लकोषे
कमल इव निलीनः पेटकः षट्पदानाम् ॥

पुण्यस्य.

1485

चिकुरप्रकरा जयन्ति ते
विदुषी मूर्धनि सा बिभर्ति यान् ।
पशुनाप्यपुरस्कृतेन त-
त्तुलनामिच्छति चामरेण कः ॥

1486

अस्याः कचानां शिखिनश्च किं नु
विधिं कलापौ विमतेरगाताम् ।
तेनायमेभिः किमपूजि पुष्पै-
रभर्त्सि दत्वा स किमर्धचन्द्रम् ॥

एतौ श्रीहर्षस्य.

अथ ललाटम्.

1487

अस्या ललाटे लिखिता सखीभि-
र्विभाव्यते चन्दनपत्त्रलेखा ।
आपाण्डुरक्षामकपोलभित्ते-
रनङ्गबाणव्रणपट्टिकेव ॥

1488

भाले तिलकलेखेयं बाले भल्लीव राजते ।
भ्रूलताचापमाकृष्य न जाने कं हनिष्यसि ॥

1489

ललाटतटमष्टमीशशधरोपमं ते प्रिये
शितीकरणपट्टतां मदनमार्गणानां गतम् ।
फलामकषणोद्भवो यदयमत्र कस्तूरिका-
विशेषकमिषात्स्फुरत्यतिमनोरमः कालिमा ॥

अथ भ्रुवौ

1490

असितात्मा समुत्पन्नः समाविष्कृतचापलः ।
निसर्गकुटिलस्तस्या भ्रूविक्षेपः खलायते ॥

ऊर्जितस्य.

1491

तस्याः शलाकाञ्जननिर्मितेव
कान्तिर्भ्रुवोरानतलेखयोर्या ।
तां वीक्ष्य लीलाचतुरामनङ्गः
स्वचापसौन्दर्यमदं मुमोच ॥

कालिदासस्य.

अथ चक्षुषी

1492

मुखपद्मे कथं तस्या जातमिन्दीवरद्वयम्
अथवा साधुनाशाय भवत्युत्पातलक्षणम् ॥

1493

वयसी मृगशावाक्षी पुण्डरीकेक्षणा कथम् ।
विरोधिसंगमो नूनं साधुनाशाय कल्पते ॥

1494

न केवलं तवैवेते नेत्रे कर्णान्तसर्पिणी ।
अतिदीर्घतया कस्य न कर्णोपान्तमागते ॥

1495

कुङ्कुमे कुसुमोत्पत्तिः श्रूयते न च दृश्यते ।
बाले तव मुखाम्भोजे दृष्टमिन्दीवरद्वयम् ॥

1496

अतः परमगम्योयं पन्था विश्रम्यतामिति ।
प्रत्यक्षियुगलं तस्याः कर्णौ वक्तुमिवागतौ ॥

केषामपि.

1497

अन्तर्मलीमसे वक्रे चले कर्णान्तसर्पिणि ।
अस्या नेत्रयुगे दृष्टे दुर्जने च कुतः सुखम् ॥

1498

निमेषेण घ्नता लोकं कृष्णेन स्निग्धचारुणा ।
कर्णान्तं गच्छता तस्या लोचनेनार्जुनायितम् ॥

भट्टवृद्धेः.

1499

प्रवातनीलोत्पलनिर्विशेष-
मधीरविप्रेक्षितमायताक्ष्याः ।
तया गृहीतं नु मृगाङ्गनाभ्य-
स्ततो गृहीतं नु मृगाङ्गनाभिः ॥

कालिदासस्य.

1500

त्वदृशोर्जनयन्ति सान्त्वनां
खुरकण्डूयनकैतवान्मृगाः ।
जितयोरुदयत्प्रमीलयो-
स्तदखर्वेक्षणशोभया भयात् ॥

श्रीहर्षस्य.

अथ कर्णौ

1501

यत्पूर्वं पवनाग्निशस्त्रसलिलैश्चीर्णं तपो दुश्चरं
तस्यैतत्फलमीदृशं परिणतं यज्जातरूपं वपुः ।
मुग्धापाण्डुकपोलचुम्बनसुखं सङ्गम्य रत्नोत्तमैः
प्राप्तं कुण्डल वाञ्छसे किमपरं यन्मूढ दोलायसे ॥

कस्यापि.

अथ नासा

1502

नासादसीया तिलपुष्पतूणं
जगत्त्रये व्यस्तशरत्रयस्य ।
श्वासानिलामोदभरानुमेयां
दधद्द्विबाणीं कुसुमायुधस्य ॥

श्रीहर्षस्य.

1503

अस्याः कुशेशयदृशः शशिशुभ्रशुभ्रं
नासाग्रवर्ति नवमौक्तिकमाचकास्ति ।
कैलासमानससरोवरराजहंस्या
निःक्षिप्तमण्डमिव जाग्रति पुण्डरीके ॥

1504

मुक्ताफलं शशिसमस्य मुखस्य तस्या
हेमोर्मिकान्तगतमञ्चति नासिकान्ते ।
नीहारबिन्दुरिव केसरचक्रमध्ये
पद्मस्य तुङ्गतरकोषजुषो नलिन्याः ॥

प० शौनकस्य.

1505

अन्योन्यलावण्यविलोकनान्तं
नेत्रद्वयं स्यात्सततं किलास्याः ।
इत्येव नासा विहिता विधात्रा
मध्ये तयोर्दर्शनविघ्नकर्त्री ॥

1506

अस्या मुखं हिमरुचिर्ननु यद्विधात्रा
संपूर्य सर्वमवशेषतयात्र मुक्तः ।
आढ्यानतामुपगतोस्य रुचा चकास्ति
नासाग्रमौक्तिकमिषादमृतस्य बिन्दुः ॥

एतौ पं॰ श्रीवकस्य.

अथाधरवर्णनम्

1507

तवैष विद्रुमच्छायो मरुमार्ग इवाधरः ।
करोति कस्य नो मुग्धे पिपासाकुलितं मनः ।

1508

अल्पेनापि सुरक्तेन साधनेन प्रयोजनम् ।
ओष्ठद्वयसहायेन कान्तास्येन जगज्जितम् ॥

1509

सर्वस्यैव हि रत्नस्य व्रणेर्घः परिहीयते ।
दयिताधररत्नं तु व्रणितं यात्यनर्घताम् ॥

केषामपि.

1510

द्विजसंगतिमासाद्य सर्वो रागाद्विमुच्यते ।
रक्तस्तथापि तन्वङ्ग्या बिम्बोष्ठः केन हेतुना ॥

लक्ष्मणस्य.

1511

रसवदमृतं कः संदेहो मधून्यपिनान्यथा
मधुरमथ किं चूतस्यापि प्रसन्नरसं फलम् ।

सकृदपि पुनर्मध्यस्थः सन्त्रसान्तरविज्ज्ञनो
वदत यदिहास्त्यन्यत्स्वादु प्रियादशनच्छदात् ॥

कस्यापि.

1512

अस्माकमस्मान्मदनापमृत्यो-
स्त्राणाय पीयूषरसोपि नासौ ।
सुधारसादप्यधिकं प्रयच्छ
प्रसीद वैदर्भि निजाधरं नः ॥

श्रीहर्षस्य.

अथ मुखम्

1513

विधायापूर्वपूर्णेन्दुमस्या मुखमभूद्ध्रुवम् ।
धाता निजासनाम्भोजविनिमीलनदुःस्थितः ॥

श्रीहर्षदेवस्य.

1514

अस्या मुखेन लोकानां हृतपङ्कजकान्तिना ।
निशासु नाशिता निद्रा कुमुदानामिवेन्दुना ॥

शाकवृद्धेः.

1515

प्रियानेत्रमुखच्छायाहृतलावण्यशोभयोः ।
समानदुःखयोरैक्यं युक्तं यन्मृगचन्द्रयोः ॥

कस्यापि.

1516

कमलमनम्भसि कमले कुवलये तानि च कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥

शंकरगणस्य.

1517

तस्या मुखस्यातिमनोहरस्य
कर्तुं न शक्तः सदृशं प्रियायाः ।

अद्यापि शीतद्युतिरात्मबिम्बं
निर्माय निर्माय पुनर्भिनत्ति ॥

श्रीहर्षस्य.

1518

प्रसन्नसंपादितचारुकान्ति-
र्जितोपि कान्तामुखशोभयायम् ।
धृष्टः शशाङ्कः पुनरभ्युदेति
लज्जा कुतोन्तर्मलिनाशयानाम् ॥

1519

भयमुज्झ जहासि किं स्वशोभां
दयितावक्त्रमिदं न पद्म चन्द्रः ।
अयि नालिक किं दिवापि भाति
स्वयमप्यस्य किमस्ति वा कलङ्कः ॥

कयोरपि.

1520

चित्रं यदेव गुणवृन्दविमर्ददक्षं
पुंसः सखे निखिलदोषवितानधाम ।
मौग्ध्यं तदेव दयितावदने नितान्तं
जातं विभूषणमनेकगुणातिशायि ॥

गोविन्दराजस्य.

1521

यदधरगतमादधाति तृष्णां
दिशति न यच्चषकोत्पलस्य निद्राम् ।
किमपि तदमृतं सकोपि चन्द्रो
वदनमयः श्रियमातनोति तन्व्याः ॥

रत्नाकरस्य.

1522

सुविहितमभिधानं वेधसा साधु यस्मा-
न्मधुलिहि हतबुद्धौ भृङ्ग इत्येतदेकम् ।

स्फुरदधरकटाक्षे क्षिप्रसौभाग्यदायि-
न्यलकरुचिनि वक्त्रे पङ्कजं शङ्कते यः ॥

गोविन्दराजस्य.

1523

कोषः स्फीततरः स्थितानि परितः पत्त्राणि दुर्गं जलं
मैत्रं मण्डलमुज्ज्वलं चिरमधो नीतास्तथा कण्टकाः ।
इत्याकृष्टशिलीमुखेन रचनां कृत्वा तदप्यद्भुतं
यत्पद्मेन जिगीषुणापि न जितं मुग्धे त्वदीयं मुखम् ॥

विज्जाकायाः.

1524

श्रीमन्मानसवासि वा हरशिरःभृङ्गाग्रसंसङ्गि वा
त्वं नारायणनाभिशायि भव वा स्थानान्तरस्थायि वा ।
नायास्येव हि नालिकाम्बुरुह हे पादोपसेवां विना
भानोर्भाभरभर्त्सितेन्दुवदनावक्त्रोपमापात्रताम् ॥

उपाध्यायधनवर्मणः.

1525

वक्त्रं जेष्यामि चन्द्रः प्रतिदिवसमसौ कान्तिमभ्येति गुर्वीं
नेत्रच्छायां हरिष्याम्यहमिति विकसत्युत्पलं दीर्घिकायाम् ।
कुर्वाणे ते तथापि श्रियमधिकतरां वीक्ष्य लोलेक्षणायां
वैलक्ष्यात्क्षीण एको विशति तदपरं मत्सरे नास्ति भद्रम् ॥

1526

हृतसारमिवेन्दुमण्डलं
दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते
धृतगम्भीरखनीखनीलिम ॥

श्रीहर्षस्य.

अथ कण्ठः

1527

कण्ठस्य नाकरोत्कान्तिं मुक्ताभरणता तथा ।
तस्याः स्वभावरम्यस्य मुक्ताभरणता यथा ॥

वृद्धे॰

1528

कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद्बभूव
साधारणो भूषणभूष्यभावः ॥

कालिदासस्य.

अथ बाहू

1529

दयिताबाहुपाशस्य कुतोयमपरो विधिः ।
जीवयत्यर्पितः कण्ठे मारयत्यपवर्जितः ॥

कलशकस्य.

1530

शब्दवद्भिरलंकारैरुपेतमतिकोमलम् ।
सुवृत्तं काव्यवद्रेजे तद्बाहुलतिकाद्वयम् ॥

1531

सुदीर्घा रागशालिन्यो बहुपर्वमनोरमाः ।
तस्या विरेजुरङ्गुल्यः कामिनां सत्कथा इव ॥

चक्रवृद्धे॰

1532

करे विभाति तन्वङ्ग्या रणद्वलयसंहतिः ।
मनःकुरङ्गबन्धाय पाशालीव मनोभुवः ॥

अथ स्तनौ

1533

यन्न माति तदङ्गेषु लावण्यमतिसंभृतम् ।
पिण्डीभूतमुरोदेशे तत्पयोधरतां गतम् ॥

1534

तस्या विनापि हारेण निसर्गादेव हारिणौ ।
जनयामासतुः कस्य विस्मयं न पयोधरौ ॥

1535

तत्पयोधरभारेषु मौक्तिकैर्निहितं पदम् ।
तत्प्रच्छादितरन्ध्राणां गुणानामेव चेष्टितम् ॥

1536

किं चित्रमुन्नतश्रीकौ यत्प्रियायाः पयोधरौ ।
तस्या हृदयलाभेन जायते कस्य नोन्नतिः ॥

केषामपि.

1537

किं चित्रं यदि तन्वङ्ग्याः स्तनाभ्यां निर्जितं जगत् ।
एको जयत उद्वृत्तः किं पुनर्द्वौ सुसंहतौ ॥

भट्टप्रभाकरस्य.

1538

उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः ।
पयोधरभरस्तन्व्याः कं न चक्रेभिलाषिणम् ॥

शकवृद्धेः.

1539

धृतघनरुचिरद्युतिना विलसद्धारेण बहलपुलकेन ।
दलयति कं नाभिमुखं बाला कुचमण्डलाभ्रेण ॥

विजयवर्मणः.

1540

तन्व्याः समुत्तुङ्गकुचाचलाग्रा
मुक्तावली बन्धमुपैति यत्र ।

तत्रातिरागोल्बणबन्धभाजां
लाभो न किं जीवितमात्रमेव ॥

भट्टप्रभाकरस्य.

1541

जयन्ति कान्तास्तनमण्डलेषु
विटार्पितान्यार्द्रनखक्षतानि ।
लावण्यसंभारनिधानकोषे
मुद्राक्षराणीव मनोभवस्य ॥

कस्यापि.

1542

अन्योन्यमुत्पीडयदुत्पलाक्ष्याः
स्तनद्वयं चारु तथा विवृद्धम् ।
मध्ये यथा श्याममुखस्य तस्य
मृणालसूत्रान्तरमप्यलभ्यम् ॥

1543

दिनेषु गच्छत्सु मधूकपाण्डुरं
तदीयमाश्याममुखं स्तनद्वयम् ।
समुद्गयोर्वारणदन्तकोषयो-
र्बभार कान्तिं गवलापिधानयोः ॥

एतौ कालिदासस्य.

1544

यन्नीयते जगति शस्त्रहता व्रजन्ति
नूनं सुरालयमिति स्फुटमेतदद्य ।
सूच्यग्रमात्रपरिखण्डितविग्रहेण
प्राप्तं यतः स्तनतटं खलु कञ्चुकेन ॥

1545

आनीलचूचुकशिलीमुखमुन्नतैक-
रोमावलीविपुलनालमिदं प्रियायाः ।
प्रोत्तुङ्गपीवरपयोधरपद्मयुग्मं
नाभेरधः कथयतीव महानिधानम् ॥

1546

पुष्पेषोरभिषेकहेमकलशौ हारप्रभावाहिनी-
चक्राह्वौ नवयौवनद्विपपतेः कुम्भौ रतेः कन्दुकौ ।
कोषौ बाहुमृणालिकाकमलयोर्लीलालतासत्फले
पूर्णौ रत्नसमुद्गकौ वहति सा लावण्यकुम्भौ स्तनौ ॥

केषामपि.

1547

नूनं प्रेयःपरिष्वङ्गगाढपीडनमन्युना ।
जातं कुरङ्गशावाक्ष्याः श्यामवक्त्रं कुचद्वयम् ॥

अथ मध्यभागः.

1548

तत्त्रिविष्टपमाख्यातं तन्वङ्ग्या यद्वलित्रयम् ।
येनानिमिषदृष्टित्वं नृणामप्युपजायते ॥

विद्याखदेवस्य.

1549

अय्ययि साहसकारिणि
किं तव चङ्क्रमणेन ।
टसदिति भङ्गमवाप्स्यसि
कुचयुगभारभरेण ॥

विकटनितम्बायाः.

1550

गुरुः प्रकृत्यैव नितम्बभारः
स्तनद्वयं वृद्धिमुपैति चास्याः ।
त्रुट्यामि मध्येन तनीयसेति
काञ्चीरवैः फूत्कृतमायताक्ष्याः ॥

जयमाधवस्य.

1551

अहो प्रमादी भगवान्प्रजापतिः
कृशातिमध्या घटिता मृगेक्षणा ।

यदि प्रमादादनिलेन भज्यते
कथं पुनः शक्ष्यति कर्तुमीदृशम् ॥

1552

हंहो नितम्ब कुचभार विधाय किं मां
मध्यस्थमभ्यधिकमुन्नमतां भवन्तौ ।
इत्थं क्रुधेव करभोरु तवोदरेण
भ्रूभङ्ग एष रचितस्त्रिवलिच्छलेन ॥

कस्यापि.

1553

काञ्चीगुणैर्विरचिता जघनेषु लक्ष्मी-
र्लब्धा स्थितिः स्तनतटेषु च रम्यहारैः ।
नो भूषिता वयमितीव नितम्बिनीनां
कार्श्यं निरर्गलमधार्यत मध्यभागैः ॥

रत्नाकरस्य.

अथ रोमराजिः

1554

आभाति रोमराजिश्चलदलिकुलकोमला विशालाक्ष्याः ।
नाभीविवरान्तर्गतमदनानलधूमलेखेव ॥

कस्यापि.

1555

नाभीह्रदे यद्विधिना न्यधायि
सौन्दर्यसारं हरिणेक्षणायाः ।
घ्रातुं तदेव भ्रमरावलीयं
प्राप्ता नु मन्ये नवरोमराजिः ॥

जयमाधवस्य.

1556

अलमलमतिवृद्ध्या स्थीयतां तस्य पश्य-
त्यकरुण करभोरोर्भज्यते मध्यमेतत् ।

इति गुरुजघनाज्ञाचोदिता रोमराजिः
स्तनयुगमसिताक्ष्या वक्तुमारोहतीव ॥

कस्यापि.

1557

तन्वङ्ग्या गजकुम्भपीनकठिनोत्तुङ्गौ वहन्त्याः स्तनौ
मध्यः क्षामतरोपि यत्र झगिति प्राप्नोति भङ्गं द्विधा ।
तन्मन्ये निपुणेन रोमलतिकोद्भेदापदेशादसौ
निःस्पन्दास्फुटलोहशृङ्खलिकया संदानितो वेधसा ॥

श्रीमम्मटस्य.

1558

अमुष्मिँल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः ।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ॥

रामस्य.

अथ जघनमण्डलम्

1559

तस्याः पद्मपलाशाक्ष्याः स्वपन्त्या जघनं घनम् ।
दृष्ट्वा सखीभिर्याभिस्ताः पुंभावं मनसा ययुः ॥

वाल्मीकेः

1560

स कथं न स्पृहणीयो विषयस्तैस्तन्नितम्बविन्यासः ।
शान्तात्मनापि विहितं विश्वसृजा गौरवं यत्र ॥

दामोदरगुप्तस्य.

1561

नारीनितम्बफलके प्रतिबध्यमाना
हंसीव हेमरशना मधुरं ररास ।

तन्मोचनार्थमिव नूपुरराजहंसा-
श्चक्रन्दुरार्तमुखरं चरणावलग्नाः ॥

माघस्य.

1562

तैस्तैर्गुणैः किल कलास्वपि तासु तासु
तन्व्यास्तथा बत गतो गुरुतां नितम्बः ।
उत्सेधवान्विधुरखण्डनमण्डितोपि
शिष्यो यथास्य मदनश्च मदश्च जातः ॥

भट्टवासुदेवस्य.

1563

वपुरनुपमं नाभेरूर्ध्वं विधाय मृगीदृशो
ललितललितैरङ्गन्यासैः पुरा रभसादिव ।
तदनु सहसा खिन्नेनेव प्रजापतिना भृशं
पृथुलपृथुला स्थूलस्थूला कृता जघनस्थली ॥

भर्गटस्य.

अथोरू

1564

अत्यन्तपरिणाहित्वादतीवश्लक्ष्णतावशात् ।
न कांचिदुपमां रोढुमूरू शक्नोति सुभ्रुवः ॥

1565

नासंहतेन शक्यः पृथुजघनाभोग एष उद्वोढुम् ।
इति मत्वेव मृगाक्ष्याः संहतिमूरुद्वयं भेजे ॥

कयोरपि.

1566

नागेन्द्रहस्तास्त्वचि कर्कशत्वा-
देकान्तशैत्यात्कदलीविशेषाः ।
लब्ध्वापि लोके परिणाहि रूपं
जातास्तदूर्वोरुपमानबाह्याः ॥

कालिदासस्य.

अथ जङ्घे

1567

वृत्तानुपूर्वे च न चातिदीर्घे
जङ्घे शुभे सृष्टवतस्तदीये ।
शेषाङ्गनिर्माणविधौ विधातु-
र्लावण्य उत्पाद्य इवास यत्नः ॥

भर्त्रैव.

1568

जङ्घे तदीये संतापं यज्जनस्यानुरागिणः ।
जनयांचक्रतुस्तीव्रं तत्र हेतुर्विलोमता ॥

शकवृद्धेः.

1569

लीलागतिर्यत्र निसर्गसिद्धा
मत्तो न दन्ती मुषितो न हंसः ।
इतीव जङ्घायुगलं तदीयं
चक्रे तुलाकोट्यधिरोहणानि ॥

अथ पादौ

1570

अमूल्यस्य मम स्वर्णतुलाकोटिद्वयं कियत् ।
इति कोपादिवाताम्रं पादयुग्मं मृगीदृशः ॥

1571

त्वद्वक्त्रं नेत्रपद्मप्रकटितमसकृत्स्पर्धितं यन्मयैत-
ज्ज्ञातं तस्मात्क्षयित्वं ग्रहणमलिनता जाड्यमन्तः कलङ्कः ।
तत्सर्वं क्षम्यतां मे पुनरपि न करोम्येवमुक्त्वापि तस्या
गाढं लग्नः शशाङ्कश्चरणनखमणिच्छद्मना पादपद्मे ॥

1572

वक्त्रेन्दुना नयनलक्ष्मभृतायताक्ष्या-
श्चारुस्फुरद्दशनदीधितिमण्डलेन ।
अत्युन्नमज्जनपयोधररुद्धभासा
पादारविन्दयुगलस्य हृता न लक्ष्मीः ॥

अथ मानः

1573

स्फुरसि बाहुलते किमनर्थकं
त्वमपि लोचन वाम भव स्थिरम् ।
तमहमागतमप्यपराधिनं
न परिरब्धुमलं न च वीक्षितुम् ॥

कस्यापि.

1574

स्फुटतु हृदयं कामं कामः करोतु तनुं तनुं
न खलु चपलप्रेम्णा कार्यं पुनर्दयितेन मे ।
इति सरभसं मानाटोपादुदीर्य वचस्तया
रमणपदवी सारङ्गाक्ष्या सशङ्कितमीक्षिता ॥

भर्भकस्य.

1575

चलतु तरला धृष्टा दृष्टिः खला सखि मेखला
स्खलतु कुचयोरुत्कम्पान्मे विदीर्यतु कञ्चुकम् ।
तदपि न मया संभाव्योसौ पुनर्दयितः शठः
स्फुटति हृदयं मानेनान्तर्न मे यदि तत्क्षणात् ॥

अमरुकस्य.

1576

न्यस्ता दृष्टिः स्तिमितनयना तन्मुखे बाष्पगर्भा
दृष्ट्वा मुग्धस्थितमपि कृतं कोपसंपर्कशंसि ।

यामीत्युक्ते भृशमपटुतामात्मनः ख्यापयन्त्या
मानस्यान्तर्विरचितपदस्येयमारम्भलीला ॥

भट्टयशसः.

1577

तदेवाजिह्माक्षं मुखमविशदास्ता गिर इमाः
स एवाङ्गाक्षेपो मयि सरसमाश्लिष्यति तनुम् ।
यदुक्तं प्रत्युक्तं तदपटु शिरः कम्पनपरं
प्रिया मानेनाहो पुनरपि कृता मे नववधूः ॥

कस्यापि.

1578

भ्रूभेदो गुणितश्चिरं नयनयोरभ्यस्तमामीलनं
रोद्धुं शिक्षितमादरेण हसितं मौनेभियोगः कृतः ।
धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथंचिन्मया
बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता ॥

अमरुकस्य.

1579

भ्रूभङ्गो रचितस्तदीक्षणपरे निस्तर्जिते लोचने
गात्रं प्रावृतमंशुकेन सकलं वृत्तिर्गिरां संयता ।
चेतः केवलमाकुलं भ्रमति मे तत्केन वा दृश्यते
गत्वा सत्वरमानय प्रियतमं मानः कृतोयं मया ॥

कस्यापि.

1580

भ्रूभेदे रचितेपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ।
कार्कश्यं गमितेपि चेतसि तनू रोमाञ्चमालम्बते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥

भदन्तारोग्यस्य.

1581

तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता चान्यत-
स्तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया ।

हस्ताभ्यां विनिवारितः सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः किं करवाणि यान्ति शतधा यत्कञ्चुके संधयः ॥

1582

प्राणेशे सहसा चिरादुपगते रुद्धे मया लोचने
प्रोक्ते वागपि तत्प्रियार्पणपरा रुद्धा बलादाकुला ।
मामुल्लङ्घ्य हठेन बाहुलतया प्रोद्भिन्नरोमाञ्चया
मातः किं करवाण्यहं यदनयाभ्यासात्समालिङ्गितः ॥

कबोरपि.

1583

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषोपि संविघ्नितः ।
आलापोपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥

पुलिनस्य.

1584

अङ्गानामतितानवं कुत इदं कस्मादकस्मादये
मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।
तन्व्या सर्वमिदं स्वभावत इति व्याहृत्य पक्ष्मान्तर-
व्यापी बाष्पभरस्तया वलितया निःश्वस्य मुक्तोन्यतः ॥

1585

नीत्वोत्सङ्गमुदस्य लम्बमलकं तन्वङ्गि किं त्वं कृशे-
त्यावेगादकृतागसीव दयिते धौर्त्यान्मुहुः पृच्छति ।
नोक्तं किंचन मुग्धया वदनकं त्वासज्य वक्षःस्थले
तस्यांसस्थललम्बिबाहुलतया निःशब्दकं रुद्यते ॥

कबोरपि.

1586

प्राणेशप्रथमापराधकरणे सख्या निदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति गलल्लोलोदकैरश्रुभिः ॥

लीलाचन्द्रस्य.

1587

भ्रूभेदो न कृतः कथा न शमिता नोपेक्षितः संभ्रमो
नोक्तं किंचिदसंमतं पुलकिता नालम्बिता वामता ।
अङ्कारोपितया तया दयितया गाढं परिष्वक्तया
लोलैरश्रुभिरीक्षणान्तरगतैर्मन्युः समावेदितः ॥

धर्मकीर्तेः.

1588

पश्यन्ती निजमेव पत्युरधरे दन्तक्षतं दूयते
साशङ्का स्वयमप्यमार्गनिहितान्दृष्ट्वा नखान्खिद्यते ।
मुग्धा सर्वविवेकहारिणि पदे मानस्य तस्मिन्स्थिता
येनात्मैव वृथाविकल्पविधुरो नीतः सपत्नीभुवम् ॥

अद्भुतफुल्लस्य.

1589

पादे मूर्धनि ताम्रतामुपगते कर्णोत्पले चूर्णिते
छिन्ने हारलतागुणे करतलेप्याघातजातव्रणे ।
अप्राप्तप्रियताडनव्यतिकरा हन्तुं पुनश्चेतसा
वाञ्छन्ती मुहुरेव काचिदबला पर्याकुलं रोदिति ॥

कस्यापि.

1590

आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादरा-
द्व्याजेनागतमावृणोति हसितं न स्पष्टमुद्वीक्षते ।
सख्यालापवती प्रकोपपिशुनं पत्या सहाभाषते
तन्व्यास्तिष्ठतु निर्भरप्रणयिता मानोपि रम्योदयः ॥

भीमस्य.

1591

ईर्ष्याप्रस्फुरिताधरौष्ठरुचकं वक्त्रं न मे दर्शितं
साधिक्षेपपदा मनागपि गिरो न श्राविता मुग्धया ।
मद्दोषैः सरसैः प्रतापितमनोवृत्त्यापि कोपेनया
काञ्च्या गाढतरावबद्धवसनमन्थ्या समावेदितः ॥

नारायणस्य.

1592

काले नीलबलाहके सतडिति प्रीतिप्रदे बर्हिणा-
माश्चर्यं कथयामि वः शृणुत भो यद्वृत्तमस्मिन्गृहे ।
सौभाग्यव्ययशङ्कयैकभवने कान्ताप्रियाभ्यामहो
मानिभ्यां बत रात्रिमेव सकलां चीर्णं प्रवासिव्रतम् ॥

कस्यापि.

अथानुनयः

1593

अयि हस्तगतैः प्राणैरमीभिः कन्दुकैरिव ।
अपर्यन्तरसं मुग्धे कियत्क्रीडितुमिच्छसि ॥

शशिवर्धनस्य.

1594

मुखं ते पादपतिते किंकरे किं करे स्थितम् ।
अयि कामातुरे कोपं कोपने कोपनेष्यति ॥

1595

अनवरतनयनविगलितजललवपरिमुषितपत्रलेखान्तम् ॥
करतलनिषण्णमबले वदनमिदं कं न तापयति ॥

कबीरपि.

1596

असममविलोकितेन किं ते
दयितं पश्य वरोरु निर्विशङ्कम् ।
नहि जातु कुशाग्रपीतमम्भः
सुचिरेणापि करोत्यपेततृष्णम् ॥

वृष्णिगुप्तस्य.

1597

मुखपङ्कजरङ्गेऽस्मिन्भ्रूलता नर्तकी तव ।
लीलानृत्तं करोतीति रम्यं रूपकरूपकम् ॥

1598

वीक्षितेन शफरीचटुलेन
प्रापितः खलु दशामहमन्त्याम् ।
किं स्मितेन वद कौमुदिभासा
पिष्टपेषणमिदं तव तन्वि ॥

विद्यापतेः.

1599

यदि वयमपराधिनस्तदानीं
नयनजलैरलिनीलकज्जलाङ्कैः ।
अयि किमियमकाण्ड एव नीता
सशशशशाङ्कदशां कपोलपाली ॥

गोविन्दराजस्य.

1600

सुतनु जहिहि मानं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किंचित् ॥

कस्यापि.

1601

परुषवचनं कोपाताम्रे दृशौ वलितं मुखं
वपुरपि मुधा धत्से चण्डि प्रसाधनवर्जितम् ।
इदमतितरामात्मायासप्रदं तव केवलं
मम पुनरतः पूर्णो हर्षो यदि स्फुरति स्फुटम् ॥

भदन्ततथागतेन्द्रसिंहस्य.

1602

प्रसीदेति ब्रूयामिदमसति कोपे न घटते
करिष्याम्येवं नो पुनरपि भवेदभ्युपगमः ।
न मे दोषोस्तीति त्वमिदमपि हि ज्ञास्यसि मृषा
किमेतस्मिन्वक्तुं क्षममिति न वेद्मि प्रियतमे ॥

श्रीहर्षदेवस्य.

1603

दृशा सार्धं दन्तच्छदपरिचयाद्दक्रमरुणं
कचभ्रूकौटिल्यान्मतिरपि न मुञ्चत्यवनतिम् ।
अहो दीर्घः कोपो मम नयनयोगात्किमपरं
कुचप्रत्यासत्त्या हृदयमपि ते चण्डि कठिनम् ॥

कस्यापि.

1604

नीलाम्भोजं स्वनयनरुचा वक्त्रकान्त्येन्दुबिम्बं
केशैर्भृङ्गान्मधुरवचनैः कोकिलानां रुतानि ।
स्पर्धायोगात्परिभवपदं प्रापय त्वं निकामं
बाधा मुग्धे न पुनरुचितास्मासु ते संश्रितेषु ॥

1605

पादासक्ते सुचिरमिह ते वामता कैव मुग्धे
नर्मासक्ते प्रणयिनि जने कोपराधोपरोधः ।
इत्थं तस्याः परिजनकथाकोमले कोपवेगे
बाष्पोद्भेदैस्तदनु सहसा न स्थितं न प्रवृत्तम् ॥

कवेरपि.

1606

अवश्यं कोपाग्निस्तव सुतनु निर्वास्यति चिरा-
त्स्वशोभामारूढं मुखमपि च ते हास्यति शुचम् ।
भवद्गोष्ठीशून्या मम तु दिवसा यान्ति य इमे
न तेषामावृत्तिः पुनरपि मनो दूयत इति ॥

भट्टकर्णाटस्य.

1607

असद्वृत्तो नायं न च खलु गुणैरेष रहितः
प्रियो मुक्ताहारस्तव चरणमूले निपतितः ।
गृहाणेमं मुग्धे व्रजतु निजकण्ठप्रणयिता-
मुपायो नास्त्यन्यस्तव हृदयसंतापशमने ॥

अमरुकस्य.

1608

परिम्लाने माने मुखशशिनि तस्याः करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे ।
तया पक्ष्मान्तान्तःश्लथपुटनिरुद्धेन सहसा
प्रसादो बाष्पेण स्तनतटविशीर्णेन कथितः ॥

1609

कोपापाटललोललोचनयुगा व्यावर्तितभ्रूलता
श्वासाताम्रमुखी वृथा करणकच्छेदे कृथा मा भ्रमम् ।
अच्छाच्छैर्नयनोदबिन्दुविसरैरासक्तमुक्ताफलं
कुर्वाणा कवरीकलापमखिलं चण्डि क्रुधा शोभसे ॥

कस्यापि.

1610

इन्दीवरेण नयनं मुखमम्बुजेन
कुन्देन दन्तमधरं नवपल्लवेन ।
अङ्गानि चम्पकदलैश्च विधाय वेधाः
कान्ते कथं रचितवानुपलेन चेतः ॥

1611

क्षीणः क्षीणोपि शशी भूयो भूयोपि वर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥

कस्यापि.

1612

गतप्राया रात्रिः कृशतनु शशी सीदत इव
प्रदीपोयं निद्रावशमुपगतो घूर्णत इव ।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो
कुचप्रत्यासत्त्या हृदयमपि ते चण्डि कठिनम् ॥

बाणभट्टस्य.

1613

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये ।

तद्युक्तं विपरीतकारिणि तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥

अवदेवस्य.

अथोक्तिप्रत्युक्ती

1614

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोस्मासु न मेपराध्यति भवान्सर्वेपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥

भट्टकुमारस्य.

1615

स्फुटो वाक्ये रोषः स्फुरति परितोषो नयनयो-
र्विलग्ने भ्रूलेखे विलसति कपोलस्थलमिदम् ।
मुखं तिर्यक्प्रीतिं गमयति हि रोमाञ्चनिचयः
प्रिये दुःसंवादा कृतककुपितस्य स्थितिरियम् ॥

1616

माननिधानधर त्वं गच्छ शिवाः सन्तु तेद्य पन्थानः ।
अमुना बद्धाञ्जलिना हृदयमशेषं निपीतं मे ॥

कस्यापि.

1617

भवतु विदितं व्यर्थालापैरलं प्रिय गम्यतां
तनुरपि न ते दोषोस्माकं विधिस्तु पराङ्मुखः ।
तव यदि तथारूढं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते हतजीविते ॥

भदन्तधर्मकीर्तेः.

1618

वर्षति परं न मेघः क्षणदापि मृगाक्षि विप्रयोगं ते ।
प्रहरति न पञ्चबाणः केवलमबले निमेषोपि ॥

कस्यापि.

1619

कठिनहृदये मुञ्च क्रोधं सुखप्रतिघातकं
लिखति दिवसं यातं यातं यमः किल मानिनि ।
वयसि तरुणे नैतद्युक्तं चले च समागमे
भवति कलहो यावत्तावद्वरं सुभगे रतम् ॥

भासस्य.

1620

कठिनहृदये मुञ्च भ्रान्तिं व्यलीककथाश्रितां
पिशुनवचनैर्दुःखं नेतुं न युक्तमिमं जनम् ।
किमिदमथवा सत्यं मुग्धे त्वयाद्य विनिश्चितं
हृदयनिहितं तन्मे कृत्वा प्रिये सुखमास्यताम् ॥

1621

प्रातः प्रातरिहागतेन जनिता निर्निद्रता चक्षुषो-
र्मन्दाया मम गौरवापनयनादुत्पादितं लाघवम् ।
किं तद्यन्न कृतं त्वया मरणभीस्त्यक्ता मया गम्यतां
दुःखं तिष्ठसि यच्च पथ्यमधुना तन्निर्गतः श्रोष्यसि ॥

1622

तथाभूदस्माकं प्रथममविभिन्ना तनुरियं
ततो नु त्वं प्रेयानहमपि हताशा प्रियतमा ।
इदानीं त्वं नाथो वयमपि कलत्रं किमपरं
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम् ॥

1623

वरं भ्रूभङ्गास्ते प्रकटितगुरुक्रोधविभवा
वरं सोपालम्भाः प्रणयविमुखा गद्गदगिरः ।
वरं मानाटोपात्प्रसभरचितोनादरविधि-
र्न रूढान्तःकोपा कठिनहृदये संवृतिरियम् ॥

1624

अविशदचलं नेत्रप्रान्तावलोकनमस्फुटं
चकितचकिता वाचः स्पर्शः क्वचिज्जनसंकुले ।

इति तव मया प्रेमारम्भे य एव निरीक्षिताः
कठिनमनसो दृष्टा भावास्त एव विरज्यतः ॥

केषामपि.

1625

यदि विनिहिता शून्या दृष्टिः किमु स्थिरकौतुका
यदि विरचितो मौने यत्नः किमु स्फुरितोधरः ।
यदि नियमितं ध्याने चेतः कथं पुलकोद्गमः
कृतमभिनयैर्दृष्टो मानः प्रसीद विमुच्यताम् ॥

अमरुकस्य.

1626

यद्गम्यं गुरुगौरवस्य सुहृदो यस्मिँल्लभन्तेन्तरं
यद्दाक्षिण्यवशाद्भयाच्च सहसा नर्मोपचाराद्यदि ।
यल्लज्जां निरुणद्धि यत्र शपथैरुत्पाद्यते प्रत्यय-
स्तत्किं प्रेम स उच्यते परिचयस्तत्रापि कोपोस्ति किम् ॥

1627

कपोले पत्त्राली करतलनिरोधेन मृदिता
निपीतो निःश्वासैरलममृतहृद्योधररसः ।
मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥

कयोरपि.

1628

कृतककृतकैर्मायासख्यैस्त्वयास्म्यतिवञ्चिता
निभृतनिभृतैः कार्यालापैर्मयाप्युपलक्षितम् ।
भवतु विदितं नेष्टाहं ते वृथा परिखिद्यसे
ह्यहमसहना त्वं निःस्नेहः समेन समं मतम् ॥

भासस्य.

1629

प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।

निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥

चन्द्रकस्य.

1630

कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते पतसि न च मे मन्युमोक्षः खलायाः ॥

1631

एवं यथाह भवती मम सर्वदोषाः
कः स्वामिना कुवलयाक्षि सहानुबन्धः ।
एषोञ्जलिर्विरचितः कुरु निग्रहं मे
दासेपराधवति कोवसरः क्षमायाः ॥

1632

त्वं तावद्बहुवल्लभो ननु युवा कान्तः सुखी निर्घृणो
नो जानासि परव्यथां शठमते नैवासि दुःखी यतः ।
किं त्वन्यान्परिपृच्छ मन्मथशरैः पीडामसह्यामिमां
त्राता नो भव येन सज्जनजनैः कापालिको नोच्यसे ॥

एते केषामपि.

1633

विरहविषमो वामः कामः करोतु तनुं तनुं
दिवसगणनादक्षश्चासौ व्यपेतघृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किसलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥

शीलाभट्टारिकायाः.

1634

कामव्याधशराहतिर्न गणिता संजीवनी त्वं स्मृता
नो दग्धा विरहानलेन झटिति त्वत्संगमाशामृतैः ।
नीतोयं दिवसो विचित्रलिखितैः संकल्परूपैर्मया
किं वान्यद्धृदये स्थितासि ननु मे तत्र स्वयं साक्षिणी ॥

शूरवर्मणः.

1635

मुक्तो मानपरिग्रहः सह सखीसार्थेन तन्मन्त्रिणा
शक्ता त्वच्चरणप्रसादरहिता नाहं क्षणं प्राणितुम् ।
पश्य त्वं कृशकं शरीरकमिदं यां यामवस्थामगा-
देषाहं तव पादयोर्निपतिता नाथ प्रसीदाधुना ॥

1636

मामालोकय नीलनीरजदलप्रस्पर्धिना चक्षुषा
तन्मोन्नामय सुभ्रु वक्त्रशशिनं ज्योत्स्नारसस्यन्दिनम् ।
हारस्त्वं मम कण्ठदेशनिहितं बाहुद्वयं नीयतां
त्वत्प्राप्तौ विरहय्य यातु कुपितेवेयं वियोगव्यथा ॥

कयोरपि.

1637

स्ववपुषि नखलक्ष्म स्वेन कृत्वा भवत्या
कृतमिति चतुराणां दर्शयिष्ये सखीनाम् ।
इति रहसि मया ते भीषितायाः स्मरामि
स्मरपरिमलमुद्राभङ्गसर्वसहायाः ॥

मुरारेः.

1638

स्त्रीपुंसौ प्रविभज्य जेतुमखिलानालोचितौ चित्तयो-
र्नम्रां वेद्मि रतिप्रसूनशरयोश्चापद्वयीं त्वद्भ्रुवौ ।
त्वन्नासाछलनिह्नुतां द्विनलिकीं नालीकमुक्त्येषिणो-
स्त्वन्निःश्वासततीमधुश्वसनजं वायव्यमस्त्रं तयोः ॥

1639

खण्डक्षोदमृदिस्थले मधुपयः कादम्बिनीतर्पणा-
त्कृष्टे रोहति दोहदेन पयसां पिण्डेन चेत्पुण्ड्रकः ।
स द्राक्षाद्रवसेचनैर्यदि फलं धत्ते तदा त्वद्गिरा-
मुद्देशाय ततोऽभ्युदेति मधुराधारस्तमप्यत्ययः ॥

1640
उन्मीलद्गुडपाकतन्तुलतया रज्ज्वा भ्रमीरर्जय-
न्दानान्तःश्रुतशर्कराचलमथः स्वेनामृतान्धाः स्मरः ।
नव्यामिक्षुरसोदधेर्यदि सुधामुत्थापयेत्सा भव-
ज्जिह्वायाः कृतिमाह्वयेत परमां मत्कर्णयोः पारणाम् ॥
1641
स ग्राम्यः स विदग्धसंसदि सदा गच्छत्यपाङ्क्तेयतां
तं च स्प्रष्टुमपि स्मरस्य विशिखा मुग्धे विगानोन्मुखाः ।
यः किं मध्विति नाधरं तव कथं हेमेति न त्वद्वपुः
कीदृङ्नाम सुधेति पृच्छति न ते दत्ते गिरं चोत्तरम् ॥
एते श्रीहर्षस्य.

अथ संभोगशृङ्गारः
तत्र षडृतुवर्णनम्
तत्रादौ वसन्तः

1642
यान्ति यच्छरणं नार्यः स्वयमेव प्रियं जनम् ।
तद्वसन्तमदान्धस्य परपुष्टस्य चेष्टितम् ॥
महामनुष्यस्य.

1643
कोकिलश्चूतशिखरे मञ्जरीरेणुपिञ्जरः ।
गदितैर्व्यक्ततामेति कुलीनश्चेष्टितैरिव ॥
कस्यापि.

1644
नेयं विरौति भृङ्गाली मदेन मधुरस्वरा ।
अयमाकृष्यमाणस्य कन्दर्पधनुषो ध्वनिः ॥
भामहस्य.

1645
किंशुकव्यपदेशेन तरुमारुह्य सर्वतः ।
दग्धादग्धमरण्यान्यां पश्यतीव विभावसुः ।
अस्यैव.

1646

जलान्तर्नलिनीनाला हर्षसंजातकण्टकाः ।
मधुरं कोकिलागीतरवं श्रोतुमिवोत्थिताः ॥

1647

परिचुम्बति संश्लिष्य भ्रमरश्चूतमञ्जरीम् ।
नवसंगमसंहृष्टः कामी प्रणयिनीमिव ॥

1648

वने प्रियमपश्यन्ती चिरमन्विष्य कोकिला ।
विरहार्ता प्रविष्टा नु रक्ताशोकं चितामिव ॥

केषामपि.

1649

पूरा नदीनां पुष्पाणि वृक्षाणां शशिनः कलाः ।
क्षीणानि पुनरायान्ति यौवनानि न देहिनाम् ॥

1650

उन्मुक्तमानकलहा रमध्वं दयितान्विताः ।
इतीव मधुरालापाः कोकिला जगदुर्जनान् ॥

सोमस्य.

1651

प्रत्यग्रतिलका सद्यो मधुलक्ष्म्यभिसारिका ।
जातपुष्पशरा चक्रे पदमुद्यानभूमिषु ॥

वररुचेः.

1652

वापीतरङ्गानिलशीतलेषु
दुर्गेष्विवोद्यानतलेषु लीनम् ।
लब्धप्रतापार्कसहायशक्त्या
शनैर्विजिग्ये शिशिरं वसन्तः ॥

1653

मधुप्रसङ्गसंवृद्धरुचिर्द्विज इवांशुमान् ।
दक्षिणाशां परित्यज्य तापमाप पुनः शनैः ॥

अयं सिद्धार्थस्य.

1654

भ्रान्त्वा विवस्वानथ दक्षिणाशा

मालम्ब्य सर्वत्र करप्रसारी ।

ऋत्विक्कृतो निःस्व इव प्रतस्थे

वसूपलब्ध्यै धनदस्य वासम् ॥

कुमारदासस्य.

1655

कर्णिकारलताः फुल्लकुसुमाकुलषट्पदाः ।

सकज्जलशिखा रेजुर्दीपमाला इवोज्ज्वलाः ॥

इन्द्रदत्तस्य.

1656

चिरं शीतजलावासलब्धसंकोचकण्टकाः ।

निषेवितुमिवोत्तस्थुरातपं कमलाकराः ॥

ईश्वरकृष्णस्य.

1657

एकत्र नास्य रतिरित्यवधूयमानः

कोपादिव श्वसनकम्पविघूर्णितायाः ।

रक्तच्छदं मधुसुगन्धि सरोरुहिण्या

भृङ्गश्चुचुम्ब कमलाननमादरेण ॥

आर्यभट्टस्य.

1658

नम्रानना नवोद्भूतरजसा स्तबकस्तनी ।

मालती यौवनवती कन्येवोच्छ्वासिनी बभौ ॥

व्यासदासस्य.

1659

इन्दिन्दिरैर्निर्भरगर्भमीष-

दुन्मेषवच्चम्पकपुष्पमासीत् ।

हिरण्मयं शासनलेखहेतोः

सज्जं मषीभाण्डमिव स्मरस्य ॥

1660

विवृण्वता सौरभरोरदोषं
वन्दिव्रतं वर्णगुणैः स्पृशन्त्याः ।
विकस्वरे कस्य न कर्णिकारे
घ्राणेन दृष्टेर्वबृधे विवादः ॥

एतौ कर्णिकारमङ्खस्य.

1661

पलाशरक्ताग्रनखे वसन्त-
कण्ठीरवे मानगजोऽङ्गनाभ्यः ।
भीतो ययौ साञ्जनबाष्पपङ्क्ति-
च्छलाद्विमुक्तायसशृङ्खलालिः ॥

1662

दिग्दक्षिणार्कं न शशाक हातुं
तत्संगमात्सोपि सदाल्पतापः ।
परस्परं किं नु तयोस्तदानीं
न वेद्मि कः पैशुनमाचचार ॥

1663

ये गात्रे ययुरध्वगोत्पलदृशामङ्गारवर्षप्रथां
ये संभोगरसालसालसवधूनेत्राञ्चलैरञ्चिताः ।
श्रीखण्डाद्रिगुहागृहान्तरभुवः शृङ्गारिषु प्रोच्छल-
च्छापानुग्रहशक्तयो ववृधिरे तेऽहंयवो वायवः ॥

एते मङ्खकस्य.

1664

ज्वलितं कुसुमप्रभया पथिकाङ्गनया विलोक्य सहकारम् ।
दहनभयादिव सिक्तं नयनोज्झितवारिणा हृदयम् ॥

दिविरयशोवर्धनस्य.

1665

अभिनवपल्लवरशना शिशिरतरतुषारजलमङ्गलस्नाता ।
पुष्पवती चूतलता प्रियेव ददृशे फलाभिमुखी ॥

कस्यापि.

1666

सहकारकुसुमकेसरनिकरभरामोदमूर्छितदिगन्ते ।
मधुरमधुविधुरमधुपे मधौ भवेत्कस्य नोत्कण्ठा ॥

कपिलरुद्रकस्य.

1667

मलयानिलललनोल्वणमदकलकलकण्ठकलकलललामः ।
मधुरमधुविधुरमधुपो मधुरयमधुना धिनोति धराम् ॥

रुद्रटस्य.

1668

सितचन्दनधवलकुचा प्रहृष्टनवकर्णिकारचितशोभा ।
हेलोल्लासितमदना कान्तेव वनस्थली भाति ॥

भट्टबीजकस्य.

1669

वक्रेण शिरसि पतता नित्यं रुधिरारुणेन दुर्वाचः ।
मत्तद्विप इव पथिकः किंशुककुसुमाङ्कुशेन धृतः ॥

1670

चेतांसि चपलपक्षैः शिलीमुखैः परिपतद्भिरतिमात्रम् ।
पथिकानां भिन्नानि प्रकटितघनरागरक्तानि ॥

1671

सममेवाकम्प्यन्ते रसवन्ति प्रकटबहलरागाणि ।
नवकिसलयानि मरुता मानवतीनां च हृदयानि ॥

भट्टवृद्धेः.

1672

विधूतभृङ्गावलिकेशपाशा
विलोलपुष्पप्रकरोत्तरीया ।
आलोलिताम्भोजविलोचनश्री-
र्विभाति मत्तेव वसन्तलक्ष्मीः ॥

कस्यापि.

1673

बालेन्दुवक्राण्यविकासभावा-
द्बभुः पलाशान्यतिलोहितानि ।

सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम् ॥

1674

आमूलतो विद्रुमरागताम्राः
सपल्लवं पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा गतवल्लभानाम् ॥

कालिदासस्य.

1675

पिककूजितमत्यन्तं मधुरध्वनितापदम् ।
करोत्युल्लङ्घिताज्ञानां मधुरध्वनि तापदम् ॥

1676

कमलिनीमलिनी दयितं विना
न सहते सह तेन निषेविताम् ।
तमधुना मधुना निहितं हृदि
स्मरति सा रतिसारमहर्निशम् ॥

रुद्रटस्य.

1677

असौ मरुच्चुम्बितचारुकेसरः
प्रसन्नताराधिपमण्डलाग्रणीः ।
वियुक्तरामातुरदृष्टिवीक्षितो
वसन्तकालो हनुमानिवागतः ॥

भट्टबीजकस्य.

1678

आदीप्तवह्निसदृशैरपयातपत्त्रैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।
सद्यो वसन्तसमयेन समागतेयं
रक्तांशुका नववधूरिव भाति भूमिः ॥

कालिदासस्य.

1679

दलानि वासः परिहृत्य पाटला
प्रकाशते पुष्पवती त्वचात्मनः ।
तथापि भृङ्गो न जहाति तां प्रियां
क्व रागिणामालि विवेकसंपदः ॥

1680

उद्दामदक्षिणमरुद्भरचालिताभिः
शाखाभिराकुलतरं रुतवारणाय ।
मा मेति कोकिलकुलं वदतीव वृक्षः
स्त्रैणं वियोगविधुरं कृपया विलोक्य ॥

श्रुतधरस्य.

1681

यत्तज्जलैरहरहः स्वकरप्रयुक्तैः
संवर्धितोसि सहकार रसोद्यमेन ।
तस्याधुना न सदृशं क्रियते वियोगे
यन्मञ्जरीर्वहसि मन्मथचापमौर्वीः ॥

कस्यापि.

1682

किं द्वारि दैवहतिके सहकारकेण
संवर्धितेन विषवृक्षक एष पापः ।
यस्मिन्मनागपि विकासविकारभाजि
घोरा भवन्ति मदनज्वरसंनिपाताः ॥

विकटनितम्बायाः.

1683

मञ्जर्यो न विलोकिताः कुसुमिताभूतस्य बाष्पान्धया
नाघ्राताः सखि संततश्वसितया वातास्तदामोदिनः ।
भृङ्गाणामलकावृतश्रवणया नोद्गीतमाकर्णितं
क्षेमेणाद्य विलङ्घितो धृतिहरो दिष्टया मधुर्बालया ॥

श्रीविभाकरवर्मणः.

1732

वातैरभ्युदितासारशीताक्रान्त इव क्षणात् ।
ज्वलन्कामानलः पान्थप्रियाहृदयमाविशत् ॥

शरदेवस्य.

1733

व्योम्नि नीलाम्बुदच्छन्ने गुरुवृष्टिभयादिव ।
जग्राह ग्रीष्मसंतापो हृदयानि वियोगिनाम् ॥

वररुचेः.

1734

अस्थिरमनेकरागं गुणरहितं नित्यवक्रदुष्प्रापम् ।
प्रावृषि सुरेन्द्रचापं विभाव्यते युवतिचित्तमिव ॥

1735

उपलक्ष्यवर्णसंकरमपगतगुणयोगमुज्झितस्थैर्यम् ।
पथिकाः समुद्विजन्ते कुदेशमिव वीक्ष्य शक्रधनुः ॥

1736

अविरलधारानिकरं जलदैर्जलमुत्सृजद्भिरतिमात्रम् ।
मानिवधूहृदयेभ्यः कालुष्यमशेषतो मृष्टम् ॥

1737

दयितभुजगेन संप्रति नृत्यच्चलचारुचन्द्रकिरणेन ।
वल्लभगुहेन कामः प्रदीपितो नीलकण्ठेन ॥

1738

अपगतरजोविकारा घनपटलाक्रान्ततारकालोका ।
लम्बपयोधरभारा प्रावृडियं वृद्धवनितेव ॥

एते वृद्धेः.

1739

धूमानलपवनविषैः पयोधरः सत्यमेव घटितोयम् ।
अन्धयति दहति चलयति निहन्ति कथमन्यथा विरहे ॥

भट्टमाडुण्डकस्य.

1740

आलोहितमाकलयन्कन्दलमुत्कम्पितं मधुकरेण ।
संस्मरति पथिषु पथिको दयिताङ्गुलितर्जनाललितम् ॥

वररुचेः.

1689

भोः पान्थाः स्वगृहान्न गच्छत मधौ सेवाक्षणो मुच्यतां
मानं मानिनि मुञ्च वल्लभजने कोपानुबन्धेन किम् ।
आयातः कुसुमाकरः क्षपयति प्राणान्वियोगातुरे-
ष्वित्स्येवं परपुष्टनादपटहो वक्तीव कामाज्ञया ॥

1690

एतस्मिन्दक्षिणाशानिलचलितलतालीनमत्तालिमाला-
पक्षक्षोभावधूतच्युतबहलरजोह्लादिहृद्ये वसन्ते ।
प्रेमस्वेदार्द्रबाहुश्लथवलयरणत्प्रौढसीमन्तिनीनां
मन्दः कण्ठग्रहोऽपि ग्लपयति हृदयं किं पुनर्विप्रयोगः ॥

कवेरपि.

1691

मौर्व्यः किं मदनस्य संततमिषुव्यापारमभ्यस्यतः
प्रत्यक्षा बत मूर्छनाः किमु मधोः सख्युर्यशो गायतः ।
विस्रस्ता रशनाः स्वयं वनभुवां किं देवतानामिमाः
शिञ्जानाः श्रुतिपेशलाः किमथवा पुष्पंधयश्रेणयः ॥

1692

प्रेयांसं प्रतिलब्धुमात्ततपसः स्यादक्षमाला रते-
र्मूर्तत्वं मृतजीवनी किमु गता तन्मन्त्रवर्णावलिः ।
रत्नस्रग्भगवत्स्मसाधनविधौ किं वा तयोपाहृता
किं वैषा प्रतिकाननं मधुलिहां पङ्क्तिः परिप्रेङ्खति ॥

अथ ग्रीष्मः

1693

निदाघतीव्रसंतापशून्यरथ्यान्तरस्थयोः ।
अन्योन्यालापसुखिनोर्यूनोश्चन्द्रायते रविः ॥

कस्यापि.

1694

एष सूर्यांशुसंतप्तो मृगः कुतरुमाश्रितः ।
साधुर्भाग्यपरिक्षीणो नीचं प्राप्येव सीदति ॥

1695

न प्रस्रवन्ति गिरयो घोरघर्माभिघर्षिताः ।
वृद्धप्रचुरनारीणां जघनानीव सांप्रतम् ॥

1696

फलितोदुम्बरान्तःस्था कलशब्दापि कोकिला ॥
न भात्यर्थपरेव स्त्री निषण्णा स्थविरोरसि ॥

1697

कोटरान्तःप्रविष्टेन पावकेनेह पादपः ।
कृत्वा साधुरिवाकार्यमन्तर्दाहेन दह्यते ॥

एते महामनुष्यस्य.

1698

परपुरुषादिव सवितुः संप्रति भीताः करामसंस्पर्शात् ।
कुलवध्व इव सलज्जाः प्रविशन्ति गृहोदरं छायाः ॥

रामिलकस्य.

1699

दुःसहसंतापभयात्संप्रति मध्यस्थिते दिवसनाथे ।
छायामिव वाञ्छन्ती छायापि गता तरुतलानि ॥

श्रीमदवन्तिवर्मणः

1700

प्रीतिगतार्थिजनानां विच्छिन्नाशां समूहमवलोक्य ।
स्फुटितमपयसस्तापाद्धृदयमिव तलं तडागस्य ॥

1701

अहमिव शून्यमरण्यं वयमिव तनुतां गतानि सलिलानि ।
अस्माकमिवोच्छ्वासा दिवसा दीर्घाश्च तप्ताश्च ॥

कयोरपि.

1702

अभिजातजनव्यथावहा
बहलोष्मप्रसरा विदाहिनः ।
प्रखला इव दृष्टिमागता
भुवि तापाय निदाघवासराः ॥

अमृतवर्धनस्य.

1703

रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांसुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः
फणी मयूरस्य तले निषीदति ॥

1704

रविप्रभाभिन्नशिरोमणिप्रभो
विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषातुरः ॥

कयोरपि.

1705

अमी व्यर्थारम्भा दुरधिगमभूभृत्परिसरे
विषण्णा लक्ष्यन्ते वयमिव हताशा जलधराः ।
ममेवान्तश्चेष्टाविफलविपुलाकारविभवाः
स्वभूमौ यान्तीमाः परिणतिमसंख्याश्च सरितः ॥

जयवर्धनस्य.

1706

मध्याह्नार्कक्वथितविरसं पल्वले चाम्बु पीत्वा
दावव्याप्तं वनमशरणं सर्वतः संनिरीक्ष्य ।
संतापेन प्रतिभयवता संनिरुद्धः समन्ता-
दात्मच्छायां विशति महिषो मण्डलीभूतदेहः ॥

मातृषेणस्य.

1707

विश्लेषो जनितः प्रियैरपि जनैरुज्जृम्भितं नालिकै-
र्मित्रेणापि खरायितं तरलया दीर्घायितं तृष्णया ।
गुर्वी वल्लभता जडैरधिगता दोषाकरः सेव्यते
हा कालः कलिरागतो नहि नहि प्राप्तः स घर्मागमः ॥

रतिमित्रस्य.

1708

सर्वाशारुधि दग्धवीरुधि सदा सारङ्गबद्धक्रुधि
क्षामक्ष्मारुहि मन्दमुन्मधुलिहि स्वच्छन्दकुन्दद्रुहि ।
शुष्यत्स्रोतसि भूरितप्ररजसि ज्वालायमानार्णसि
ग्रीष्मे मासि तताऽर्कतेजसि कथं पान्थ व्रजञ्जीवसि ॥

1709

दूरादेव कृतोञ्जलिर्न तु पुनः पानीयपानार्थिना
रोमाञ्चोपि निरन्तरं प्रकटितः प्रीत्या न शैत्यादपाम् ।
रूपालोकनविस्मितेन चलितो मूर्धा न शान्त्या तृषा-
मक्षुण्णो विधिरध्वगेन घटितो वीक्ष्य प्रपापालिकाम् ॥

1710

स्वेदाम्भः कणिकाचितेन वपुषा शीतानिलस्पर्शनं
तर्षोत्कर्षजुषा मुखेन शिशिरस्वच्छाम्बुपानादरः ।
दूराध्वक्लमनिःसहैरवयवैश्छायासु विश्रान्तयः
कश्मीरान्परितो निदाघसमये धन्यः परिभ्राम्यति ॥

एते भट्टबाणस्य.

1711

अङ्गुल्यग्रनिरोधतस्तनुतरां धारामियं तन्वती
कर्कर्या न परं पयो निपुणिका दातुं प्रपापालिका ।
विश्लिष्टाङ्गुलिना करेण दशनापीडं शनैः पान्थ हे
निःस्पन्दोर्ध्वविलोचनं त्वमपि हा जानासि पातुं पयः ॥

कस्यापि.

1712

गन्तुं सत्वरमीहसे यदि गृहं व्यालोलवेणीलतां
द्रष्टुं वा स्वकुटुम्बिनीमनुदिनं कान्तां समुत्कण्ठसे ।
तत्तृष्यन्नपि मुग्धमन्थरवलन्नेत्रान्तरुद्धाध्वगा-
मेतां दूरत एव हे परिहर भ्रातः प्रपापालिकाम् ॥

1713

वाताकीर्णे विशीर्णवैरणतृणश्रेणीझणत्कारिणि
ग्रीष्मे सोष्मणि चण्डसूर्यकिरणप्रक्काथ्यमानार्णसि ।
चित्तारोपितकामिनीमुखशशिज्योत्स्नाहतक्लान्तयो
मध्याह्नेपि मुदैव यान्ति पथिकाः स्वं देशमुत्कण्ठिताः ॥

1714

तदात्वस्नातानां दरदलितमल्लीकुसुमिनः
कचान्बिभ्राणानां मलयजरसार्द्रार्द्रवपुषाम् ।
निदाघार्कप्लोषग्लपितमहिमानं मृगदृशां
परिष्वङ्गोनङ्गं पुनरपि शनैरङ्कुरयति ॥

एते केषामपि.

1715

ग्रीष्मोष्मप्लोषशुष्यत्पयसि बकभयोद्भ्रान्तपाठीनभाजि
प्रायः पङ्कैकभावं गतवति सरसि स्वल्पतोये लुठित्वा ।
कृत्वा कृत्वा जलार्द्रीकृतमुपरि जरत्कर्पटाग्रं प्रपायां
तोयं लब्ध्वापि पान्थः पथि चलति हहा हेतिकुर्वन्पिपासुः ॥

भट्टबाणस्य.

1716

बाले मालेयमुच्चैर्न भवति गगनव्यापिनी नीरदानां
किं त्वं पक्ष्मान्तवान्तैर्मलिनयसि मुधा वक्त्रमश्रुप्रवाहैः ।
एषा प्रोद्वृत्तमत्तद्विपकटकषणक्षुण्णविन्ध्योपलाभा
दावाग्नेः संप्रवृत्ता मलिनयति दिशां मण्डलं धूमलेखा ॥

धाराकदम्बस्य.

1717

कानि स्थानानि दग्धान्यतिशयमहनाः सन्ति के वा प्रदेशाः
किं वा शेषं वनस्य स्थितमिति पवनासङ्गविस्पष्टतेजाः ।
चण्डज्वालावलीढस्फुटिततरुलताग्रन्थिमुक्ताट्टहासो
दावाग्निः शुष्कवृक्षे शिखरिणि गहनेधिष्ठितः पश्यतीव ॥

भीमस्य.

अथ वर्षाः

1718

अतसीपुष्पसंकाशं खं वीक्ष्य जलदागमे ।
ये वियोगेन जीवन्ति न तेषां विद्यते भयम् ॥

विषमादित्यस्य.

1719

इन्द्रगोपैर्बभौ भूमिर्निचितेव प्रवासिनाम् ।
अनङ्गबाणैर्हृद्भेदस्रुतलोहितबिन्दुभिः ॥

1720

सान्द्रनीहारसंवीततोयगर्भगुरूदरा ।
संततस्तनिताभ्राली निषसादाद्रिसानुषु ॥

वररुचेः.

1721

स्फुरन्तः पिङ्गलाभासो धरण्यामिन्द्रगोपकाः ।
सरक्तवान्ताः पान्थस्त्रीजीवा इव चकासति ॥

1722

भ्रष्टैर्मेघभुकाघातदलितादर्कदाडिमात् ।
फलैरिव मही पिङ्गैः पूरिता हरिगोपकैः ॥

उञ्छवृत्तेः.

1723

अकालजलदच्छन्नमालोक्य रविमण्डलम् ।
चक्रवाकयुगं रौति रजनीभयशङ्कया ॥

1724

गर्ज वा वर्ष वा मेघ मुञ्च वाशनितोमरान् ।
गणयन्ति न शीतोष्णं वल्लभाभिमुखा नराः ॥

1725

हसतीव बलाकाभिर्नृत्यतीव तडिद्भुजैः ।
रोदितीवाम्बुधाराभिरुन्मत्तकमिवाम्बरम् ॥

एते केषामपि.

1726

वनिताचित्तचपला तडिदम्भोदकुक्षिषु ।
न तिष्ठति चिरं लक्ष्मीरपात्राङ्कमिवागता ॥

1727

कलुषं मधुरं चाम्भः सर्वं सर्वत्र सांप्रतम् ।
अनार्जवजनस्येव कृतकव्याहृतं वचः ॥

एतौ महामनुष्यस्य.

1728

सेन्द्रचापैः श्रिता मेघैर्निपतन्निर्झरा नगाः ।
वर्णकम्बलसंवीता बभुर्मत्तद्विपा इव ॥

विशाखदेवस्य.

1729

अदृष्टपूर्वमस्माभिर्यदेतद्दृश्यतेधुना ।
विषं विषधरैः पीतं मूर्छिताः पथिकाङ्गनाः ॥

कस्यापि.

1730

भृशं भुभुभिरे भुभ्रैर्दिशः कुटजपादपैः ।
मेघरुद्धवियन्मार्गावतीर्णैरिव तारकैः ॥

भदन्तक्षेमवृद्धेः.

1731

अब्देभकुम्भे निर्भिन्ने विद्युत्खड्गलताहते ।
स्वच्छमुक्ताफलस्थूला निपेतुस्तोयबिन्दवः ॥

1732

वातैरभ्युदितासारशीताक्रान्त इव क्षणात् ।
ज्वलन्कामानलः पान्थप्रियाहृदयमाविशत् ॥

शरदेवस्य.

1733

व्योम्नि नीलाम्बुदच्छन्ने गुरुवृष्टिभयादिव ।
जग्राह ग्रीष्मसंतापो हृदयानि वियोगिनाम् ॥

वररुचेः.

1734

अस्थिरमनेकरागं गुणरहितं नित्यवक्रदुष्प्रापम् ।
प्रावृषि सुरेन्द्रचापं विभाव्यते युवतिचित्तमिव ॥

1735

उपलक्ष्यवर्णसंकरमपगतगुणयोगमुज्झितस्थैर्यम् ।
पथिकाः समुद्विजन्ते कुदेशमिव वीक्ष्य शक्रधनुः ॥

1736

अविरलधारानिकरं जलदैर्जलमुत्सृजद्भिरतिमात्रम् ।
मानिवधूहृदयेभ्यः कालुष्यमशेषतो मृष्टम् ॥

1737

दयितभुजगेन संप्रति नृत्यच्चलचारुचन्द्रकिरणेन ।
वल्लभगुहेन कामः प्रदीपितो नीलकण्ठेन ॥

1738

अपगतरजोविकारा घनपटलाक्रान्ततारकालोका ।
लम्बपयोधरभारा प्रावृडियं वृद्धवनितेव ॥

एते वृद्धेः.

1739

धूमानलपवनविषैः पयोधरः सत्यमेव घटितोयम् ।
अन्धयति दहति चलयति निहन्ति कथमन्यथा विरहे ॥

भट्टमाहुण्डकस्य.

1740

आलोहितमाकलयन्कन्दलमुत्कम्पितं मधुकरेण ।
संस्मरति पथिषु पथिको दयिताङ्गुलितर्जनाललितम् ॥

वररुचेः.

1741

नन्दयति कस्य न मनश्चपलैर्घनधूलिधूसरच्छायैः।
आक्रम्य पुत्रकैरिव मलिनीकृतमम्बरं जलदैः ॥

बीजकस्य.

1742

चरितैः कौलेयैरिव जलदैरसितैर्दिशश्चिता वीक्ष्य ।
हंसाः सिता इव गुणाः क्वापि गता लोकमुत्सृज्य ॥

कस्यापि.

1743

आलोकयति पयोधरमुपमान्दिरमभिनवाम्बुभरनीलम् ।
दयितारचितचितानलधूमोद्गमशङ्कया पथिकः ॥

अमरुकस्य.

1744

उपरि घनं घनपटलं तिर्यग्गिरयोपि नर्तितमयूराः ।
क्षितिरपि कन्दलधवला दृष्टिं पथिकः क्व पातयतु ॥

भर्तृहरेः.

1745

उपरि पयोधरमाला दूरे दयिता किमेतदापतितम् ।
हिमवति दिव्यौषधयः क्रोधाविष्टः फणी शिरसि ॥

1746

प्रियसखि कः खलु कालः प्रवासिनामतिशयेन कष्टतरः ।
इति वदति पथिकजाया बकेन च प्रावृडित्युक्तम् ॥

1747

अन्यस्मिन्नपि काले दयिताविरहः करोति संतापम् ।
किं पुनरविरलजलधरगुरुतररसितेषु दिवसेषु ॥

केषामपि.

1748

किं गतेन यदि सा न जीवति
प्राणिति प्रियतमा तथापि किम् ।
इत्युदीक्ष्य नवमेघमालिकां
न प्रयाति पथिकः स्वमान्दिरम् ॥

रतिमित्रस्य.

1789

मेघाटोपैः स्तनितसुभगं वीक्ष्य खं हस्तिदन्तैः
कृत्वा पल्लीं शशिकरनिभैश्चामरैश्छादयित्वा ।
कर्पूरैस्तां मृगमदरसैर्भूमिमालिप्य शेते
सैंहे चर्मण्युरसि दयिताबाहुपाशः पुलिन्दः ॥

1790

रटतु जलधरः पतन्तु धाराः
स्फुरतु तडिन्मरुतोपि वान्तु शीताः ।
इयमुरसि महौषधीव कान्ता
सकलभयप्रतिघातिनी स्थिता मे ॥

कस्यापि.

अथ शरत्.

1791

बभूव गाढसंतापा मृणालवलयोज्ज्वला ।
उल्केव चन्दनापाण्डुघनस्तनवती शरत् ॥

भट्टबाणस्य.

1792

दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः ।
नवसंगमसव्रीडा जघनानीव योषितः ॥

वाल्मीकेः.

1793

वान्तिकह्लारसुभगाः सप्तच्छदसुगन्धयः ।
वाता नवरतग्लानवधूगमनमन्थराः ॥

1794

वान्ति रात्रौ रतिक्लान्तकामिनीसुहृदोनिलाः ।
ललनालोलधम्मिल्लमल्लिकामोदवासिताः ॥

कस्यापि.

1795

शरद्युत्पन्नसंदेहाः सरसो गगनस्य च ।
चाबकाः सलिले पेतुश्चक्रवाका नभो ययुः ॥

1796

पणवनितयेव शरदा संप्रत्युपजनिततीव्रसंतापः ।
क्षपयित्वा घनसंपदमम्बरशेषः कृतः सविता ॥

एतौ शकवृद्धेः.

1797

काशाः क्षीरनिकाशा दधिशरवर्णानि सप्तपर्णानि ।
नवनीतनिभश्चन्द्रः शरदि च तक्रप्रभा ज्योत्स्ना ।

गण्डगोपालस्य.

1798

विजितमपि पक्ष्मलाक्ष्या बिम्बाधरशोभया वराकमिदम् ।
विकसति बन्धूकमहो रागवतः कीदृशी लज्जा ॥

लोठितकस्य.

1799

अश्यद्घनान्धकारेथ प्राप्ते वर्षानिशाक्षये ।
शरत्प्रभातवेलेव प्रकाशमनयद्दिशः ॥

1800

रिक्ता विपाण्डुरात्मानो निःशब्दाः प्राप्तलाघवाः ।
त्यक्तचपला इव घना न्यस्तचापा दिशो ययुः ॥

भौर्वस्य.

1801

खमिव जलं जलमिव खं हंसश्चन्द्र इव हंस इव चन्द्रः ।
कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥

1802

असारो निर्गुणो वक्रश्चित्ररूपतयान्वितः ।
अवाप न चिरात्कीर्तिं शक्रचापः खलो यथा ॥

अवन्तिवर्मणः.

1759

पयोनिधेर्वाडववह्निमिश्रं
यत्पीतमम्भो बहु घस्मरेण ।
- - - - - - - - - - - -
- - - - - - - - - - - -

1760

मलिनहुतभुग्धूमश्यामैर्दिशो मलिना घनै-
रविरलतृणश्यामा भूमिर्नवोद्गतकन्दला ।
सुरतसुभगो नूनं कालः स एष समागतो
मरणशरणा यस्मिन्नेते भवन्ति वियोगिनः ॥

चीआकस्य.

1761

रसति तरुणीकेशश्यामे पयोभृति निर्भरं
स्फुरति चपले वारं वारं क्षणद्युतितेजसि ।
उपगुरुजनं मन्ये दैन्यात्पराङ्मुखसुप्तया
निभृतनिभृतं मन्दोच्छ्वासं तया बत रुद्यते ॥

जीवनागस्य.

1762

विरमत घनाः किं वो वृष्ट्या मुधैव विसृष्टया
व्रजत ककुभं कामप्यन्यां मनोरुचितामितः ।
न तदिह वनं नासौ मार्गो न तच्च शिलातलं
विरहगलितैस्तन्व्या नो यद्रुतं नयनाम्बुभिः ॥

1763

शिखिकुलगलप्राप्तच्छायैः पयोदवितानकै-
रभिनवततं दृष्ट्वा व्योम प्रमुग्धदृशा चिरम् ।
प्रथमविरहे सारङ्गाक्ष्या क्षणं तदनुष्ठितं
जगति पथिकैर्दत्तो येन प्रवासजलाञ्जलिः ॥

1764

कुटजकटवो वाता घ्राताः श्रुतं घनगर्जितं
निशि निशि मुधा शून्ये तल्पे कृतः शयनभ्रमः ।
अवधिगणनालेखापूर्णाः कृता गृहभित्तयो
न खलु कठिनाः प्राणा याता न च त्वमिहागतः ॥

केषामपि.

1765

क्षपाः क्षामीकृत्य प्रसभमपहृत्याम्बु सरितां
प्रताप्योर्वीं कृत्स्नां तरुगहनमुच्छोष्य सकलम् ।
क्व संप्रत्युष्णांशुर्गत इति समालोकनपरा-
स्तडिद्दीपालोका दिशि दिशि चरन्तीह जलदाः ॥

पाणिनेः.

1766

दिशां हाराकाराः शमितशमभाराः शमवतां
हताध्वव्यापाराः कृतमदविकाराश्च शिखिनाम् ॥
असूचीसंचारास्तुहिनकणसारा विरहिणी-
मनः कीर्णाङ्गाराः किरति जलधारा जलधरः ॥

कस्यापि.

1767

बर्ही रौति बका रटन्ति तडितः शाम्यन्ति न व्याकुला
विक्रोशन्ति घना घना च विलपत्युच्चैर्बलाकावलिः ।
आत्मानं मरुतः क्षिपन्ति सलिलासाराः पतन्त्यमतो
मुक्त्वा प्रावृषि साहसैकरसिके याति प्रियामध्वगे ॥

कस्यापि.

1768

देशैरन्तरिता शतैश्च सरितामुर्वीधरैः काननै-
र्यत्नेनापि न याति लोचनपथं कान्तेतिजानन्नपि ।
उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाश्रुपूर्णां दृशं
तामाशां पथिकस्तथापि किमपि ध्यायन्मुहुर्वीक्षते ॥

नरसिंहस्य.

1769

किंचिन्मुद्रितपांसवः शिखिकुलैरल्पक्षमालोकिता
जीर्णावासरुदद्दरिद्रगृहिणीश्वासानिलैर्जर्जराः ।
एते ते निपतन्ति नूतनघनात्प्रावृड्डरारम्भिणो
विच्छायीकृतविप्रयुक्तवनितावक्त्रेन्दवो बिन्दवः ॥

कस्यापि.

1770

छिद्यन्तां वनराजयः कुसुमिता निर्वास्यतां सर्पभु-
ङ्नीपोद्दामकदम्बरेण सुरभिः संमथ्यतां मारुतः ।
हा कष्टं धिगहो न कश्चिदपि मे मूकीकरोत्यम्बुदा-
नित्येवं पथिकाङ्गनाप्रलपितं श्रुत्वेव खं रोदिति ॥

नड्डुकस्य.

1771

ग्रामेस्मिन्पथिकाय पान्थ वसतिर्नैवाधुना दीयते
रात्रावत्र विहारमण्डपतले पान्थः प्रसुप्तो युवा ।
तेनोद्गीय खलेन गर्जति घने स्मृत्वा प्रियां तत्कृतं
येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति ॥

कस्यापि.

1772

श्रुत्वा बालमृगीविलोलनयना शब्दं घनानां पुरा
भीत्या वक्षसि संस्थितापि निविडं भूयः समालिङ्गति ।
या वक्त्रादपहृत्य रोपितवती कण्ठे ममैवाननं
सा द्रक्ष्यत्यधुना कथं नु विरहे बाला पयोदावलीम् ॥

दुर्गसेनस्य.

1773

नृत्यच्चन्द्रकिणि क्वणन्मधुलिहि श्यामायमानक्षितौ
धीरध्वानपयोमुचि प्रविलसत्सौदामिनीदामनि ।
धाराम्भःकणशीतवाहिमरुति प्राणान्पयोदागमे
हा हा हास्यति मुग्धिका नववधूरित्यध्वगः क्रन्दति ॥

देवदत्तस्य.

1774

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा
पान्थेनात्मवियोगदुःखपिशुनं गीतं तथोत्कण्ठया ।
आस्तां जीवितहारिणः प्रवसनालापस्य संकीर्तनं
मानस्यापि जलाञ्जलिः सरभसं लोकेन दत्तो यथा ॥

भर्गटस्य.

1775

हंसानां गतयो हृता यदि तया कूजन्त्वमी सोत्सुका-
स्तत्केशैर्हृतबर्हकान्तय इमे नृत्यन्तु वा बर्हिणः ।
लावण्यं हृतमस्य दग्धशशिनस्तापं करोत्वेष मे
यूयं गर्जथ यन्निरागसि मयीत्येतन्न युक्तं घनाः ॥

कस्यापि.

1776

आक्रन्दाः स्तनितैर्विलोचनजलान्यश्रान्तधाराम्बुभि-
स्तद्विच्छेदभुवश्च शोकशिखिनस्तुल्यास्तडिद्विभ्रमैः ।
अन्तर्मे दयितामुखं तव शशी वृत्तिः समाप्यावयो-
स्तत्किं मामनिशं सखे जलधर त्वं दग्धुमेवोद्यतः ॥

आनन्दवर्धनस्य.

1777

मेघैर्व्योम नवाम्बुभिर्वसुमती विद्युल्लताभिर्दिशो
धाराभिर्गगनं वनानि कुटजैः पूरैर्वृता निम्नगाः ।
एकां घातयितुं वियोगविधुरां दीनां वराकीं स्त्रियं
प्रावृट्काल हताश वर्णय कृतं मिथ्या किमाडम्बरम् ॥

भीभाकस्य.

1778

सोत्साहा नववारिभारगुरवो मुञ्चन्तु नादं घना
वाता वान्तु कदम्बरेणुशबला नृत्यन्तु सर्पद्विषः ।
मग्नां कान्तवियोगदुःखजलधौ मां वीक्ष्य दीनाननां
विद्युत्किं स्फुरसि त्वमप्यकरुणे स्त्रीत्वेपि तुल्ये सति ॥

अथ हेमन्तः

1827

शरत्कालातपक्लान्तकान्तावक्त्रेन्दुवल्लभः ।
प्राप्तः सपदि हेमन्तः सामन्तः स्मरभूपतेः ॥

1828

अलभन्त नभःक्षेत्रे तारास्तरलकान्तयः ।
त्विषं तुषारबीजानां नूतनाङ्कुरशालिनाम् ॥

1829

साशङ्केनेव कंदर्पदर्पोष्मपरिचिन्तनात् ।
शीतेन मदिराक्षीणां स्पृश्यते न कुचस्थली ॥

1830

मद्वैरिणः कठोरांशोरियं प्रणयभूरिति ।
रोषादिव तुषारेण निरदह्यत पद्मिनी ॥

1831

समक्षमपि सूर्यस्य पर्यभूयत पद्मिनी ॥
तेजस्विनोपि कुर्वन्ति किं कालवशमागताः ॥

एते बिल्हणस्य.

1832

हिमधवलदन्तकेशी मन्दद्युतितारका बृहत्तिमिरा ।
द्विगुणीभूता रजनी वृद्धेव शनैः शनैर्याति ॥

1833

नग्नाः सदा शीतसहा जटाधरा
विमुच्य पर्णानि फलानि सांप्रतम् ।
सुखप्रदं माधवमाप्तुमुत्सुका-
स्तपः प्रवृत्ताः किमु सन्ति पादपाः ॥

1834

कम्पप्रदोसौ शिशिरर्तुचौरो
मुष्णाति वृक्षान्हरते किमस्मान् ।

इतीव भीत्या परिपाण्डुराणि
जातानि शुष्काणि तृणानि भूमौ ॥

1835

रति किमपां भस्मासारं शरद्वसितात्मनां
रिपवनतां नीतैर्मेघैः पुनात्युत चन्द्रिकाम् ।
मति सुमनःसंदर्भं किं निगीर्णमशेषतः
किरति परितः किं हेमन्तस्तुषारकणोत्करम् ॥

प° श्रीवक्रस्य.

1836

हेमन्त स्मरिष्यामि याते त्वयि गुणद्वयम् ।
अयत्नशीतलं वारि निशाश्च सुरतक्षमाः ॥

1837

म्भीरस्यापि सतः संप्रति गुरुशोकपीडितस्येव ।
कूपस्य निशापगमे बाष्पेण निरुध्यते कण्ठः ॥

एतौ बाणकवेः.

1838

आहूतोपि सहायैरेमीत्युक्त्वा विमुक्तनिद्रोपि ।
न्तुमना अपि पथिकः संकोचं नैव शिथिलयति ॥

भश्रीः.

1839

प्रालेयलेशशिशिरानिलसंप्रयोगः
प्रोत्फुल्लकुन्दमकरन्दहृतालिवृन्दः ।
कालोयमापतति कुङ्कुमपङ्कपिङ्ग-
प्रोत्तुङ्गपीवरपयोधरभारभाजाम् ॥

डोहरस्य.

1840

लघुनि तृणकुटीरे क्षेत्रकोणे यवानां
नवयवसपलालस्रस्तरे सोपधाने ।
परिहरति सुगुप्तं हालिकद्वन्द्वमारा-
त्कुचकलशमहोष्मावद्धरेखस्तुषारः ।

कमलायुधस्य.

1789

मेघाटोपैः स्तनितसुभगं वीक्ष्य खं हस्तिदन्तैः
कृत्वा पल्लीं शशिकरनिभैश्चामरैश्छादयित्वा ।
कर्पूरैस्तां मृगमदरसैर्भूमिमालिप्य शेते
सैंहे चर्मण्युरसि दयिताबाहुपाशः पुलिन्दः ॥

1790

रटतु जलधरः पतन्तु धाराः
स्फुरतु तडिन्मरुतोपि वान्तु शीताः ।
इयमुरसि महौषधीव कान्ता
सकलभयप्रतिघातिनी स्थिता मे ॥

कस्योरपि.

अथ शरत्.

1791

बभूव गाढसंतापा मृणालवलयोज्ज्वला ।
उल्केव चन्दनापाण्डुघनस्तनवती शरत् ॥

भट्टबाणस्य.

1792

दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः ।
नवसंगमसव्रीडा जघनानीव योषितः ॥

वाल्मीकेः.

1793

वान्तिकह्लारसुभगाः सप्तच्छदसुगन्धयः ।
वाता नवरतग्लानवधूगमनमन्थराः ॥

1794

वान्ति रात्रौ रतिक्लान्तकामिनीसुहृदोनिलाः ।
ललनालोलधम्मिल्लमल्लिकामोदवासिताः ॥

कस्योरपि.

1795

शरद्युत्पन्नसंदेहाः सरसो गगनस्य च ।
चातकाः सलिले पेतुश्चक्रवाका नभो ययुः ॥

1796

पणवनितयेव शरदा संप्रत्युपजनिततीव्रसंतापः ।
क्षपयित्वा घनसंपदमम्बरशेषः कृतः सविता ॥

एतौ शकवृद्धेः.

1797

काशाः क्षीरनिकाशा दधिशरवर्णानि सप्तपर्णानि ।
नवनीतनिभश्चन्द्रः शरदि च तक्रप्रभा ज्योत्स्ना ।

गण्डगोपालस्य.

1798

विजितमपि पक्ष्मलाक्ष्या बिम्बाधरशोभया वराकमिदम् ।
विकसति बन्धूकमहो रागवतः कीदृशी लज्जा ॥

लोठितकस्य.

1799

भ्रश्यद्घनान्धकारेथ प्राप्ते वर्षानिशाक्षये ।
शरत्प्रभातवेलेव प्रकाशमनयद्दिशः ॥

1800

रिक्ता विपाण्डुरात्मानो निःशब्दाः प्राप्तलाघवाः ।
त्वत्सपत्ना इव घना न्यस्तचापा दिशो ययुः ॥

और्वस्य.

1801

खमिव जलं जलमिव खं हंसश्चन्द्र इव हंस इव चन्द्रः ।
कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥

1802

असारो निर्गुणो वक्रश्चित्ररूपतयान्वितः ।
अवाप न चिराद्ध्वंसं शक्रचापः खलो यथा ॥

भवन्तिवर्मणः.

1803

सितद्विजालीरम्याणि न जहुः कस्य वा मनः ।
मुखानि चन्द्रकान्तानि निशानां योषितामिव ॥

शकवर्मणः.

1804

प्रसादयन्त्या शरदा चन्द्रमन्तर्मलीमसम् ।
तीव्रतापः कृतो भास्वान्रुषेवालोहितद्युतिः ॥

1805

कलमं फलभारातिगुरुमूर्धतया शनैः ।
विननामान्तिकोद्भूतं समाघ्रातुमिवोत्पलम् ॥

वररुचेः.

1806

मयैवाजन्मसंवृद्धः संपन्नः क्व नु यास्यति ।
शालेर्वियोगभीत्येव क्षेत्राम्भः कृशतां ययौ ॥

1807

मन्युनेव कृशां ग्रीष्मे वर्षासु रुदितामिव ।
शरत्प्रसादमनयच्छशाङ्कस्य निशाङ्गनाम् ॥

1808

उपकारिणि विक्षीणे शनैः केदारवारिणि ॥
सानुक्रोशतया शालिरभूत्पाण्डुरवाङ्मुखः ॥

वररुचेः.

1809

लवणाम्बुनिधेरम्भः कृत्स्नमुद्गीर्य तोयदाः ।
दधुर्धवलतां भूयः पीतदुग्धार्णवा इव ॥

1810

नीलोत्पलवने रेजुः पादाः श्यामायिता रवेः ।
घनबन्धनमुक्तस्य श्यामिकामलिना इव ॥

बाणस्य.

1811

वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च विलीनभृङ्गैः ।

परस्परं विस्मयवन्ति लक्ष्मी-

मालोकयां चक्रुरिवादरेण ॥

भट्टस्वामिनः.

1812

मणिप्रभेषु प्रतिबिम्बशोभया

निमग्नया बालशशाङ्कलेखया ।

बिसाङ्कुरो वारिषु वञ्चितात्मना

न राजहंसेन पुनर्विचिच्छिदे ॥

कुमारदत्तस्य.

1813

इयमिदमत्यन्तसमं नीचप्रभविष्णुता शरच्चेयम् ।

क्षेत्रेभ्योपास्य फलं खलेषु निःक्षिप्यते यस्याम् ॥

1814

शरदि रविरश्मितप्ता बिभ्राणाः शोषमतिशयगुपिताः ।

ज्वरिता इव लक्ष्यन्ते लङ्घनयोग्या महासरितः ॥

एतौ जयगुप्तस्य.

1815

ऐन्द्रं धनुः पाण्डुपयोधरेण

शरद्दधानार्द्रनखक्षताभम् ।

प्रसादयन्ती सकलङ्कमिन्दुं

तापं रवेरभ्यधिकं चकार ॥

पाणिनेः.

1816

स्प्रष्टुं न या कण्टकतीक्ष्णदण्डं

करेण पद्मं रमणी शशाक ।

सैवोत्पलानां विलुलाव खण्डं

धिङ्मादैवं सर्वनिकारधाम ॥

1817

रक्तच्छदत्वं विकचा वहन्ती

नालं जलैः संगतमादधानाः ।

निरस्य पुष्पेषु रुचिं समग्रां
पद्मा विरेजुः श्रमणा यथैव ॥

शाकवृद्धेः-

1818

अथ प्रसन्नेन्दुमुखी सिताम्बरा
समाययावुत्पलपत्त्रलोचना ।
सपङ्कजश्रीरिव गां निषेवितुं
सहंसवालव्यजना शरद्वधूः ॥

महामनुष्यस्य.

1819

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः ॥

भट्टेः.

1820

अक्ष्णोर्विपक्ष इति सानुशयं लुलाव
नीलोत्पलं यदबला कलमस्य गोप्त्री ।
भूयस्तदेव शिरसावहदुन्नतानां
वैरं विरोधिषु दृढं न पराजितेषु ॥

भट्टाचार्यस्य.

1821

तीक्ष्णं रविस्तपति नीच इवाचिराढ्यः
शृङ्गं रुरुस्त्यजति मित्त्रमिवाकृतज्ञः ।
तोयं प्रसीदति मुनेरिव चित्तमन्तः
कामी दरिद्र इव शोषमुपैति पङ्कः ॥

भासस्य.

1822

नीतोस्मि येन महतीं सलिलेन वृद्धिं
संयोजितश्च सततं गुरुणा फलेन ।

तच्छोष्यते दिनकृतेत्यतिचिन्तयेव
शोकानतं कलमशालिवनं विपाण्डु ॥

अर्जुनदेवस्य.

1823

क्वचित्सस्यैराढ्या क्वचन विकचैर्नीरजवनैः
क्वचित्स्वच्छैस्तोयैः क्वचिदपि रुतैः सारसकृतैः ।
क्वचिद्व्योमाभोगैः सुभगशशभृद्बिम्बधवलै-
रहो चेतः पुंसां हरति बहुरूपा शरदियम् ॥

1824

अर्धे सुप्तो निशायां सरभससुरतायाससन्नश्लथाङ्गः
प्रोद्भूतासह्यतृष्णो मधुमदविरतौ हर्म्यपृष्ठे विबुद्धः ।
संभोगक्लान्तकान्ताशिथिलभुजलतावर्जितं कर्करीतो
ज्योत्स्नाभिन्नाच्छधारं न पिबति सलिलं शारदं मन्दभाग्यः ॥

कयोरपि.

1825

पूर्वं वारिधरप्रसङ्गसमयेनापूरितैः कुक्षिभि-
र्या गर्भिण्य इवातिभारगुरवो निःसेव्यतामागताः ।
एताः संप्रति ता विभान्त्यकलुषाः क्षामाभिरामाङ्गिकाः
कूजत्सारसपोतपीतपयसो नद्यः प्रसूता इव ॥

श्रीभोगिवर्मणः.

1826

भोक्तुं भङ्क्त्वा न भुङ्क्ते कुटिलबिसलताकोटिमिन्दोर्वितर्का-
त्ताराकारांस्तृषार्तो न पिबति पयसः स्थूलबिन्दून्दलस्थान् ।
छायां सध्वान्तसंध्येत्यलिकुलशबलां वेत्ति चाम्भोरुहाणां
कान्ताविश्लेषभीरुर्दिनमपि रजनीं मन्यते चक्रवाकः ॥

श्रीशिवस्वामिनः.

अथ हेमन्तः

1827

शरत्कालातपक्लान्तकान्तावक्त्रेन्दुवल्लभः ।
प्राप्तः सपदि हेमन्तः सामन्तः स्मरभूपतेः ॥

1828

अलभन्त नभःक्षेत्रे तारास्तरलकान्तयः ।
त्विषं तुषारबीजानां नूतनाङ्कुरशालिनाम् ॥

1829

साशङ्केनेव कंदर्पदर्पोष्मपरिचिन्तनात् ।
शीतेन मदिराक्षीणां स्पृश्यते न कुचस्थली ॥

1830

मद्वैरिणः कठोरांशोरियं प्रणयभूरिति ।
रोषादिव तुषारेण निरदह्यत पद्मिनी ॥

1831

समक्षमपि सूर्यस्य पर्यभूयत पद्मिनी ॥
तेजस्विनोपि कुर्वन्ति किं कालवशमागताः ॥

एते बिल्हणस्य.

1832

हिमधवलदन्तकेशी मन्दद्युतितारका बृहत्तिमिरा ।
द्विगुणीभूता रजनी वृद्धेव शनैः शनैर्याति ॥

1833

नग्नाः सदा शीतसहा जटाधरा
विमुच्य पर्णानि फलानि सांप्रतम् ।
सुखप्रदं माधवमाप्तुमुत्सुका-
स्तपः प्रवृत्ताः किमु सन्ति पादपाः ॥

1834

कम्पप्रदोसौ शिशिरर्तुचौरो
मुष्णाति वृक्षान्हरते किमस्मान् ।

इतीव भीत्या परिपाण्डुराणि
जातानि शुष्काणि तृणानि भूमौ ॥

1835

हरति किमपां भस्मासारं शरद्धसितात्मनां
परिपवनतां नीतैर्मेघैः पुनात्युत चन्द्रिकाम् ।
वमति सुमनःसंदर्भं किं निगीर्णमशेषतः
किरति परितः किं हेमन्तस्तुषारकणोत्करम् ॥

प° श्रीबकस्य.

1836

हे हेमन्त स्मरिष्यामि याते त्वयि गुणद्वयम् ।
अयत्नशीतलं वारि निशाश्च सुरतक्षमाः ॥

1837

गम्भीरस्यापि सतः संप्रति गुरुशोकपीडितस्येव ।
कूपस्य निशापगमे बाष्पेण निरुध्यते कण्ठः ॥

एतौ बाणकवेः.

1838

आहूतोपि सहायैरेमीत्युक्त्वा विमुक्तनिद्रोपि ।
गन्तुमना अपि पथिकः संकोचं नैव शिथिलयति ॥

भर्त्रौः.

1839

प्रालेयलेशशिशिरानिलसंप्रयोगः
प्रोत्फुल्लकुन्दमकरन्दहृतालिवृन्दः ।
कालोयमापतति कुङ्कुमपङ्कपिङ्ग-
प्रोत्तुङ्गपीवरपयोधरभारभाजाम् ॥

डोहरस्य.

1840

लघुनि तृणकुटीरे क्षेत्रकोणे यवानां
नवयवसपलालस्रस्तरे सोपधाने ।
परिहरति सुगुप्तं हालिकद्वन्द्वमारा-
त्कुचकलशमहोष्माबद्धरेखस्तुषारः ।

कमलायुधस्य.

1841

शुकहरितयवानां सीम्नि नीहारभासः
सपदि विगतनिद्राः क्रौञ्चकान्ताः क्षपान्ते ।
विदधति कमनीयं क्वाणमुत्कलकारं
सरलितगलनालीजर्जरस्फाररेफम् ॥

1842

हे पान्थ प्रियविप्रयोगहुतभुग्ज्वालानभिज्ञोसि किं
किं वा नास्ति तव प्रिया गतघृणः किं वासि हीनो धिया ।
येनास्मिन्नवकुङ्कुमारुणरुचिव्यासक्तघर्मोचिते
कुन्दानन्दितमत्तषट्पदकुले काले गृहान्निर्गतः ॥

1843

प्रोद्यत्प्रौढप्रियंगुद्युतिभृति विदलत्कुन्दमाद्यद्विरेफे
काले प्रालेयवातप्रचलविकसितोद्दाममन्दारदाम्नि ।
येषां नो कण्ठलग्ना क्षणमपि तुहिनक्षोददक्षा मृगाक्षी
तेषामायामियामा यमसदनसमा यामिनी याति नूनम् ॥

केषामपि.

1844

छित्त्वा हारलताः किरन्ति गलितव्याकीर्णमुक्ताफलाः
शुष्कं मर्मरयन्ति चन्दनरजो वक्षःस्थलायासकम् ।
शीतं शारदतापतान्तिशमनं यद्यत्समाजह्रिरे
हेमन्ते तदिदं त्यजन्ति तुहिनव्याजेन दिव्याङ्गनाः ॥

1845

शोभां दिक्तरुणीर्नयन्ति विलसन्मुक्ताकलापोज्ज्वलां
क्षौणीमण्डलमावहन्ति निपतत्पुष्पोपकाराञ्चितम् ।
स्वच्छैः प्रोर्णुवते नितान्तधवलैर्वासोभिरुर्वीभृतः
किं हेमन्तमहोचितं हिममुचः कुर्वन्ति नैतेम्बुदाः ॥

1846

प्रयाणव्यापारं तुहिनपतनेनान्तरयति
प्रथिम्ना श्यामानां विपुलयति संभोगसमयम् ।
समाश्लेषं शीतैर्गमयति मरुद्भिर्निबिडतां
हितं हेमन्तोयं किमपि तरुणानां प्रकुरुते ॥

एते श्रीभट्टसारस्वतस्य.

अथ शिशिरः

1847

अभ्युत्पन्नविलासानां नारीणामिव सांप्रतम् ।
सीत्काराचार्यतां कर्तुमयं प्राप्तो हिमागमः ॥

1848

कारणोत्पन्नकोपापि सांप्रतं जलदागमे ।
निशि शीतापदेशेन गाढमालिङ्गति प्रियम् ॥

एतौ महामनुष्यस्य.

1849

प्रावारैरङ्गारैर्गर्भगृहैस्तनतटैश्च दयितानाम् ।
संतर्जितं समन्तान्निपतति शीतं दरिद्रेषु ॥

1850

संकोचितकरयुगलः प्रगलितवृङ्गासिकोद्धूषितकायः ।
नद्यवतरणविषण्णो लिखित इवावस्थितः पथिकः ॥

कयोरपि.

1851

अभुक्तमिव शीतभयात्संस्त्यानत्वच्छलेन हिमधवलम् ।
अम्भोभिरपि गृहीतं पश्यत शिशिरस्य माहात्म्यम् ॥

अमृतवर्धनस्य.

1852

करचरणनासमादौ कर्णौ गृह्णाति रक्ततां गमयन् ।
शीतं गुरुकृतपीडं पश्चादङ्गानि कूर्म इव ॥

बीजकस्य.

1853

द्वारं गृहस्य पिहितं शयनस्य पार्श्वे
वह्निर्ज्वलत्युपरि तूलपटो गरीयान् ।
अङ्केनुकूलमनुरागवशात्कलत्र-
मित्थं करोति किमसौ स्वपतस्तुषारः ॥

बाणस्य.

1854

केशानाकुलयन्दृशौ मुकुलयन्वासो बलादाक्षिप-
न्नातन्वन्पुलकोद्गमं प्रकटयन्नावेगकम्पं गतेः ।
वारं वारमुदारसीत्कृतरवैर्दन्तच्छदं पीडय-
न्प्रायः शैशिर एष संप्रति मरुत्कान्तासु कान्तायते ॥

1855

चुम्बन्तो गण्डभित्तीरलकवति मुखे सीत्कृतान्यादधाना
वक्षःसूत्कञ्चुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ।
ऊरूनाकम्पयन्तः पृथुजघनतटात्स्रंसयन्तोंशुकानि
व्यक्तं कान्ताजनानां विटचरितभृतः शैशिरा वान्ति वाताः ॥

कस्यापि.

1856

इन्दुं तण्डुलखण्डमण्डलरुचिं नित्योदितं जातुचि-
द्दर्शे मेघघरट्टघट्टनगलद्देहं विधत्ते विधिः ।
नूनं लोकहितेच्छया किरति यत्संतर्पणं सर्वतः
शुभ्रादभ्रविशिष्टपिष्टरुचिरं भूमौ तुषारं दिवः ॥

प॰ पाजकस्य.

1857

पुण्याग्नौ पूर्णवाञ्छः प्रथममगणितप्लोषदोषः प्रदोषे
पान्थः सुप्त्वा यथेच्छं तरलतनुतृणे धामनि ग्रामदेव्याः ।
उत्कम्पी कर्पटार्धे जरति परिजडेदभ्रनिश्छिद्रनिद्रे
वाते वाति प्रकामं हिमकणनिहतः कोणतः कोणमेति ॥

अथ कुसुमोच्चयः

1858

प्रयच्छतोच्चैः कुसुमानि मानिनी
विपक्षगोत्रं दयितेन लम्भिता ।
न किंचिदूचे चरणेन केवलं
लिलेख बाष्पाकुललोचना भुवम् ॥

1859

निपीयमानस्तबका शिलीमुखै-
रशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती ददृशे वधूजनै-
रमन्ददष्टौष्ठकरावधूननम् ॥

1860

करौ धुनाना नवपल्लवाकृती
वृथा कृथा मानिनि मा परिश्रमम् ।
उपेयुषी कल्पलताभिशङ्कया
कथं न्वितस्त्रस्यति षट्पदावलिः ॥

1861

व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियं जघानोन्नतपीवरस्तनी ॥

एते भारवेः.

1862

मुहुरुपहसितामिवालिनादै-
र्वितरसि नः कलिकां किमर्थमेताम् ।
वसतिमभिगतेन धाम्नि तस्याः
शठ कलिरेव महाँस्त्वयाद्य दत्तः ॥

1863

अवचितकुसुमा विहाय वल्ली-
र्युवतिषु कोमलमालभारिणीषु ।
पदमुपदधिरे कुलान्यलीनां
न परिचयो मलिनात्मनां प्रधानम् ॥

1864

विनयति सुदृशो दृशः परागं
प्रणयिनि कौसुममाननानिलेन ।
तदहितयुवतेरभीक्ष्णमक्ष्णो-
र्द्वयमपि रोषरजोभिरापुपूरे ॥

एते माघस्य.

1865

उच्चित्य प्रथममवस्थितं मृगाक्षी
पुष्पौघं श्रितविटपं ग्रहीतुकामा ।
आरोढुं चरणमदादशोकयष्टे-
रामूलं पुनरपि तेन पुष्पितासौ ॥

1866

अत्रास्मिन्सुरतलतागृहेस्ति रम्यं
मालत्याः कुसुममनुच्चितं परेण ।
इत्युक्त्वा मृदु करपल्लवे गृहीत्वा
मुग्धाक्षीं रहसि निनाय कोपि धूर्तः ॥

एतौ जयमाधवस्य.

1867

प्रोत्फुल्लचारुकुसुमस्तबकौघनम्रा
येयं धृता रुचिरचूतलता मृगाक्ष्या ।
शङ्केनया विरहिणीवधदुर्मदस्य
कामस्य पूरितमिदं प्रतिपुष्पचापम् ॥

एतत्पुष्पलोठकस्य.

1868

असंख्यपुष्पोपि मनोभवस्य
पञ्चैव बाणार्थमयं ददाति ।
एवं कदर्यत्वमिवावधार्य
सर्वस्वमग्राहि मधोर्वधूभिः ॥

1869

स्वेदाम्भसा पुष्परजोभरैश्च
सर्वत्र पङ्के विहिते वधूनाम् ।
चक्रे निवासं कठिनोन्नतेषु
स्त्रीणां मनोभूः कुचमण्डलेषु ॥

अथ जलकेलिः

1870

उन्मृष्टपत्त्रा लुलितालकान्ताः
कण्ठेषु लग्ना जघनं स्पृशन्तः ।
कुचस्थलीष्वाहतिमादधाना
गता वधूनां प्रियतां जलौघाः ॥

1871

चकाशिरे कण्टकिभिः पलाशै-
र्नितम्बसङ्गोल्लसितोरुकम्पैः ।
कान्तापरिष्वङ्गविरूढसान्द्र-
रोमाञ्चपुञ्जैरिव पद्मखण्डाः ॥

1872

हृतोङ्गरागस्तिलकं विमृष्टं
लब्धान्तरैरेभिरितीव मत्वा ।
सुसंहतेनेति तदा जलाना-
मदायि मध्यं न कुचद्वयेन ॥

एते अवबधर्मस्य.

1873

सन्दष्टवस्त्रेष्वबलानितम्बे-
ष्विन्दुप्रकाशान्तरितोडुकल्पाः ।
अमी जलापूरितसूत्रमार्गा
मौनं भजन्ते रशनाकलापाः ॥

1874

आसां जलास्फालनतत्पराणां
मुक्ताफलस्पर्धिषु शीकरेषु ।
पयोधरोत्सर्पिषु शीर्यमाणः
संलक्ष्यते न च्छिदुरोपि हारः ॥

एतौ कालिदासस्य.

1875

मुग्धाङ्गना कापि सरोजपत्त्रं
विलोलिताम्भःकणिकं निरीक्ष्य ।
प्रसारयामास जवेन पाणिं
ससंभ्रमं मौक्तिकशङ्कयेव ॥

वल्लभदेवस्य.

1876

सततमातपवातनिषेविणः
परिणतं सरसस्तपसः फलम् ।
यदबलाजन एव भुजैरसा-
वुर इवास्य पयः परिषस्वजे ॥

यह्लकस्य.

1877

प्रियकरप्रहिताम्बुकणच्छटा-
स्फुरणमीलितलोचनयाप्यहो ।
हृदि कयाचिदसह्यमनोभव-
ज्वलनतापरुजा जगृहेतराम् ॥

1878

करौ धुनाना नवपल्लवाकृती
पयस्यगाधे किल जातसंभ्रमा ।
सखीष्वनिर्वाच्यमधार्ष्ट्यदूषितं
प्रियाङ्कसंश्लेषमवाप मानिनी ॥

1879

प्रियेण संग्रथ्य विपक्षसंनिधा-
वुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥

1880

तिरोहितान्तानि नितान्तमाकुलै-
रपां विगाहादलकैः प्रसारिभिः ।
ययुर्वधूनां वदनानि तुल्यतां
द्विरेफवृन्दान्तरितैः सरोरुहैः ॥

एते भारवेः.

1881

संक्षोभं पयसि मुहुर्महेभकुम्भ-
श्रीभाजा स्तनयुगलेन नीयमाने ।
विश्लेषं युगमगमद्रथाङ्गनाम्नो-
रुद्वृत्तः क इव सुखावहः परेषाम् ॥

1882

आनन्दं दधति मुखे करोदकेन
श्यामाया दयिततमेन सिच्यमाने ।
ईर्ष्यन्त्या वदनमसिक्तमप्यनल्प-
स्वेदाम्भःस्नपितमजायतेतरस्याः ॥

1883

कान्तानां कुवलयमप्यपास्तमक्ष्णोः
शोभाभिर्न मुखरुचाहमेकमेव ।
संहर्षाद्दलिविरुतैरितीव गायँ-
ल्लोलोर्मौ पयसि महोत्पलं ननर्त ॥

एते माघस्य.

1884

लब्धं सरोभिः फलमम्बुजानां
सङ्गेन कान्तामुखतस्कराणाम् ।
एषामकृष्यन्त वराङ्गनाभि-
र्विलोचनानीव यदुत्पलानि ॥

1885

किमप्यवज्ञातसरोरुहेभ्यः
सरस्तदासां पदपल्लवेभ्यः ।
परीक्षणायेव निसर्गकान्ते-
रलक्तकं वीचिभिराचकर्ष ॥

एतौ बिल्हणस्य.

अथास्तमयः

1886

करसादोम्बरत्यागस्तेजोहानिः सरागता ।
वारुणीसङ्गजावस्था भानुनाप्यनुभूयते ॥

सुरभिचूलस्य.

1887

विलोक्य संगमे रागं पश्चिमाया विवस्वतः ।
कृतं कृष्णं मुखं प्राच्या नहि नार्यो विनेर्ष्यया ॥

पाणिनेः.

1888

दीप्तिमोषधिलेशेषु तापं विरहिणीषु च ।
निःक्षिप्येव जगामास्तं विस्रस्तकिरणो रविः ॥

क्षेमेन्द्रस्य.

1889

अविज्ञातविशेषस्य सर्वतेजोपहारिणः ।
स्वामिनो निर्विवेकस्य तमसश्च किमन्तरम् ॥

श्रीमदवन्तिवर्मणः.

1890

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥

विक्रमादित्यस्य.

1891

क्वचिन्मृगशिरःपूर्णं क्वचिदालम्बिकृत्तिकम् ।
क्वचिच्छ्रवणसंकीर्णं नभो व्याधगृहायते ॥

भास्करसेनस्य.

1892

सांध्यरागरुधिरारुणमारा-
न्निष्पपात रविमण्डलमब्धौ ।
क्रूरकालकरवालविलूनं
वासरस्य सहसैव शिरो नु ॥

उपमन्योः.

1893

रम्यतामुपगते नयनानां
लोहितायति सहस्रमरीचौ ।
आससाद विरहय्य धरित्रीं
चक्रवाकमिथुनान्यभितापः ॥

भारवेः.

1894

अंशुमानपि विपाकपिशङ्ग-
रूपमाप परितो दिवसान्ते ।
कः परोऽत्र न विकारमुपेया-
भीम — — परिवेल्लितमूर्तिः ॥

1895

प्रोज्झ्यमित्रमपवर्जितदोषं
नाशयप्रकटनं मम युक्तम् ।
नूनमेवमवमृष्य तदानीं
मीलितं हृदयमम्बुरुहेण ॥

1896

मित्रमुज्झितवतातिनिराशं
स्वाशयाद्विदितवैभवहीनम् ।
ईदृशेन नभसा महतान्तः
शून्यता प्रकटितातिशयेन ॥

एते जयमाधवस्य

1897

असौ हि संकेतसमुत्सुकाभि-
र्विलासिनीभिर्मदनातुराभिः ।
सरोषदृष्टः स्फुरिताधराभि-
र्द्रुतं रविर्भीत इवास्तमेति ॥

नरेन्द्रस्य.

1898

अथाससादास्तमनिन्द्यतेजा
जनस्य दूरोज्झितमृत्युभीतेः ।
उत्पत्तिमद्वस्तु विनाश्यवश्यं
यथाहमित्येवमिवोपदेष्टुम् ॥

1899

सरोरुहाक्षीणि निमीलयन्त्या
रवौ गते साधु कृतं नलिन्या ।
अक्ष्णां हि दृष्टापि जगत्समग्रं
फलं प्रियालोकनमात्रमेव ॥

एतौ पाणिनेः.

1900

कृतोपकारं प्रियबन्धुमर्कं
मा द्राक्ष्म हीनांशुमधः पतन्तम् ।
इतीव मत्वा नलिनीवधूभि-
र्निमीलितान्यम्बुरुहेक्षणानि ॥

1901

शुद्धमाविलमवस्थितं चलं
वक्रमार्जवगुणान्वितं च यत् ।
सर्वमेव तमसा समीकृतं
धिङ्महत्त्वमसतां हतान्तरम् ॥

कालिदासस्य.

1902

एके वारिनिधौ प्रवेशमपरे लोकान्तरालोकनं
केचित्पावकयोगितां निजगदुः क्षीणेऽह्नि चण्डार्चिषः ।
मिथ्या चैतदसाक्षिकं प्रियसखि प्रत्यक्षतीव्रातपं
मन्येऽहं पुनरध्वनीनरमणीचेतोधिशेते रविः ॥

इन्दुलेखायाः.

1903

महद्भिरोघैस्तमसामभिद्रुतो
भयेप्यसंमूढमतिः क्रमन्क्षितौ ।
प्रदीपवेषेण गृहे गृहे स्थितो
विखण्ड्य देहं बहुधेव भास्करः ॥

मेण्ठस्य.

1904

प्रकाश्य लोकान्भगवान्स्वतेजसा
प्रभादरिद्रः सवितापि जायते ।
अहो चला श्रीर्बलमानदामहो
स्पृशन्ति सर्वं हि दशाविपर्यये ॥
पाणिनेः.

1905

अयं हि तीव्रेण जगन्ति तेजसा
प्रताप्य भासां पतिरस्तमागतः ।
प्रतापमात्रोपनता विभूतय-
श्चिरं न तिष्ठन्ति परोपतापिनाम् ॥
शंकरगणस्य.

1906

समाहृतं यस्य करैर्विसर्पिभि-
स्तमो दिगन्तेष्वपि नावतिष्ठते ।
स एव भास्वाँस्तमसाभिभूयते
स्पृशन्ति कं कालवशेन नापदः ॥
डहोरकस्य.

1907

परस्परं चञ्चुपुटद्वयार्पितं
बिभर्ति चक्राह्वयुगं मदालसम् ।
नितान्तसंघट्टनकीलकोपमां
वियोगभीत्येव मृणालनालिकाम् ॥
कस्यापि.

1908

यातोस्मि पद्मनयने समयो ममैष
सुप्ता मयैव भवती प्रतिबोधनीया ।
प्रत्यायनामयमितीव सरोरुहिण्याः
सूर्योस्तमस्तकनिविष्टकरः करोति ॥
श्रीहर्षदेवस्य.

1909

अस्तावलम्बिरविबिम्बतयोदयाद्रि-
चूडोन्मिषत्सकलचन्द्रतया च सायम् ।
संध्याप्रनृत्तहरहस्तगृहीतकांस्य-
तालद्वयेव समलक्ष्यत नाकलक्ष्मीः ॥

1910

व्यक्तोपकारममुना स्थगिताह्व दिक्षु
प्रेयोगृहं सुखमलक्षितमेव यामः ।
धम्मिल्लबन्धरुचिरैरभिसारिकाभिः
प्रेम्णा तमश्चिरमितीव शिरोभिरूहे ॥

1911

आबद्धपद्ममुकुलाञ्जलि याचितोस्मा-
नुत्सृज्य संप्रति गतः कथमंशुमाली ।
अन्तर्निरुद्धमधुपक्वणितैरितीव
स्वप्नायति स्म नलिनी निशि बद्धनिद्रा ॥

1912

अस्ताद्रिपार्श्वमुपजग्मुषि तिग्मभासि
जानीत शीतकिरणोभ्युदितो न वेति ।
चारा इवाथ रजनीतिमिरप्रयुक्ता-
श्चेरुश्चिरं चरणभूमिषु चञ्चरीकाः ॥

1913

निष्ठ्यूतकज्जलकरालशिखाशिखण्डै-
रुत्सङ्गवृत्तिमधिगम्य निकेतनानाम् ।
स्नेहानुबन्धिभिरदीपि दिनावसाने
संध्यार्भकैरिव सरागकरैः प्रदीपैः ॥

एते रत्नाकरस्य.

1914

आवेपते भ्रमति रोदिति मोहमेति
कान्तं विलोकयति कूजति दीनदीनम् ।
अस्तं हि भानुमति गच्छति चक्रवाकी
हा जीवितेपि मरणं प्रियविप्रयोगः ॥

1915

दूरागतं दयितमुत्सुकिता नितान्त-
मालिङ्ग्य यातु विरहस्य दुरन्तमन्तम् ।
इत्थं विचिन्त्य भुवनत्रितयैकबन्धु-
रस्तं जगाम भगवाननुकम्पयेव ॥

कयोरपि.

1916

एकेनाक्ष्णा परिणतरुषा पाटलेनास्तसंस्थं
पश्यत्यर्कं कुमुदविशदेनापरेण स्वकान्तम् ।
अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी
द्वौ संकीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥

चन्द्रकस्य.

1917

हुताशज्वालाभे स्थितवति रवावस्तशिखरे
पिपासुः किंजल्कं प्रविशति सरोजं मधुकरः ।
तदन्तः संरोधं गणयति न संध्यासमयजं
जनोर्थी नापायं विमृषति फलैकान्ततृषितः ॥

विष्णुशर्मणः.

1918

वेश्यङ्गारसमं विकासिकुसुमं पश्यत्यलातं बिसं
वह्निं चन्द्रमवेक्षते ग्रहगणं तद्विस्फुलिङ्गोपमम् ।
चक्राह्वो निशि शीतलेपि शयने तोयेन संदह्यते
प्रायेणेष्टवियोगतप्तमनसां वन्ह्येकरूपं जगत् ॥

1919

चक्राह्वो विरही हतोपि हृदये बाणेन न त्यक्तवा-
न्प्राणान्प्राणसमासमागमसुखध्यानैकतानश्चिरम् ।
स्वां छायामवलोक्य वारिणि गलद्रक्तामवेत्य प्रियां
भ्रातस्तद्व्रणवेदनापरिगतः कष्टं मृतः सांप्रतम् ॥

कयोरपि.

1920

दीनं रौति निरीक्ष्य तत्र सवितुर्बिम्बं समुत्को मुहु-
र्भङ्क्त्वा मार्ष्टि पुरः स्थितां सहचरीं दुःखेन मन्दोद्यमाम् ।
अस्तं यास्यति भास्करोयमुदयादित्याकुलश्चेतसा
चक्राह्वो न सुखं दिवापि लभते धिग्दुःखितान्कामिनः ॥

1921

पक्षावुत्क्षिपति क्षितौ निपतति क्रोडं नखैरुल्लिख-
त्युद्बाष्पेण च चक्षुषा सहचरीं ध्यायन्मुहुर्वीक्षते ।
चक्राह्वो दिवसावसानसमये तत्तत्करोत्युन्मना
येनालोहितमण्डलोपि कृपया नास्तं रविर्गच्छति ॥

प्रियाविरहस्य.

1922

प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभू-
न्न पतिष्यतः करसहस्रमपि ॥

1923

अनुरागवन्तमपि लोचनयो-
र्दधतं वपुः सुखमतापकरम् ।
निरकासयद्रविमपेतवसुं
वियदालयादपरदिग्गणिका ।

1924

रुचिधाम्नि भर्तरि भृशं विमलाः
परलोकमभ्युपगते विविशुः ।
ज्वलनं त्विषः कथमिवेतरथा
सुलभोन्यजन्मनि स एव पतिः ॥

1925

अविभाव्यतारकमदृष्टहिम-
द्युतिबिम्बमस्तमितभानु नभः ।
विरतोरुतापमतमिस्रमभा-
दपदोषतैव विगुणस्य गुणः ॥

1926

ददृशेपि भास्कररुचाह्नि न यः
स तमीं तमोभिरधिगम्य तताम् ।
द्युतिमग्रहीद्ग्रहगणो लघवः
प्रकटीभवन्ति मलिनाश्रयतः ॥

एते माघस्य.

1927

कालः किरातः स्फुटपद्मकस्य
वधं व्यधाद्यस्य दिनद्विपस्य ।
तस्यैव संध्या रुचिरास्रधारा
ताराश्च कुम्भस्थलमौक्तिकानि ॥

1928

एतद्भ्रुकचानुकारिकिरणं राजद्रुहोह्नः शिर-
श्छेदाभं वियतः प्रतीचि निपतत्यब्धौ रवेर्मण्डलम् ।
एषापि द्युरमा प्रियानुगमनं प्रोद्दामकाष्ठोत्थिते
संध्याग्नौ विनिधाय तारकमिषाज्जातास्थिशेषस्थितिः ॥

एतौ नैषधकर्तुः.

1929

भानुमान्परदिग्वनिताया-
श्चुम्बति स्म मुखमुद्धतरागः।
पद्मिनी किमु करोतु वराकी
मीलिताम्बुरुहनेत्रपुटाभूत् ॥

विह्लणस्य.

1930

किं नु कालगणनापतेर्मषी-
भाण्डमर्यमवपुर्हिरण्मयम् ।
तत्र यद्विपरिवर्तिताननं
लिम्पति स्म धरणिं तमोमषी ॥

मङ्खकस्य.

1931

आदाय दण्डं सकलासु दिक्षु
योयं परिभ्राम्यति भानुभिक्षुः ।
अब्धौ निमज्जन्निव तापसोयं
संध्याभ्रकाषायमधत्त सायम् ॥

1932

किं योगिनीयं रजनी रतीशं
याजीजिवत्पद्ममम्रमुहच्च ।
योगर्द्धिमस्या महतीमलम-
मिदं वदत्यम्बरचुम्बि कम्बु ॥

1933

प्रबोधकालप्रतिबोधितानि
ताराखपुष्पाणि निदर्शयन्ती ।
निशाह शून्याध्वनि योगिनीयं
मृषा जगद्दृष्टमपि स्फुटाभम् ॥

1934

रामालिरोमावलिदिग्विगाहि
ध्वान्तायते वाहनमन्तकस्य ।
यद्वीक्ष्य दूरादिव बिभ्यतः स्वा-
नश्वान्गृहीत्वापसृतो विवस्वान् ॥

एते नैषधकर्तुः.

1935

वासवस्तुरगरत्नममुष्मा-
त्प्राप दास्यति ममापि कदाचित् ।
आशयेति जलराशिमयासी-
द्भानुरश्वपरिवर्तधियेव ॥

अथाभिसारिकाः

1936

हृदये दयितेन हृते वपुषि सवेपथुनि पथि निरालोके ।
अयि कथय कथमनङ्ग प्रियगृहमभिसारिकां नयसि ॥

1937

दुर्दिननिशीथतिमिरे निःसंचारासु नगरवीथीषु ।
पत्यौ विदेशयाते परं सुखं जघनचपलायाः ॥

1938

कान्तवेश्म बहु संदिशतीभि-
र्यातमेव रतये रमणीभिः ।
मन्मथेन परिलुप्तमतीनां
प्रायशः स्खलितमप्युपकारि ॥

भारवेः.

1939

नूपुरौ कथयतोभिसारणं
शिञ्जितेन पदवीमलक्तकः ।

संगमे रटति मेखला खला
सर्व एव रिपवो न मण्डनम् ॥

1940

उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः ।
यातः परमपि जीवति जीवितनाथो भवत्वस्याः ॥

कयोरपि.

1941

नयनोदरयोः कपोलभागे
द्युतिमद्रत्नगणेषु भूषणेषु ।
सलिलप्रतिबिम्बितेन्दुबिम्बा
शतचन्द्राभरणेव काचिदासीत् ॥

भूषणदेवस्य.

1942

मदेन रागेण किमिन्दुना वा
पुष्पेषुणा वा मधुना प्रयुक्ताः ।
निशागमे यत्प्रविहाय भीतिं
ययुः प्रियाणां भवनानि नार्यः ॥

शीलुकस्य.

1943

निरीक्ष्य विद्युन्नयनैः पयोदो
मुखं निशायामभिसारिकायाः ।
धारानिपातैः सह किं नु वान्त-
श्चन्द्रोयमित्यार्ततरं ररास ॥

पाणिनेः.

1944

संकेतधाम्नि प्रथमं प्रियेण
संभाविते सत्यभिसारिकायाः ।
अभूत्सुखं यत्किमपीति वाचा-
मगोचरं तत्स्वयमेव वाच्यम् ॥

प्रवरसेनस्य.

1945

कलावति क्षततमसि प्रभावति
स्फुटोदये जननयनाभिनन्दिनि ।
वदुर्दृशं शशिनि त्वाभिसारिकाः
क्वचिद्भवत्यतिसुभगोपि दुर्भगः ॥

गोविन्दस्वामिनः.

1946

क्व प्रस्थितासि करभोरु घने निशीथे
प्राणाधिको वसति यत्र निजः प्रियो मे ।
एकाकिनी वद कथं न बिभेषि बाले
शूरोस्ति पुङ्खितशरो मदनः सहायः ॥

अमरुकस्य.

1947

उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ ।
प्रियमभिसरस्येवं मुग्धे त्वमाहतडिण्डिमा
यदि किमपरं त्रासोत्कम्पा दिशः समुदीक्षसे ॥

भर्तृटस्य.

1948

मार्गे पङ्किनि तोयदान्धतमसे निःशब्दसंचारकं
गन्तव्या दयितस्य मेद्य वसतिर्मुग्धेति कृत्वा मतिम् ।
आ जानूद्धृतनूपुरा करतलेनाच्छाद्य नेत्रे भृशं
कृच्छ्राल्लब्धपदस्थितिः स्वभवने पन्थानमभ्यस्यति ॥

1949

यावन्मद्यमदप्रमादविवशः सुप्तो जनोन्तःपुरे
यावच्चैष न मुच्यते जलमुचा वैरीव तारापतिः ।
यावद्द्वारमिदं न रक्षकजनैरास्थीयते संप्रति
क्षिप्रं तावदसौ स्मरामयवतां वैद्यः समासाद्यताम् ॥

1950

वातोद्धूतमुखी प्रमृष्टतिलका सालक्तरक्तांशुका
मेघानां निनदेन भीतवदना गत्वा प्रियस्यालयम् ।
द्वारं नेच्छति लज्जया प्रलपितुं देहीति वर्षाहता
पादौ नूपुरकर्दमप्रतिहतौ संशब्दयन्ती स्थिता ॥

केषामपि.

1951

पङ्काक्ताजानुपादासिततरवसना वृष्टिसंमृष्टपत्त्रा
वातोद्धूतालकान्ता जलपतनगलत्क्लिन्नधम्मिल्लमाला ।
शीतप्रस्पन्दितौष्ठाक्षमकरचरणा वेपथुव्याप्तगात्री
नापुण्यैरेत्य तन्वी गुरुजनभवनान्नीयते वक्षसि द्राक् ॥

वय्यहास्तस्य.

1952

पुत्रमम्बुजमुखी शवभङ्ग्या
कृत्रिमं शिरसि कापि वहन्ती ।
कान्तवेश्मनि जगाम रुदन्ती
कं विडम्बयति नो कुसुमेषुः ॥

बिह्लणस्य.

1953

अस्थानगामिभिरलंकरणैरुपेता
भूयः पदस्खलननिह्नुतिरप्रसन्ना ।
वाणीव कापि कुकवेर्जनहस्यमाना
द्राङ्निर्गता निजगृहाद्वनिता मदान्धा ॥

उत्प्रेक्षावल्लभस्य.

1954

निशा वयस्या तिमिरं प्रदीपः
सोपानपाली भुजगेन्द्रभोगाः ।
प्रेमोन्मदानामभिसारिकाणां
स्मरोपदिष्टः पर एव पन्थाः ॥

वाहिनीपतेः.

अथ चन्द्रोदयः

1955

प्रत्यग्रयौवनां श्यामामपेततिमिरांशुकाम् ।
विलोक्य जातहासोभून्मुदेव कुमुदाकरः ॥

वररुचेः.

1956

आश्वासयति काकोपि दुःखितां पथिकाङ्गनाम् ।
त्वं चन्द्रामृतजन्मापि दहसीति किमुच्यताम् ॥

1957

तन्वङ्ग्या मुखमुद्वीक्ष्य क्षणमेष निशाकरः ।
प्रद्वेषात्क्षयमायाति वृद्धिर्मत्सरिणां कुतः ॥

1958

कुमुदेष्वधिकं भान्ति पतिताश्चन्द्ररश्मयः ।
अतिप्रकृष्टशीलेषु कुलेष्विव समृद्धयः ॥

1959

बोधितुं हृदये सुप्तं सहायं रतिवल्लभम् ।
करस्पर्शी कुचे धत्ते चन्द्रश्चञ्चलचक्षुषाम् ॥

केषामपि.

1960

दूरमंशुप्रभाजालं प्रसारयति चन्द्रमाः ।
रात्रौ नववयाः कामी मनोरथमिवाधनः ॥

1961

शीतांशुकरसंस्पृष्टा निशासु कमलाकराः ।
संकुचन्त्यप्रियं दृष्ट्वा नयनानीव योषिताम् ॥

महामनुष्यस्य.

1962

उदयनगान्तरितमियं प्राची सूचयति दिङ्निशानाथम् ।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥

श्रीहर्षदेवस्य.

1963

अङ्गुलीभिरिव केशसंचयं
संनिगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं
चुम्बतीव रजनीमुखं शशी ॥

कालिदासस्य.

1964

निरर्थकं जन्म गतं नलिन्या
यया न दृष्टं तुहिनांशुबिम्बम् ।
उत्पत्तिरिन्दोरपि निष्फलैव
न येन दृष्टा नलिनी विबुद्धा ॥

बिह्लणराजकन्ययोः.

1965

संविधातुमभिषेकमुदासे
मन्मथस्य लसदंशुजलौघः ।
यामिनीवनितया ततचिह्नः
सोत्पलो रजतकुम्भ इवेन्दुः ॥

भारवेः.

1966

एष तुङ्गमरवीन्त्रिडम्बरः
क्षोभमात्रमगमत्पयोनिधिः ।
विभ्रमैस्तदुदयक्रमोत्थितै-
रुल्ललास ललनासु मन्मथः ॥

भा० जयवर्धनस्य.

1967

प्रसन्नसंपादितचारुकान्ति-
र्जितोपि कान्तामुखशोभयायम् ।
धृष्टः शशाङ्कः पुनरभ्युदेति
लज्जा कुतोन्तर्मलिनाशयानाम् ।

कस्यापि.

1968

शुद्धस्वभावान्यपि संहतानि
निनाय भेदं कुमुदानि चन्द्रः ।
अवाप्य वृद्धिं मलिनान्तरात्मा
जडो भवेत्कस्य गुणाय वक्रः ॥

1969

उपोढरागेण विलोलतारकं
तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया
पुरोपि रागाद्गलितं न लक्षितम् ॥

एतौ पाणिनेः.

1970

संप्राप्तुकामोदयमर्कभर्तु-
रम्भोजिनी भृङ्गकृताक्षमाला ।
साध्वी नवाम्भोजनिमीलिताक्षी
निमग्ननाला सलिलेतपस्यत् ॥

1971

उद्यञ्छशी तरुणभास्करकान्तिचौरः
स्पर्शेन शीतकरलालितया प्रदोषे ।
ज्ञातोर्धसुप्तनलिनीप्रियया सलज्जः
पाण्डुत्वमाप रभसादिव मन्मथार्तः ॥

एतौ प्रचण्डमाधवस्य.

1972

प्रथमं कलाभवदथार्धमथो
हिमदीधितिर्महदभूदुदितः ।
दधति ध्रुवं क्रमत एव न तु
द्युतिशालिनोपि सहसाभ्युदयम् ॥

1973

उदमज्जि कैटभजितः शयना-
दपनिद्रपाण्डुरसरोजरुचा ।
प्रथमप्रबुद्धनदराजसुता-
वदनेन्दुनेव तुहिनद्युतिना ॥

1974

अथ लक्ष्मणानुगतकान्तवपु-
र्जलधिं व्यतीत्य शशिदाशरथिः ।
परिवारितः परित ऋक्षबलै-
स्तिमिरौघराक्षसकुलं बिभिदे ॥

1975

रजनीवशादुदयमाप शशी
सपदि व्यभूषयदसावपि ताम् ।
अविलम्बितक्रममहो महता-
मितरेतरोपकृतिमच्चरितम् ॥

1976

दिवसं भृशोष्णरुचिपादहतां
रुदतीमिवानवरतालिरुतैः ।
मुहुरामृशन्मृगधरोमकरै-
रुदशिश्वसत्कुमुदिनीवनिताम् ॥

एते माघस्य.

1977

धिक्तस्य मूर्खजरठस्य कवेः कवित्वं
यः स्त्रीमुखं च शशिनं च समीकरोति ।
भ्रूभङ्गविभ्रमकटाक्षनिरीक्षितानि
कोपप्रसादहसितानि कुतः शशाङ्के ॥

कस्यापि.

1978

यदेतच्चन्द्रान्तर्जलदलवलीलां प्रकुरुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा ।
अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्किततनुम् ॥

1979

अमुष्मै चौराय प्रतिनियतमृत्युप्रतिभिये
प्रभुः प्रीतः पादादुपरि नवपादद्वयकृते ।
सुवर्णानां कोटीर्दश दशनकोटिक्षतगिरी-
न्करीन्द्रानप्यष्टौ मदमुदितगुञ्जन्मधुलिहः ॥

एतौ श्रीहर्षदेवचौरयोः.

1980

स्वैरं कैरवकोरकान्विदलयन्यूनां मनः खेलय-
न्नम्भोजानि निमीलयन्मृगदृशां मानं समुन्मूलयन् ।
कोकानाकुलयंस्तमः कवलयन्नम्भोधिमुद्वेलय-
ञ्ज्योत्स्नां कन्दलयन्दिशो धवलयन्निन्दुः समुज्जृम्भते ॥

1981

मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थलो-
च्छलत्तरलतारकाप्रकरकीर्णमुक्तागणः ।
पुरंदरहरिद्दरीकुहरगर्भसुप्तोत्थित-
स्तुषारकरकेसरी गगनकाननं गाहते ॥

1982

अङ्कं केपि शशाङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगदिरे भूमेश्च बिम्बं परे ।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तन्मन्ये रविभीतमन्धतमसं कुक्षिस्थमालक्ष्यते ॥

1983

ॐकारो मदनद्विजस्य गगनक्रोडस्य दंष्ट्राङ्कुर-
स्तारामौक्तिकशुक्तिरन्धतमसस्तम्बेरमस्याङ्कुशः ।
शृङ्गारार्गलकुञ्चिका विरहिणीप्राणच्छिदे कर्तरी
संध्यावारवधूनखक्षतिरसौ चान्द्री कला पातु वः ॥

1984

पश्य चन्द्रमुखि चन्द्रमण्डलं
व्योममार्गसरसीसरोरुहम् ।
यामिनीयुवतिकर्णकुण्डलं
मारमार्गणनिघर्षणोपलम् ॥

केषामपि.

1985

निर्मले सलिलकुण्डसुनीले
संचरन्सितरुचिः शनकैः खे ।
तत्र कालगणकेन नियुक्ता
रात्रिमानघटिकेव विभाति ॥

राजानकानन्दकस्य.

1986

आकाशवापीसितपुण्डरीकं
शाणोपलं मन्मथसायकानाम् ।
पश्योदितं शारदमुत्पलाक्षि
संध्याङ्गनाकन्दुकमिन्दुबिम्बम् ॥

1987

दृष्टे चन्द्रमसि प्रलूनतमसि व्योमाङ्गणस्थेयसि
स्फूर्जन्निर्मलतेजसि त्वयि गते दूरं निजप्रेयसि ।
श्वासः कैरवकोरकीयति मुखं तस्याः सरोजीयति
क्षीरोदीयति मन्मथो मृगदृशो दृक्चन्द्रकान्तीयति ॥

कवीरपि.

1978

यदेतच्चन्द्रान्तर्जलदलवलीलां प्रकुरुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा ।
अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्किततनुम् ॥

1979

अमुष्मै चौराय प्रतिनियतमृत्युप्रतिभिये
प्रभुः प्रीतः पादादुपरि नवपादद्वयकृते ।
सुवर्णानां कोटीर्दश दशनकोटिक्षतगिरी-
न्करीन्द्रानप्यष्टौ मदमुदितगुञ्जन्मधुलिहः ॥

एतौ श्रीहर्षदेवचौरयोः

1980

स्वैरं कैरवकोरकान्विदलयन्यूनां मनः खेलय-
न्नम्भोजानि निमीलयन्मृगदृशां मानं समुन्मूलयन् ।
कोकानाकुलयंस्तमः कवलयन्नम्भोधिमुद्वेलय-
ञ्ज्योत्स्नां कन्दलयन्दिशो धवलयन्निन्दुः समुज्जृम्भते ॥

1981

मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थलो-
च्छलत्तरलतारकाप्रकरकीर्णमुक्तागणः ।
पुरंदरहरिद्दरीकुहरगर्भसुप्तोत्थित-
स्तुषारकरकेसरी गगनकाननं गाहते ॥

1982

अङ्कं केपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगदिरे भूमेश्च बिम्बं परे ।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तन्मन्ये रविभीतमन्धतमसं कुक्षिस्थमालक्ष्यते ॥

1983

ॐकारो मदनद्विजस्य गगनक्रोडस्य दंष्ट्राङ्कुर-
स्तारामौक्तिकशुक्तिरन्धतमसस्तम्बेरमस्याङ्कुशः ।
शृङ्गारार्गलकुञ्चिका विरहिणीप्राणच्छिदे कर्तरी
संध्यावारवधूनखक्षतिरसौ चान्द्री कला पातु वः ॥

1984

पश्य चन्द्रमुखि चन्द्रमण्डलं
व्योममार्गसरसीसरोरुहम् ।
यामिनीयुवतिकर्णकुण्डलं
मारमार्गणनिघर्षणोपलम् ॥

केषामपि.

1985

निर्मले सलिलकुण्डसुनीले
संचरन्सितरुचिः शनकैः खे ।
तत्र कालगणकेन नियुक्ता
रात्रिमानघटिकेव विभाति ॥

राजानकानन्दकस्य.

1986

आकाशवापीसितपुण्डरीकं
शाणोपलं मन्मथसायकानाम् ।
पश्योदितं शारदमुत्पलाक्षि
संध्याङ्गनाकन्दुकमिन्दुबिम्बम् ॥

1987

दृष्टे चन्द्रमसि प्रलूनतमसि व्योमाङ्गणस्थेयसि
स्फूर्जन्निर्मलतेजसि त्वयि गते दूरं निजप्रेयसि ।
श्वासः कैरवकोरकीयति मुखं तस्याः सरोजीयति
क्षीरोदीयति मन्मथो मृगदृशो दृक्चन्द्रकान्तीयति ॥

कवेरपि.

1988

एतत्प्रचण्डि समुदेत्यकलङ्कमूर्ति
कल्माषिताम्बरतलं ग्रहचक्रवालम् ।
सूर्येन्दुसंपुटसमुद्गकवाटकोष-
विश्लेषकीर्णनवरत्नकलापकान्ति ॥

1989

लावण्यकान्तिविसरामृतवाञ्छयेव
बिभ्रत्सुधानिकरनिर्भरतामपीन्दुः ।
छायाछलेन निपपात वधूकपोले
संतोषभाग्भवति को गुणवान्गुणेषु ॥

1990

कर्णेवतंसयितुमर्पयितुं शिखासु
मार्ष्टुं रतिश्रमजलं चषके निधातुम् ।
कण्ठे गुणं रचयितुं वलयान्विधातुं
स्त्रीणां मनोतिलुलुभे शशिनः करेषु ॥

भट्टहरिभूतस्य.

1991

उत्कूजति भ्रमति रोदिति रारटीति
पद्मानि चोत्क्षिपति चञ्चुपुटेन दूरम् ।
तोये निमज्जति शशाङ्कमुदीक्षते च
कष्टं प्रियाविरहितो निशि चक्रवाकः ॥

1992

चिन्ताकुलः सहचरीविरहार्द्रशोकः
स्वच्छायया च दयितेतिकृतप्रलापः ।
त्यक्तस्तयापि विरहाच्चपलोर्मिवेगा-
दालम्बनान्यपि विधिर्विधुरो निहन्ति ॥

कस्यापि.

1993

त्रिनयनजटावल्लीपुष्पं मनोभवकार्मुकं
महकिसलयं संध्यानारीनितम्बनखक्षतम् ।
तिमिरभिदुरं व्योम्नः शृङ्गं निशावदनस्मितं
प्रतिपदि नवस्येन्दोर्बिम्बं सुखोदयमस्तु वः ॥

फल्गुहस्तिन्याः.

1994

कपोले मार्जारः पय इति कराँल्लेढि शशिन-
स्तरुच्छिद्रप्रोतान्बिसमिति करी संकलयति ।
रतान्ते तल्पस्थान्हरति वनिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ॥

भासस्य.

1995

छायामम्भसि विप्रयोगकृपणः स्वां मन्यमानः प्रियां
चक्राह्वो वदनाद्बिसाङ्कुरमभिप्रेर्याननेस्यास्ततः ।
दृष्ट्वाम्बुप्लुतमेतयेरितमिति प्रीतस्तमेवादश-
द्व्यामूढः परमार्थ एव सुतरां लोकः सुखी नेतरः ॥

प्रियमुखस्य.

1996

अत्यन्तोन्नतपूर्वपर्वतमहापीठे हरस्पर्धया
दूरोदञ्चितधूमसंनिभतमस्तारास्फुलिङ्गाकुलम् ।
नूनं पञ्चशरोकरोच्छशिमिषात्स्वं ज्वाललिङ्गं यतो
गर्वाच्छर्वपरान्दहेन्मुनिवरान्सर्वानखर्वांशुभिः ॥

शरीफस्य.

1997

इदं व्योमसरोमध्ये भाति चन्द्रसितोत्पलम् ।
मलिनोन्तर्गतो यत्र कलङ्को भ्रमरायते ॥

पं० श्रीवकस्य.

1998

ताराप्रसूननिचयेन निशा स्मरस्य
पूजां विधाय गगनाङ्गणपीठपृष्ठे ।
ज्योत्स्नाछलेन किरतीन्दुसमुद्गिकाया
निःशेषकामुकवशीकृतिचूर्णमुष्टीः ॥

1999

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिन्यापत्तेरिव कलितवैराग्यविशदः ।
परिभ्रेङ्खत्तारापरिकरकपालाञ्चिततले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ॥

2000

मन्येस्तं समये प्रविश्य सहसा वारां निधेरन्तरं
चन्द्रच्छद्मसमाश्रितः पुनरयं चण्डांशुरेवोद्गतः ।
येनौर्वानलसंगमादृशगुणीभूतप्रतापोद्गमो
मध्येङ्गारकलङ्कितो विरहिणां दग्धुं मनांस्युद्गतः ॥

एते भर्तृसारस्वतस्य.

2001

सौधस्कन्धतलानि दीपपटलैः कम्पेन पाण्डुध्वजा
हंसाः पक्षविधूननेन मृदुना निद्रान्तनादेन च ।
लक्ष्यन्ते कुमुदानि षट्पदरुतैरुत्सर्पिगन्धेन च
क्षुभ्यत्क्षीरपयोधिपूरसदृशे जाते शशाङ्कोदये ॥

2002

कैलासायितमद्रिभिर्विटपिभिः श्वेतातपत्रायितं
मृत्पङ्केन दधीयितं जलनिधेर्दुग्धायितं वारिभिः ।
मुक्ताहारलतायितं व्रततिभिः शङ्खायितं श्रीफलैः
श्वेतद्वीपजनायितं जनपदैर्जाते शशाङ्कोदये ॥

एतौ भट्टविविक्रमस्य.

2003

विश्लिष्टोन्विष्य सर्वाः कमलवनभुवश्चक्रवाको वराको
भ्रान्तो रक्तोत्पलिन्यां दवदहन इति त्यक्तदेहः पपात ।
यावत्तत्रैव शोकात्प्रथमनिपतितां प्रेक्षते चक्रवाकी-
मन्योन्यस्नेहवृद्धिं प्रकटयति विधिः प्रायशः पुण्यभाजाम् ॥

2004

प्रथममरुणच्छायस्तावत्ततः कनकाकृतिः
प्रभवति ततो ध्वान्तक्षोदक्षमः क्षणदामुखे ।
तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥

कयोरपि.

2005

लक्ष्मीक्रीडातडागो रतिधवलगृहं दर्पणो दिग्वधूनां
पुष्पं श्यामालतायास्त्रिभुवनविजये मन्मथस्यातपत्रम् ।
पिण्डीभूतं स्मरस्य स्मितममरसरित्पुण्डरीकं मृगाङ्को
ज्योत्स्नापीयूषवापी जयति सितवृषस्तारकागोकुलस्य ॥

कस्यापि.

2006

अरोदि मधुपैर्भृशं कमलमालया मीलितं
व्यकम्पि जलवीचिभिर्विदलितं मुखं कैरवैः ।
विलोक्य रजनौ हृदे विरहिकोकशोकं घनं
परव्यसनकातराः किमिव कुर्वते साधवः ॥

पं० श्रीवकस्य.

अथ पानकेलिः

2007

बहुविकृतगाढरागं विलासवैदग्ध्यचेष्टिताचार्यः ।
जयति मधु प्रियवदने यौवनमिव जीवलोकेस्मिन् ॥

कस्यापि.

2008

क्रान्तकान्तवदनप्रतिबिम्बे
भग्नबालसहकारसुगन्धौ ।
स्वादुनि प्रणदितालिनि शीते
निर्ववार मधुनीन्द्रियवर्गः ॥

माघस्य.

2009

मा गमन्मदविमूढधियो नः
प्रोज्झ्य रन्तुमिति शङ्कितनाथाः ।
योषितो न मदिरां भृशमीषुः
प्रेम पश्यति भयान्यपदेपि ॥

2010

अन्ययान्यवनितागतचित्तं
चित्तनाथमभिशङ्कितवत्या ।
पीतभूरिसुरयापि न मेदे
निर्वृतिर्हि मनसो मदहेतुः ॥

2011

अप्रसन्नमपराद्धरि पत्यौ
कोपदीप्तमुररीकृतधैर्यम् ।
क्षालितं नु शमितं नु वधूनां
द्रावितं नु हृदयं मधुवारैः ॥

2012

प्राप्यते गुणवतापि गुणानां
व्यक्तमाश्रयवशेन विशेषः ।
तत्तथाहि दयिताननदत्तं
व्यानशे मधु रसातिशयेन ॥

2013

बिम्बितं भृतपरिस्रुति जान-
न्भाजने जलजमित्यबलायाः ।
घ्रातुमक्षि मधुपः पतति स्म
भ्रान्तिभाजि भवति क्व विवेकः ॥

भस्यैव.

2014

सागसि प्रियतमे कृतकोपा
याङ्घ्रियुग्मपतितेपि न तुष्टा ।
सैव मद्यपरिलुप्तविवेका
तं तथैव परितोषयति स्म ॥

नमजितः.

2015

कामिनीवदननिर्जितकान्तिः
शोभितुं नहि शशाक शशाङ्कः ।
लज्जयेव विमलं वपुराप्तुं
शीधुपूर्णचषकेषु ममज्ज ॥

भारवेः

2016

मूर्तिमन्तमिव रागरसौघं
ते परस्परसमर्पितवक्त्राः ।
आननासवमिषेण तदानी-
मक्षिपन्त हृदयेषु युवानः ॥

2017

अर्धपीतमदिरा मणिपारी
शोभतां कथमितीव तरुण्या ।
चुम्बितैरधिकपाटलभासा
पूरिताधरमयूखभरेण ॥

एतौ श्रवमाधवस्य.

2018

कान्तानवाधररसामृततृष्णयेव
बिम्बं पपात शशिनो मधुभाजने यत् ।
निःशोषिते मधुनि लज्जितचित्तवृत्ति
तत्तन्मुखावजितकान्तितयेव नष्टम् ॥

विभाकरवर्मणः.

2019

मधुरद्विरेफरणिताभिमन्त्रितं
धृतमानखण्डननिरर्गलस्थिति ।
मदनस्य वारुणमिवास्त्रमाबभौ
हृदयं विशन्मधु विमुग्धचक्षुषाम् ॥

2020

संक्रान्तमाननमवेक्ष्य मृगायताक्ष्याः
पर्याचलन्नयनमासवपूरितायाम् ।
सेन्दीवरं कमलमित्यवमन्य दूरा-
द्भृङ्गो ममज्ज सहसैव यथार्थनामा ॥

प्रचण्डमाधवस्य.

2021

प्रत्यग्रदन्तपदलग्ननिशातमद्य-
संतापिताधरदला दयितस्य कान्ता ।
भ्रूक्षेपनेत्रवलनाकरकम्पमन्द-
सीत्कारविभ्रमसुखा सुतरां बभूव ॥

लोठकस्य.

2022

पीतस्तुषारकिरणो मधुनैव सार्ध-
मन्तः प्रविश्य चषकप्रतिबिम्बवर्ती ।
मानान्धकारमपि मानवतीजनस्य
नूनं बिभेद यदसौ प्रससाद सद्यः ॥

रत्नाकरस्य.

2023

नतशातकौम्भकलशीमुखाच्युतं
वलमानमप्रकरभाजि कुन्तले ।
सुतनोर्मुखामृतरुचेरुपेयुषो
व्यधित प्रदक्षिणमिवान्तिके मधु ॥

महङ्कस्य.

अथ परस्परचाटवः

तत्र

प्रियाविषये तावत्

2024

त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वकृत् ।
नहि रूपोपमा त्वन्या तवास्ति शुभदर्शने ॥

भगवद्वाल्मीकिमुनेः

2025

मुग्धे धानुष्कता केयमपूर्वा तव दृश्यते ।
यया विध्यसि चेतांसि गुणैरेव न सायकैः ॥

2026

मुग्धे न पर्यसे दातुमदत्तं नोपतिष्ठति ।
अस्थास्नु यौवनमिदं कथमेतद्भविष्यति ॥

2027

प्रविशामि किमङ्गेषु भवतीं निगरामि किम् ।
चिरेण गतलब्धासि न जाने करवाणि किम् ॥

2028

उदयगिरिमूर्धगोयं त्वद्वदनापहृतकान्तिसर्वस्वः ।
फूत्कर्तुमिवोर्ध्वकरः स्थितः पुरस्तान्निशानाथः ॥

श्रीहर्षदेवस्य.

2029

अन्यतो नय मुहूर्तमाननं
चन्द्र एष सरले कलामयः ।
मा कदाचन कपोलयोर्मलं
संक्रमय्य समतां स नेष्यति ॥

मञ्जीरस्य.

2030

शिखरिणि क नु नाम कियच्चिरं
किमभिधानमसावकरोत्तपः ।
तरुणि येन तवाधरपाटलं
दशति बिम्बफलं शुकशावकः ॥

कस्यापि.

2031

लावण्यकान्तिपरिपूरितदिङ्मुखेस्मि-
न्स्मेरेधुना तव मुखे तरलायताक्षि ।
क्षोभं यदेति न मनागपि तेन मन्ये
सुव्यक्तमेव जलराशिरयं पयोधिः ॥

अववर्धनस्य.

2032

असुभिरशुभं त्यक्त्वा देहं निजं किल योगवि-
द्विशति विशदं ज्ञानालोकात्परस्य कलेवरम् ।
नयनविवरैः सूक्ष्मैः साक्षादहो तव नैपुणं
विशसि हृदयं द्रष्टुं स्पष्टं बहिश्च विचेष्टसे ॥

2033

विसृज दयिते हासज्योत्स्नां निमीलतु पङ्कजं
विकिर नयने भ्रष्टच्छायं भवत्वसितोत्पलम् ।
वद सुवदने लज्जामूका भवत्वपि कोकिला
परपरिभवो मानस्थाने न मानिनि सह्यते ॥

कयोरपि.

2034

खेदाय स्तनभार एष किमु ते मध्यस्य हारोपर-
स्ताम्यत्यूरुयुगं नितम्बभरतः काञ्च्यानया किं पुनः ।
शक्तिः पादयुगस्य नोरुयुगलं वोढुं कुतो नूपुरौ
स्वाङ्गैरेव विभूषितासि वहसि क्लेशाय किं मण्डनम् ॥

2035

प्रसीद गतिरुज्झ्यतां व्रजतु राजहंसी सुखं
स्मितं च परिमुच्यतां स्फुरतु कुन्दपुष्पप्रभा ।
निमीलय विलोचने भवतु हारि कर्णोत्पलं
करस्थगितमाननं कुरु विभातु चन्द्रोदयः ॥

चन्द्रोदयस्य.

2036

माने मौनमयं विपाण्डु विरहे रम्योक्ति नर्मण्यपि
कोपे सस्फुरिताधरं निधुवने तत्तद्विलासोज्ज्वलम् ।
- - - - - - - - - - - - - - - - - - -
तैस्तैः सुन्दरि चेष्टितैर्मुखमिदं कान्तिं न कां दास्यति ॥

भागवतवल्लटस्य.

2037

फुल्लेन्दीवरशङ्कया नयनयोर्बन्धूकबुद्ध्याधरे
पाण्योः पद्मधिया मधूककुसुमभ्रान्त्या तथा गण्डयोः ।
लीयन्ते कवरीषु बान्धवजनप्रीतिप्रबद्धस्पृहा
दुर्वारा मधुपाः कियन्ति भवती स्थानानि रक्षिष्यति ॥

कस्यापि.

अथ प्रियविषये

2038

न जाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि किं यान्तु नेत्रतामुत कर्णताम् ॥

कस्यापि.

2039

सत्यमाचक्ष्व किं नाथ तवैतद्भुवि चेष्टितम् ।
श्रुतः सुखकरो दृष्टो मनोमोहावहोसि यत् ॥

2040

शूरोसि नूनमुदितः पुरतो यदारा-
न्नारीजनस्य हृदयाम्बुरुहप्रबोधम् ।
धत्से निशाततरबाण उदग्रधन्वा
कामः पदातिरिति तावक एष हन्ति ॥

कष्वटस्य.

2041

खरघनमपि दृष्टं व्योम सोढाः समीराः
शिखिकुलकलवाचां श्रोत्रमासीन्निवासः ।
असुसम न मृताहं त्वद्वियोगेपि जाते
तव घनपरिरम्भप्रार्थनाशावशेन ॥

हरगणस्य.

अथ सुरतारम्भः

2042

वल्लभागमनानन्दनिर्भरे हृदये सति ।
वद कुत्रावकाशोस्ति मानस्य मम सांप्रतम् ॥

2043

संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥

कवेरपि.

2044

अन्तःस्थसुरतारम्भाभिलाषमपि गोपयत् ।
अन्योन्यं मिथुनं वेत्ति नेत्रे दृष्ट्वैव चञ्चले ॥

कष्वटस्य.

2045

अनुदिनमभ्यासदृढैः सोढुं दीर्घोपि शक्यते विरहः ।
प्रत्यासन्नसमागममुहूर्तविघ्नोपि दुर्विषहः ॥

श्रीमयूरस्य.

2046

गुर्वन्तिके ह्रिया पूर्वं संज्ञयार्थावबोधनम् ।
करोति पत्युर्युवतिरथ शब्दानुशासनम् ॥

प° पाजकस्य.

2047

दूरादुत्कण्ठन्ते दयितजनसंनिधौ तु लज्जन्ते ।
त्रस्यन्ति कम्पमानाः शयनीये नवपरिणया वध्वः ॥

रुद्रटस्य.

2048

अक्षदेवनपणीकृतेधरे
कान्तयोर्जयपराजये सति ।
अत्र वक्तु यदि वेत्ति मन्मथः
कस्तयोर्जयति जीयतेथवा ॥

जयवर्धनस्य.

2049

प्रेयसि प्रणयलालनापरे
नीविबन्धमथ मोक्तुमिच्छति ।
निर्गते परिजने नतभ्रुवो
लज्जयेव निरगामि लज्जया ॥

वल्लटस्य.

2050

उत्पादयन्ती सुरतस्य विघ्नं
परस्परालापसुखं हरन्ती ।
संरागिणः कामिजनस्य गाढ-
मक्ष्णोर्ललम्बे सहसैव निद्रा ॥

2051

अनिरीक्षणमेव दृष्टिरार्द्रा
परिहासालपनानि मौनमेव ।
अवधीरणमेव चाभियोगो
विनिगूढोपि हि लक्ष्यतेनुरागः ।'

2052

अवचनं वचनं गुरुसंनिधा-
वनवलोकनमेव विलोकनम् ।
अवयवावरणं हि यदंशुक-
व्यतिकरेण तदङ्गसमर्पणम् ॥

वामनस्वामिनः.

2053

कंचित्क्षणं ननु सहस्व विमुञ्च वासो
जागर्त्ययं परिजनो धिगपत्रपोसि ।
एषोञ्जलिः शमय दीपमिति प्रियाया
वाचो रतादपि परां मुदमावहन्ति ॥

राजपुत्रपर्पटेः.

2054

उत्साहिता सकलशीधुमदेन वक्तु-
मर्धोदिते नववधूरवलम्बितह्रीः ।
आलीजनेष्वनुपसंहतवाक्यशेषा
भर्तुश्चकार सविशेषकुतूहलित्वम् ।

रत्नाकरस्य.

2055

कलहकलया यत्संधृत्यै त्रपावनतानना
विहितपुलकोद्भेदं सुभ्रूश्चकर्ष न कञ्चुकम् ।
दयितमभितस्तामुत्कण्ठां विवव्रुरनन्तरं
झटिति सकलास्त्रुटयत्प्रान्ताः स्तनांशुकसंधयः ॥

2056

पटालभे पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥

अमरुकस्य.

2057

स्मररसनदीपूरेणोढाः पुनर्गुरुसेतुभि-
र्यदभिविधृता दुःखं तिष्ठन्त्यपूर्णमनोरथाः ।
तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालानीतं पिबन्ति रसं प्रियाः ॥

नरसिंहस्य.

2058

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता
घटयति घनं कण्ठाश्लेषं न सान्द्रपयोधरा ।
वदति बहुशो गच्छामीति प्रयत्नधृताप्यहो
रमयतितरां संकेतस्था तथापि हि कामिनी ॥

श्रीहर्षदेवस्य.

2059

मुहुरविशदा विस्रम्भार्द्रा मुहुः स्मृतमन्यवो
मुहुरसरलाः प्रेमप्रह्वा मुहुर्मुहुरस्थिराः ।
वितथशपथोपालम्भाङ्का मुहुर्मधुरा मुहुः
परिववृधिरे निष्पर्यन्ता मिथो मिथुनोक्तयः ॥

2060

प्रथमजनिते मन्यौ बाला विकारमजानती
कितवचरितेनारोप्याङ्कं विनम्रमुखैव सा ।
चिबुकमलकं चोन्नम्योच्चैरकृत्रिमविभ्रमा
नयनसलिलस्यन्दिन्योष्ठे रुदत्यपि चुम्बिता ॥

कयोरपि.

2061

हरति सुचिरं गाढाश्लेषे यदङ्कमाकुला
स्थगयति तथा यत्पाणिभ्यां मुखं परिचुम्बने ।
यदतिबहुशः पृष्टा किंचिद्वदत्यपरिस्फुटं
रमयतितरां तेनैवासौ मनोभिनवा वधूः ॥

रुद्रटस्य.

2062

समजनि न तत्प्रेम स्पष्टं यदीषदपीर्ष्यया
स्मरसुखसखी नासावीर्ष्या विना कलहेन या ।
न खलु कलहः सोन्योन्यं यः प्रसादनवर्जितः
प्रसदनविधिर्नासौ बाला न येन विलिल्यिरे ॥

शिवस्वामिनः.

2063

चिरविरहिणोरुत्कण्ठार्त्यो श्लथीकृतगात्रयो-
र्नवमिव जगज्जातं भूयश्चिरादभिनन्दतोः ।
कथमपि दिने दीर्घे याते निशामधिरूढयोः
प्रसरति कथा यूनोर्बह्वी यथा न तथा रतिः ॥

कस्यापि.

2064

क्वचिदपरिस्फुटं क्वचिदलब्धविलासरसं
क्वचिदसमञ्जसोक्तिमधुरस्मितपल्लवितम् ।
रहसि मृगीदृशः सरसपेशलहावकथा-
ललितपदाक्षरं किमपि हारि समुल्लपितम् ॥

लुहकस्य.

2065

आनन्दोद्गतबाष्पपूरपिहितं चक्षुः क्षमं नेक्षितुं
बाहू सीदत एव कम्पविधुरौ शक्तौ न कण्ठग्रहे ।
वाणी साध्वसगद्गदाक्षरपदा संक्षोभलोलं मनो
यत्सत्यं प्रियसंगमोपि सुचिरादादौ वियोगायते ॥

श्रीडामरस्य.

2066

यत्नात्संगममिच्छतोः प्रतिदिनं दूतीकृताश्वासयो-
रन्योन्यं परिशुष्यतोर्नवरतप्राप्तिस्पृहां तन्वतोः ।
संकेतोन्मुखयोः कथं कथमपि प्राप्ते चिरात्संगमे
यत्सौख्यं नवरक्तयोस्तरुणयोस्तत्केन साम्यं व्रजेत् ॥

झूलितकस्य.

2067

लोलभ्रूलतया विपक्षदिगुपन्यासेवधूतं शिर-
स्तद्वृत्तान्तनिरीक्षणे कृतनमस्कारो विलक्षः स्थितः ।
कोपाताम्रकपोलकान्तिनि मुखे दृष्ट्या गतः पादयो-
रुत्सृष्टो गुरुसंनिधावपि विधिर्द्वाभ्यां न कालोचितः ॥

2068

अज्ञातागममीलिताक्षियुगलं किं त्वं मुधा तिष्ठसि
ज्ञातोसि प्रकटप्रकम्पपुलकैरङ्गैः स्फुटं मुग्धया ।
मुञ्चैनां जड किं न पश्यसि गलद्बाष्पाम्बुधौताननां
सख्यैवं गदिते विमुच्य रभसात्कण्ठेवलग्नो युवा ॥

कयोरपि.

2069

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलात् ।
तिर्यग्वर्तितकंधरः सपुलकः प्रेमोल्लसन्मानसः
सान्तर्हासलसत्कपोलफलको धूर्तोपरां चुम्बति ॥

अमरुकस्य.

2070

सा यावन्ति पदान्यलीकपिशुनैरालीजनैः शिक्षिता
तावन्त्येव कृतागसो द्रुततरं व्याहृत्य पत्युः पुरः ।
प्रारब्धा परतो यथा मनसिजस्येच्छा तथा वर्तितुं
प्रेम्णो मौग्ध्यविभूषणस्य सहजः कोप्येष रम्यः क्रमः ॥

2071

स्वेदाम्भःकणिकाचितेपि वदने जातेपि रोमोद्गमे
विस्रम्भेपि गुरौ पयोधरभरोत्कम्पे विवृद्धिं गते ।
दुर्वारस्मरनिर्भरेपि हृदये नैवाभियुक्तः प्रिय-
स्तन्वङ्ग्याहठकेशकर्षणघनाश्लेषामृते लुब्धया ॥

कयोरपि.

2072

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते ।
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव मेद्य सुतरां प्रीत्यै नवोढा वधूः ॥

श्रीहर्षदेवस्य.

2073

सा गोत्रस्खलनं निशम्य सहसा तत्पूर्वमुत्कम्पिनी
हे मातः कथितः प्रियाप्रियसखा प्रेमाशनिर्दारुणः ।
एतच्छ्राव्यमुत प्रकाश्यमपरेणाकर्णितं वा भवे-
दित्युद्दामविकल्पविभ्रितपतद्बाष्पोदकं रोदिति ॥

अर्भकस्य.

2074

धूर्तेन प्रथमं ह्रिया हृतमुखी बाला नवोढा पुरः
सख्याः सस्मितमुन्नमय्य वदनं कृच्छ्रात्क्षणं चुम्बिता ।
भूयस्तां तृषितामिव स्मरतृषा शुष्यन्मुखीं वक्त्यसौ
किं खिन्नास्यधरामृतं हृतमिति प्राणाधिके गृह्यताम् ॥

2075

आयाते दयिते मरुस्थलभुवामुद्वीक्ष्य दुर्लङ्घ्यतां
तन्वङ्ग्या परितोषबाष्पतरलामासज्य दृष्टिं मुखे ।
दत्त्वा पीलुशमीकरीरकवलं स्वेनाञ्चलेनादरा-
दुन्मृष्टं करभस्य केसरसटाभारावलग्नं रजः ॥

कयोरपि.

2076

आयाते दयिते मनोरथशतैर्नीते कथंचिद्दिने
वैदग्ध्यापगमाज्जडे परिजने दीर्घां कथां कुर्वति ।
दष्टास्मीत्यभिधाय सत्वरपदं व्याधूय चीनांशुकं
तन्वङ्ग्या रतिलालसेन मनसा नीतः प्रदीपः शमम् ॥

अद्भुतफुल्लस्य.

2077

आयातो दयितस्तवेति वचसा न श्रद्दधे भाषितं
चक्षुर्गोचरतां गतेपि सुमुखी भ्रान्तिं निजां मन्यते ।
कण्ठाश्लेषगतेपि शून्यहृदया स्वप्नान्तरं शङ्कते
वार्तां पृच्छति भर्तरि स्मितमुखी लज्जावती तुष्यति ॥

2078

सोत्कण्ठाकुलया दृशा समदनोज्जृम्भा विलासश्रिया
सव्रीडा वदनेन्दुना सपुलकोत्कम्पा स्तनाभ्यामसौ ।
साक्षेपा कृतकावलेपललितैर्लब्धे क्षणं वल्लभे
जाता प्रेममयीव संभृतरसस्पर्शानुबन्धे वधूः ॥

लुद्दकस्य.

2079

गच्छेत्युन्नतया भ्रुवैव गदितं मन्दं वलन्त्या तया
तेनाप्यञ्चितलोचनद्वयपुटेनाज्ञा गृहीता शनैः ।
संकेताय वलद्दृशा पिशुनिता ज्ञाता च दिक्प्रेयसा
गूढः संगमनिश्चयो गुरुपुरोप्येवं युवभ्यां कृतः ॥

अमरुकस्य.

2080

दूराज्ज्ञातविकल्पयोरभिमुखं विन्यस्यतोर्लोचने
लीलासत्वरवक्रयोश्च निकटे मन्दां गतिं कुर्वतोः ।
व्यावृत्तेक्षणवीक्षणालसपदं कृच्छ्रादतिक्रामतो-
रौत्सुक्यं नवरक्तयोर्द्विगुणयत्यायामिता वर्त्मनः ॥

शम्बुकस्य.

2081

काञ्च्या गाढतरावबद्धवसनप्रान्ता किमर्थं पुन-
र्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति ।
मातः स्वप्नुमपीह वारयति मामित्याहितक्रोधया
पर्यस्य स्वपनच्छलेन शयने दत्तोवकाशस्तया ॥

कस्यापि.

2082

गाढाश्लेषमपास्य केलिकलहे तिर्यक्स्थिता मानिनी
— — — — — — — — — — — —

पश्चादुत्सुकया मनोरथविधिव्याजोल्लसच्चेतसा
रक्षन्त्या निजगौरवं चतुरया भूयः समालिङ्गितः ॥

भट्टवल्लटस्य.

2083

आगत्य प्रणिपातसान्त्वितसखीदत्तान्तरे सागसि
स्वैरं कुर्वति तल्पपार्श्वनिभृते धूर्तेङ्गसंवाहनम् ।
ज्ञात्वा स्पर्शवशात्तया किल सखीभ्रान्त्या स्वमङ्कं शनैः
खिन्नासीत्यभिधाय मीलितदृशा सानन्दमारोपितः ॥

2084

चक्षुःप्रीत्या प्रसक्ते मनसि परिचये चिन्त्यमानाभ्युपाये
रागे याते गुरुत्वं प्रविकसति गिरां गोचरे दूतिकायाः ।
आस्तां दूरेण तावत्सरभसदयितालिङ्गनानन्दलाभ-
स्तद्गेहोपान्तरथ्याभ्रमणमपि परां निर्वृतिं संतनोति ॥

2085

पर्यावृत्तिश्लथाङ्गी प्रियशयनतटे मानिनी पृष्ठलग्ने
स्वैरं स्वैरं करेणानुसरति रमणे रोमवल्ल्यालवालम् ।
प्रेमस्वेदावगाढं विगलितरशना मन्युपूर्णा किलान्त-
र्दीर्घोच्छ्वासच्छलेन श्लथयति चतुरा बन्धमर्धोरुकस्य ॥

एते केषामपि.

अथ सुरतकेलिः

2086

समादिष्टं शिष्टैरसममिह यन्निर्वृतिपदं
पुनर्दग्धोप्याशु प्रभवति यतो मन्मथतरुः ।
श्रुते यस्मिन्कामी भवति कृतकृत्यो रतिमुखे
स सीत्कारः पायादमृतविजयी सुन्दरदृशाम् ॥

सीत्काररत्नस्य.

2087

आस्तां दूरेण विश्लेषः प्रियामालिङ्गतो मम ।
स्वेदः किं न सरिन्नाथो रोमाञ्चः किं न पर्वतः ॥

2088

किं नु लीना विलीना नु सुप्ता किं नु मृता नु किम् ।
परिष्वक्तैव कुरुते सा मे शङ्काशतं प्रिया ॥

कस्यापि.

2089

इन्द्राय वीक्षमाणस्तन्मुखमास्वादयन्ननन्ताय ।
स्पृहयामि चाद्य दयितामालिङ्गन्कार्तवीर्याय ॥

कस्यापि.

2090

उन्नमय्य सकचग्रहमास्यं
चुम्बति प्रियतमे हठवृत्त्या ।
हुं ममेति वदनान्तरलीनं
जल्पितं जयति मानवतीनाम्

विज्जाकायाः.

2091

वल्लभेन परिचुम्बिताधरा
खण्डिता यदि न खण्डिता ततः ।
श्लिष्यतापि कुचयोर्निरन्तरं
पीडिता यदि न पीडिता ततः ॥

कस्यापि.

2092

पाणिपल्लवविधूनमन्तः
सीत्कृतानि नयनार्धनिमेषाः ।
योषितां रहसि गद्गदवाचा-
मस्त्रतामुपययुर्मदनस्य ॥

भारवेः.

2093

पाणिपल्लवयुगेन मुग्धया
यन्मुखं पिहितमंशुके हृते ।
वल्लभेन सुरतेन ताडिया
शोकतां कथमियान्निशाकरः ॥

वल्लभदेवस्य.

2094

अम्बरं विनयतः प्रियपाणे-
र्योषितश्च करयोः कलहस्य ।
वारणामिव विधातुमभीक्ष्णं
कक्ष्यया च वलयैश्च शिशिञ्जे ॥

माघस्य.

2095

यद्दूरमुक्तविनयं यदनुष्ठितेच्छं
यन्निर्दयं यदसमाधि यदस्तलज्जम् ।
यद्रागनिग्रहदयं यदपोढधैर्यं
तत्तद्बभूव सुरतेषु गुणो न दोषः

भट्टपरिभूतस्य.

2096

स्वामिन्प्रभो प्रिय गृहाण परिष्वजस्व
किं किं शठोस्यकरुणः स्वसुखे स्थितोसि ।
ही दुःखयस्यलमलं विरमेति वाचः
स्त्रीणां भवन्ति सुरते प्रणयानुरूपाः ॥

भट्टकुमारस्य.

2097

दृशा सपदि मीलितं दशनरोचिषा निर्गतं
करेण परिवेपितं वलयकैरथाक्रन्दितम् ।
प्रियैः समदयोषितां ननु विखण्ड्यमानेधरे
परव्यसनकातराः किमिव कुर्वते साधवः ॥

कस्यापि

2098

वदनशशिनः स्पर्शे शीतादिवागतवेपथुः
स्तनयुगलके भ्रान्त्वा तुङ्गे निलीन इव भ्रमात् ।
ज्वलितमदनाङ्गारे तन्व्यास्ततो जघनस्थले
सपुलकजलः पत्युः पाणिर्विलीन इवाभवत् ॥

2099

किमु परिगता भर्त्रा तप्तशिलोहवदेकता-
मुत रमयितुः स्यूताङ्गेङ्गे शितैः स्मरसायकैः ।
विलयनमथ प्राप्ता रागोष्मभिर्मुहुरित्यहो
पतति भुजयोरन्त — — — — — न दीयते ॥

2100

वदननिहिते ताम्बूलांशे श्रिते रतिबीजतां
कुवलयदृशः प्रत्याजघ्ने स रागतरुस्तदा ।
किसलयरुचो यस्य च्छायामुपाश्रितयोस्तयो-
र्विषमविषमः कार्त्स्न्येनास्तं गतो विरहक्लमः ॥

2101

व्यसनमचलं यत्राचार्यो व्रतं विषयार्द्रता
सुहृदविनयो दासः प्रेयान्प्रभुर्मकरध्वजः ।
गृहमशिथिलाश्लेषा शय्या स्वरूपमभेदिता
रमणमिथुनान्यव्याख्येयां दशां विजगाहिरे ॥

एते श्रीशिवस्वामिनः.

2102

रतिकृति गते मायानिद्रां प्रवर्तितचुम्बना
पुलकपयसा तत्त्वं मत्वा मुखादहृताननना ।
कृतकशयितो निमाद्योसीत्युदीर्य कलं वधू-
र्व्रणितमधरं कृत्वा दन्तैरपूरयत स्पृहाम् ॥

2103

अनुनयगुरोर्गोष्ठीबन्धो मुखासवसंपदां
शपथविवरं विस्रब्धानां धियां प्रथमातिथिः ।
अविनयवचोवादस्थानं पुरंध्रिषु पप्रथे
मदविलसितस्यैकाचार्यश्चिरं रतिविभ्रमः ॥

2104

पुरा निःस्पन्दानां तदनु लघुसंकोचनवतां
ततश्चादीर्घाणां क्षणमधिकतैक्ष्ण्यं गतवताम् ।
स्फुरन्नश्यत्तारं क्रमविषमलेखामुपगतं
मृगाक्षीणामक्ष्णां जयति सुरतारम्भलसितम् ॥

2105

करकिसलयं धुत्वा धुत्वा विमार्गति वाससी
क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति ।
स्थगयति मुहुः पत्युर्नेत्रे विहस्य समाकुला
सुरतविरतौ रम्या नारी पुनः पतिमाश्रिता ॥

एते केषामपि.

2106

सुरतविरतौ व्रीडावेशभ्रमश्लथहस्तया
रहसि गलितं तन्व्या प्राप्तुं न पारितमंशुकम् ।
रतिरसजडैरङ्गैरङ्गं पिधातुमशक्तया
प्रियतमतनौ सर्वाङ्गीणं प्रविष्टमधृष्टया ॥

अमरुकस्य.

2107

नैषा वेगं मृदुतरतनुस्तावकीनं विसोढुं
शक्ता मैनां चपल सुभृशं खेदयेन्दीवराक्षीम् ।
रत्यभ्यासं विदधत इव प्राणनाथस्य गत्वा
कर्णोपान्ते निभृतनिभृतं नूपुरं शंसतीव ॥

मूर्खस्य.

2108

याते गोत्रविपर्यये श्रुतिपथं शय्यागतायाश्चिरं
निर्ध्यातं परिवर्तनं हृदि पुनः प्रारब्धमङ्गीकृतम् ।
भूयस्तत्प्रकृतं कृतं च वलितक्षिप्तैकदोर्लेखया
मानिन्या न तु पारितः स्तनभरो नेतुं प्रियस्योरसः ॥

अमरुकस्य.

2109

तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तस्याश्च तद्विस्मृतम् ॥

कस्यापि.

2110

अद्य द्यूतजिताधरग्रहविधावीशोसि तत्खण्डना-
द्राधिक्ये वद को भवानिति मृषाकोपाञ्चितभ्रूलतम् ।
सद्यः स्विन्नकरात्तकुन्तलकरायत्तीकृतस्यास्य मे
मुग्धाक्षी प्रतिकृत्य तत्कृतवती द्यूतेपि यन्नार्जितम् ॥

गोपादित्यस्य.

2111

दन्ताग्रग्रहणं करोति शनकैर्नैवाधरे खण्डनं
कण्ठे श्लिष्यति निर्भरग्रहविधिं कर्तुं पुनः शङ्कते ।
तिष्ठत्येव रतान्तरेष्वभिमुखी नैवाभियुङ्क्ते स्वयं
निष्प्रागल्भ्यतयैव वल्लभतरो यूनां नवोढाजनः ॥

श्रीडामरस्य.

2112

एकस्मिञ्छयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यं हृदयस्थितेप्यनुनये संरक्षतोर्गौरवम् ।
दम्पत्योः शनकैरपाङ्गवलनामिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसव्यावृत्तकौतूहलः ॥

2113

शून्यं वासगृहं विलोक्य शयनादुत्थाय काचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विश्रब्धं परिरभ्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥

2114

गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।
मा मा मानद मुञ्च मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥

2115

अन्योन्यप्रकटानुरागरभसादुद्भूतरोमाञ्चयो-
रुत्कण्ठापरिखेददुःसहतया क्षामीभवद्गात्रयोः ।
नक्तं दैववशात्क्षणं गुरुजनात्स्वायत्ततां प्राप्तयो-
र्यातो दुर्लभसंगमोत्सवविधिर्यूनोर्जनाख्येयताम् ॥

2116

निर्वृत्ते सुरतोत्सवे बहुविधे जातेधिकेङ्कक्रमे
तल्पे स्वेदजलार्द्रचन्दनमये किंचिद्गृहीतेम्बरे ।
सान्द्रस्नेहवशाद्विशेषविषयव्यासङ्गजिह्मात्मनो-
र्दम्पत्योः स्मरघस्मरातुरतया भूयोपि जाता स्पृहा ॥

एते केषांचित्.

2117

पिधत्ते श्वासःपट्टैः सितकरमथोत्तंसकुसुमै-
र्निरस्तैर्दीपार्चिः शमयति च लज्जापरवशा ।

प्रियेण प्रत्यङ्कं प्रणिहितदृशा वाससि हृते
कथंकारं तारं परिहरति हारं नववधूः ॥

प॰ जगन्नाथस्य.

2118

कुचस्पर्शाद्धर्षं हरति तदिमं मुञ्च गलतो
वदत्येवं कान्ते रतिरसरते ह्रीनतमुखी ।
प्रियं द्रष्टुं सोत्का प्रतिमितमुखं नायकमणौ
कथं कारं तारं परिहरति हारं नववधूः ॥

प॰ श्रीवकस्य.

अथ विपरीतरतकेलिः

2119

विपरीतरतायासजनिताः स्वेदबिन्दवः ।
पतन्तु तव गात्रेषु कामिनीवदनच्युताः ॥

कस्यापि.

2120

पततु तवोरसि सततं दयिताधम्मिल्लमल्लिकाप्रकरः ।
रतिरणरभसकचग्रहलुलितालकवल्लरीपतितः ॥

भट्टबाणस्य.

2121

रत्नोत्कटोत्तमाङ्गी श्यामाथ विकञ्चुका तरुणी ।
पततु तवोरसि दयिता क्षुरिका भुजगी च शत्रूणाम् ॥

नम्राचार्यस्य.

2122

श्रूयते रशनारावो विरतो नूपुरध्वनिः ।
कस्यैषा कृतपुण्यस्य कामिनी पुरुषायते ॥

कस्यापि.

2123

वैपरीत्यमतिनिन्द्यमनिष्टं
यद्विशुद्धमतयः कथयन्ति ।

कामिनां निधुवनेषु तदेव
श्लाघ्यमित्यभिमतत्वमवाप ॥

सत्यदेवस्य.

2124

आहतं कुचतटेन तरुण्याः
साधु सोऽहममुनेति पपात ।
त्रुटयतः प्रियतमोरसि हारा-
त्पुष्पवृष्टिरिव मौक्तिकवर्षः ॥

माघस्य.

2125

ऊरुमूलगतनेत्रयुगस्य
प्रेयसो रभसवेल्लितकेशी ।
चुम्बति स्म रतिकेलिविदग्धा
हावहारि वदनं दयितस्य ॥

जयमाधवस्य.

2126

नखदशननिपातजर्जराङ्गी
रतिकलहे परिपीडिता प्रहारैः ।
यदिह मरणमेव किं न याया-
द्यदि न पिबेदधरामृतं प्रियस्य ॥

क्षेमेन्द्रस्य.

2127

मुग्धे तवास्मि दयिता दयितो भव त्व-
मित्युक्तया नहि नहीति शिरो विधूय ।
स्वं स्वात्करान्मम करे वलयं क्षिपन्त्या
वाचं विनाभ्युपगमः कथितो मृगाक्ष्या ॥

2128

तन्नास्ति कारयति यन्न मनोभवस्य
सा शक्तिरप्रतिहता भुवने तथा हि ।

उद्घाट्य पीवरपयोधरमण्डलाग्रं
वल्गन्ति माधव उपर्यबला अपीह ॥

शशिवर्धनस्य.

2129

चिरारूढप्रेमप्रणयपरिहासेन हतया
तदारब्धं तन्व्या न तु यदबलायाः समुचितम् ।
अनिर्व्यूढे तस्मिन्प्रकृतिसुकुमाराङ्गलतया
पुनर्लज्जालोलं मयि विनिहितं लोचनयुगम् ॥

2130

कथं न्वेषा तन्वी प्रकृतिसुकुमाराङ्गलतिका
प्रगल्भव्यापारं रतिकलहखेदं विषहते ।
नलिन्यास्तिग्मोपि प्रभवति सुखायैव सविता
प्रकृष्टे प्रेम्ण्येवं किमिव न सहन्ते युवतयः ॥

कस्यापि.

2131

क्वचित्ताम्बूलाक्तः क्वचिदगुरुपङ्काङ्कमलिनः
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः ।
बलीभङ्गाभोगेष्वलकपतिताकीर्णकुसुमः
स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छदपटः ॥

2132

कार्या न प्रतिकूलता न च बहिर्गन्तव्यमस्माद्गृहा-
त्कोपश्च क्षणमात्रमाहितरुषा कार्यः प्रणामावधिः ।
इत्येवं प्रमदाव्रतं यदि भवान्गृह्णाति नात्यन्तिकं
तत्राहं दयितीभवामि शठ हे कोपानुबन्धेन किम् ॥

केषामपि.

2133

पश्याश्लेषविशीर्णचन्दनरजःपुञ्जप्रसङ्गादियं
शय्या संप्रति कोमलाङ्गि परुषेत्यारोप्य मां वक्षसि ।

गाढोष्ठग्रहपूर्वमाकुलतया पादाग्रसंदंशके-
नाकृष्याम्बरमात्मनो यदुचितं धूर्तेन तत्प्रस्तुतम् ॥

अमरुकस्य.

2134

शान्ते मन्मथसंगरे रणभृतां सत्कारमातन्वती
वासोदाज्जघनस्य पीनकुचयोर्हारं श्रुतौ कुण्डले ।
बिम्बोष्ठस्य च वीटिकां सुनयना पाण्योः रणत्कङ्कणे
पश्चाल्लम्बिनि केशपाशनिचये युक्तो हि बन्धः कृतः ॥

कस्यापि.

2135

उपरि निपतितानां स्रस्तधम्मिल्लकानां
मुकुलितनयनानां किंचिदुन्मीलितानाम् ।
सुरतसमरखेदस्विन्नगण्डस्थलाना-
मधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥

कस्यापि.

2136

चलत्कुचं व्याकुलकेशपाशं
स्विद्यन्मुखं स्वीकृतमन्दहासम् ।
पुण्यातिरेकात्पुरुषा लभन्ते
पुंभावमम्भोरुहलोचनानाम् ॥

2137

आदौ मज्जनचीरहारतिलकं नेत्राञ्जनं कुण्डले
नासामौक्तिककेशपाशरचना सत्कञ्चुकं नूपुरौ ।
सौगन्ध्यं करकङ्कणं चरणयो रागो रणन्मेखला
ताम्बूलं करदर्पणं चतुरता शृङ्गारकाः षोडश ॥

2138

इक्षोर्विकारा मतयः कवीनां
गवां रसो बालकचेष्टितानि ।

ताम्बूलमर्घ्यं युवतेः कटाक्षा
एतान्यहो शक्र न सन्ति नाके ॥

केषामपि.

अथ सुरतनिवृत्तिः

2139

पीतौष्ठरागाणि हृताञ्जनानि
भास्वन्ति लोलैरलकैर्मुखानि ।
प्रातः कृतार्थानि यथा विरेजु-
स्तथा न पूर्वेद्युरलंकृतानि ॥

भर्तृस्वामिनः.

2140

मयाङ्कमानीय विमर्दविक्लवा
पटान्तलीलाव्यजनेन वीजिता ।
तयापि सानन्दजलार्द्रगण्डया
निरीक्ष्य तुष्ट्या पुनरस्मि चुम्बितः ॥

2141

सत्यं तथा न विदितः सुरतोपचारः
सज्जन्ति येन पुरुषा इह कामिनीनाम् ।
दत्तः करश्च दयितेन ममोपनाभि
सख्यै शपामि यदि किंचिदपि स्मरामि ॥

2142

धन्यासि या कथयसि प्रियसंगमेपि
विस्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहितश्च करः प्रियेण
सख्यै शपामि यदि किंचिदपि स्मरामि ॥

2143

श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथ-
श्चुम्बत्यस्मिन्वदनविकृतिः किं कृता किं न दृष्टः ।
नोक्तः कस्मादिति नववधूश्चेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणे प्रेम्णि जाता रसज्ञा ॥

2144

दूरारूढप्रणयमधुरप्रेमगर्भोक्तिभाजां
गाढाश्लेषव्यतिकरधृतैकात्म्यसंभावनानाम् ।
अव्युच्छिन्नाधरमधुरसासारके प्रार्थये त्वां
यूनां मा भूद्भगवति निशे संगमे ते प्रभातम् ॥

केषामपि.

2145

सख्यस्तानि वचांसि यानि बहुशोधीतानि युष्मन्मुखा-
दक्ष्येहं बहुशिक्षिता क्षणमिति ध्यात्वापि मौनं श्रिता ।
धूर्तेनैत्य च मण्डलीकृतकुचं गाढं परिष्वज्य मां
पीतान्येव सहाधरेण हसता वक्त्रस्थितान्येव मे ॥

अमरुकस्य.

2146

कान्ते सागसि शापितेपि हि सखीवेषं विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्संगमाकाङ्क्षया ।
मुग्धे दुष्करमेतदित्यतितरामुद्दामहासं बला-
दाकृष्य च्छलितास्मि तेन कितवेनेति प्रदोषागमे ॥

कस्यापि.

2147

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धना-
द्वासः श्लथमेखलं करधृतं किंचिन्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि केवलमहं तस्याङ्गसङ्गे पुनः
कोसौ कास्मि रतं नु वा कथमिति स्वल्पापि मे न स्मृतिः ॥

अमरुकस्य.

2148

तूष्णीमास्स्व हताशया सखि मया किं पृष्टया मा मुधा
मानं विस्मरणैकशीलहृदयां मां कारयेथाः पुनः ।
निर्लज्जेत्यपि नोदितोद्य स जनो यावत्समालिङ्गितः
पर्यालोचि न कीदृशी परिणतिः कोपस्य जाता मम ॥

2149

याता प्रातरयं चला च युवता मेघादयो दुःसहा
दृष्ट्वा प्रोषितभर्तृकामतितरां प्रोज्जृम्भते मन्मथः ।
सेवा हेतुरपि श्रियो न च तया हीनस्य किंचित्सुख-
मित्यालोच्य जहाति काचिदबला प्राणान्प्रियस्योरसि ॥

2150

कृत्वा विग्रहमश्रुपातकलुषं शय्यासनादुत्थिता
क्रोधाच्चापि विघट्य गर्भभवनद्वारं रुषा प्रस्थिता
दृष्ट्वा चन्द्रमसं प्रभाविरहितं प्रत्यूषवाताहता
हा रात्रिस्त्वरिता गतेति पतिता कान्ता प्रियस्योरसि ॥

एते केषामपि.

2151

जाने कोपतरङ्गिताङ्गुलतिका तेनाहमालिङ्गिता
संस्पृष्टा कुचयोर्निरर्गलतया हारोपि पार्श्वे कृतः ।
एतावत्तु सखि स्मरामि यदतो वृत्तं परं तत्परं
धैर्यस्योद्दलनं शरीरशमनं ध्यात्वापि नो वेद्मि किम् ॥

2152

मूर्छाछादितमीक्षते न नयनं तापे तनुः पच्यते
कम्पः सूचयतीव जीवगमनं मोहे मनो मज्जति ।
प्राग्जन्मार्जितकर्मणा बलवता कालेन कामेन वा
को जानाति स केन मे धृतिहरः कण्ठे भुजंगोर्पितः

एतौ क्षेमेन्द्रस्य.

2208

जलजभिदुरीभावं प्रेप्सुः करेण निपीडय-
त्यशिशिरकरस्ताराशङ्खप्रपञ्चविलोपकृत् ।
रजनिरमणस्यास्तक्षोणीधरार्धपिधावशा-
द्धृतमधुना बिम्बं कम्बुच्छिदाकरपत्त्रताम् ॥

2209

दिनमिव दिवाकीर्तिस्तीक्ष्णैः क्षुरैः सवितुः करै-
स्तिमिरकबरीलूनां कृत्वा निशां निरदीधरत् ।
स्फुरति परितः केशस्तोमैस्ततः पतयालुभि-
र्ध्रुवमधवलं तत्तच्छायच्छलादवनीतलम् ॥

2210

ऋतुपरिवृढः पत्या मुक्तां पुरा यदपीडय-
द्यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती ।
तदुभयमतः शङ्के संकोचितं निजशङ्कया
प्रसरति रवौ कोपाटोपाद्विदारुणरोचिषि ॥

2211

यस्याघोजविमुद्रणप्रकरणे निर्निद्रयत्यंशुमा-
न्वृष्टीः पूरयति स्म यज्जलरुहामक्ष्णा सहस्रं हरिः ।
साजात्यं सरसीरुहामपि दृशामप्यस्ति तद्वास्तवं
यन्मूलाद्रियतेतरां कवितृभिः पद्मोपमा चक्षुषः ॥

एते श्रीवैषधकर्तुः.

2212

यद्गात्रौ रहसि व्यपेतविनयं वृत्तं रसात्कामिनो-
रन्योन्यं शयनीयमीहितरसावाप्तिप्रवृत्तस्पृहम् ।
तत्सानन्दमिलद्दृशोः कथमपि स्मृत्वा गुरूणां पुरो
हासोद्भेदनिरोधमन्थरमिलत्तारं कथंचित्स्थितम् ॥

भल्लटस्य.

2213

रात्रावद्य ममानया त्रिभुवनक्रान्तस्य साहायकं
साधीयो विहितं रसादिति पुरः सख्याः प्रिये जल्पति ।
किंचित्कोपमुपप्रदर्श्य हसितं तन्व्या त्रपामन्थरं
हेलोल्लासितचञ्चुचञ्चलशिखारुद्धोन्नमद्भ्रूकया ॥

मल्लकस्य.

2214

दम्पत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वच-
स्तत्प्रातर्गुरुसंनिधौ निगदतस्तस्यातिमात्रं वधूः ।
कर्णालम्बितपद्मरागशकलं विन्यस्य चञ्च्वाः पुटे
व्रीडार्ता प्रकरोति दाडिमफलव्याजेन वाग्बन्धनम् ॥

कस्यापि.

2215

लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागः परः ।
दृष्ट्वा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥

दाक्षिणात्यस्य कस्यापि.

2216

ज्वालौपम्यस्पृशि यदुषसि ध्राप्यमाणैरशेषै-
स्तारापुष्पैर्विरचितमहो मण्डलं चण्डरश्मेः ।
शोणीभावं शमयितुमहो रात्रिसंदंशमध्ये
तत्कालाख्यः कलयति शनैरुन्नयँल्लोहकारः ॥

भर्तृसारस्वतस्य.

2217

विरलविरलीभूतास्ताराः कलाविव सज्जना
मन इव मुनेः सर्वत्रैव प्रसन्नमभून्नभः ।
अपसरति च ध्वान्तं चित्तात्सतामिव दुर्जनो
विगलति निशा क्षिप्रं लक्ष्मीर्निरुद्यमिनामिव ॥

निरास भृङ्गं कुपितेव पद्मिनी
न मानिनी संसहतेन्यसंगमम् ॥

भट्टेः.

2165

किं भूषणेन रचितेन हिरण्मयेन
किं रोचनादिरचितेन विशेषकेण ।
आर्द्राणि कुङ्कुमरुचीनि विलासिनीना-
मङ्गेषु किं नखपदानि न मण्डनानि ॥

भट्टकुमारस्य.

2166

एतन्नरेन्द्रवृषभ क्षपया व्रजन्त्या
संरोपणार्थमिव गोपितमम्बुजेषु ।
उद्घाटयत्ययमशीतकरः करौघैः
पद्माकरात्तिमिरबीजमिवालिवृन्दम् ॥

शैन्धुकस्य.

2167

स्तनपरिसरभागे दूरमावर्तमानाः
स्फुटतनिमनि मध्ये किंचिदेव स्खलन्तः ।
ववुरलघुनितम्बाभोगरुद्धा वधूनां
निधुवनरसखेदच्छेदिनः प्राक्वाताः ॥

2168

दिशि दिशि मृगयन्ते वल्लुना वासमेते
मुहुरपगतनिद्राः सप्तयो हेषितेन ।
अयमपि च सरोषैः कामिभिः श्रूयमाणो
नदति मधुरतारं ताम्रचूडो विहंगः ॥

कयोरपि.

2169

जाताः पक्वपलाण्डुपाण्डुरमुखच्छायाकिरस्तारकाः
प्राचीमङ्कुरयन्ति किंचन रुचो राजीवजीवातवः ।

लूतातन्तुवितानवर्तुलमिदं बिम्बं दधच्चुम्बति
प्रातः प्रोषितरोचिरम्बरतलादस्ताचलं चन्द्रमाः ॥

मुरारेः.

2170

सपदि कुमुदिनीभिर्मीलितं हा क्षपापि
क्षयमगमदपेतास्तारकास्ताः समस्ताः ।
इति दयितकलत्रश्चिन्तयन्नङ्कमिन्दु-
र्वहति कृशमशेषं भ्रष्टशोभं शुचेव ॥

2171

नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि मुहुरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्प-
न्नवद परिमलगन्धः केन शक्यो वरीतुम् ॥

2172

बहु जगद पुरस्तात्तस्य मत्ता किलाहं
चकर च किल चाटु प्रौढयोषिद्वदस्य ।
विदितमिति सखीभ्यो रात्रिवृत्तं विचिन्त्य
व्यपगतमदयाह्नि व्रीडितं मुग्धवध्वा ॥

2173

अविरतमभिरामा रागिणोः सर्वरात्रं
नवनिधुवनलीलाः कौतुकेनाभिवीक्ष्य ।
इदमुदवसितानामस्फुटालोकसंप-
न्नयनमिव सनिद्रं घूर्णते दैपमर्चिः ॥

2174

द्रुततरकरदक्षाः क्षिप्तवैशाखशैले
दधति दधनि धीरानारवान्वारिणीव ।
शशिनमिव सुरौघाः सारमुद्धर्तुमेते
कलशिमुदधिगुर्वीं वल्लवा लोडयन्ति ॥

2175

अनुनयमगृहीत्वा व्याजसुप्ता पराची
रुतमथ कृकवाकोस्तारमाकर्ण्य काले ।
कथमपि परिवृत्ता निद्रयान्धा किल स्त्री
मुकुलितनयनैवाश्लिष्यति प्राणनाथम् ॥

2176

परिशिथिलितकर्णग्रीवमामीलिताक्षः
क्षणमयमनुभूय स्वप्नमूर्ध्वज्ञुरेव ।
रिरसयिषति भूयः शष्पमग्रे विकीर्णं
पटुतरचपलौष्ठप्रस्फुरत्प्रोथमश्वः ॥

2177

उदयमुदितदीप्तिर्याति यः संगतौ मे
पतति न वरमिन्दुः सोपरामेष गत्वा ।
स्मितरुचिरिव सद्यः साभ्यसूयं प्रभेति
स्फुरति रुचिरमेषा पूर्वकाष्ठाङ्गनायाः ॥

2178

दधदसकलमेकं खण्डितामानमद्भिः
श्रियमपरमपूर्णामुच्छ्वसद्भिः पलाशैः ।
कलरवमुपगीते षट्पदौघेन धत्तः
कुमुदकमलखण्डे तुल्यरूपामवस्थाम् ॥

2179

विकचकमलगन्धैरन्धयन्भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वायुः ।
समदमदनमाद्यद्यौवनोद्दामरामा-
रमणरभसखेदस्वेदविच्छेददक्षः ॥

2180

नवकुमुदवनश्रीहासकेलिप्रसङ्गा-
दधिकरुचिरशेषामप्युषां जागरित्वा ।

अयमपरदिशोऽङ्के मुञ्चति स्रस्तहस्तः
शिशयिषुरिव पाण्डुग्लानमात्मानमिन्दुः ॥

2181

विगततिमिरपङ्कं पश्यति व्योम याव-
द्धुवति विरहखिन्नः पक्षती यावदेव ।
रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना
सरिदपरतटान्तादागता चक्रवाकी ॥

2182

तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं दधानः ।
मदधिवसतिं मा गाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन ॥

2183

कृतगुरुतरहारच्छेदमालिङ्ग्य पत्यौ
परिशिथिलितगात्रे गन्तुमापृच्छमाने ।
विगलितनवमुक्तास्थूलबाष्पाम्बुबिन्दु
स्तनयुगमबलायास्तत्क्षणं रोदितीव ॥

2184

प्रतिशरणमशीर्णज्योतिरग्न्याहितानां
विधिविहितविरिब्धैः सामिधेनीरधीत्य ।
कृतगुरुदुरितौघध्वंसमध्वर्युवर्यै-
र्हुतमयमुपलीढे साधु सान्नाय्यमग्निः ॥

2185

विततपृथुवरत्रातुल्यरूपैर्मयूखैः
कलश इव महीयान्दिग्भिराकृष्यमाणः ।
कृतकलकलविङ्गालापकोलाहलाभि-
र्जलनिधिजलमध्यादेष उत्तार्यतेऽर्कः ॥

2186

क्षणमयमुपविष्टः क्ष्मातलन्यस्तपादः
प्रणतिपरमवेक्ष्य प्रीतमह्नाय लोकम् ।
भुवनतलमशेषं प्रत्यवेक्षिष्यमाणः
क्षितिधरतटपीठादुत्थितः सप्तसप्तिः ॥

2187

उदयशिखरिशृङ्गप्राङ्गणेष्वेव रिङ्ख-
न्सकमलमुखहासं वीक्षितः पद्मिनीभिः ।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवोङ्के हेलया बालसूर्यः ॥

2188

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयति दिननाथो याति शीतांशुरस्तं
हतविधिलसितानां ही विचित्रो विपाकः ॥

2189

क्षणमतुहिनधाम्नि प्रोष्य भूयः पुरस्ता-
दुपगतवति पाणिग्राहवद्दिग्वधूनाम् ।
द्रुततरमुपयातः स्रंसमानांशुकोसा-
वुपपतिरिव नीचैः पश्चिमान्तेन चन्द्रः ॥

2190

प्रलयमखिलतारालोकमह्नाय नीत्वा
श्रियमनतिशयश्रीः सानुरागां दधानः ।
गगनसलिलराशौ रात्रिकल्पावसाने
मधुरिपुरिव भास्वानेष एकोधिशेते ॥

एते माघस्य.

2191

निर्यान्त्या रतिवेश्मनः परिणतप्रायां विलोक्य क्षपां
गाढालिङ्गनचुम्बनानि बहुशः कृत्वाप्यसंतुष्टया ।

एकं भूमितले निधाय चरणं तल्पेऽर्पयन्त्यापरं
तन्वङ्ग्या परिवर्तिताङ्गलतया प्रेयाँश्चिरं चुम्बितः ॥

कस्यापि ।

2192

अरुणगृहिणीमाशामासादयन्तममुं रुची-
निचयसिचयांशांशाभ्रंशक्रमेण निरंशुकम् ।
तुहिनमहसं पश्यन्तीव प्रसादमिषादसौ
निजमुखमतः स्मेरं धत्ते हरेर्महिषी हरित् ॥

2193

रजनिवमथुप्रालेयाम्भःकणक्रमसंभृतैः
कुशकिसलयस्याच्छैरग्रेसरैरुदबिन्दुभिः ।
शुषिरकुशलेनाधःसूचीशिखाङ्कुरसंकरं
किमपि गमितान्यन्तर्मुक्ताफलान्यवमेनिरे ॥

2194

रविरुचिकचार्मीकारेषु स्फुटामलबिन्दुतां
गमयितुममूरुच्चीयन्ते विहायसि तारकाः ।
स्वरविरचनायासामुच्चैरुदात्ततया हताः
शिशिरमहसो बिम्बादस्मादसंशयमंशवः ॥

2195

व्रजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नले दूरं तारापतौ च हतौजसि ।
लघु रघुपतेर्जायां मायामयीमिव रावणि-
स्तिमिरचिकुरग्राहं रात्रिं हिनस्ति गभस्तिराट् ॥

2196

त्रिदशमिथुनक्रीडातल्पे विहायसि गाहते
निधुवनधुतस्रग्भागश्रीभरं महसंग्रहः ।
मृदुतरकराकारैस्तूलोल्करैरुदरंभरिः
परिहरति नाखण्डो गण्डोपधानविधां विधुः ॥

2197

दशशतचतुर्वेदीशाखाविवर्तनमूर्तयः
सविधमधुनालंकुर्वन्ति ध्रुवं रविरश्मयः ।
वदनकुहरेष्वध्येतॄणामयं यदुदञ्चति
श्रुतिपदमयस्तेषामेव प्रतिध्वनिरध्वनि ॥

2198

नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपक्षिणा-
मिह विहरणैः श्येनंपातां रवेरवधारयन् ।
शशविशसनत्रासादाशामयाम्बरमां शशी
तदधिगमनात्तारापारापतैरुदडीयत ॥

2199

प्रथममुपहृत्यार्घ्यं तारैरखण्डिततण्डुलै-
स्तिमिरपरिषद्दूर्वापर्वावलीशबलीकृतैः ।
अथ रविरुचां मासातिथ्यं नभः स्वविहारिभिः
सृजति शिशिरक्षोदश्रेणीमयैरुदसक्तुभिः ॥

2200

असुरहितमप्यादित्योत्थां विपत्तिमुपागतं
दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत्तमः ।
पठति लुठतीं कण्ठे विद्यामयं मृतजीविनीं
यदि न भजते संध्यामौनव्रतव्ययभीरुताम् ॥

2201

तटतरुखगश्रेणीसांराविणैरिव सांप्रतं
सरसि विगलन्निद्रामुद्राजनिष्ट सरोजिनी ।
अधरसुधया मध्ये मध्ये वधूमुखलब्धया
धयति मधुपः स्वादुंकारं मधूनि सरोरुहाम् ॥

2202

तिमिरविरहात्पाण्डूयन्ते दिशः कृशतारकाः
कमलहसितैः श्येनीवोन्नीयते सरसी न का ।

शरणमिलितध्वान्तध्वंसिप्रभादरधारणा-
द्गगनशिखरं नीलत्येकं निजैरयशोभरैः ॥

2203

जगति मिथुने चक्रावेव स्मरागमपारगौ
नवमिव मिथः संभुञ्जाते वियुज्य वियुज्य यौ ।
सततममृतादेवाहाराद्यदापदरोचकं
तदमृतभुजां भर्ता शंभुर्विषं बुभुजे विभुः ॥

2204

स्वमुकुलमयैर्नेत्रैरन्धंभविष्णुतया जनः
किमु कुमुदिनीं दुर्व्याचष्टे रवेरनवेक्षिकाम् ।
लिखितपठिता राज्ञो दाराः कविप्रतिभासु ये
शृणुत शृणुतासूर्यंपश्यया न सा किल भाविनी ॥

2205

घुसृणसुमनःश्रेणीश्रीणामनादरिभिः सरः-
परिसरचरैर्भासां भर्तुः कुमारतरैः करैः ।
अजनि जलजामोदानन्दोत्पतिष्णुमधुव्रता-
वलिशबलनाद्गुञ्जापुञ्जश्रियं गृहयालुभिः ॥

2206

दहनमविशद्दीप्तिर्यास्तं गते गतवासर-
प्रशमसमयप्राप्ते पत्यौ विवस्वति रागिणी ।
अधरभुवनात्सोद्धृत्यैषा हठात्तरणेः कृता-
मरपतिपुरप्राप्तिर्धत्ते सतीव्रतमूर्तिताम् ॥

2207

बुधजनकथा तथ्यैवेयं तनौ तनुजन्मनः
पितृशितिहरिद्वर्णाद्याहारजः किल कालिमा ।
शमनयमुनाक्रोडैः कालैरितस्तमसः पिबा-
दपि यदमलच्छायात्कायादभूयत भास्वतः ॥

2208

जलजभिदुरीभावं प्रेप्सुः करेण निपीडय-
त्यशिशिरकरस्ताराशङ्कुप्रपञ्चविलोपकृत् ।
रजनिरमणस्यास्तक्षोणीधरार्धपिधावशा-
दधतमधुना विम्बं कम्बुच्छिदाकरपत्रताम् ॥

2209

दिनमिव दिवाकीर्तिस्तीक्ष्णैः क्षुरैः सवितुः करै-
स्तिमिरकवरीलूनां कृत्वा निशां निरदीधरत् ।
स्फुरति परितः केशस्तोमैस्ततः पतयालुभि-
र्ध्रुवमधवलं तत्तच्छायच्छलादवनीतलम् ॥

2210

उडुपरिवृढः पत्या मुक्तां पुरा यदपीडय-
द्यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती ।
तदुभयमतः शङ्के संकोचितं निजशङ्कया
प्रसरति रवौ कोपाटोपादिवारुणरोचिषि ॥

2211

यस्याम्भोजविमुद्रणप्रकरणे निर्निद्रयत्यंशुमा-
न्वृष्टीः पूरयति स्म यज्जलरुहामक्ष्णा सहस्रं हरिः ।
साजात्यं सरसीरुहामपि दृशामप्यस्ति तद्वास्तवं
यन्मूलाद्ध्रियतेतरां कवितृभिः पद्मोपमा चक्षुषः ॥

एते श्रीनैषधकर्तुः.

2212

यद्रात्रौ रहसि व्यपेतविनयं वृत्तं रसात्कामिनो-
रन्योन्यं शयनीयमीहितरसावाप्तिप्रवृत्तस्पृहम् ।
तत्सानन्दमिलद्दृशोः कथमपि स्मृत्वा गुरूणां पुरो
हासोद्भेदनिरोधमन्थरमिलत्तारं कथंचित्स्थितम् ॥

अमरुकस्य.

2213

रात्रावद्य ममानया निधुवनक्लान्तस्य साहायकं
साधीयो विहितं रसादिति पुरः सख्याः प्रिये जल्पति ।
किंचित्कोपमुपप्रदर्श्य हसितं तन्व्या त्रपामन्थरं
हेलोल्लासितचञ्चुचञ्चलशिखारुद्धोन्नमद्दृक्कया ॥

मल्लकस्य.

2214

दम्पत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वच-
स्तत्प्रातर्गुरुसंनिधौ निगदतस्तस्यातिमात्रं वधूः ।
कर्णालम्बितपद्मरागशकलं विन्यस्य चञ्च्वाः पुटे
व्रीडार्ता प्रकरोति दाडिमफलव्याजेन वाग्बन्धनम् ॥

कस्यापि.

2215

लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागः परः ।
दृष्ट्वा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥

दाक्षिणात्यस्य कस्यापि.

2216

ज्यालीपण्यस्थिशि यदुषसि द्राव्यमाणैरशेषै-
स्तारापुष्पैर्विरचितमदो मण्डलं चण्डरश्मेः ।
शोणीभावं शमयितुमहो रात्रिसंदंशमध्ये
तत्कालाख्यः कलयति शनैरुन्नयँल्लोहकारः ॥

भर्तृसारस्वतस्य.

2217

विरलविरलीभूतास्ताराः कलाविव सज्जना
मन इव मुनेः सर्वत्रैव प्रसन्नमभून्नभः ।
व्यपसरति च ध्वान्तं चित्तात्सतामिव दुर्जनो
विगलति निशा क्षिप्रं लक्ष्मीर्निरुद्यमिनामिव ॥

2218

अभूत्प्राची पिङ्गा रसपतिरिव प्राश्य कनकं
गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
क्षणात्क्षीणास्तारा नृपतय इवानुद्यमपरा
न दीपा राजन्ते द्रविणरहितानामिव गुणाः ॥

2219

प्राची माणिक्यशोणा कमलपरिषदामोचि संकोचमुद्रा
निद्रालुः कैरवाली सरसि सरसिका सारसी कूजतीति ।
इत्थं जातप्रबोधे वदति परिजने किंचिदुन्मीलिताक्षी
भीरुर्भीरुर्वियोगात्पुनरपि सहसालिङ्गति प्राणनाथम् ॥

एते केषामपि ।

2220

पुरुहूतदिगङ्गना प्रसूते
रविमुद्यामद्भुतं चिरादिवेति ।
अलिनो नलिनोदराद्विमुक्ताः
प्रियबाहुद्वयबन्धनान्नवोढाः ॥

2221

निनाय यद्विरहविजृम्भणाकुलो
विभावरीं कथमपि साभ्युपागता ।
विलोकिता दयिततमा तथामुदं
तनोति नो रजनिवियोगिपक्षिणः ॥

2222

यथा शशी पिपतिषुरस्तपर्वते
नवांशुमत्किरणविरुग्णचन्द्रिकः ।
करोत्यहो अपि निजसंपदः स्फुटं
द्विषद्रता विपदधिकं सुखोदयम् ॥

2223

भिन्दानः सुन्दरीणां पतिषु रुषमयं हर्म्यपारावतेभ्यो
वाचालत्वं ददानः कवितृषु च गुणं प्रातिभं संदधानः ।

प्रातस्त्यसूर्यनादः स्थगयति गगनं मांसलः पांशुतल्पा-
दस्वल्पादुत्थितानां नरवरकरिणां शृङ्खलाशिञ्जितेन ॥

राजशेखरस्य.

अथ संकीर्णम्

2224

यो न दीर्घासितापाङ्गविलासविनतभ्रुवः ।
प्रियामुखस्य वशगस्तस्मै नृपशवे नमः ॥

2225

तन्वीकटाक्षदग्धस्य वद वैद्य किमौषधम् ।
पथ्यमालिङ्गनं तस्याः सकचग्रहचुम्बनम् ॥

2226

कुप्यत्यकस्मात्कुपितापि रम्या
स्वयं प्रसादं समुपैति यस्मात् ।
स्वयं प्रसन्नेति बिभर्ति लज्जा-
मक्षुण्णकप्रेक्षणकं प्रियायाः ॥

केषांचित्.

2227

भ्रूचातुर्यं कुञ्चितान्ताः कटाक्षाः
स्निग्धा हावा लज्जितान्ताश्च हासाः ।
लीलामन्दं प्रस्थितं च स्थितं च
स्त्रीणामेतद्भूषणं चायुधं च ॥

कविपुत्रयोः.

2228

मालती शिरसि जृम्भणोन्मुखी
चन्दनं वपुषि कुङ्कुमाविलम् ।
वक्षसि प्रियतमा मदालसा
स्वर्ग एष परिशिष्ट आगतः ॥

2218

अभूत्प्राची पिङ्गा रसपतिरिव प्राश्य कनकं
गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
क्षणात्क्षीणास्तारा नृपतय इवानुद्यमपरा
न दीपा राजन्ते द्रविणरहितानामिव गुणाः ॥

2219

प्राची माणिक्यशोणा कमलपरिषदामोचि संकोचमुद्रा
निद्रालुः कैरवाली सरसि सरसिका सारसी कूजतीति ।
इत्थं जातप्रबोधे वदति परिजने किंचिदुन्मीलिताक्षी
भीरुर्भीरुर्वियोगात्पुनरपि सहसालिङ्गति प्राणनाथम् ॥

एते केषामपि ।

2220

पुरुहूतदिगङ्गना प्रसूते
रविमुद्दामप्रवृत्तं चिरादिवेति ।
अलिनो नलिनोदराद्विमुक्ताः
प्रियबाहुद्वयबन्धनान्नवोढाः ॥

2221

निनाय यद्विरहविजृम्भणाकुलो
विभावरीं कथमपि साभ्युपागता ।
विलोकिता दयिततमा तथामुदं
तनोति नो रजनिवियोगिपक्षिणः ॥

2222

यथा शशी पिपतिषुरस्तपर्वते
नवांशुमत्किरणविरुग्णचन्द्रिकः ।
करोत्यहो अपि निजसंपदः स्फुटं
द्विषद्गता विपदधिकं सुखोदयम् ॥

2223

भिन्दानः सुन्दरीणां पतिषु रुषमयं हर्म्यपारावतेभ्यो
वाचालत्वं ददानः कवितृषु च गुणं प्रातिभं संदधानः ।

प्रातस्त्यस्तूर्यनादः स्थगयति गगनं मांसलः पांसुतल्पा-
दस्वल्पादुत्थितानां नरवरकरिणां शृङ्खलाशिञ्जितेन ॥

राजशेखरस्य.

अथ संकीर्णम्

2224

यो न दीर्घासितापाङ्गविलासविनतभ्रुवः ।
प्रियामुखस्य वशगस्तस्मै नृपशवे नमः ॥

2225

तन्वीकटाक्षदग्धस्य वद वैद्य किमौषधम् ।
पथ्यमालिङ्गनं तस्याः सकचग्रहचुम्बनम् ॥

2226

कुप्यत्यकस्मात्कुपितापि रम्या
स्वयं प्रसादं समुपैति यस्मात् ।
स्वयं प्रसन्नेति बिभर्ति लज्जा-
मक्षुण्णकप्रेक्षणकं प्रियायाः ॥

केषांचित्.

2227

भ्रूचातुर्यं कुञ्चितान्ताः कटाक्षाः
स्निग्धा हावा लज्जितान्ताश्च हासाः ।
लीलामन्दं प्रस्थितं च स्थितं च
स्त्रीणामेतद्भूषणं चायुधं च ॥

कविपुत्रयोः.

2228

मालती शिरसि जृम्भणोन्मुखी
चन्दनं वपुषि कुङ्कुमाविलम् ।
वक्षसि प्रियतमा मदालसा
स्वर्ग एष परिशिष्ट आगतः ॥

2229

मात्सर्यमुत्सार्य विचार्य कार्य-
मार्याः समर्यादमिदं वदन्तु ।
सेव्या नितम्बाः किमु भूधराणा-
मुत स्मरस्मेरविलोचनानाम् ॥

2230

अधीतविद्यैर्विगते शिशुत्वे
धनैर्जिते हारिणि यौवने च ।
सेव्या नितम्बास्तु विलासिनीनां
ततस्तदर्थं धरणीधराणाम् ॥

2231

सत्यं जना वच्मि न पक्षपाता-
ल्लोकेषु सप्तस्वपि तथ्यमेतत् ।
नान्यन्मनोहारि नितम्बिनीभ्यो
दुःखैकहेतुर्न च कश्चिदन्यः ॥

2232

यदा प्रकृत्यैव जनस्य रागिणो
ज्वलेत्प्रदीप्तो हृदि मन्मथानलः ।
तदात्र भूयः किमनर्थपण्डितैः
कुकाव्यगव्याहुतयोपि पातिताः ॥

केषामपि.

2233

मधु च विकसितोत्पलावतंसं
शशिकरपल्लवितं च हर्म्यपृष्ठम् ।
मदनजनितविभ्रमा च रामा
फलमिदमर्थवतां विभूतयोन्याः ॥

मेण्ठस्य.

2234

एकाकिनी यदबला तरुणी तथाह-
मस्मद्गृहे गृहपतिश्च गतो विदेशम् ।
कं याचसे तदिह वासमियं वराकी
श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ ॥

रुद्रटस्य.

2235

लज्जाभरावनतमन्थरदृष्टिपातं
येषां स्थितं कुलवधूवदनारविन्दम् ।
तेषामनेकपुरुषव्रणिताधरेषु
सक्तिः कथं भवति वारवधूमुखेषु ॥

2236

स्मितं किंचिन्मुग्धं तरलमधुरो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ।
गतानामारम्भः किसलयितलीलापरिकरः
स्पृशन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृशः ॥

2237

सव्रीडार्धनिरीक्षणं यदुभयोर्यद्दूतिसंप्रेषण-
मद्य श्वो भविता समागम इति प्रीतिः प्रसादश्च यः ।
संप्राप्तेपि समागमे सरभसं यच्चुम्बनालिङ्गनं
तत्कामस्य फलं तदेव सुरतं शिष्टं पशूनामपि ॥

2238

कन्या कौतुकमात्रकेण विधवा संमर्दमात्रार्थिनी
वेश्या वित्तलवेच्छया स्वगृहिणी गत्यन्तरासंभवात् ।
वाञ्छन्तीत्थमनेककारणवशात्पुंभिः स्त्रियः संगमं
शुद्धस्नेहनिबन्धना परवधूः पुण्यैः परैः प्राप्यते ॥

2239

एकान्ते वनतो गृहं शशिमुखोप्यन्यादृशो दृश्यते
क्षिप्रं साधय यातु पुत्रि सुदिने भुक्त्वान्यमावासकम् ।

लब्ध्वा संभ्रमिता किलेति बहुशः संप्रेरयन्त्या वधूः
पान्थं वीक्ष्य बभञ्ज सस्मितमुखी सैवार्धसिद्धौदनम् ॥

2240

क्वाम्भोदः क्व कचत्कलापविलसत्पक्षातपत्रः शिखी
क्वेन्दोर्मण्डलमंशुजालविमलं वीचिः क्व वाम्भोनिधेः ।
क्वोद्यन्बालदिवाकरः क्व कमलं मत्तालिमालाकुलं
यो येनाभिमतः स तेन कुरुते दूरेपि चेतःसुखम् ॥

केषामपि.

2241

आश्लिष्टा रभसाद्विलीयत इवाक्रान्ताप्यनङ्गेन या
यस्याः कृत्रिमचण्डवस्तुकरणाकूतेषु खिन्नं मनः ।
कोयं काहमिति प्रवृत्तसुरता जानाति या नान्तरं
रन्तुः सा रमणी स एव रमणः शेषौ तु जायापती ॥

अमरुकस्य.

2242

माङ्गा मेति मनागनागतगुणं जाताभिलाषं ततः
सव्रीडं तदनु श्लथोद्यममनु प्रत्यस्तधैर्यं पुनः ।
प्रेमार्द्रस्पृहणीयनिर्भररहःक्रीडाप्रगल्भं ततो
निःसङ्गाङ्गविघर्षणाधिकसुखं रम्यं कुलस्त्रीरतम् ॥

2243

सद्यः पक्वघृतं पयः सतुहिनं श्यामा नवं राङ्कवं
रक्तं कुङ्कुममारुकाणि तुरसी द्राक्षा कपित्थं मधु ।
क्षीरी कैरवगर्भकोमलतनुर्नीतानि सेवेत यः
कश्मीरेषु जनस्य तस्य वसतो मन्ये सुखेषु ग्रहः ॥

2244

गङ्गाधौतशिलातले हरवृषस्कन्धावरुग्णद्रुमे
सिद्धाध्यासितकंदरे हिमवति स्थाने स्थिते स्थेयसि ।
कः कुर्वीत परप्रणाममलिनं मान्यो मनस्वी जनो
यद्युत्त्रस्तकुरङ्गशावनयना न स्युः स्मरास्त्रं स्त्रियः ॥

2245

संसारेस्मिन्नसारे कुनृपतिभवनद्वारसेवाकलङ्क-
व्यासङ्गव्यस्तधैर्यं कथममलधियो मानसं संविदध्युः ।
यद्येताः प्रोद्यदिन्दुद्युतिनिचयभृतो न स्युरम्भोजनेत्राः
प्रेङ्खत्काञ्चीकलापाः स्तनभरविनमन्मध्यभागास्तरुण्यः ॥

केषामपि.

2246

सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथजुषो नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥

धर्मकीर्तेः.

2247

अम्बा शेतेत्र वृद्धा परिणतवयसामग्रणीरत्र तातो
निःशेषागारकर्मश्रमशिथिलतनुः कुम्भदासी तथाहम् ।
अस्मिन्पापा निकेते कतिपयदिवसप्रोषितप्राणनाथा
पान्थायेत्थं तरुण्या कथितमवसरव्याहृतिव्याजपूर्वम् ॥

रुद्रटस्य.

2248

यत्नात्संगममिच्छतोः प्रतिदिनं दूतीकृताश्वासयो-
रन्योन्यं परिशुष्यतोर्नवरतप्राप्तिस्पृहां तन्वतोः ।
संकेतोन्मुखयोः कथं कथमपि प्राप्ते चिरात्संगमे
यत्सौख्यं नवरक्तयोस्तरुणयोस्तत्केन साम्यं व्रजेत् ॥

2249

कान्ताया विकसद्विलासहसितस्वच्छांशवश्चामरं
संसक्तावभिषेकहेमकलशौ यच्चन्दनाङ्कौ स्तनौ ।
यत्कार्तस्वरचारुकान्ति जघनं सिंहासनं भूभुजां
साम्राज्यं तदिदं जयाजयमयः शेषस्तु चिन्तामयः ॥

2250

नासादितानि वनवासदृढव्रतेन
चित्राणि नेत्रचरितानि मृगैर्मृगाक्ष्याः ।
तत्कान्तिरुज्ज्वलरुचिव्यसनाद्दहो नु
हेम्ना हुताशपतनैरपि नैव लब्धा ॥

एतौ क्षेमेन्द्रस्य.

2251

चूतोद्यानं सुरभिरनिलः शाड्वलश्यामभूमि-
स्तन्त्रीवाद्यं चषकमदिरा लोलिता मालतीभिः ।
स्वच्छज्योत्स्ना विजनरजनी कुड्मलाक्षीकटाक्षाः
सारं विद्युद्वलयचपले जीवलोके किमन्यत् ॥

मङ्गलवत्सस्य.

अथ वीराः

2252

खड्गास्तिष्ठन्तु मत्तेभकुम्भकुट्टाट्टहासिनः ।
एकदोर्दण्डशेषोपि कः सहेत पराभवम् ॥

2253

एकः स एव तेजस्वी सैंहिकेयः सुरद्विषाम् ।
शिरोमात्रावशेषेण जीयन्ते येन शत्रवः ॥

कयोरपि.

2254

भर्तृपिण्डानृणकरो यशःक्रयमहापणः ।
सुराङ्गनास्वयंग्राहो रम्यः कालोयमागतः ॥

शाण्डिल्यस्य.

2255

बहवः पङ्गवोपीह नराः शास्त्राण्यधीयते ।
विरला रिपुखड्गाग्रधारापातसहिष्णवः ॥

राजपुत्रार्गटस्य.

2256

अनन्तोद्भूतभूतौघसंकुले भूतलेखिले ।
शास्त्रे शास्त्रे त्रिचतुराश्चतुरा यदि मादृशाः ॥

स्कन्दस्कारशंकरस्य.

2257

महिम्नामन्तरं पश्य शेषाहेः साब्धिभूधरा ।
फणासहस्रस्रग्दाम्नि भ्रमरीव विभाति भूः ॥

2258

मा भैष्ट नैते निस्त्रिंशा नीलोत्पलदलत्विषः ।
एते वीरावलोकिन्या लक्ष्म्या नयनविभ्रमाः ॥

2259

तेजसा सह जातानां वयः कुत्रोपयुज्यते ।
बालस्यापि रवेः पादाः पतन्त्युपरि भूभृताम् ॥

2260

नात्युच्चशिखरो मेरुर्नातिनीचं रसातलम् ।
व्यवसायद्वितीयानां नाप्यपारो महोदधिः ॥

2261

येन पाषाणखण्डस्य मूल्यमल्पं वसुंधरा ।
अनस्तमितसारस्य तेजसस्तद्विजृम्भितम् ॥

एते केषामपि.

2262

मा जीवन्यः परावज्ञादुःखदग्धोपि जीवति ।
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥

2263

तुल्येपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् ।
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥

2264

पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेपि देहिनस्तद्वरं रजः ॥

एते माघस्य.

2265

न सदश्वाः कशाघातं न सिंहा घनगर्जितम् ।
परैरङ्गुलिनिर्दिष्टं न सहन्ते मनस्विनः ॥

शुष्कटसुखवर्मसूनोर्विद्याधरस्य.

2266

तावदाश्रीयते लक्ष्म्या तावदस्य स्थिरं यशः ।
पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥

2267

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरः स्थिते ।
नान्यामङ्गुलिमभ्येति संख्यायामुद्यताङ्गुलिः ॥

2268

ज्वलितं न हिरण्यरेतसं
चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः
सुखमुज्झन्ति न धाम मानिनः ॥

एते भारवेः.

2269

धृतधनुषि बाहुशालिनि शैला न नमन्ति यत्तदाश्चर्यम् ।
रिपुसंज्ञकेषु गणना कैव वराकेषु काकेषु ॥

2270

अङ्गणवीथी वसुधा कुल्या जलधिः स्थली च पातालम् ।
वल्मीकश्च सुमेरुः कृतप्रयत्नस्य धीरस्य ॥

एतौ भट्टबाणस्य.

2271

जीवन्नेव मृतोसौ यस्य जनो वीक्ष्य वदनमन्योन्यम् ।
कृतमुखभङ्गो दूरात्करोति निर्देशमङ्गुल्या ॥

दामोदरगुप्तस्य.

2272

अभिमुखमिहतस्य ततस्तिष्ठतु तावज्जयोथवा स्वर्गः ।
उभयबलसाधुवादश्रवणसुखस्यैव नास्त्यर्घः ॥

श्रीभास्करस्य.

2273

रविमणिरपि निश्चेष्टः पादैस्तिग्मद्युतेर्मनाक्स्पृष्टः ।
ज्वलतितरामिति को वा मन्युं सोढुं क्षमो मानी ॥

भ०-इन्द्रसिंहस्य.

2274

भुजे विशाले विमलेसिपत्त्रे
कोन्यस्य तेजस्विकथां सहेत ।
गतासुरप्याहवसीम्नि वीरो
द्विधा विधत्ते रविमण्डलं यः ॥

शुष्कटसूनुविद्याधरस्य.

2275

एषा हि मे रणगतस्य दृढा प्रतिज्ञा
द्रक्ष्यन्ति यन्न रिपवो जघनं हयानाम् ।
युद्धेषु भाग्यचपलेषु न मे प्रतिज्ञा
दैवं यदिच्छति जयं च पराजयं च ॥

चन्द्रकस्य.

2276

सेना मयैव न हता निखिला रिपूणां
भर्तुर्भवेदुपकृतिर्न शरीरकेण ।
मत्तेभतुङ्गदशनाहतिनिर्गतासु-
रित्थं ह्रियेव सुभटो रुधिरे ममज्ज ॥

श्रीशूरस्य.

2277

रथस्यैकं चक्रं भुजगयमिताः सप्ततुरगा
निरालम्बो मार्गश्चरणरहितः सारथिरपि ।
रविर्गच्छत्यन्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥

अर्गटस्य.

2278

विजेतव्या लङ्का चरणतरणीयो जलनिधि-
र्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्याजौ रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥

2279

घटे जन्मस्थानं मृगपरिजनो भूर्जवसनं
वने वासः कन्दादिकमशनमेवंविधगुणः ।
अगस्त्यः पाथोधिं यदकृत कराम्भोजकुहरे
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥

2280

विपक्षः श्रीकण्ठो जडपतिरमात्यः शशधरो
वसन्तः सामन्तः कुसुममिषवो लक्ष्यमबलाः ।
तथापि त्रैलोक्यं जयति मदनो देहरहितः
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥

केषामपि.

2281

लोकोत्तरं चरितमर्पयति प्रतिष्ठां
पुंसां कुलं नहि निमित्तमुदारतायाः ।
वातापितापनमुनेः कलशात्प्रसूति-
र्लीलायितं पुनरमुद्रसमुद्रपानम् ॥

2282

पृथ्वि स्थिरा भव भुजंगम धारयैनां
त्वं कूर्मराज तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तत्त्रितये दिधीर्षां
देवः करोति हरकार्मुकमाततज्यम् ॥

बालरामायणे.

2283

क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमपि नहि रुषां नन्वहं मेघनादः
किंचित्संरम्भलीलानियमितजलधिं राममन्वेषयामि ॥

2284

पातालतः किमु सुधारसमानयामि
चन्द्रं निपीड्य किमुतामृतमाहरामि ।
उद्यण्डचण्डकिरणं किमु वारयामि
कीनाशलोकमथवा ननु चूर्णयामि ॥

हनुमद्वाक्यमेतत्.

2285

सामोपायनयप्रपञ्चपटवः प्रायेण ये भीरवः
शूराणां व्यवसाय एव हि परं संसिद्धये कारणम् ।
विस्फूर्जद्विकटाटवीगजघटापीठैकसंचूर्णन-
व्यापारैकरसस्य सन्ति विजये सिंहस्य के मन्त्रिणः ॥

2286

काकुत्स्थस्य दशाननो न कृतवान्दारापहारं यदि
क्वाम्भोधिः क्व च सेतुबन्धघटना क्वोत्तीर्य लङ्काजयः ।
पार्थस्यापि पराभवं यदि रिपुर्नाधास्यत्तादृक्कपो
नीयन्ते रिपुभिः समुन्नतिपदं प्रायः परं मानिनः ॥

कस्यापि.

2287

वह्निं शीतयितुं हिमं ज्वलयितुं वातं निरोद्धुं पयो
मूर्तं व्योम विधातुमुन्नमयितुं नेतुं नतिं वा महीम् ।
उद्धर्तुं किल भूभृतः स्खलयितुं सिन्धुं च संभाव्यते
शक्तिर्यस्य जनैः स एव नृपतिः शेषाः परं पार्थिवाः ॥

भट्टवृद्धेः.

2288

नायाति वाडवशिखाक्कथनेन तापं
शैत्यं हिमाद्रिपयसा विशता च नाब्धिः ।
कश्चिद्गभीरमनसां सततं विषाद-
काले प्रमोदसमये च समोनुभावः ॥

2289

संप्राप्नुवन्ति ननु मण्डलमेकमेव
क्ष्मापा जये समरसीम्नि वपुस्तु हित्वा ।
चण्डांशुमण्डलमथाभिमतानि कामं
प्रेमार्द्रनिर्जरवधूस्तनमण्डलानि ॥

2290

नास्मिन्संततवेष्टनोल्बणतमैस्तल्पैरुदेति व्यथा
ग्रन्थिभ्यश्चलितैर्न चालमसुभिर्मर्मव्यथा जायते ।
क्रन्दद्बन्धुजनार्तनादचकितस्वान्तं न वा स्थीयते
नह्येतन्मरणं सुखस्य सुभगा काप्येव संप्राप्तिभूः ॥

अथ हास्यम्

2291

कृष्णः क्रीडितवान्गोभिरिति गोतुल्यबुद्धिषु ।
पक्षपातवती लक्ष्मीरहो देवी पतिव्रता ॥

अमृतदत्तस्य.

2292

प्रायश्चित्तं मृगयते यः प्रियापादताडितः ।
क्षालनीयं शिरस्तस्य कान्तागण्डूषशीधुभिः ॥

श्यामलकस्य.

2293

तवोच्छ्रितान्पातयितुः पतितांश्चोद्धरिष्यतः ।
विधातुरिव दृश्यन्ते भग चित्रा विभूतयः ॥

व्याघ्रगणस्य.

2294
केशाः किमपराध्यन्ति क्लेशानां मुण्डनं कुरु ।
सकषायस्य चित्तस्य काषायैः किं प्रयोजनम् ॥
2295
किराटोटति साटोपं पटाङ्कितकटीतटः ।
रटन्वराटिकाहेतोर्लसदन्तरशाटिकः ॥
2296
रण्डाः पाखण्डिभिर्व्याप्ता भर्तृभिः कुलयोषितः ।
वेश्या धनिनमिच्छन्ति च्छात्राः करपरायणाः ॥
2297
यदक्षिभ्रूलतापाङ्गैः स्त्रियः कुर्वन्ति चापलम् ।
जघनेष्वेव तत्सर्वं पतत्यनपराधिषु ॥
2298
आदौ नम्रस्ततः स्तब्धः कार्यकालेषु निष्ठुरः ।
कृते कार्ये पुनर्नम्रः शिश्नतुल्यो वणिग्जनः ॥
2299
केतक्यः कण्टकैर्व्याप्ता नलिन्यः पङ्कसंभवाः ।
विलासिन्यः सकुट्टन्यः क्व रत्नमनुपद्रवम् ॥
2300
जिह्वायाश्छेदनं नास्ति न तालुपतनाद्भयम् ।
निर्विशङ्केन वक्तव्यं वाचालः को न पण्डितः ॥
2301
गुरुनटदैवज्ञभिषक्छ्रोत्रियमुखगह्वराणि यदि न स्युः ।
व्याकरणसिंहभीता अपशब्दमृगाः क्व विचरेयुः ॥
2302
गणयति गगने गणकश्चन्द्रेण समागमं विशाखायाः ।
विविधभुजंगक्रीडासक्तां गृहिणीं न जानाति ॥
2303
परनारीषु दोषोऽस्ति स्वनारी नैव विद्यते ।
अत एव कुलीनानां प्रशस्ता करसुन्दरी ॥

2304

गौरः सुपीवराभोगो रण्डाया मुण्डितो भगः ।
मेरोर्रकहयोल्लीढशष्पहेमतटायते ॥

2305

अभ्यस्य पवनविजयं व्याख्याय च शैवसंहिताः सकलाः ।
मरणसमये गुरूणां गूथवदसवो विनिर्याताः ॥

2306

धान्यं मे कनकं मे माषा मे शोभना मसूरा मे ।
इति बत मे मे कुर्वन्पशुरिव नीतः कृतान्तेन ॥

2307

का नाम बुद्धिहीनस्य विधेस्तस्य विदग्धता ।
कूष्माण्डेषु न यश्चक्रे तैलमूर्णा च दन्तिषु ॥

2308

सदा वक्रः सदा क्रूरः सदा मानधनापहः ।
कन्याराशिस्थितो नित्यं जामाता दशमो ग्रहः ॥

2309

यमः शरीरगोप्तारं संचितारं वसुंधरा ।
दुःशीला स्त्री च हसति भर्तारं पुत्रवत्सलम् ॥

2310

अधोमुखैकदंष्ट्रेण विषशुक्रप्रवाहिणा ।
अनेन दुश्चिकित्स्येन जगद्दष्टं भगाहिना ॥

2311

परान्नं प्राप्य दुर्बुद्धे मा प्राणेषु दयां कृथाः ।
दुर्लभानि परान्नानि प्राणा जन्मनि जन्मनि ॥

2312

घृतेन भोजनं बद्धुं विडालस्यापि दीयते ।
आटिकाक्रोडखण्डस्तु दुर्लभं भोजनं महत् ॥

2313

यावन्ते पितरः पुत्रान्स्वर्गार्थे स्पृहयालवः ।
यः पीतं पायसं दद्यास्त्विन्नभृष्टां तथाटिकाम् ॥

2314

सा पार्वतीत्यवितथं स च स्थाणुरपि स्फुटम् ।
संपृक्तावपि यावास्तां सुरताभोगनिःस्पृहौ ॥

2315

स्थाणुर्वा स्यादजो वा स्यात्पशूनां पतिरेव वा ।
कामिनीविभ्रमाचार्यं योधाक्षील्कुसुमायुधम् ॥

2316

परोपकारसंस्कारताम्बूलाधरचुम्बनैः ।
यन्न संयुज्यते वक्त्रमधश्छिद्रेण तत्समम् ॥

केषामपि.

2317

प्रपायां पीयते वारि सत्रागारेपि भुज्यते ।
सुप्यते देवसदने यभ्यते यत्र लभ्यते ॥

2318

निदाघकाले विप्रस्य प्रसुप्तस्य तरोरधः ।
शुना प्रमूत्रितं हस्ते देवस्यत्वेति सोब्रवीत् ॥

2319

वैद्यनाथ नमस्तुभ्यं क्षपिताशेषमानव ।
त्वयि संन्यस्तभारोयं कृतान्तः सुखमेधते ॥

2320

आतुराद्वित्तहरणं मृतादपि पलायनम् ।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥

2321

दाहज्वरेण मे मान्धं वद वैद्य किमौषधम् ।
पिब मद्यं शरावेण ममाप्यानय कर्परम् ॥

एते मवस्व.

2322

अधमर्णशवाजीविश्राद्धभुग्दुष्टभूभुजाम् ।
अभिप्राया न सिद्ध्यन्ति तेनेदं ध्रियते जगत् ॥

2323

अक्रोधं शिक्षयन्त्यन्यान्क्रोधना ये तपस्विनः ।
निर्धना ये धनायैव धातुवादोपदेशिनः ॥

हर्षस्य.

2324

काकाल्लौल्यं यमात्क्रौर्यं स्थपतेर्नित्यघातिताम् ।
आद्याक्षराणि संगृह्य कायस्थः केन निर्मितः ॥

2325

यमोपि वञ्चितो येन नकारान्तरलेखया ।
आयुधं कलमं यस्य तस्य देवोपि शङ्कते ॥

2326

कायस्थेनोदरस्थेन मातुरामिषशङ्कया ।
अन्त्राणि यन्न भुक्तानि तत्र हेतुरदन्तता ॥

2327

लेखनीकृतकर्णस्य कायस्थस्य न विश्वसेत् ।
विश्वसेत्कृष्णसर्पस्य वने व्याघ्रस्य विश्वसेत् ॥

2328

निःस्नेहः शूकरहितः सकषायो विबन्धकृत् ।
मसूर इव कायस्थः कायस्थः कस्य शान्तये ॥

2329

लघुपादो न मार्जारः श्वासधारी न तापसः ।
दण्डहस्तोपि न यमश्छिद्रान्वेषी न पन्नगः ॥

केषामपि.

2330

यद्भीमतातिवेगेन व्यासेन सहसा बहु ।
भाषितं शतशस्तेन तत्रैव च रुचिं कुरु ॥

2331

चक्रिता च मृताचार्ये चेलं चर्चा च लीनता ।
चकारचश्चुता चेति सप्तजीवनहेतवः ॥

दामोदरगुप्तस्य.

2332

नीचेश्वरस्य यद्धास्यं – – – – – – – – –
तद्दुर्भरकृतग्रस्य जठरस्य विजृम्भितम् ॥

2333

वैयाकरणसिंहेन योपशब्दमृगो हतः ।
नटैराशनिकैर्वैद्यैः पाण्डुराङ्गैः स – – – ॥

2334

– – – – – – – – – – – – –
– – – – – – हण यातु कथं जडतुल्यं तुण्डुको हसति ॥

एते केषामपि.

2335

परपरिवादेन गुणो वेषविशेषेण पौरुषातिशयः ।
यत्किंचनकारितया नृणां भवेद्राजपुत्रत्वम् ॥

प्रकाशवर्षस्य.

2336

उपयुक्तखदिरवीटकजनिताधररागभङ्गभयात् ।
कुलटा वाटकनिकटे तृष्यन्त्यपि वारि नो पिबति ॥

दामोदरगुप्तस्य.

2337

छन्दोरहिता गाथाः श्लोकानपशब्दविषधरग्रस्तान् ।
पठतोप्यहो सुमहती महार्घता राजपुत्रस्य ॥

इच्छटस्य.

2338

शृणु सखि कौतुकमेकं ग्राम्येण कुकामिना यदद्यकृतम् ।
सुरतसुखमीलिताक्षी मृतेति भीतेन मुक्तास्मि ॥

2339

अविदग्धः श्रमकठिनो दुर्लभयोषिद्युवा विप्रः ।
अपमृत्युरपक्रान्तः कामिव्याजेन मे रात्रौ ॥

एतौ दामोदरगुप्तस्य.

2340

अधरामृतेन पित्तं नश्यति वायुः पयोधरभरेण ।
अनवरतरतेन कफस्त्रिदोषशमनं वपुस्तन्व्याः ॥

2341

याप्यो वैद्यस्य निधिर्जीवति चेत्तन्महान्यशःपटहः ।
व्याधिभयात्को न सुहृन्न भवति — — — कुरु चिकित्सायाम् ॥

कयोरपि.

2342

पर्यङ्कः स्वास्तरणः पतिरनुकूलो मनोहरं सदनम् ।
नार्हति लक्षांशमपि त्वरितक्षणचौर्यसुरतस्य ॥

दामोदरगुप्तस्य.

2343

द्विगुरपि सद्वन्द्वोहं गृहे च मे सततमव्ययीभावः ।
तत्पुरुष कर्म धारय येनाहं स्यां बहुव्रीहिः ॥

2344

वाचयति नान्यलिखितं लिखितमनेनापि वाचयति नान्यः ।
अयमपरोस्य विशेषः स्वयमपि लिखितं न वाचयति ॥

कयोरपि.

2345

मदनपरिपाण्डुगण्डा मुण्डितभगमण्डला खराण्डानाम् ।
खण्डयतु दुःखमधिकं सुखखण्डकरण्डिका रण्डा ॥

रण्डानन्दस्य.

2346

चङ्गस्तृणेन यातः पटहरणेनापि निर्गतः शंभुः ।
सौरो व्यञ्जनहान्या श्यामलकस्त्वर्धचन्द्रेण ॥

कस्यापि.

2347

कचाधरकुचोरूणां दुःखं कंदर्पकर्मणि ।
स्त्रीचिह्नशिभयोः सौख्यं वादिपक्षवतामिव ॥

2348

अनाहूतप्रविष्टस्य दृष्टस्य क्रुद्धचक्षुषा ।
स्वयमेवोपविष्टस्य वरं मृत्युर्न भोजनम् ॥

2349

उत्कोचपारितोषकभाटस्तुभाषिततरार्थचौर्यांशाः ।
तत्क्षणमेव ग्राह्याः षडन्यकाले न लभ्यन्ते ॥

2350

आ सप्ततेर्यस्य विवाहपङ्क्ति-
र्विच्छिद्यते नूनमपण्डितोसौ ।
जीवन्ति ताः कर्तनकुट्टनाभ्यां
गोभ्यः किमुक्षा यवसं ददाति ॥

भट्टोर्वीधरस्य.

2351

छिद्रेष्वनर्था बहुलीभवन्ती-
त्यलीकमेतद्भुवि संप्रतीतम् ।
छिद्रं पुरस्कृत्य हि कामिनीना-
मर्था भवन्त्येव हि न त्वनर्थाः ॥

2352

स्वल्पष्टकारो विटचेटचाट-
किराटभाटीकुलटाभटानाम् ।
भट्टस्य मुट्टः पुनरेष कस्मा-
दत्रोत्तरं दास्यति कुट्टनी ते ॥

कयोरपि.

2353

एषोग्निहोत्रीति बिभर्ति गास्ता
विक्रीय दुग्धं सलिलं जुहोति ।

ख्यातोस्ति लोकेष्वृतुकालगामी
रजस्वलां याति दिवापि वेश्याम् ॥

2354

शैलाः सुरात्रुक्ममयान्निरीक्ष्य
निघर्षणच्छेदनतापमुक्ताः ।
आत्मानमाश्लिष्य भुजोपपीडं
श्रेयांसि कर्तृष्विह चिन्तयन्ति ॥

सुवर्णकारेश्वरवर्मणः.

2355

एतांश्छिनद्मि यदि तन्मम जीवितेन
शण्ढस्य किं नु यदि सन्त्वथ गोपतेः किम् ।
आसे प्रसार्य यदि तज्जनता हसन्ति
भारैर्गुणैश्च वृषणैश्च हला श्रमो मे ॥

रत्नसूतेः.

2356

खट्वा नितान्तलघुका शिथिलप्रताना
वेश्यापतिः स च निरन्तरखण्डकारी ।
तत्रापि दैवहतिकाः खलु माघरात्र्यो
हा सह्यतां कथमयं व्यसनप्रपञ्चः ॥

2357

अक्षोठशुण्ठिमरिचार्द्रकदाडिमत्व-
क्कुस्तुम्बुरुलवणतैलसुसंस्कृतान्यः ।
मत्स्यान्सुशीतसितभक्ततले दधाति
स ब्रह्मलोकमधिगच्छति पुण्यकर्मा ॥

2358

भक्तं प्रतोलयति वज्रमिवामरेन्द्रः
शाकं समुद्धरति शल्यमिवास्थिलग्नम् ।
क्वाथीं सुसैन्धवयुतां गलदाहकर्त्रीं
निर्मत्सरेण मनसा जलवद्ददाति ॥

2359

सिद्धान्तषट्कमपि चोपनिषच्चतुष्कं
विद्याश्चतुर्दश कलाः सकलाश्च सम्यक् ।
बुद्ध्वापि याति लघुतां गुरुतां गतोसौ
यश्चक्रिकां बहुविधां बहुधा न वेत्ति ॥

2360

कटी मुष्टिग्राह्या द्विपुरुषभुजग्राह्यमुदरं
स्तनौ घण्टालोलौ जघनमिव यातुं व्यवसितौ ।
स्मितं भेरीनादो मुखमपि च यत्तद्भयकरं
तथाप्येषा रण्डा परिभवति संतापयति च ॥

2361

सिताम्बरयुगावृतः क्षुरनिघृष्टजङ्घोरुको
दिनत्रयपरिग्रहग्लपितवीटिकां धारयन् ।
सुराजिरमहेलको धवलसंनिधावुद्धुरो
रहो मृगयतेतरां विचलितोर्ध्वधम्मिल्लकः ॥

2362

सर्वस्य द्वे जगति नियते संपदापच्च जन्तो-
र्वृद्धो यूना सह परिचयात्त्यज्यते कामिनीभिः ।
एको गोत्रे भवति पुरुषः संपदामाश्रयो यः
स्त्री पुंवच्च व्यवहरति चेद्विद्धि गेहं प्रणष्टम् ॥

2363

कण्ठाद्रक्तं पिबति गुणिनां मद्यमांसं न भुङ्क्ते
विष्णुद्रव्यं हरति कुरुते द्वादशीषूपवासम् ।
सांख्यं श्रुत्वापहरति गवां ब्राह्मणानां च वृत्तिं
पापो दम्भः कलियुगसखः कस्य मित्रं नियोगी ॥

2364

प्रश्नाः कथा विचित्राः कण्डूयनमंशुकान्तराकृष्टिः ।
दिनवेलार्कनिरीक्षणमतिहासो मशकदंशकाक्षेपः ॥

2365

वहिरपि गमनं बहुशः स्वजनकलिः सलिलपात्रभङ्गश्च ।
वह्निप्रशमश्चेति द्वादशचेष्टाः सुवर्णकाराणाम् ॥

2366

यभस्व नित्यं यदि शक्तिरस्ति ते
दिनाद्दिनं गच्छति कान्त यौवनम् ।
मृताय को दास्यति दर्भविष्टरे
तिलोदकैः सार्धमलोमशं भगम् ॥

2367

ऋज्वी दृष्टिरनुल्बणं विहसितं मन्दं परिष्वञ्जितं
द्वेषो नर्मणि दूरतीर्थगमने यत्नो रतिर्लिङ्गिषु ।
यस्यास्त्यक्तसुखस्पृहं किल वपुः पीनाल्पलम्बस्तनी
सज्जारा विटपेटकैकमहिषी रण्डा सुखायास्तु वः ॥

2368

वेश्यानां परलोकसाधनधियामत्यन्तरत्यन्तर-
व्यग्राणामिदमेकमेव तपसश्छिद्रं कदाचिद्भवेत् ।
ताम्बूलद्रवसान्द्ररागमदिरामोदप्रगल्भैर्मुखै-
र्यत्स्वस्तीत्यपवित्रवक्त्रकुहरांश्चुम्बन्ति विप्रानपि ॥

2369

वित्तेन वेत्ति वेश्या स्मरसदृशं कुष्ठिनं जराजीर्णम् ।
वित्तं विनापि वेत्ति स्मरसदृशं कुष्ठिनं जराजीर्णम् ॥

अयं क्षेमेन्द्रस्य.

2370

दीनार एकोस्ति ममेन्दुवक्त्रे
कटीतटप्रान्तनिबन्धबद्धः ।
उपार्जितोयं बहुभिः प्रयासै-
स्तदर्धमर्धेन कुरु प्रसादम् ॥

2371

प्रचुरमरिचापूर्णाः पूर्णैर्निरन्तरसंकुला
करिवरचलद्दन्तच्छायैर्बिसाङ्कुरमूलकैः ।
शकुनिशकलश्रेणीशाराः स्फुटा वटिकाकुलाः
शिशिरसमये भूयासुस्ते करम्भकहण्डिकाः ॥

2372

दन्तान्निर्दलयन्नसांश्च जडयत्तालु द्विधा स्फोटय-
च्छैत्यात्संघटयन्गलं गलबिलद्वाराणि संकोचयत् ।
इत्थं निर्मलकर्करीस्थमसहप्रालेयवाताहतं
नाधन्याः प्रचुरं पिबन्त्यनुदिनं प्रोन्मुक्तधारं पयः ॥

केषामपि.

2373

बिभ्राणार्द्रनखक्षतानि जघने नान्यत्र गात्रे भया-
न्नेत्रे चुम्बनपाटले च दधती निद्रालसे निश्चले ।
स्वं संकेतमदूरमेव कमितुर्भ्रूसंज्ञया बिभ्रती
सिद्धिं याति विटैककल्पलतिका रण्डा न पुण्यैर्विना ॥

2374

यत्नोत्थापनमात्रनिःसहजरच्चर्मावशेषश्लथ-
भ्रश्यच्छेपसि दुर्बलाङ्गवलनाव्यर्थोद्यमालिङ्गने ।
लज्जादायिनि खिद्यमानयुवतौ वृद्धस्य कृच्छ्रं रते
यत्स्यात्तत्प्रतिभाव्य किं नु हसितुं युक्तं किमारोदितुम् ॥

भट्टवृद्धेः.

2375

धत्सेऽङ्गानि न धार्यसे च बहुभिर्वेत्सि स्वयं संगतं
पद्भ्यां यासि वचो ददासि शिरसः शक्नोषि संचालनम् ।
भक्तस्योपरि नास्ति ते विमुखता नोष्मा न तृष्णाप्यहो
आनन्दोद्य नियोगिरुग्विरहितो दृष्टोसि जीवन्पुनः ॥

2376

मांसपाकोत्कटमद्यगन्धिविहरच्चेटीनटीसंकुलं
यद्वेश्यायतनं भुजंग परया भक्त्या पुरः पश्यसि ।
अत्रास्ते गृहदेवता विदधती दिग्घट्टनं कुट्टनी
यस्याः प्रत्यहमात्तकामुकपशुव्रातोपहारैर्बलिः ॥

2377

गृध्री निर्भरमामिषेषु सरघा घोरा मधूनां भरे
व्याघ्री तीक्ष्णनखक्षतेषु भुजगी दंशप्रकारेषु च ।
उत्तानेषु विवर्तनेषु शफरी वित्तच्छले मूषकी
वेश्या कामुकवञ्चनासु भवने रूपैरनेकैः स्थिता ॥

2378

उच्चैरध्ययनं चिरंतनकथाः स्त्रीभिः सहालापनं
तासामर्भकलालने रतिरथो तत्पाकमिथ्यास्तुतिः ।
पितृभ्रातृजनाशिषः सुभगतायोग्यत्वसंकीर्तनं
स्वानुष्ठानकथाभिवादनविधिर्भिक्षोर्गुणा द्वादश ॥

2379

क्षारं राद्धमिदं किमद्य दयिते राध्नोषि किं न स्वय-
माः पापे प्रतिजल्पसे प्रतिदिनं पापस्त्वदीयः पिता ।
धिक्त्वां क्रोधमुखीमलीकमुखरस्त्वत्तोपि कः क्रोधनो
दंपत्योरिति नित्यदत्तकलहक्लेशान्तयोः किं सुखम् ॥

2380

न भ्रूभङ्गकटाक्षवीक्षणसुखं सान्द्रेन्धकारोदये
नालापाः प्रकटीभवन्ति मधुराः स्वैरं मिथो भाषणात् ।
साशङ्के हृदये तथा हि न मुदामासक्तिरुत्पद्यते
चित्रं चौर्यरते तथापि मनसः कोप्येष रम्यो रसः ॥

2381

क्रयादौषधवत्कामः प्रभुत्वात्केवलभ्रमः ।
कारुवन्निजदारेषु योन्यः कामः समन्मथः ॥

2382

स्वायत्तमेकान्तहितं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥

2383

नाम ग्रन्थकृतां गृहाण विबुधोपाध्यायचर्चां कुरु
ग्रन्थानां भव सत्परिग्रहकृती स्पर्धस्व साकं बुधैः ।
नानाहस्तविचित्रचालनपरश्चोद्यैः सशब्दं हस-
न्निच्छेश्चेद्बुधतां पुरो जडधियामत्यन्तमूर्खोपि सन् ॥

2384

निःशङ्कं यत्तदुच्चैर्वद कुरु विकटं स्वाननं ज्ञानगर्वा-
च्छ्लाघस्वात्मानमन्यान्भष हस सहसा किंचिदश्लीलमुक्त्वा ।
सावद्यं खण्डखाद्यं पठ विवद समुत्कर्षयन्मूर्खलोका-
निच्छेश्चेत्सूरिभावं जडजनपुरतो मूर्खवृन्दारकोपि ॥

2385

व्यासादीन्कविपुंगवाननुचितैश्चोद्यैः सलीलं भष-
न्मुच्चैर्जल्प निमील्य लोचनयुगं श्लोकान्सगर्वं पठन् ।
काव्यं स्वीकुरु यत्परैर्विरचितं स्पर्धस्व साकं बुधै-
र्यद्यभ्यर्थयसे श्रुतेन रहितः पाण्डित्यमाप्तुं बलात् ॥

2386

आकारेण शशी गिरा परभृतः पारावतश्चुम्बने
हंसश्चङ्क्रमणे समं दयितया रत्या विमर्दे गजः ।
इत्थं भर्तरि मे समस्तयुवतिश्लाघ्यैर्गुणैः सेविते
क्षुण्णं नास्ति विवाहितः पतिरिति स्यान्नैष दोषो यदि ॥

2387

अनेकैर्नायकगुणैः सहितः सखि मे पतिः ।
स एव यदि जारः स्यात्सफलं जीवितं मम ॥

2388

रे रे यन्त्रक मा रोदीः कं कं न भ्रमयन्त्यमूः ।
कटाक्षाक्षेपमात्रेण कराकृष्टस्य का कथा ॥

केषामपि.

2389

विप्रः सपक्षो ह्युपवीतधारी
युक्त्या स्वरार्थं भ्रमयन्स्वहस्तम् ।
शिष्योस्मि नार्या न तु रोदनं मे
शब्देन वेदाध्ययनं करोमि ॥

राजानककानन्दस्वामिनः.

2390

यज्ञोपवीतं परमं पवित्रं
करेण धृत्वा शपथं करोमि ।
नान्यन्मनोहारि नितम्बिनीभ्यो
दुःखैकहेतुर्न च कश्चिदस्ति ॥

2391

वान्त्यापि यत्सुखयति प्रहतोपि चेतो
जातव्रणोपि नयनोत्सवमातनोति ।
मुण्डीकृतोपि सुरते प्रबिभर्ति शोभां
पायादपूर्वचरितः सुभगो भगो वः ॥

2392

मूर्खैः कृतेपि परदाररते विशुद्ध्यै
मातेति वाचिकमघान्तरमातनोति ।
यागाब्जसीम्नि कृतविट्छिदनार्थमोतु-
रुत्खातपातकमुदस्यति तद्दलेभ्यः ॥

2393

अपथ्यभोगेषु यथातुराणां
स्पृहा यथार्थेष्वतिदुर्गतानाम् ।

परोपतापेषु यथा खलानां
स्त्रीणां तथा चौर्यरतोत्सवेषु ॥

2394

कार्यार्थिनो दीर्घमिवाध्वखेदं
विक्रीतदासा इव कर्मभारम् ।
कष्टं कटुद्रव्यमिवामयार्ताः
स्वभर्तृगेहं वनिताः सहन्ते ॥

2395

अयेश्वराधारणगायनानां
सदैव कल्पद्रुमवत्फलन्ति ।
सन्त्यस्तु किंचिद्वचसैव सायं
दीपाय कर्पूरमिवार्पयन्ति ॥

2396

श्वश्रूर्नुदति च शश्वन्नुदति ननन्दाथ देवरो नुदति ।
प्रियसखि तथापि गेहे पतिरसमासे समाश्रित्य ॥

2397

घञ्झडधमणनविशेषो वक्तुर्वक्त्रान्न लभ्यते यस्य ।
मुखगुदरन्ध्रविशेषो दन्तैरुपलभ्यते तस्य ॥

भर्य कस्यापि.

2398

इन्दुर्यत्र न निन्द्यते न मधुरं दूतीवचः श्रूयते
नोच्छ्वासा हृदयं दहन्ति शिशिरा नो याति कार्श्यं वपुः ।
स्वायत्तामनुकूलिकां स्वगृहिणीमालिङ्ग्य यत्सुप्यते
तत्किं प्रेम गृहाश्रमव्रतमहो कष्टं हि तद्धार्यते ॥

2399

दिग्वासा यदि तत्किमस्य वसनैश्चेत्तस्य किं भस्मना
भस्माथाङ्गनया किमस्य यदि सा कामं परिद्वेष्टि किम् ।
इत्यन्योन्यविरुद्धचेष्टितमसौ पश्यन्निजस्वामिनो
भृङ्गी सान्द्रसिरावनद्धपरुषं धत्तेस्थिशेषं वपुः ॥

2400

नास्माकं जननी तथोज्ज्वलकुला सच्छ्रोत्रियाणां कुला-
दूढा काचन कन्यका खलु मया तेनास्मि तताधिकः ।
अस्मत्स्यालकभागिनेयभगिनी मिथ्याभिशस्ता परै-
स्तत्संबन्धवशान्मया स्वगृहिणी प्रेयस्यपि प्रोज्झिता ॥

कृष्णमिश्रस्य.

2401

बाला क्रन्दति घर्षणेन युवतिः सीत्कारमामुञ्चति
प्रौढा मुञ्चति पुत्रशोकमतुलं पीयूषदण्डाहता ।
वृद्धागाधभगोदधिप्रमथने निर्मन्थमन्थाचलो
जीयादिन्द्रकरीन्द्रदन्तमुसलाकारो लकारस्तव ॥

2402

भिक्षो कन्था श्लथा ते ननु शफरवधे जालिकैषास्ति मत्स्यां-
स्तेमी मद्यावदंशाः पिबसि मधु समं वेश्यया यासि वेश्याम् ।
दत्त्वारीणां गलेऽङ्घ्रिं किमु तव रिपवो भित्तिभेत्तास्मि येषां
चौरस्त्वं द्यूतहेतोः कथमसि कितवो येन दासीसुतोस्मि ॥

2403

दूरे क्षीरकथा तथाहि कतरो राज्ञां विशेषोपरो
दण्डापूपिकया दधिष्वधिगमस्तक्रं क्व मे संभवेत् ।
मस्तु स्वस्तिमदस्तु गोरसरसप्रस्ताव एवाफल-
स्तद्भाग्यं मम येन काञ्जिकलवैर्निष्किंचनो वञ्चितः ॥

प॰ ओनकस्य.

2404

क्लेशैः केशैरशेषैरलमुपरचितैः कार्यहार्यं मनोस्या
दाता ग्राम्योपि काम्यः किमपरमनया दग्धवैदग्ध्यरीत्या ।
स्वैरं निर्गत्य पुत्र व्रज युवतिजनो यत्र वाल्लभ्यलभ्यः
कुट्टन्या प्रोक्तमित्थं प्रकटविटभटोच्चाटनं पातु युष्मान् ॥

2405

आदौ तावद्व्यापारस्था यमवरुणधनदसदृशा भवन्त्यतिगर्विता
मानोन्मत्ता दर्पोत्सिक्ताः परविभवहरणनिरता भवन्त्यतिदारुणाः ।
भ्रष्टास्तेभ्यो व्यापारेभ्यो हतिनिगडनियतचरणास्तथा लगुडार्दिता
लम्बैः कूर्चैर्दीनैर्वक्त्रैर्मुनय इव शमदमरता भवन्त्यतिभद्रकाः ॥

एते केषामपि.

2406

भोगोपभुक्तिः क्रियते परेण
संमर्दनार्तिं तु वयं भजामः ।
वृद्धास्तनौ वक्तुमितीव यातौ
समानदुःखस्य भगस्य मूलम् ॥

अथ जातिः

2407

मार्जारश्चुल्लितलादुत्थाय विजृम्भितायतो भूत्वा ।
विधुनोति भस्मपरुषाण्यङ्गानि निशावसानेषु ॥

2408

गायति विहसति नृत्यति हृदयेन धृतां प्रियां विचिन्तयति ।
समविषमं च न विन्दति गृहगमनसमुत्सुकः पथिकः ॥

कयोरपि.

2409

धूलीधूसरतनवो राज्यस्थितिरचनकल्पितैकनृपाः ।
कृतमुखवाद्यविकाराः क्रीडन्ति सुनिर्भरं डिम्भाः ॥

रुद्रटस्य.

2410

विरलाङ्गुलिकरपिहितघ्राणान्वितगण्डचिबुकमुखविवरम् ।
कस्योच्चरद्धकारं सूक्ष्मशिशोर्ज्योन्मनो न हरेत् ॥

2411

आस्यं पिधाय सकलं विरलाङ्गुलिना करेण सघ्राणम् ।
भयमुच्चरद्धकारं मनोहरं ज्योत्करोति शिशुः ॥

एतौ वल्लभदेवस्य.

2412

गर्जन्हरिः साम्भसि शैलकुञ्जे
प्रतिध्वनीनात्मकृतान्निशम्य ।
पदं बबन्ध क्रमितुं सकोपः
प्रतर्कयन्नन्यमृगेन्द्रनादम् ॥

भट्टेः.

2413

अम्भोमुचां सलिलमुद्वमतां निशीथे
तालीवनेषु निभृतस्थितकर्णतालाः ।
आकर्णयन्ति करिणोर्धनिमीलिताक्षा
धारारवान्दशनकोटिनिषण्णहस्ताः ॥

कस्यापि.

2414

छिन्नाणि स्खलता पदानि दधता धात्रीकरालम्बिना
स्वभ्यस्तं पुनरेव जानुगमनं निःशङ्कमातन्वता ।
उद्भिन्नासमदन्तकुड्मलमुखेनाव्यक्तवाग्वादिना
या प्रीतिः स्वसुतेन चेतसि सखे वक्तुं न सा पार्यते ॥

भट्टजनार्दनस्य.

2415

आयातो भवतः पितेति सहसा मातुर्निशम्योदितं
धूलीधूसरितो विहाय शिशुभिः क्रीडारसान्प्रस्तुतान् ।
दूरात्स्मेरमुखः प्रसार्य ललितं बाहुद्वयं बालको
नाधन्यस्य पुरः परैति परया प्रीत्या रणन्घर्घरम् ॥

कस्यापि.

2416

मातर्धर्मपरे दयां मयि कुरु श्रान्तेश्च वैदेशिके
द्वारालिन्दककोणकेथ निभृतं यातास्मि सुप्त्वा निशि ।
इत्युक्त्वा सहसा प्रचण्डगृहिणीवाक्येन निर्भर्त्सितः
स्कन्धन्यस्तपलालमुष्टिविभवः पान्थः पुनः प्रस्थितः ॥

रविदत्तस्य.

2417

आरात्कारीषवह्नेः प्रविरचिततृणप्रस्तरान्तर्निषण्णैः
संशीर्णग्रन्थिकन्थाविवरवशविशच्छीतवाताभिभूतैः ।
नीताः कृच्छ्रेण पान्थैः श्वभिरिव निविडं जानुसंकोचकुब्जै-
रन्तर्दुर्वारदुःखद्विगुणतरकृतायामयामास्त्रियामाः ॥

कस्यापि.

2418

पक्षावुत्क्षिप्य धुन्वन्सकलतनुरुहाभोगविस्फारिताङ्गः
प्रागेवोड्डीननिद्रः स्फुरदरुणकरोद्भासितं खं निरीक्ष्य ।
प्रातश्चोत्थाय नीडस्थिततरलतनुर्घर्घरध्वानमुच्चै-
रुद्ग्रीवः पूर्वकायोन्नतिविकटसटः कुक्कुटो रारटीति ॥

नड्डुवाहस्य.

2419

आकर्षन्निव गां धमन्निव खुरैः पश्चार्धमुज्झन्निव
स्वीकुर्वन्निव खं पिबन्निव दिशो वायून्समश्नन्निव ।
साङ्गारप्रकरां स्पृशन्निव महीं छायाममृष्यन्निव
चञ्चच्चामरवीज्यमानवदनः श्रीमान्हयो धावति ॥

श्रीसिंहदत्तस्य.

2420

पश्चादङ्घ्रिं प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटा धूलिधूम्रा विधूय ।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुङ्गस्तुरंगो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥

भट्टबाणस्य.

2421

आलोकत्रस्तनारीकृतसभयमहानादधावज्जनौघ-
व्याप्तद्वारप्रदेशप्रचुरकलकलाकर्णनस्तब्धचक्षुः ।
कष्टं दण्डं गृहाणेत्यतिमुखरमुखैस्ताडितो लोष्टघातै-
र्भीतः सर्पो गृहस्यानधिगतविवरः कोणतः कोणमेति ॥

शिविरकिशोरकस्य.

2422

आघ्रायाघ्राय गन्धं विकृतमुखपुटो दर्शयन्दन्तपङ्क्तिं
धावन्नुन्मुक्तनादो मुहुरपि रभसाकृष्टया पृष्ठलग्नः ।
गर्दभ्याः पादघातद्विगुणितसुरतप्रीतिराकृष्टशिश्नो
वेगादारुह्य मुह्यन्नवतरति खरः खण्डितेच्छश्चिराय ॥

श्रीमद्भुरस्य.

2423

घ्रात्वा श्रोणीमजाया विततमभिमुखं नाससंकोचभङ्गं
स्थित्वा सूर्यं निरीक्ष्य प्रविकसितसटो घट्टयन्क्ष्मां खुरेण ।
ब्लोब्लोकारान्प्रकुर्वन्मणिशकलनिभं चालयन्नेत्रयुग्मं
छागश्चाटूननेकांश्चतुर इव विटो मन्मथान्धः करोति ॥

भट्टबाणस्य.

2424

गर्जित्वा मेघधीरं प्रथममथ शनैर्मण्डलीकृत्य देहं
शृङ्गाभ्यां धारयन्तावभिमुखमवनिं दारयन्तौ खुराग्रैः ।
मन्दं मन्दं समेत्य स्थिरनिहितपदं दत्तघातौ सरोषं
युध्येते चालयन्तौ कुटिलितमसकृत्पुच्छमेतौ महोक्षौ ॥

कस्यापि.

2425

आहत्याहत्य मूर्ध्ना द्रुतमनुपिबतः प्रस्नुतं मातुरूधः
किंचित्कुब्जैकजानोरनवरतचलच्चारुपुच्छस्य धेनुः ।
उत्तीर्णं तर्णकस्य प्रियतनयतया दत्तहुंकारमुद्रा
विस्रंसिक्षीरधारालवशबलमुखस्याङ्गमातृप्ति लेढि ॥

श्रीमद्भुरस्य.

अथ चाटवः

2426

अनास्वादितसंभोगाः पतन्तु तव शत्रवः ।
बालवैधव्यदग्धानां कुलस्त्रीणां स्तना इव ॥

2427

नारायणायितं देव त्वया नरकविद्विषा ।
यदेकः शिशुपालोपि स्थापितो न द्विषां कुले ॥

2428

तुलामारुह्य रविणा वृश्चिके निहितं पदम् ।
भवता शिरसि न्यस्तमयत्नेनैव भोगिनाम् ॥

2429

विचरेदेकपाद्धर्मः कथमस्मिन्कलौ युगे ।
यदि वंशस्त्वदीयोयं न स्यादस्यावलम्बनम् ॥

2430

कृतं कलौ त्वयैकेन परलोकप्रसाधनम् ।
गुणानुबन्धिभिः शुद्धैर्मार्गणैः सफलीकृतैः ॥

2431

किं कृतेन न यत्र त्वं यत्र त्वं किमसौ कलिः ।
कलौ चेद्भवतो जन्म कलिरस्तु कृतेन किम् ॥

2432

विना साध्येन नैवास्ति तार्किकाणां हि साधनम् ।
साध्यं ते नास्त्यहो चित्रं तथाप्यस्त्येव साधनम् ॥

2433

प्रत्यक्षमविसंवादि प्रमाणं प्रोच्यते बुधैः ।
प्रत्यक्षस्ते गुणौघोयमप्रमाणः कथं भुवि ॥

2434

चित्रं कारणमन्यत्र कार्यमन्यत्र दृश्यते ।
महान्प्रतापो देवस्य दाहस्तु हृदि विद्विषाम् ॥

2435

राजंस्त्वमेव पातालमाशानां त्वं निबन्धनम् ।
त्वं चामरमरुद्भूमिरेको लोकत्रयायसे ॥

2436

करपातैर्दुरालोकैस्तीक्ष्णः संतापयन्प्रजाः ।
भानुर्न भवता तुल्यः क्षणसंरक्तमण्डलः ॥

2437

एतावच्छक्यमस्माभिर्वक्तुं त्वं गुणवानिति ।
रत्नाकरस्य रत्नौघपरिच्छेदे तु के वयम् ॥

2438

मित्रमण्डलसंतापशुष्कदेहास्तवारयः ।
जाताः संप्रति दग्धाशा निदाघदिवसा इव ॥

2439

कारणैः सदृशं कार्यमिति मिथ्या प्रसिद्धयः ।
मानिनो भवतो जातं यदमानं यशो भुवि ॥

2440

अमानेनापि भवता दानमानादिभिर्गुणैः ।
आश्रितः सर्व एवायं समानः क्रियते जनः ॥

2441

भवतोपि भवद्भृत्याः सुखभाजो भवन्त्यमी ।
त्वत्प्रसादात्सुखावाप्तिर्या तेषां सा कुतस्त्वयि ॥

2442

भोगस्तवैव सफलो योर्थिभिः परिभुज्यते ।
अन्येषां किं नृणां भोगैरभोगैः फणिनामिव ॥

2443

दुर्योधनः सकर्णोसि हृदि शल्योसि विद्विषाम् ।
सकृपो धृतराष्ट्रोसि त्वमेकः कौरवायसे ॥

2444

युधिष्ठिरोसि भीमोसि चरितैरर्जुनो भवान् ।
प्रज्ञया सहदेवोसि वाच्यता नकुलस्य ते ॥

2445

स्वयंभुवां स्रुवृत्तानां करपीडां दृढां कुरु ।
स्वयं भुवां स्रुवृत्तानां करपीडां निवारय ॥

2446

याताः कणादतां केचिदपरे विन्ध्यवासिताम् ।
शबरस्वामितामन्ये शास्त्रकारास्तवारयः ॥

2447

आहवे जगदुद्दण्डराजमण्डलराहवे ।
दाहवेपथुकर्त्रैरैः स्वस्त्यस्तु तव बाहवे ॥

2448

श्रीभृतो नरकान्तस्य लीलाकलितभूभृतः ।
तव सत्यानुरागस्य श्लाघ्यं जन्म हरेरिव ॥

2449

क्षणमप्यनुगृह्णाति यं दृष्टिस्तेनुरागिणी ।
ईर्ष्ययेव त्यजत्याशु तं नरेन्द्र दरिद्रता ॥

2450

नूनं धात्रा न विज्ञातं मनो विस्तारि तावकम् ।
अन्यथा कृतवान्गां किं चतुःसागरसंकटाम् ॥

2451

स श्रियो भाजनं यस्ते पादच्छायां न मुञ्चति ।
अथ विप्रतिपत्तिस्ते कमलं किं न पश्यसि ॥

2452

सर्वदा सर्वदोसीति मिथ्या संस्तूयसे जनैः ।
नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ॥

केषामपि.

2453

सरस्वती स्थिता वक्त्रे लक्ष्मीः करसरोरुहे ।
कीर्तिः किं कुपिता राजन्येन देशान्तरं गता ॥

2454
आहते तव निःसाणे स्फुटितं रिपुहृद्घटैः ।
गलिते तत्प्रियानेत्रै राजंश्चित्रमिदं महत् ॥

2455
अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुतः ।
मार्गणौघः समायाति गुणो याति दिगन्तरम् ॥

2456
अमी पानकरम्भाभाः सप्तापि जलराशयः ।
त्वद्यशोराजहंसस्य पञ्जरं भुवनत्रयम् ॥

2457
कीर्तिस्ते जातजाड्येव चतुरम्बुधिमज्जनात् ।
आतपाय धरानाथ गता मार्तण्डमण्डलम् ॥

2458
दुनोति त्वामघवतः कीर्तनं केनचित्कृतम् ।
त्वयि संकीर्तिते चित्रं मघवानपि तुष्यति ॥

एते अमृतदत्तस्य.

2459
भवतस्तुल्यतामेति न सोमो न दिवाकरः ।
यस्य दातुः परिभ्रान्तौ न रात्रौ न दिवा करः ॥

2460
अक्षराणामकारोऽहमिति विष्णुः स्वयं ब्रुवन् ।
भवता सोऽपि यत्सत्यमाकारेण लघूकृतः ॥

एतौ भास्करसेनस्य.

2461
राजन्यद्यपि ते बाहू कान्तालिङ्गनलालसौ ।
तथापि समरे भेत्तुं शक्तौ हस्तिकवाटयोः ॥

2462
अगम्यगमनात्प्रायः प्रायश्चित्तीयते जनः ।
अगम्यं त्वद्यशो याति सर्वत्रैव च पावनम् ॥

2463

यशसस्तव सौजन्यमहो विस्मयकारकम् ।
आत्मवच्छुक्लतां नीतमयशो विद्विषामपि ॥

2464

गुणवत्त्वे समानेपि भेदोयं युवयोर्महान् ।
धनुर्याति गुणच्छेदमविच्छेदगुणो भवान् ॥

2465

किं करोतु गुणौघस्ते शरावपुटदीपवत् ।
वसुधाम्बरपर्यन्तविनिवारितगोचरः ॥

2466

संधिविग्रहकालज्ञः कृतकृत्योपि पाणिनिः ।
परप्रत्ययकारीति भवता नोपमीयते ॥

2467

उपसर्गाः क्रियायोगे पाणिनेरिति संमतम् ।
निष्क्रियोपि तवारातिः सोपसर्गः सदा कथम् ॥

2468

तव शत्रुर्भवांश्चैव द्वयं व्याकरणायते ।
स निपातोपसर्गाभ्यां त्वं गुणागमवृद्धिभिः ॥

2469

असत्कविप्रणीतानां श्लोकानामिव ते द्विषाम् ।
क्लिष्टार्थसंधिवृत्तीनां निपाताः स्युः पदे पदे ॥

2470

यदस्ति तद्वदासीति नैतच्चित्रमवैम्यहम् ।
भयं स्वप्नेपि ते नास्ति दत्तं तद्विद्विषां कथम् ॥

2471

अकलङ्को दृढः शुद्धः परिवारी गुणान्वितः ।
सद्वंशो हृदयग्राही खड्गः सुसदृशस्तव ॥

2472

प्रायेण सर्वं पश्यन्ति विपरीतं विनश्वराः ।
यत्त्वं काञ्चनगौरोपि काल एवासि विद्विषाम् ॥

2473

त्वया सह विरुद्धानां कुतः कुशलता कुले ।
वासो हि नियतस्तेषां वने कुशलताकुले ॥

2474

विरोधात्तव शत्रूणां जातं सौगतदर्शनम् ।
विग्रहे क्षणभङ्गित्वं सर्वाङ्गेषु च शून्यता ॥

2475

रागान्नक्षत्रयोगाच्च समूहात्तास्य देवता ।
जयलक्ष्मीर्महीभर्तुर्वक्षो याता रणे द्विषाम् ॥

पं° राजकस्य.

2476

त्वद्यशःपुण्डरीकस्य त्रैलोक्यैकसरःस्थितेः ।
कीर्तिहंसीविधूतस्य रजः पतति नो हिमम् ॥

कस्यापि.

2477

सकृपाणां द्विषां सेनामकृपाणां रणे घ्नता ।
अमूर्धन्येन भवता मूर्धन्येन जिता दिशः ॥

अमृतदत्तस्य.

2478

त्वद्यशोजलधौ राजन्निमज्जनभयादिव ।
सूर्येन्दुबिम्बमिषतो धत्ते तुम्बीद्वयं नभः ॥

2479

अहो किमपि ते शुद्धं यशःकुसुममुन्नतम् ।
यस्यायममृतस्यन्दी बालेन्दुर्बाह्यपल्लवः ॥

जयवर्धनस्य.

2480

उदिते दृष्टिसुखे त्वयि शशिनीव भवन्ति चन्द्रकान्तानि ।
वदनान्यरिनारीणामविरलजलबिन्दुवर्षीणि ॥

2481

एकं मित्रं भजते मासेनेन्दुः स्वयं क्षयं गच्छन् ।
मित्त्रशतानि भजंस्त्वं प्रतिक्षणं वृद्धिमुपयासि ॥

कवोरपि.

2482

स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥

भट्टबाणस्य.

2483

दिङ्मुखानि परिचुम्बति पृथ्वी-
मम्बुराशिरशनां परिरभ्य ।
उल्लसत्युपवनेषु यशस्ते
वृद्धमेव तरुणोचितचेष्टम् ॥

श्रीकल्लटस्य.

2484

दृष्टमङ्कुरितमर्जुनसृष्टौ
यन्महापुरुषनिर्मितिबीजम् ।
तत्तवोदयविधाविह धातु-
र्दृश्यते कुसुमितं फलितं च ॥

आनन्दवर्धनस्य.

2485

ऊष्मव्यपेता रहिताश्च वृद्ध्या
संयोगहीना लघवोपि चान्तः ।
श्लोकस्य वर्णा इव विद्विषस्ते
पादान्तमागम्य गुरूभवन्ति ॥

2486

यशोदयामण्डितकान्तदेहो
बाल्येपि गोपालजनस्य नेता ।
गोमण्डलं पासि बलेन युक्तः
कथं न राजन्पुरुषोत्तमोसि ॥

2487

कृशाशयात्यन्तविवृद्धतापया
विपाण्डुरीभूतपयोधरश्रिया ।
शिलीमुखास्वादितबन्धुजीवया
तवारिनारी शरदा विडम्ब्यते ॥

केषामपि.

2488

दिग्वधूवदनचुम्बि चेर्ष्यया
वीक्ष्य सद्युति दिवा भवद्यशः ।
दर्शितः पृथुपयोधरोद्गम-
स्तेन सापि परिरभ्यतेखिला ॥

2489

अभिहिताप्यभियोगपराङ्मुखी
प्रकटमङ्गविलासमकुर्वती ।
उपरि ते पुरुषायितुमक्षमा
नववधूरिव शत्रुपताकिनी ॥

एतौ विकटनितम्बायाः.

2490

द्रविणमापदि भूषणमुत्सवे
शरणमात्मभये निशि दीपकः ।
बहुविधार्थ्युपकारभरक्षमो
भवति कोपि भवानिव सन्मणिः ॥

भल्लटस्य.

2491

अपहरसि सदा मनांसि पुंसा-
मतिमहता गुणसंपरिग्रहेण ।
न च भवसि तथाप्यनेकचित्तो
हतमथवा विवृणोति कः परस्वम् ॥

2492

प्रद्युम्न इन्दुकुलजः स बभूव नाम्ना
राजाप्यसौ दशरथः सुतरामभद्रः ।
धर्मात्मजो नकुलवानिति सुप्रसिद्धं
केनोपमा भवतु ते सकलाधिपस्य ॥

कयोरपि.

2493

ऐरावणे सुरवधूपरिगीयमान-
युष्मद्यशःश्रवणनिश्चलकर्णताले ।
निर्विघ्नमापिबति भृङ्गकुलं मदाम्भः
कल्याणमावहति कस्य न चेष्टितं ते ॥

जितमन्योः.

2494

गायन्ति किंनरगणाः सह कामिनीभिः
प्रोत्तुङ्गशैलशिखरेषु हिमाचलस्य ।
शङ्खेन्दुकुन्ददलबालमृणालनाल-
नीहारहारहरहाससितं यशस्ते ॥

कस्यापि.

2495

त्वद्बाहुदण्डकरवालविदारितारि-
मातङ्गकुम्भदलनच्युतमौक्तिकौघैः ।
रेजे भवत्परिगृहीतविपक्षलक्ष्मी-
धम्मिल्लपुष्पनिकरैरिव रङ्गभूमिः ॥

हर्षदत्तस्य.

2560

अहं सदा प्राणसमं महीभुजां
स मां सदा वेत्ति नृपस्तृणोपमम् ।
इतीव कर्णेषु सुवर्णमर्थिनां
स्वखेदमाख्यातुमिवास्ति भूपते ॥

2561

त्वदाप्तचामीकरचारुभूषण-
प्रभावलीसंगमपिङ्गलत्विषाम् ।
समुन्मिषद्दाहभियेव दुर्गति-
र्जहाति सङ्गं ज्वलतामिवार्थिनाम् ॥

एतौ बिल्हणस्य.

2562

मुखेनेन्दुं धत्से सकलमकलङ्कं न शिरसा
द्विजिह्वः क्रूरोसौ निपतति न कर्णे न कटके ।
प्रभूताप्येषा ते जनयति न भूतिः परुषता-
मपूर्वं शर्वत्वं तव निरपवादं कुत इदम् ॥

कस्यापि.

2563

इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारि-
स्त्वन्नागानां मदजलमषीभाञ्जि गण्डस्थलानि ।
अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्ता-
न्याभान्त्येवं वद धवलितं किं यशोभिस्त्वदीयैः ॥

राजशेखरकवेः.

2564

कुरबक कुचाघातक्रीडारसेन वियुज्यसे
बकुलविटपिन्स्मर्तव्यं ते मुखासवसेचनम् ।
चरणघटनाभून्यो यास्यस्यशोक सशोकता-
मिति निजपुरत्यागे यस्य द्विषां जगदुः स्त्रियः ॥

रत्नाकरस्य.

2565

तीव्राताम्ररुचो रवेः कथमियं स्वप्नेपि संभावना
नो युक्त्यानुमतः प्रभातसलिलस्नानेन सोयं विधिः ।
सान्द्रानन्दविधायिशीतमधुरव्यापारगौरात्मना
नूनं त्वद्यशसैव संप्रति शशी शीर्णः पुनः पूरितः ॥

श्रीकण्ठकवेः.

2566

अर्थाकृष्टधियः पदं रचयतः शब्दावधानात्मनः
संधिच्छेदविधाननिर्गमविधिव्यापारमातन्वतः ।
मा मां कश्चिदिह ग्रहीदिति मुहुः साशङ्कमापश्यत-
श्चौरस्येव कवेर्भयं भवति यत्तद्विद्विषामस्तु वः ॥

2567

साशङ्कस्य समाकुलीकृतमतेरत्यन्तनिस्तेजसः
खिन्नाङ्गस्य विकम्पमानहृदयस्यारूढमन्योर्भृशम् ।
लज्जां संत्यजतः क्रमं विमृषतो विघ्नान्बहून्पश्यतः
क्लेशो योर्थिजनस्य वक्तुमनसो भूयात्स ते विद्विषाम् ॥

2568

श्लोकः कस्य ममैव साधु सुकवे भूयः सखे पठ्यता-
मस्यार्थः पुनरुक्तमेतदपरोप्येष प्रयोगोस्ति भोः ।
इत्येवं कुविदग्धवाक्यपरशुच्छिन्नोत्तमाशालता
दुःखं यत्कवयः प्रयान्ति नृपते तद्यान्तु ते शत्रवः ॥

2569

द्वारं वेत्रिभिरावृतं बहिरपि प्रक्लिन्नगण्डैर्गजै-
रन्तः कञ्चुकिभिः स्फुरन्मणिधरैरध्यासिता भूमयः ।
आक्रान्तं महिषीभिरेव शयनं त्वद्विद्विषां मन्दिरे
राजन्सैव चिरंतनप्रणयिनी शून्येपि राज्यस्थितिः ॥

2570

किं हास्येन न मे प्रयास्यसि पुरः प्राप्तश्चिराद्दर्शनं
नेयं निष्करुण प्रवासरुचिता केनासि दूरीकृतः ।

2506

यशःकुसुमवाटिका गुणनिधानमञ्जूषिका
कलाकमलदीर्घिका कलितदर्पबालाशनिः ।
द्विषत्तिमिरचन्द्रिका वरविलासिनीचेतसां
वशीकरणवर्तिका कुशलिनी तनुस्तावकी ॥

2507

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्येते भावा मदस्य च हेतवो
व्रजति पुरुषो यैरुन्मादं त एव तवाङ्कुशाः ॥

कवेरपि.

2508

यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रतां
त्वां प्रत्येव बिभर्ति यश्च किरति क्रूरध्वनिं निष्ठुरः ।
दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन्गुणं
विख्यातः स्फुटमेक एव हि भवान्सीमा गुणग्राहिणाम् ॥

2509

युष्मद्दन्तिबलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुवं
सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः ।
पृथ्वीन्द्रः स पृथुर्भवद्रणरसप्रेक्षोपनम्रामर-
श्रेणीमध्यचरः पुनः क्षितिधराक्षेपाय धत्ते धियम् ॥

एतौ श्रीहर्षस्य.

2510

देव त्वद्विजयं निराकृतभयं प्रौढप्रतापालयं
क्रान्तक्ष्मावलयं कृतारिविलयं श्रुत्वा सुराधीश्वरः ।
गुप्तं गच्छति नेच्छति प्रतिवचः प्रेम्णा गुरुं पृच्छति
त्राणं वाञ्छति मूर्छति प्रतिमुहुः शच्यां दृशं यच्छति ॥

कस्यापि.

2511

देव त्वद्यश एव किं सितसितं रामे शशाङ्के मरु-
द्वाहे स्वर्गगजे हरे फणिपतौ वाण्यां वृषे भे रुचिः ।
अन्येषां तु तदम्बरे तदुदरे तद्व्यञ्जने तन्मदे
तत्कण्ठे च तदीक्षणे तदलके तत्पोत्रके तत्पथि ॥

शाकल्यपल्लवस्य.

2512

त्वद्यात्रासमयेतिदुर्धरगतेः सैन्यस्य संमर्दतो
द्राक्पिष्टेपि शिरोगणे गुणयुगं जज्ञे फणाभृत्पतेः ।
प्रापद्भूपरमाणुभिस्तरलितैः कालुष्यमक्ष्णां न य-
द्भृङ्गस्य च कारणं यदभूणोस्रो पत्तिकोलाहलम् ॥

मल्लस्य.

2513

सङ्ग्रामाङ्गणसंगतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कौदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरमला कीर्त्या च लोकत्रयम् ॥

2514

देवाकर्णय नाकिनां पुरि नृणां लोके पुरे भोगिना-
मासन्केचन सन्ति केचन तथा स्थास्यन्ति ये केचन ।
तन्मध्ये न बभूव नास्ति भविता तादृङ्नीतौ नतौ
कान्तौ काव्यरतौ नुतौ रिपुहतौ कीर्तौ च यस्ते समः ॥

2515

भूपालाः शशिभास्करान्वयभुवः के नाम नासादिता
भर्तारं पुनरेकमेव हि भुवस्त्वां देव मन्यामहे ।
येनाङ्गं परिमृष्य कुन्तलमथाकृष्य व्युदस्यायतं
चोलं प्राप्य च मध्यदेशमधुना काञ्च्यां करः पातितः ॥

मयूरस्य.

2516

त्वं द्वित्राणि पदानि गच्छसि महीमुल्लङ्घ्य यान्ति द्विष-
स्त्वं बाणान्दश पञ्च मुञ्चसि निजान्मुञ्चन्ति शस्त्राणि ते ।
ते देवीपतयस्त्वदस्त्रनिहितास्त्वं मानुषीणां पति-
र्निन्दा तेषु कथं स्तुतिस्त्वयि कथं श्रीकर्ण निर्णीयताम् ॥

कस्यचिद्दाक्षिणात्यस्य.

2517

अर्थिभ्रंशवहूभवत्फलभरव्याजेन कुब्जायितो
देव त्वय्यतिदानभाजि कथमप्यास्तां स कल्पद्रुमः ।
आस्ते निर्व्ययरत्नसंपदुदयोदग्रः कथं याचक-
श्रेणीवर्जनदुर्यशोनिविडितव्रीडस्तु रत्नाचलः ॥

2518

दूरं श्वेतगुणैरहंकृतिभृतां जैत्राङ्ककारे चर-
त्यस्मिंस्त्वद्यशसि प्रयाति कुमुदं बिभ्यन्न निद्रां निशि ।
धम्मिल्ले किमु मल्लिकाद्य मनसां माल्यं भिया लीयते
पीयूषद्रवकैतवाद्धृतदरः शीतद्युतिः स्विद्यति ॥

2519

युष्मद्गन्धगजस्तृषाम्भसि भृशं कण्ठान्तमज्जत्तनुः
फेनैः पाण्डुरितः स्वदिक्करिजयक्रीडायशःस्पर्धिभिः ।
दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः कराम्भोवमि-
व्याजादभ्रमुवल्लभेन विरहं निर्वापयत्यम्बुधेः ॥

2520

आस्ते दामोदरीयामियमुदरदरीं यावलम्ब्य त्रिलोकी
संमातुं शक्तिमन्ति प्रथिमभरवशादत्र नो त्वद्यशांसि ।
तामेतां पूरयित्वा निरगुरिव मधुध्वंसिनः पाण्डुपद्म-
च्छद्मापन्नानि तानि द्विपदशनसनाभीनि नाभीपथेन ॥

2521

मयि स्थितिर्नम्रतयैव लभ्यते
दिगेव च स्तब्धतया विलङ्घ्यते ।

इतीव चापं दधदाशुगं क्षिप-
नयोपदेष्टासि रणे द्विषामपि ॥

2522

रिपूनवाप्यापि गतोवकीर्णितां
भवान्न यावज्जनरञ्जनव्रती ।
भृशं विरक्तानपि रक्तवत्तरा-
न्विकृत्य यत्तानसृजासृजद्युधि ॥

2523

न तूणादुद्धारे न गुणघटने न श्रुतिशिखं
समाकृष्टौ दृष्टिर्न वियति न लक्ष्ये न च भुवि ।
नृणां दृश्ये देव क्वचन विशिखान्किं तु पतित-
द्विषद्वक्षोरन्ध्रैरनुमितिरमून्गोचरयति ॥

2524

न पाहि पाहीति यदब्रवीरमुं
ममीष्ठ तेनैवमभूदिति क्रुधा ।
रणक्षितौ ते किमु शत्रुमूर्धभि-
र्विदश्य दन्तैर्निजमोष्ठमास्यते ॥

2525

भुजेपसर्पत्यपि दक्षिणे गुणं
महेषुणादाय पुरः प्रसर्पिणे ।
धनुः परीरम्भमिवातिसंमदा-
त्तवाहवे दित्सति वामबाहवे ॥

2526

देवारिप्रकरः शरश्च भवतः संख्ये पतन्तावुभौ
सीत्कारं च न संमुखौ रचयतः कम्पं च न प्राप्नुतः ।
तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्ति यन्मुक्तयो-
रेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतम् ॥

2527

तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्तृतां
शङ्के यत्प्रतिबिम्बमम्बुधिपयःपूरोदरे वाडवः ।
व्योमव्यापिविपक्षराजकयशस्तारापराभावुकः
कासां देव न स प्रतापतपनः पारं गिरां गाहते ॥

एते श्लोका नैषधकर्तुः श्रीहर्षस्य.

2528

श्रीसंनिधानविलसद्रुचिरब्जशङ्ख-
चक्राङ्कपाणिरसुरक्षणहारिचेष्टः ।
बह्वीः समा अबलभद्रपरोपि राज-
ञ्जीया अचिन्त्यचरितः पुरुषोत्तमस्त्वम् ॥

कपिलदामोदरस्य.

2529

एष विशेषः स्पष्टो वह्नेश्च त्वत्प्रतापवह्नेश्च ।
अङ्कुरति तेन दग्धं दग्धस्यानेन नोद्भवो भूयः ॥

2530

ददतो वाञ्छितमर्थं सदनुरक्ता तव गृहं त्यक्त्वा ।
स्त्रीचापलेन कीर्तिर्नभासक्ता गता ककुभः ॥

2531

भ्रमता पृथिवीमखिलामिदमाश्चर्यं मया दृष्टम् ।
धनदोपि नयननन्दन परिहरसि यदुग्रसंपर्कम् ॥

2532

इदमपरमद्भुततमं युवतिसहस्रैर्विलुप्यमानस्य ।
वृद्धिर्भवति न हानिर्यत्तव सौभाग्यकोषस्य ॥

2533

प्रकृतिलघोर्येन कृता जघन्यवर्णस्य गौरवापत्तिः ।
जघनचपला यदार्याः स पिङ्गलस्ते कथं तुल्यः ॥

2534

दैन्यमिदं यच्छ्लाघा क्रियते ते रक्षसापि न समस्य ।
न सबलमकरोद्योषिति भवांस्तु भुङ्क्ते प्रसह्य रिपुलक्ष्मीम् ॥

एते दामोदरगुप्तस्य.

2535

कुन्दः कन्दलितव्यथं विचकिलः कम्पाकुलं केतकः
सातङ्कं मदनः सदैन्यमलसं मुक्तोतिमुक्तद्रुमः ।
भोक्तुं किं तु न पारितस्तव रिपुस्त्रीभिः पुरीनिर्गमे
तत्कालं कृतमाधवीपरिणयः सत्केसरः केसरः ॥

शम्भोः.

2536

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥

2537

किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥

2538

अत्यन्तकृष्णः स विनिर्मलस्त्वं
स वामनः सर्वत उन्नतोसि ।
जनार्दनो यस्स दयापरस्त्वं
विष्णुः कथं वीर तवोपमानम् ॥

प० श्रीवकस्य.

2539

राजन्यशो हिममिषाच्छिशिरे यदासी-
द्भूमौ लसत्किमुत तस्तुलिसद्म यातम् ।

तत्राप्ययमादिव ततोद्य मधौ त्वदीयं
प्रोज्झिममाशु धरणेः कुसुमच्छलेन ॥

2540

मेघाडम्बरमम्बरं यदि तदा निर्नष्टशोभा वयं
नित्यं तीक्ष्णकरेण तेन दिवसे तत्राप्यहो बाधिताः ।
स्वामी नः शशभृत्क्षयोदयहतो दुःखादितीवागता
उद्याने नरदेव सेवनपराः पुष्पच्छलात्तारकाः ॥

2541

यद्ग्रीष्मो विलसत्प्रतापमहिमा यज्जीवनाढ्यो भृशं
संपन्नो घनकाल एष सफला चेयं शरन्निर्मला ।
हेमन्तः शिशिरो घनाम्बरधरस्त्वत्सेवयेत्याशया
पुष्पौघैः किमु देव सेवनपरः स्थैर्येच्छुरास्ते मधुः ॥

2542

श्रीमन्नाथ तवानने भगवती वाणी नरीनृत्यते
तद्द्रष्टुं कमला समागतवती लोलेति बद्धा गुणैः ।
कीर्तिश्चन्द्रकरीन्द्रदन्तकुमुदक्षीरोदनीरोपमा
त्रासादम्बुनिधिं विलङ्घ्य भवतो नाद्यापि विश्राम्यति ॥

दाक्षिणात्यस्य कस्यापि.

2543

अधर्ममन्यत्र महीतलेस्मि-
न्संक्षोभहेतुं मलिनं विचार्य ।
निष्कासनायास्य रुषेव देव
सितं यशः सर्वदिशः प्रयाति ॥

प° श्रीवकस्य.

2544

किं वृत्तान्तैः परगृहगतैः किं तु नाहं समर्थ-
स्तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः ।

गेहे गेहे विपणिषु तथा चत्वरे पानगोष्ठ्या-
मुन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः ॥

मातङ्गदिवाकरस्य.

2545

अनिःसरन्तीमपि गेहगर्भा-
त्कीर्तिं परेषामसतीं वदन्ति ।
स्वैरं चरन्तीमपि च त्रिलोक्यां
त्वत्कीर्तिमाहुः कवयः सतीं तु ॥

2546

आसीन्नाथ पितामही तव मही माता ततोनन्तरं
संप्रत्येव हि साम्बुराशिरशना जाया जयोद्भूतये ।
पूर्णे वर्षशते भविष्यति पुनः सैवानवद्या स्नुषा
युक्तं नाम समस्तशास्त्रविदुषां लोकेश्वराणामिदम् ॥

मातङ्गदिवाकरस्य.

2547

अव्यापाररता वसन्तसमये ग्रीष्मे व्यवायप्रियाः
सक्ताः प्रावृषि पल्वलाम्भसि नवे कूपोदकद्वेषिणः ।
कट्वम्लोष्णरताः शरद्यधिभुजो हेमन्तनिद्रालसाः
स्वैर्दोषैरपचीयमानवपुषो नश्यन्तु ते शत्रवः ॥

वैद्यहरिचन्द्रस्य.

2548

तन्वीमुज्झितभूषणां कलगिरं रोमोद्गमं बिभ्रतीं
वेपन्तीं व्रणिताधरां विवसनां सीत्कारमातन्वतीम् ।
दोर्भ्यां चण्डतुषारपातसभयामालिङ्ग्य कण्ठे भृशं
स्वां मूर्तिं दयितामिवातिरसिकां त्वद्विद्विषः शेरते ॥

2549

दानं दृढतरमुष्टेः श्रीरुज्झितकोषतो यशो मलिनात् ।
धाराधरात्प्रतापस्त्वदसेरतिचित्रमेतदवनिपते ॥

2550

नाकारमुद्वहसि नैव विकत्थसे त्वं
दित्सां न सूचयसि मुञ्चसि सत्फलानि ।
निःशब्दवर्षणमिवाम्बुधरस्य राज-
न्संलक्ष्यते फलत एव तव प्रसादः ॥

अयं मातृगुप्तस्य.

2551

इन्द्रो यच्छतमन्युरस्ति दहनो यत्पावकोप्यन्तकः
कीनाशो धनदो विमाननिरतः पाशी जलानां पतिः ।
ईशः कामहरश्चलो यदनिलो यन्नैर्ऋतो राक्षस-
स्तन्नान्योवनिलोकपाल भवतः कश्चित्समः स्याद्गुणैः ॥

प० श्रीवकस्य.

2552

देवोर्वीरमणेन्द्र पार्वणशशिद्वैराज्यसज्जं यशः
सर्वाङ्गोज्ज्वलशर्वपर्वतसितश्रीगर्वनिर्वासि यत् ।
तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजिश्रियः
पर्यायः किमु दुग्धसिन्धुपयसां सर्वानुवादः किमु ॥

2553

निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्थिकूटावट-
स्थानस्थायुकमौक्तिकोत्कराकिरः कैर्देव नायं करः ।
उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्गत्तुरंगक्षुर-
क्षुण्णासु क्षितिषु क्षिपन्निव यशःक्षोणीक्षबीजव्रजम् ॥

नैषधकर्तुः.

2554

उग्रग्राहमुदन्वतो जलमतिक्रामत्यनालम्बना
व्योम्नि भ्राम्यति दुर्गमक्षितिभृतां प्राग्भारमारोहति ।
कीर्णे याति विषाकुलैरहिकुलैः पातालमेकाकिनी
त्वत्कीर्तिर्यदतो नरेन्द्र कृतकं मन्ये भयं योषिताम् ॥

2555

उद्दामाम्बुदगर्हितान्धतमसप्रध्वस्तदिङ्मण्डले
काले यामिकजामदुमद्भुभटव्याकीर्णकोलाहले ।
कर्णस्याद्भुहदर्णवाम्बुवडवावह्नेर्यदन्तःपुरा-
दायातासि तदम्बुजाक्षि कृतकं मन्ये भयं योषिताम् ॥

कयोरपि.

2556

सा ख्यातास्ति जगत्त्रये सुरनदी सा शंभुचूडामणी
शेषा शेषतुषारसोमसुषमाचौरी गुणैर्निर्मलैः ।
युक्ता सा भवदीयकीर्तितुलनौचित्यं भजेत्सा न चे-
द्भूपालक्षणदेश संततमधोयानैकताना भवेत् ॥

प० कृष्णकस्य.

2557

दिग्दन्तावलमण्डली विदलति स्वर्णाद्रिरुत्कम्पते
क्षोणी क्षुभ्यति बिभ्यति प्रतिदिशं सर्वेपि रत्नाकराः ।
लङ्कातङ्कमुपैति शेवधिपतिः शङ्कां परां गाहते
दानाय त्वयि राजशेखरमणे दर्भं समुद्बिभ्रति ॥

दाक्षिणात्यस्य कस्यापि.

2558

यत्कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बते
जातं यद्वनकाननैकशरणप्राप्तेन दावाग्निना ।
एषा त्वद्भुजतेजसा विजितयोस्तावत्तयोरौचिती
धिक्तं वाडवमम्भसि क्षिपि भिया येन प्रविष्टं पुनः ॥

2559

अकर्णधाराभुगसंभृताङ्कतां
गतैररित्रेण विना तवारिभिः ।
विधाय तावत्तरणेर्भिदामहो
निमज्ज्य तीर्णः समरे भवार्णवः ॥

एतौ नैषधकर्तुः.

2560

अहं सदा प्राणसमं महीभुजां
स मां सदा वेत्ति नृपस्तृणोपमम् ।
इतीव कर्णेषु सुवर्णमर्थिनां
स्वखेदमाख्यातुमिवास्ति भूपते ॥

2561

त्वदाप्तचामीकरचारुभूषण-
प्रभावलीसंगमपिङ्गलत्विषाम् ।
समुन्मिषद्दाहभियेव दुर्गति-
र्जहाति सङ्गं ज्वलतामिवार्थिनाम् ॥

एतौ बिह्लणस्य.

2562

मुखेनेन्दुं धत्से सकलमकलङ्कं न शिरसा
द्विजिह्वः क्रूरोसौ निपतति न कर्णे न कटके ।
प्रभूताप्येषा ते जनयति न भूतिः परुषता-
मपूर्वं शर्वत्वं तव निरपवादं कुत इदम् ॥

कस्यापि.

2563

इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारि-
स्त्वन्नागानां मदजलमषीभाञ्जि गण्डस्थलानि ।
अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्ता-
न्याभान्त्येवं वद धवलितं किं यशोभिस्त्वदीयैः ॥

राजशेखरकवेः.

2564

कुरबक कुचाघातक्रीडारसेन वियुज्यसे
बकुलविटपिन्स्मर्तव्यं ते मुखासवसेचनम् ।
चरणघटनाभून्यो यास्यस्यशोक सशोकता-
मिति निजपुरत्यागे यस्य द्विषां जगदुः स्त्रियः ॥

रत्नाकरस्य.

2565

तीव्रातामरुचो रवेः कथमियं स्वप्नेपि संभावना
नो युक्त्यानुपतः प्रभातसलिलस्नानेन सोयं विधिः ।
सान्द्रानन्दविधायिशीतमधुरव्यापारगौरात्मना
नूनं त्वद्यशसैव संप्रति शशी शीर्णः पुनः पूरितः ॥

श्रीकल्लटकवेः.

2566

अर्थाकृष्टधियः पदं रचयतः शब्दावधानात्मनः
संधिच्छेदविधाननिर्गमविधिव्यापारमातन्वतः ।
मा मां कश्चिदिह ग्रहीदिति मुहुः साशङ्कमापश्यत-
श्चौरस्येव कवेर्भयं भवति यत्तद्विद्विषामस्तु वः ॥

2567

साशङ्कस्य समाकुलीकृतमतेरत्यन्तनिस्तेजसः
खिन्नाङ्गस्य विकम्पमानहृदयस्यारूढमन्योर्भृशम् ।
लज्जां संत्यजतः क्रमं विमृषतो विघ्नान्बहून्पश्यतः
क्लेशो योर्थिजनस्य वक्तुमनसो भूयात्स ते विद्विषाम् ॥

2568

श्लोकः कस्य ममैव साधु सुकवे भूयः सखे पठ्यता-
मस्यार्थः पुनरुक्तमेतदपरोप्येष प्रयोगोस्ति भोः ।
इत्येवं कुविदग्धवाक्यपरशुच्छिन्नोत्तमाशालता
दुःखं यत्कवयः प्रयान्ति नृपते तद्यान्तु ते शत्रवः ॥

2569

द्वारं वेत्रिभिरावृतं बहिरपि प्रक्लिन्नगण्डैर्गजै-
रन्तः कञ्चुकिभिः स्फुरन्मणिधरैरध्यासिता भूमयः ।
आक्रान्तं महिषीभिरेव शयनं त्वद्विद्विषां मन्दिरे
राजन्सैव चिरंतनप्रणयिनी शून्येपि राज्यस्थितिः ॥

2570

किं हास्येन न मे प्रयास्यसि पुरः प्राप्तश्चिराद्दर्शनं
नेयं निष्करुण प्रवासरुचिता केनासि दूरीकृतः ।

स्वप्नान्तेष्विति ते वचः प्रियतमव्यासक्तकण्ठग्रहो
बुद्ध्वा रोदिति शून्यबाहुयुगलस्तावद्रिपुस्त्रीजनः ॥

2571

तं राजानमकाण्ड एव चपले त्यक्त्वा तथा वल्लभं
पश्चात्तापविदीर्यमाणहृदया किं सांप्रतं रोदिषि ।
इत्थं वृष्टिजलप्रवाहनयना शून्ये पुरे विद्विषां
चित्रस्था पुरतो विलोक्य पथिकैर्लक्ष्मीस्तवालभ्यते ॥

2572

आक्षिप्तैः प्रतिपक्षभूमिपतिभिः क्रुद्धेन देव त्वया
विन्यस्तैर्न महायुधानि विविधान्याविष्क्रियन्ते युधि ।
दूरावर्जितमौलयस्तव पुरस्तन्वन्ति ते केवलं
नानाकारकिरीटरत्ननिकरैरिन्द्रायुधानि क्षितौ ॥

2573

कस्मात्सत्यवतीसुतेन मुनिना नोक्तं भविष्यत्कथा-
मध्ये रूपमनादिमध्यनिधनस्येदं हरेर्मानुषम् ।
इत्थं व्युत्थितविश्वकण्टकचमूनिर्मूलनव्यापृतं
संग्रामाम्बरसूर्यमम्बरचरास्त्वां वीक्ष्य संशेरते ॥

एते केषामपि ।

2574

सौभाग्यस्य समर्पणेन तिमिरातङ्कच्छिदा तेजसा
सामर्थ्येन विषानलादिजयिना तैस्तैस्तथान्यैर्गुणैः ।
श्लाघ्यत्वं दधते नृपैः शिरसि ये सर्वैर्धृतास्तान्मणी-
न्पद्भ्यां संस्पृशसीत्यहो फलमिदं नीतेरवाप्तं त्वया ॥

अमृतदत्तस्य ।

2575

अम्भोराशिरिवासि सत्त्वनिलयो नो मन्दरक्षोभवा-
न्कल्याणप्रकृतिः सुमेरुरिव किं देवः सुरापाश्रयः ।
सच्छायो न तु रूढदुस्तरलतस्त्वं कल्पवृक्षो यथा
तैः कुर्वन्ति तुलां तथापि भवतो मूढाः कवीनां धियः ॥

2576

नो कामः प्रतिहन्यते प्रणयिनां स्वप्नेऽपि नाथ त्वया
नैवाधः कुरुषे वृषं द्विरसना व्याला न ते वल्लभाः ।
नो बह्व्यस्तव मूर्तयो न च तनुर्नित्यं जडानुग्रह-
व्यग्रा नो विषमा च दृक्कथमथ च ख्यातः क्षितावीश्वरः ॥

2577

राजश्रीः समलंकृता तव धिया सा चापि विद्वत्तया
विद्वत्ता नयवित्तया परमया नीतिश्च शौर्येण ते ।
शौर्यं ते यशसा यशश्च चरितैश्चेष्टाश्च ते तेजसा
तेजश्च स्वकुलोद्गतं कुलमपि श्लाघ्यं भवज्जन्मना ॥

2578

गर्जित्वा बहुदूरमुन्नतिभृतो मुञ्चन्ति वार्यम्बुदा
भद्रस्यापि गजस्य दानसमये संजायते दुर्मदः ।
पुष्पाडम्बरयापनेन ददति प्रायः फलानि द्रुमा
नोत्सेको न मदो न कालहरणं दानप्रवृत्तस्य ते ॥

एते केषामपि.

2579

मर्यादानियमो द्वयोरपि धृता द्वाभ्यामपीयं मही
भीतैर्भोगिभिरप्युभावनुगतौ रत्नाकरौ द्वावपि ।
एवं ते जलधेश्च तुल्यगुणयोरेको विशेषो महा-
ल्लावण्यातिशयेन यत्स विरसस्तेनैव हृद्यो भवान् ॥

बन्धोः.

2580

बद्धाः केचिदधोमुखत्वमपरे नीताः समारोपिताः
केचित्संभृतविग्रहा अपि बलादानीय रिक्तीकृताः ।
अन्ये बन्धनतश्चिरात्कथमपि भ्रष्टा निरालम्बना-
स्त्वच्चक्रे रिपवोऽरघट्टघटिकायन्त्रक्रमं बिभ्रति ॥

2581

निष्पार्ष्णि करपीडनेन गमिताश्चक्रच्युतास्ताडिता
दग्धा भूतिकृतास्पदेन भवता नित्यं प्रतापाग्निना ।
बद्धाः कण्ठतलेषु रज्जुवलयैर्भूयो धरां माहिता
भग्नाः संप्रति नाथ पार्थिवघटाः किं कर्परैर्वीक्षितैः ॥

2582

यान्त्येके परपुष्टतां बलिभुजो भ्राम्यन्ति केचिन्मही-
मन्ये बिभ्रति लावकत्वमपरे जाता वने वर्तकाः ।
केचित्खञ्जनका भवन्ति सभयैर्मार्गप्रयाणैरहो
तिर्यक्त्वामपि लम्भितैस्त्वदरिभिर्लब्धा न पक्षोन्नतिः ॥

2583

क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः पातितयावकैरिव गलद्बाष्पाम्बुधौताननाः ।
भीता भर्तृकरावलम्बितकरास्त्वच्छत्रुनार्योऽधुना
दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ॥

2584

यल्लावण्यमयत्वमेव जलधेर्जातं परं दूषणं
यच्चैषा शशलक्ष्मणः परिणता पृथ्वी कलङ्कायते ।
यत्संकल्पफलप्रदोऽप्यहृदयश्चिन्तामणिर्वेधसा
तत्त्वामप्रतिसंविधातुमनसा साकूतमाचेष्टितम् ॥

2585

आमोदाहतभृङ्गपक्षपवनप्रेङ्खद्रजःपिञ्जरे
पद्मे श्रीर्वसतीति नाद्भुतमिदं रम्यं प्रकृत्यैव तत् ।
तच्चित्रं यदरातिकण्ठरुधिरप्रक्लिन्नतीक्ष्णस्फुर-
द्धारेऽसौ भवतश्चिरं निवसति खड्गेऽपि दृष्टा सती ॥

2586

तन्वी विग्रहिणी कलङ्करहिता मुक्ताफलालंकृता
सद्वंशा गजगामिनी पुलकिता दन्तप्रभाभासिता ।

श्यामा चारुपयोधरा सुरुचिरा पुंसां मनोहारिणी
कामं वक्षसि ते पतत्वहरहः खड्गाग्रधारा रिपोः ॥

2587

ते गच्छन्ति महापदं भुवि पराभूतिः समुत्पद्यते
तेषां तैः समलंकृतं निजकुलं तैरेव लब्धा क्षितिः ।
तेषां द्वारि नदन्ति वाजिनिवहास्ते भूषिताः प्रत्यहं
ये दृष्टाः परमेश्वरेण भवता तुष्टेन रुष्टेन वा ॥

2588

सिक्तायां वीरकण्ठस्थलबहलगलद्रक्तधाराम्बुवर्षै-
र्माद्यन्मातङ्गकुम्भोद्दलनविलुलितैर्मौक्तिकैः पुष्पितायाम् ।
संग्रामोद्यानभूमौ तुरगखुरमुखोत्खातकृष्टस्थलायां
जातं त्वत्खड्गवल्ल्यां फलमतुलरसास्वादहृद्यं जयश्रीः ॥

2589

भास्वद्रत्नप्रदीपे वरशयनगतो वासवेश्मन्युदारे
कान्तामालिङ्ग्य तुङ्गस्तनकलशयुगस्पर्शरोमाञ्चिताङ्गः ।
स्वप्ने नीवीं विमोक्तुं चपलयति करं यावदुत्कस्तवारि-
स्तावत्प्रस्तारकान्तस्थितकठिमकुशप्रान्तविद्धो विबुद्धः ॥

2590

न प्राप्तो रत्नपात्रस्थितमधुकणिकासंगमामोदलाभो
नो वा नारीकपोले विलसितममले कर्णपूरीकृतेन ।
इत्थं त्वच्छत्रुगेहे वनकरिकषणोन्मूलितं दीर्घिकावा-
मुच्चैः किंजल्करेणुभ्रमदलिविरुतैरुत्पलं रोदितीव ॥

2591

माहं तुल्यः कृतेन प्रसभमकपटाक्रान्तलोकः प्रभुर्मे
त्रेता नैवास्मि यस्मान्मम भुवनपतिर्नैव दारापहारी ।
का स्पर्धा द्वापरे मे स्वजनसुतसुहृद्बन्धुघाती न देवो
राजन्नित्थं कृतादीनुपहसति कलिस्त्वद्यशोभुच्छलेन ॥

केषामपि.

2592

वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः ।
वाहिन्यः पार्श्वमेताः सुचिरपरिचिता नैव मुञ्चन्त्यभीक्ष्णं
स्वच्छेन्तर्मानसेस्मिन्कथमवनिपते तेम्बुपानाभिलाषः ॥

बाणस्य.

2593

प्रोद्यद्बालाङ्कुरश्रीर्दिशि दिशि दशनैरेभिराशागजानां
रोहन्मूलातिगौरैरुरगपतिफणैरत्र पातालकुक्षौ ।
अस्मिन्नाकाशदेशे विकसितकुसुमा राशिभिस्तारकाणां
नाथ त्वत्कीर्तिवल्ली फलति फलमिदं बिम्बमिन्दोः सुधार्द्रम् ॥

वसुधरस्य

2594

आ स्वर्लोकादुरगनगरं नूतनालोकलक्ष्मी-
मातन्वद्भिः किमिव सिततां चेष्टितैस्ते न नीतम् ।
अप्येतासां रमणविरहे विद्विषत्कामिनीनां
यैरानीता नखपदमयी मण्डना पाण्डिमानम् ॥

कस्यापि.

2595

लग्नं रागावृताङ्ग्या सुदृढमपि यथैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्सक्तोयं न किंचिद्गणयति विदितं तेस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिव गतेत्यम्बुधिं यस्य कीर्तिः ॥

हर्षदत्तस्य.

2596

शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नाथ दोषाकरश्री-
र्वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टनी खड्गयष्टिः ।
आज्ञेयं सर्वगा ते प्रविलसति पुरो वृद्धया किं मया ते
प्रोच्येवेत्थं प्रकोपाच्छशिकरसितया यस्य कीर्त्या प्रयातम् ॥

2597

तन्मे निष्प्रभयत्वं स खलपरिचयः सा परेष्वभ्यसूया
तत्स्वभ्रूविभ्रमोत्थं सहजमपि तथा चापलं लोकनिन्द्यम् ।
सर्वं सद्वृत्तयोगादपगतमधुना तात नैवास्मि शोच्या
लक्ष्मीर्संदेशमेवं गदितुमिव मता कीर्तिरम्भोनिधिं ते ॥

2598

शान्त्यै दर्पवतां जयाय जगतां संपत्तये याचतां
संमानाय सतां हिताय महतां तापाय पृथ्वीभृताम् ।
सोल्लासेन सकौतुकेन शमितध्यानेन दूरीकृत-
स्वाध्यायेन समाप्तसर्वतपसा त्वं वेधसा निर्मितः ॥

भवं शंभुकवेः.

2599

आकाराहीनकान्तिर्निधनविरहितो योगदोल्लासभागी
विक्रान्तो विश्वतुल्यः कमलकलितदृग्विभ्रमोत्कृष्टमूर्तिः ।
नानाशापूर्णकीर्तिः सुखरसमयितो वारणाक्रान्तदेहो
यादृग्देव त्वमेवं भवतु रिपुगणोप्यादिवर्णप्रलोपात् ॥

पं॰श्रीवकस्य.

2600

शौर्यश्रीकेशपाशः करिवदनमिलन्मौक्तिकव्यक्तपुष्पः
क्षोणीरक्षाभुजंगः कुलशिखरिलुठत्कीर्तिनिर्मोकपट्टः ।
शत्रुव्रातप्रतापप्रलयजलधरः स्फारधाराकरालः
प्रीत्या लक्ष्मीकटाक्षः कुवलयविजयी देवपाणौ कृपाणः ॥

कस्यापि.

2601

धूलीभिर्दिवमन्धयन्बधिरयन्नाशाः खुराणां रवै-
र्वातं संयति खञ्जयञ्जवजयैः स्तोतॄन्गुणैर्मूकयन् ।
धर्मोपार्जनसंनियुक्तजगता देव त्वयाधिष्ठितः
सान्द्रोत्फालमिषाद्विगायति पदा स्प्रष्टुं तुरंगोपि गाम् ॥

2602

विश्राणे रणचत्वरादरिगणे त्रस्ते समस्ते पुनः
कोपात्कोपि निवर्तते यदि भटः कीर्त्या गजत्युद्भटः ।
आगच्छन्नपि संमुखं विमुखतामेवाधिगच्छत्यसौ
देव त्वच्छुरिकारयेण झटिति च्छिन्नापसर्पच्छिराः ॥

2603

अन्तः संतोषबाष्पैः स्थगयति न दृशस्ताभिराकर्णयिष्य-
न्नङ्गे नानस्तिलोमा रचयति पुलकश्रेणिमानन्दकन्दाम् ।
न क्षोणीभङ्गभीरुः कलयति स शिरःकम्पनं तत्र विघ्नः
शृण्वंस्त्वत्कीर्तिपूरान्कथमुरगपतिः प्रीतिमाविष्करोति ॥

2604

युष्मद्भीतारिनारी गिरिबिलविलसद्वासरा निःसरन्ती
स्वक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थितोन्निद्रचन्द्रा ।
आक्रन्दद्भूरि यत्तन्नयनजलमिलच्चन्द्रहंसानुबिम्ब-
प्रत्यासत्तिप्रहृष्यत्तनयविहसितैराश्वसीत्श्वसीच्च ॥

2605

द्वेष्याकीर्तिकलिन्दशैलसुतया मग्ना भवद्दोर्द्वयी-
कीर्तिश्रेणिमयी समागममगाद्गङ्गा रणप्राङ्गणे ।
तत्तस्मिन्विनिमज्ज्य बाहुजभटैरारम्भि रम्भापरी-
रम्भानन्दनिकेतनन्दनवनक्रीडादराडम्बरः ॥

2606

आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्तिः
सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रतापः ।
त्वत्तो वीरः परः कः पदयुगयुगपत्पातिभूपातिभूय-
श्चूडारत्नोडुपत्नीकरपरिचरणानन्दनन्दन्नखेन्दुः ॥

एते नैषधकर्तुः.

2607

अपारपुलिनस्थलीभुवि हिमालये मालये
निकामविकटोन्नते दुरधिरोहणे रोहणे ।

महत्यमरभूधरे गहनकंदरे मन्दरे
भ्रमन्ति न पतन्त्यहो परिणता भवत्कीर्तयः ॥

2608

उर्वीं मौर्वीकिणभृति भवद्दोष्णि बिभ्रत्यशेषां
शान्तक्लान्तिः किमपि कुरुते नर्मणा कर्म कूर्मः ।
कृत्वा लीलापुलिनलवलीपल्लवग्रासगोष्ठीं
दिङ्मातङ्गाः सममथ सरिन्नाथपाथः पिबन्ति ॥

2609

किं मौनं ननु मेनके किमु रुजं धत्से शचि क्षामता
केयं वाचि घृताचि साचि किमिदं रम्भे मुखाम्भोरुहम् ।
याते त्वच्चरितामृते श्रुतिपथं गीर्वाणवामभ्रुवा-
मेवं देव खरस्मरज्वरजुषामुक्ताः सखीभिर्गिरः ॥

2610

यो वैरिष्वनलो नलो वसुमतीदीपो दिलीपोथ यो
यो मानेन पृथुः पृथुर्जगति यो निर्लाघवो राघवः ।
यः कीर्तौ भरतो रतो नृपगुणैर्यः शंतनुः शन्तनुः
संजाते त्वयि कस्य न क्षितिपते सर्वेपि ते विस्मृताः ॥

2611

कर्पूरैरिव पारदैरिव सुधास्यन्दैरिव प्लाविते
जाते हन्त दिवापि देव ककुभां गर्भे भवत्कीर्तिभिः ।
धृत्वाङ्गे कवचं निबध्य शरधिं कृत्वा पुरो माधवं
कामः कैरवबान्धवोदयधिया धुन्वन्धनुर्धावति ॥

2612

व्याप्तव्योमतले मृगाङ्कधवले निर्धौतदिङ्मण्डले
देव त्वद्यशसि प्रशान्ततमसि प्रौढे जगत्प्रेयसि ।
कैलासन्ति महीभृतः फणभृतः शेषन्ति पाथोधयः
क्षीरोदन्ति सुरद्विपन्ति करिणो हंसन्ति पुंस्कोकिलाः ॥

2613
चैत्रं मा स्मर विस्मर स्मर रतिं किं सायकैर्मारकै-
र्गोधां मुग्ध बधान किं च जहिहि ज्याबन्धधीरं धनुः ।
देवेस्मिन्हि मुहुः स्मृतेपि न मतिर्नैव स्मृतिर्न स्थिति-
र्नासक्तिर्न धृतिर्न निर्वृतिरपि क्वाप्यस्ति वामभ्रुवाम् ॥

2614
पद्भ्यामटितुमशक्ता निजभुवि मणिकुट्टिमेषु या चित्रम् ।
सा ते कथमरिवनिता कण्टकविकटाटवीष्वटति ॥

2615
आलेख्यं निजमुल्लिलेख विजने सोल्लेखया रेखया
संकल्पानकरोद्विकल्पबहुलाकल्पाननल्पानपि ।
अद्राक्षीदपरप्रजापतिमतं चक्रे च तीव्रं व्रतं
त्वन्निर्माणविधौ कियन्न विदधे बद्धावधानो विधिः ॥

2616
कंदर्पे नडकूबरे कुमुदिनीकान्तेप्यवज्ञावतां
त्वत्सौन्दर्यकथासु तासु मरुतां वृत्तासु कौतूहलात् ।
प्राप्ता तानवमुर्वशी रतिरतिक्रान्ता हता रोहिणी
जाता किं च खरस्मरज्वरभरारम्भापि रम्भातनुः ॥

2617
सोल्लासा अपि सोद्यमा अपि घनोत्कण्ठा अपि क्वापि नो
यान्ति श्यामनिशान्तरेपि रमणोपान्तं कुरङ्गीदृशः ।
सद्यस्त्वद्यशसा हि कुञ्जररदच्छेदच्छविच्छादिना
नीतं कान्तपुरंध्रिकुन्तलभरश्यामं विरामं तमः ॥

2618
उल्लेखं निजमीक्षते भणितिषु प्रौढिं परां शिक्षते
संधत्ते पदसंपदः परिचयं धत्ते ध्वनेरध्वनि ।
वैचित्र्यं विचिनोति वाचकविधौ वाचस्पतेरन्तिके
देव त्वद्गुणवर्णनाय कुरुते किं किं न वाग्देवता ॥

2619

श्रीखण्डद्रवनिर्झरन्ति हृदये पीयूषकल्लोलिनी-
निष्यन्दन्ति तनौ रसायनरसस्यन्दन्ति कर्णान्तरे ।
नासीरप्रसरन्ति दिक्परिसरे भूमण्डले मौक्तिक-
प्रस्तारन्ति सुधाकरन्ति गगनोत्सङ्गे भवत्कीर्तयः ॥

2620

किं राकेन्दुकरच्छटाभिरुदितं किं मौक्तिकैरुद्गतं
किं मल्लीमुकुलैः स्मितं विकसितं किं मालतीकुड्मलैः ।
स्वैं किं रमणीविलासहसितैः किं तत्र कीर्णं सुधा-
स्यन्दैर्यत्र जगत्त्रयैकतिलक भ्रान्तं भवत्कीर्तिभिः ॥

2621

नोद्दामानि दिशां मुखानि न घनाभोगा नभोमण्डली
नैवोत्तालतलं रसातलतलं पृथ्वी न पृथ्वी पुनः ।
एतद्देव कथं नु कुञ्जररदच्छेदावदातास्तव
स्वैरं यान्ति च मान्ति च श्रुतिसुधाधारामुचः कीर्तयः ॥

2622

औदार्यं सधने नयोथ सुजने लज्जा कुलस्त्रीजने
सत्काव्यं वदने मदो द्विरदने पुंस्कोकिलः कानने ।
रोलम्बः कमले नखाङ्कुरचना कान्ताकपोलस्थले
तन्वी तल्पतले भवानपि विभो भूमण्डले मण्डनम् ॥

2623

कण्ठान्तः क्वणितं दिवाकरकरक्लान्त्या रजोविप्लवै-
स्तन्नेत्राञ्चलकुञ्चनं शितकुशप्रान्तक्षतैः सीत्कृतिः ।
श्वासोर्मिप्रचयो वनेचरभिया त्वद्वैरिवामभ्रुवा-
मेवं देव मरुस्थलीषु सुरतक्रीडानुरूपः क्रमः ॥

2624

रूपं यन्मदने द्युतिः शशिनि या गम्भीरता याम्बुधौ
यो मेरौ गरिमाथ या कमलिनीकान्ते प्रतापोन्नतिः ।

यो लक्ष्मीरमणे च विक्रमगुणस्तत्सर्वमेकत्र चे-
द्द्रष्टुं वाञ्छसि दृश्यतामयमितो देवस्त्रिलोकीमणिः ॥

2625

स ख्यातो जगति त्रिविक्रम इति त्वाद्विक्रमा भूरय-
स्तेनैको निहतो बलिर्बलिशतध्वंसी भुजस्तावकः ।
तं वैकुण्ठमवैति को न जगतीं जेतुं त्वकुण्ठो भवा-
नस्त्येवं महदन्तरं तव तथा देवस्य दैत्यद्रुहः ॥

2626

प्रालेयैः स्नपयन्ति कल्पलतिकाः सेकाननेकानथ
श्रीखण्डाम्बुगलज्जलैरविरलैस्तन्वन्ति संतानके ।
सान्द्रैश्चन्द्रमणिद्रवैरपि विभो मन्दारवल्लीमलं
सिञ्चन्त्यद्य भवत्प्रतापदहनत्रासेन नाकाङ्गनाः ॥

2627

कान्तारेषु च काननेषु च सरित्तीरेषु च क्ष्माभृता-
मुत्सङ्गेषु च पत्तनेषु च सरिद्भर्तुस्तटान्तेषु च ।
भ्रान्ताः केतकगर्भपल्लवरुचः श्रान्ता इव क्ष्मापते
कान्ते नन्दनकन्दलीपरिसरे रोहन्ति ते कीर्तयः ॥

2628

राकेन्दोरुदयः किमेष किमयं गौरीगुरुर्वा गिरिः
क्षीरोदः किमयं किमेष पुरजिल्लीलाविलासोरगः ।
किं मन्थाद्रिरयं सुधाजलनिधेर्धौतस्तरङ्गैरिति
त्वत्कीर्तौ वसुधापुरंदर गताः संदेहिनो देहिनः ॥

एते शंभुकवेः

2629

सिन्धोर्जैत्रमयं पवित्रमसृजस्त्वत्कीर्तिपूर्ताद्भुतं
यत्र स्नान्ति जगन्ति सन्ति कवयः के वा न वाचंयमाः ।
यद्बिन्दुश्रियमिन्दुरञ्चति जलं चाविश्य दृश्येतरो
यस्यासौ जलदेवता स्फटिकभूर्जागर्ति यागेश्वरः ॥

2630

युष्मत्कीर्तिविवर्तधौतनिखिलत्रैलोक्यनिर्वासितै-
र्विश्रान्तिः कलिता कथासु जरतां श्यामैः समस्तैरपि ।
जज्ञे कीर्तिमयादहो भयभरैरस्मादकीर्तेः पुनः
सेयं नास्य कथापथेपि मलिनच्छाया बबन्ध स्थितिम् ॥

श्रीहर्षस्य.

2631

सुराणां पातासौ स पुनरतिपुण्यैकरसिको
महस्तस्यास्थाने गुरुरुचितमार्गे स निरतः ।
करस्तस्यात्यन्तं स्पृशति शतकोटिप्रणयितां
स सर्वस्वं दाता तृणमिव सुरेशं विजयते ॥

सुबन्धोः.

2632

कृष्णोयं मथनार्तिकृत्प्रतिदिनं सुप्तोस्य किं सेवया
सेव्योन्योन्तरविद्ययापरमतिर्नित्यप्रबुद्धो मया ।
इत्थं ह्याकलयन्विलोक्य हि तथा प्राप्तं यशस्तावकं
राजन्क्षीरनिधिस्तुषारकपटात्सेवार्थमेवागतः ॥

2633

श्रीजैनोल्लाभदीनार्थं श्लोकोयं चाटुमिश्रितः ॥
श्रीबकेन मयाकारि वारिदे हिमवर्षिणि ॥

2634

आसीददभ्रशरदभ्रमिषाद्यशस्ते
नाके भ्रमन्नृप यदभ्रमुकान्तशुभ्रम् ।
तत्पुष्पवर्षणमिवाप्सरसां द्युलोके
व्यामोत्यमादिव भुवं तुहिनच्छलेन ॥

अस्यैव.

2635

श्रीमद्भूरमणेन्द्र तावकयशःपीयूषपोषोद्धतो
राहोर्यद्ग्रहणागतस्य गिलनं चक्रे क्रुधा प्रत्युत ।

सोयं भुक्तसुधो यदस्य जठराजीर्णो दरीदृश्यते
मन्ये तेन गतः शशी निलयतां लावण्यमालिन्ययोः ॥

त्रिभिः पादैः समस्यापूरणं श्रीबकस्य.

2636

सहृदयगिरामानर्थक्यप्रसङ्गभयेन किं
किमुत तरुणीदृङ्निर्माणप्रयोजनकाम्यया ।
बहुमततरं स्वं विज्ञानं विधातुमथाभव-
त्तव नरपते सर्गारम्भे विधिर्विहितोद्यमः ॥

श्रीभर्तृसारस्वतस्य.

2637

पातालं परिपालयत्यहिपतौ वाताशिनो भोगिनः
शक्रे शासति नाकलोकममराः सत्राशनं भुञ्जते ।
क्षोणीशे त्वयि रक्षति क्षितिमिमां प्रख्यातकीर्तौ सदा
मृष्टान्नं मृदुलाम्बरं बहु सुखं सर्वे लभन्ते जनाः ॥

कस्यापि.

2638

भोगीन्द्रः प्रमदोत्तरङ्गमुरगीसंगीतगोष्ठीषु ते
कीर्तिं देव शृणोतु विंशतिशती यच्चक्षुषां वर्तते ।
रक्ताभिः सुरसुन्दरीभिरभितो गीतां तु कर्णद्वयी-
दुःस्थः श्रोष्यति नाम किं स हि सहस्राक्षो न चक्षुःश्रवाः ॥

मुरारेः.

2639

शंभुर्मानससंनिधौ सुरधुनीं मूर्ध्ना दधानः स्थितः
श्रीकान्तश्चरणस्थितामपि वहन्नेतां निलीनोम्बुधौ ।
मग्नः पङ्करुहे कमण्डलुगतामेतां वहन्नब्जभू-
र्मन्ये वीर तव प्रतापदहनं ज्ञात्वोल्बणं भाविनम् ॥

2640

देव त्वद्भुजदण्डदर्पगरिमोद्गारप्रतापानल-
ज्वालापङ्क्तिमकीर्तिपारदघटीविस्फोटिनो बिन्दवः ।

शेषाहिः कति तारकाः कति कति क्षीराम्बुधिः कत्यपि
प्रालेयाचलशङ्खशुक्तिकरकाकर्पूरकुन्देन्दवः ॥

एतौ श्रीहनुमतः.

अथ नीतिपद्धतिः

2641

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते ।
स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति ॥

2642

उपकारः परो धर्मः परोर्थः कर्मनैपुणम् ।
पात्रे दानं परः कामः परो मोक्षो वितृष्णता ॥

2643

स धर्मो यो निरुपधः सोर्थो यो न विरुध्यते ।
स कामः सङ्गहीनो यः स मोक्षो येपुनर्भवः ॥

2644

अविद्यानाशिनी विद्या भावना भवनाशिनी ।
दारिद्र्यनाशनं दानं शीलं दुर्गतिनाशनम् ॥

2645

गतेपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः ।
इह चेत्स्यान्न फलदा फलदा सान्यजन्मनि ॥

2646

अत्यार्यमतिदातारमतिशूरमतिव्रतम् ।
प्रज्ञाभिमानिनं चैव श्रीर्भयान्नोपसर्पति ॥

2647

नालसाः प्राप्नुवन्त्यर्थान्न क्लीबा न च मानिनः ।
न च लोकरवाद्भीता न च शश्वत्प्रतीक्षिणः ॥

2648

यः समुत्पतितं क्रोधं मानं चापि नियच्छति ।
स श्रियो भाजनं पुंसां यथापत्सु न मुह्यति ॥

2649

वश्येन्द्रियं जितात्मानं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते ॥

2650

अनागतविधातारमप्रमत्तमकोपनम् ।
चिरारम्भमदीनं च नरं श्रीरुपतिष्ठति ॥

2651

जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु तेषु लोकोयं ननु कृत्स्नस्त्वया जितः ॥

2652

यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यो गां चरन्तीं निवारय ॥

2653

सुहृदोप्यरयस्तस्य यस्यात्मा दुरधिष्ठितः ।
अजीर्णे पथ्यमप्यन्नं व्याधये मरणाय वा ॥

2654

भीरुः पलायमानोपि नान्वेष्टव्यो बलीयसा ।
कदाचिच्छूरतामेति मरणे कृतनिश्चयः ॥

2655

तेजस्विनि क्षमोपेते नातिकार्कश्यमाचरेत् ।
अतिनिर्मथनाद्वह्निश्चन्दनादपि जायते ॥

2656

असहायः समर्थोपि तेजस्वी किं करिष्यति ।
निवाते ज्वलितोप्यग्निः स्वयमेव प्रशाम्यति ॥

2657

कृत्वा बलवता वैरमात्मानं यो न रक्षति ।
अपथ्यमिव तद्भुक्तं तस्यानर्थाय केवलम् ॥

2658

कारणात्प्रियतामेति द्वेष्यो भवति कारणात् ।
अर्थार्थी जीवलोकोयं न कश्चित्कस्यचित्प्रियः ॥

2659

नास्ति जात्या रिपुर्नाम मित्रं चापि न विद्यते ।
सामर्थ्ययोगाज्जायन्ते मित्राणि रिपवस्तथा ॥

2660

अकृत्वा परसंतापमगत्वा खलनम्रताम् ।
अनुत्सृज्य सतां मार्गं यत्स्वल्पमपि तद्बहु ॥

2661

अप्रार्थितानि दुःखानि यथैवायान्ति देहिनम् ।
सुखानि च तथा मन्ये दैन्यमत्रातिरिच्यते ॥

2662

यदभावि न तद्भावि यद्भावि न तदन्यथा ।
इति चिन्ताविषघ्नोयमगदः किं न पीयते ॥

2663

आगमिष्यन्ति ते भावा ये भावा मयि भाविनः ।
अहं तैरनुगन्तव्यो न तेषामन्यतो गतिः ॥

2664

धनमस्तीति वाणिज्यं किंचिदस्तीति कर्षणम् ।
सेवा न किंचिदस्तीति नाहमस्मीति साहसम् ॥

2665

नोदन्वानर्थितामेति न चाम्भोभिर्न पूर्यते ।
आत्मा तु पात्रतां नेयः पात्रमायान्ति संपदः ॥

2666

प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।
एतद्विज्ञाय सामर्थ्यं न बालैः समतामियात् ॥

2667

पुत्रैर्मित्रैर्गृहैर्वापि वियुक्तस्य धनेन वा ।
मग्नस्य व्यसने कृच्छ्रे पुंसः श्रेयस्करी धृतिः ॥

2668

दुःखी दुःखाधिकान्पश्येत्सुखी पश्येत्सुखाधिकान् ।
आत्मानं हर्षशोकाभ्यां शत्रुभ्यामिव नार्पयेत् ॥

2669

सुप्रशमपि चेच्छूरमृद्धिर्मोहयते नरम् ।
वर्तमानः सुखे सर्वो नावैतीति मतिर्मम ॥

2670

येऽर्थाः क्लेशेन देहस्य धर्मस्यातिक्रमेण च ।
अरेर्वा प्रणिपातेन मा स्म तेषु मनः कृथाः ॥

2671

गुणेषु यत्नः क्रियतां किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥

2672

गुणाः खलु गुणा एव न गुणा धनहेतवः ।
अर्थसंचयकर्तॄणि भाग्यानि पृथगेव हि ॥

2673

गुणाः खलु गुणा एव न गुणाः फलहेतवः ।
सगुणो निष्फलश्चापो निर्गुणः सफलः शरः ॥

2674

आत्मायत्ते गुणादाने नैर्गुण्यं वचनीयता ।
दैवायत्तेषु वित्तेषु पुंसः का नाम वाच्यता ॥

एते भगवद्व्यासमुनेः

2675

काकतालीययोगेन यदनात्मवति क्षणम् ।
करोति प्रणयं लक्ष्मीस्तत्तस्याः स्त्रीत्वचापलम् ॥

2676

नोपभोक्तुमपि क्लीबो जानात्युपचितां श्रियम् ।
ग्राम्यो विरागयत्येव रमयन्नपि कामिनीम् ॥

2677

यच्छक्तावप्युपेक्षन्ते कदाचिदपकारिणम् ।
समूलकाषं कषितुमुपायोसौ न मूढता ॥

2678

उत्पन्नपरितापस्य बुद्धिर्भवति यादृशी ।
तादृशी यदि पूर्वं स्यात्कस्य न स्यात्फलोदयः ॥

2679

अज्ञोपि तज्ज्ञतामेति शनैः शैलोपि चूर्ण्यते ।
घुणोप्यत्ति महावृक्षं पश्याभ्यासविजृम्भितम् ॥

2680

धन्यास्ते पुरुषव्याघ्र ये बुद्ध्या कोपमुत्थितम् ।
निरुन्धन्ति महत्पारं दीप्तमग्निमिवाम्भसा ॥

2681

महानहमिति ज्ञात्वा महासत्त्वं न लङ्घयेत् ।
निष्पिनष्टि गजस्यापि पाणिभ्यां किं न केसरी ॥

2682

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय क्षीणे कस्यास्ति सौहृदम् ॥

2683

गुणैः सर्वज्ञकल्पोपि सीदत्येको निराश्रयः ।
अनर्घमपि माणिक्यं हेमाश्रयमपेक्षते ॥

रविगुप्तस्य.

2684

अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च संचयम् ।
अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मभिः ॥

2793

आपत्सु मित्रं जानीयाद्रणे शूरं रहः शुचिम् ।
भार्यां तु विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम् ॥

2794

पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन् ।
सर्वदानाधिकं यस्मात्प्रजानां परिपालनम् ॥

2795

अवकाशः सुवृत्तानां हृदयान्तर्न योषिताम् ।
इतीव विदधे धाता सुवृत्तौ तद्बहिः कुचौ ॥

कह्लणस्य.

2796

प्रावृण्मेघस्य मालिन्ये को दोषो भूरिवर्षिणः ।
शारदाभ्रस्य शुभ्रत्वं वद कुत्रोपयुज्यते ॥

2797

सतां मतमतिक्रम्य योसतां वर्तते मते ।
अचिरात्स च्युतः स्थानात्पतति द्विषतां वशे ॥

2798

जडोयमिति नात्यन्तं हीनमप्युपतापयेत् ।
निर्दयं निहतोश्मापि वमति ज्योतिषः कणान् ॥

2799

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वन्तं स्पृष्टो दहति पावकः ॥

2800

कोतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥

पञ्चतन्त्रे.

2801

शरीरनिरपेक्षस्य दक्षस्य व्यवसायिनः ।
न्यायेनारब्धकार्यस्य नास्ति किंचन दुष्करम् ॥

2802

नोपकारः सुहृच्चिह्नं नापकारोरिलक्षणम् ।
प्रदुष्टमप्रदुष्टं च चित्तं मित्रारिलक्षणम् ॥

2803

आकारेणेङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकाराभ्यां ज्ञायतेन्तर्गतं मनः ॥

2804

कः कालः कानि मित्राणि को देशः कौ व्ययागमौ ।
को वाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥

2805

कण्टकस्य च भग्नस्य दन्तस्य चलितस्य च ।
अमात्यस्य च दुष्टस्य मूलादुद्धरणं वरम् ॥

2806

यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि ।
अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥

केषामपि.

2807

परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च कुप्यत्यमूढः सन्स च मूढतमो मतः ॥

2808

परवाच्येषु निपुणः सर्वो भवति सर्वदा ।
आत्मवाच्यं न जानाति जानन्नपि विमुह्यति ॥

2809

यद्यद्ब्रूयादल्पमतिस्तत्तदस्य सहेद्बुधः ।
प्राकृतो हि प्रशंसन्वा निन्दन्वा किं करिष्यति ॥

2810

प्रत्यक्षं गुणवादी यः परोक्षे तु विनिन्दकः ।
स मानवः श्ववल्लोके परित्याज्यो बुभूषता ॥

१

2703

सत्कृतं स्वजनेनेह परोपि बहु मन्यते ।
स्वजनेन ह्यवज्ञातं परोप्यभिभवेन्नरम् ॥

2704

ज्ञातीनां वक्तुकामानां कटूनि परुषाणि च ।
सकोपं हृदयं वाचा श्लक्ष्णया शमयेद्बुधः ॥

2705

परोपि हितवान्बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥

2706

मूषकी गृहजातापि हन्तव्या ह्यपकारिणी ।
घृतप्रदानैर्मार्जारो हितकृत्प्रार्थ्यतेन्यतः ॥

2707

सौहृदेन परित्यक्तं निःस्नेहं खलमुत्सृजेत् ।
सोदर्यं भ्रातरमपि किमुतान्यं पृथग्जनम् ॥

2708

पूर्वोपकारी यस्तु स्यादपकारे गरीयसि ।
उपकारेण तत्तस्य क्षन्तव्यमपराधिनः ॥

2709

अथ चेद्बुद्धिजं कृत्वा ब्रूयुस्ते तदबुद्धिजम् ।
पापान्स्वल्पेपि तान्हन्यादपराधे तथानृजून् ॥

2710

अणु पूर्वं बृहत्पश्चाद्भवत्यार्येषु संगतम् ।
विपरीतमनार्येषु यथेच्छसि तथा कुरु ॥

2711

सद्भिरेव सदासीत सद्भिः कुर्वीत संगतम् ।
सद्भिर्विवाहं मैत्रीं च नासद्भिः किंचिदाचरेत् ॥

2712
विरुद्धैरपि वक्तव्यं साधुभिर्धर्मदर्शिभिः ।
दोषा अपि हि साधूनामसतां च गुणैः समाः ॥

2713
प्रेक्षणीयः प्रयत्नेन स्वभावो नेतरे गुणाः ।
अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि तिष्ठति ॥

2714
अप्युन्मत्तात्प्रलपतो बालाच्च परिसर्पतः ।
सर्वतः सारमादद्यादश्मभ्य इव काञ्चनम् ॥

2715
प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्रवर्षी स्यात्प्रगल्भः स्यादनिष्ठुरः ॥

2716
किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः ।
इति संचिन्त्य मनसा प्राज्ञः कुर्वीत वा न वा ॥

2717
कार्यमालोचितापायं मतिमद्भिर्विवेचितम् ।
न केवलं हि संपत्तौ विपत्तावपि शोभते ॥

2718
षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णस्तु जातुचित् ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न गच्छति ॥

2719
सुमन्त्रिते सुविक्रान्ते सुकृते सुविचारिते ।
प्रारम्भे कृतबुद्धीनां सिद्धिरव्यभिचारिणी ॥

2720
अफलानि दुरन्तानि समव्ययफलानि च ।
अशक्यानि च वस्तूनि नारभेत विचक्षणः ॥

2721

यत्कार्यं पुरुषेणेह व्यवसायवता सता ।
तत्कार्यमविशङ्केन सिद्धिर्दैवे प्रतिष्ठिता ॥

2722

दैवयोगादुपनताः प्रतिज्ञाहीनसंपदः ।
अकस्मादेव नश्यन्ति खलानामिव संगतम् ॥

2723

न दैवमिति संचिन्त्य त्यजेदुद्योगमात्मवान् ।
अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति ॥

2724

बहवो यत्र नेतारः सर्वे पण्डितमानिनः ।
सर्वे महत्त्वमिच्छन्ति तद्वृन्दमवसीदति ॥

2725

ज्येष्ठो भ्राता पितृसमो मृते पितरि भारत ।
स ह्येषां वृत्तिदाता स्यात्स ह्येतान्परिपालयेत् ॥

2726

कनिष्ठास्तं नमस्येरन्सर्वे छन्दानुवर्तिनः ।
तमेव चोपजीवेयुर्यथैव पितरं तथा ॥

2727

तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी ।
कोर्थः पुत्रेण वा तेन यो न विद्वान्न धार्मिकः ॥

2728

अजातमृतमूर्खेभ्यो मृताजातौ वरं सुतौ ।
तौ किंचिच्छोकदौ पित्रोर्मूर्खस्त्वत्यन्तशोकदः ॥

2729

अपुत्रत्वं भवेच्छ्रेयो न तु स्याद्विगुणः सुतः ।
जीवन्नप्यविनीतोसौ मृत एव न संशयः ॥

2730

एकोपि गुणवान्पुत्रो निर्गुणेन शतेन किम् ।
एकश्चन्द्रस्तमो हन्ति न च ताराः सहस्रशः ॥

2731

दाने तपसि शौर्ये वा यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥

2732

पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम् ।
विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥

2733

दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते ।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन युज्यते ॥

2734

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥

2735

प्रज्ञाशौर्यविवृद्धेषु भृत्येषु शठवृत्तिषु ।
स्वामी विश्वासनिद्रालुः प्रतारयति तायते ॥

2736

यस्य कार्यमकार्यं वा सममेव भवत्युत ।
कस्तस्य विश्वसेत्प्राज्ञो दुर्मतेरकृतात्मनः ॥

2737

अपराधो न मेस्तीति नैतद्विश्वासकारणम् ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥

2738

केचिन्मृगमुखा व्याघ्राः केचिद्व्याघ्रमुखा मृगाः ।
तत्स्वरूपविपर्यासाद्विश्वासो ह्यापदां पदम् ॥

2757

सकृद्दुष्टस्तु यः कश्चित्पुनः संधानमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥

2758

नात्यन्तसरलैर्भाव्यं गत्वा पश्य वने तरून् ।
छिद्यन्ते सरलास्तत्र कुब्जाः सन्ति पदे पदे ॥

2759

यस्य चाप्रियमन्विच्छेद्ब्रूयात्तस्य सदा प्रियम् ।
व्याधा मृगवधं कर्तुं इयं गायन्ति सुस्वरम् ॥

2760

ऋणशेषोग्निशेषश्च शत्रुशेषस्तथैव च ।
पुनः पुनः प्रवर्तन्ते तस्मान्निःशेषमाचरेत् ॥

2761

नहि कश्चित्कृते कार्ये कर्तारं समवेक्षते ।
तस्मात्सर्वाणि कार्याणि सावशेषाणि कारयेत् ॥

2762

नोपेक्षितव्यो विद्वद्भिः शत्रुरल्पोप्यवज्ञया ।
वह्निरल्पोपि संवृद्धः कुरुते भस्मसाद्वनम् ॥

2763

आदरात्संगृहीतेन शत्रुणा शत्रुमुद्धरेत् ।
पादलग्नं करस्थेन कण्टकेनेव कण्टकम् ॥

2764

केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः ।
केचिज्ज्ञानावलेपेन केचिन्नष्टैस्तु नाशिताः ॥

2765

पण्डितेन विरुद्धः सन्दूरेस्मीति न विश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू याभ्यां दूरे हिनस्ति सः ॥

2766

पक्वान्नमिव राजेन्द्र सर्वसाधारणाः स्त्रियः ।
तस्मात्तासु न रज्येत नाश्वसेन्न च विश्वसेत् ॥

2767

मठरश्च तपस्वी च शूरश्चाप्यकृतव्रणः ।
मद्यपा स्त्री सती राजन्निति न श्रद्दधाम्यहम् ॥

2768

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधः शय्यां वासयेद्व्यभिचारिणीम् ॥

2769

चतुरः सृजता राजन्नुपायांस्तेन वेधसा ।
न सृष्टः पञ्चमः कोपि गृह्यन्ते येन योषितः ॥

2770

अपि कुञ्जरकर्णाग्रादपि पिप्पलपल्लवात् ।
अपि विद्युद्विलसिताद्विलोलं ललनामनः ॥

2771

जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥

2772

यदन्तस्तन्न जिह्वायां यज्जिह्वायां न तद्बहिः ।
यद्बहिस्तन्न कुर्वन्ति विचित्रचरिताः स्त्रियः ॥

2773

न दानेन न मानेन नार्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण गृह्यन्ते विषमाः स्त्रियः ॥

2774

स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् ।
मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥

2775

सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीवति ॥

2776

नित्यं प्रहृष्टया भाव्यं गृहकार्ये च दक्षया ।
सुसंस्कृतोपस्करया नित्यं चामुक्तहस्तया ॥

2777

स्त्रियः सेवेत नात्यन्तं मृष्टं भुञ्जीत नाहितम् ।
अस्तब्धः पूजयेन्मान्यान्सेवेतामायया गुरून् ॥

2778

न चेर्ष्या स्त्रीषु कर्तव्या दारा रक्ष्याः प्रयत्नतः ।
अनायुष्या भवेदीर्ष्या तस्मात्तां परिवर्जयेत् ॥

2779

सूक्ष्मेभ्योपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या हि सर्वदा ।
द्वयोर्हि कुलयोर्दोषमावहेयुररक्षिताः ॥

2780

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामः पण्डितोप्यत्र मुह्यति ॥

2781

स्त्रियश्च यः प्रार्थयते संनिकर्षं च गच्छति ।
ईषच्च कुरुते सेवां तं तमिच्छन्ति योषितः ॥

2782

यदैव भर्ता जानीयान्मन्त्रमूलपरां स्त्रियम् ।
उद्विजेत तदैवास्याः सर्पाद्वेश्मगतादिव ॥

2783

नास्ति यज्ञः स्त्रियः कश्चिन्न व्रतं नोपवासकः ।
पतिं शुश्रूषते यत्सा तेन स्वर्गे महीयते ॥

2784

पानमक्षास्तथा नार्यो मृगया गीतवादिते ।
एतानि युक्त्या सेवेत प्रसङ्गो ह्यत्र दोषवान् ॥

2785

प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः ।
न तं भर्तारमिच्छन्ति षण्ढं पतिमिव स्त्रियः ॥

2786

अतथ्यास्तथ्यसंकाशास्तथ्याश्चातथ्यदर्शनाः ।
दृश्यन्ते विविधा भावास्तस्माद्युक्तं परीक्षणम् ॥

2787

ब्राह्मणेषु च ये शूराः स्त्रीषु ज्ञातिषु गोषु च ।
वृन्तादिव फलं पक्वं धृतराष्ट्र पतन्ति ते ॥

2788

व्रजत्यधोधो यात्युच्चैर्नरः स्वैरेव कर्मभिः ।
खनितेव हि कूपस्य प्रासादस्येव कारकः ॥

2789

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बुद्ध्यवज्ञानमवमानं च केवलम् ॥

2790

किं करिष्यत्यपात्राणामुपदेष्टा सुवागपि ।
तक्ष्णस्तीक्ष्णः कुठारोपि दुर्दारुणि विहन्यते ॥

2791

यदभुतार्थधर्मा वै प्रमाद्यति न तच्छलम् ।
धर्म एवायमन्धानां यत्स्खलन्ति खलेष्वपि ॥

एते श्रीव्यासमुनेः.

2792

वहन्प्रज्वलितो वह्निर्दहन्मूलानि रक्षति ।
समूलकाषं कषति वार्योघो मृदुशीतलः ॥

2793

आपत्सु मित्रं जानीयाद्रणे शूरं रहः शुचिम् ।
भार्यां तु विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम् ॥

2794

पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन् ।
सर्वदानाधिकं यस्मात्प्रजानां परिपालनम् ॥

2795

अवकाशः सुवृत्तानां हृदयान्तर्न योषिताम् ।
इतीव विदधे धाता सुवृत्तौ तद्बहिः कुचौ ॥

कह्लणस्य.

2796

प्रावृण्मेघस्य मालिन्ये को दोषो भूरिवर्षिणः ।
शारदाभ्रस्य शुभ्रत्वं वद कुत्रोपयुज्यते ॥

2797

सतां मतमतिक्रम्य योसतां वर्तते मते ।
अचिरात्स च्युतः स्थानात्पतति द्विषतां वशे ॥

2798

जडोयमिति नात्यन्तं हीनमप्युपतापयेत् ।
निर्दयं निहतोश्मापि वमति ज्योतिषः कणान् ॥

2799

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वन्तं स्पृष्टो दहति पावकः ॥

2800

कोतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥

पञ्चतन्त्रे.

2801

शरीरनिरपेक्षस्य दक्षस्य व्यवसायिनः ।
न्यायेनारब्धकार्यस्य नास्ति किंचन दुष्करम् ॥

2802

नोपकारः सुहृच्चिह्नं नापकारोऽरिलक्षणम् ।
प्रदुष्टमप्रदुष्टं च चित्तं मित्रारिलक्षणम् ॥

2803

आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकाराभ्यां ज्ञायतेऽन्तर्गतं मनः ॥

2804

कः कालः कानि मित्राणि को देशः कौ व्ययागमौ ।
को वाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥

2805

कण्टकस्य च भग्नस्य दन्तस्य चलितस्य च ।
अमात्यस्य च दुष्टस्य मूलादुद्धरणं वरम् ॥

2806

यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि ।
अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥

केषामपि.

2807

परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च कुप्यत्यमूढः सन्स च मूढतमो मतः ॥

2808

परवाच्येषु निपुणः सर्वो भवति सर्वदा ।
आत्मवाच्यं न जानाति जानन्नपि विमुह्यति ॥

2809

यद्यद्ब्रूयादल्पमतिस्तत्तदस्य सहेद्बुधः ।
प्राकृतो हि प्रशंसन्वा निन्दन्वा किं करिष्यति ॥

2810

प्रत्यक्षं गुणवादी यः परोक्षे तु विनिन्दकः ।
स मानवः श्ववल्लोके परित्याज्यो बुभूषता ॥

2811

दानं क्षमा धृतिः प्रज्ञा संतोषो वागनिष्ठुरा ।
ह्रीरहिंसाव्यसनिता ज्ञानं चेति सुखावहाः ॥

2812

यत्सुखं सेवमानोपि धर्मार्थाभ्यां न हीयते ।
कामं तदुपसेवेत न मूढव्रतमाचरेत् ॥

2813

सर्वथा धर्ममूलोर्थो धर्मश्चार्थनिबन्धनः ।
इतरेतरयोनी तौ विद्धि मेघोदधी यथा ॥

2814

सततं यश्च कामार्थी नेतरावनुतिष्ठति ।
स वध्यः सर्वलोकस्य ब्रह्महेव जुगुप्सितः ॥

2815

अर्थानामर्जनं कार्यं वर्धनं रक्षणं तथा ।
भक्ष्यमाणो निराधानः क्षीयते हिमवानपि ॥

2816

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥

2817

निर्विशेषं यदा राजा समं भृत्येषु वर्तते ।
तत्रोद्यमसमर्थानामुत्साहः परिहीयते ॥

2818

मित्रपक्षमनाश्वासं भार्यां चाप्रियवादिनीम् ।
भर्तारं चाविशेषज्ञं दूरतस्त्यजतः सुखम् ॥

एते भगवद्व्यासमुनेः

2819

क्षमी दाता गुणग्राही स्वामी दुःखेन लभ्यते ।
अनुकूलः शुचिर्दक्षो राजन्भृत्योपि दुर्लभः ॥

2820

साराऽसारपरिच्छेत्ता स्वामी भृत्यस्य दुर्लभः ।
यथोक्तकारी स्मृतिमान्प्रभोर्भृत्यश्च दुर्लभः ॥

2821

कुलीनः शीलसंपन्नो वाग्मी दक्षः प्रियंवदः ।
यथोक्तवादी स्मृतिमान्दूतः स्यात्सप्तभिर्गुणैः ॥

2822

न तु हन्यान्महीपालो दूतं कस्यांचिदापदि ।
दूतहन्ता तु नरकं सचिवैः सह गच्छति ॥

2823

योनौ कर्मणि बीजे वा यस्य नास्त्यन्यसंकरः ।
तस्य कृच्छ्रगतस्यापि न पापे रमते मतिः ॥

2824

धर्मकामार्थकुशलाः कुलीनाः सत्यवादिनः ।
समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः ॥

2825

यं यमर्थप्रयोगेषु राजा नयति मुख्यताम् ।
तस्य तस्योपघाताय यतन्ते राजवल्लभाः ॥

2826

सभा वां न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ।
अब्रुवन्विब्रुवन्वापि नरः किल्बिषभाग्भवेत् ।

2827

तस्मात्सभ्यः सभां गत्वा रागद्वेषविवर्जितः ।
वचस्तथाविधं ब्रूयाद्यथा न नरके पतेत् ॥

2828

अपराधानुरूपं च दण्डं दण्ड्येषु पातयेत् ।
वियोजयेद्धनैराढ्यान्दरिद्रान्वधबन्धनैः ॥

2829

पिता माता तथा भ्राता भार्या पुत्रः पुरोहितः ।
नादण्ड्यो नाम राज्ञोस्ति यस्त्वधर्मेण तिष्ठति ॥

2830

जिघांसवः पापकामाः परस्वादायिनः शठाः ।
रक्षांस्यधिकृता एते तेभ्यो रक्षेदिमाः प्रजाः ॥

2831

निर्दोषाः शुचयो यस्य लुब्धैरधिकृतैर्नृप ।
धनार्थं विप्रलुप्यन्ते किं पापमधिकं ततः ॥

2832

अनादेयं नाददीत परिक्षीणोपि पार्थिवः ।
आदेयं न समृद्धोपि सूक्ष्ममप्यर्थमुत्सृजेत् ॥

2833

आयास्य बहुभिर्दुग्धां पीतां वत्सेन सद्गवीम् ।
सुशिक्षितोपि गोपालः प्रयत्नेन दुहीत किम् ॥

2834

प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ।
एवं विद्वानविद्वान्वा ब्राह्मणो दैवतं महत् ॥

2835

अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् ।
लोकपालान्सृजेयुश्च लोकानन्यांस्तथा द्विजाः ॥

2836

संनिवेशविशेषात्तु दुरुक्तमपि शोभते ।
कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम् ॥

2837

धर्मार्थसहितं वाक्यं प्रियं वा यदि वाप्रियम् ।
अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् ॥

2838

सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥

2839

वैद्यसांवत्सरामात्या यस्य राज्ञः प्रियंवदाः ।
आरोग्यधर्मकोषेभ्यः क्षिप्रं स परिहीयते ॥

2840

योर्थधर्मावुपाश्रित्य हित्वा भर्तुः प्रियाप्रिये ।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥

एते श्रीव्यासमुनेः

2841

प्रजा न रञ्जयेद्यस्तु राजा रक्षादिभिर्गुणैः ।
अजागलस्तनस्येव तस्य नाम निरर्थकम् ॥

2842

अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः ।
स समेत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥

2843

बुद्धिमाननुरक्तोयमिहोभयमयं जडः ।
इति भृत्यविचारज्ञो भृत्यैरापूर्यते नृपः ॥

2844

स्थानेष्वेव नियोज्यानि भृत्याश्चाभरणानि च ।
नहि चूडामणिः पादे प्रभवामीति बध्यते ॥

एते पञ्चतन्त्रके.

2845

चित्तज्ञः कुरुते यद्यत्तत्तत्संपद्यते गुणः ।
प्रभुचित्तमजानानः फलभाङ्नैव सेवकः ॥

वल्लभदेवस्य.

2846

एकार्थाभिनिवेशित्वमरिलक्षणमुच्यते ।
— — — — — जिगीषुगुणान्वितः ॥

कस्यापि.

2847

त्यजति भयमकृतपापो मित्राणि शठं प्रमादिनं विद्या ।
ह्रीः कामिनमलसं श्रीः स्त्री क्रूरं दुर्जनं लोकः ॥

2848

अव्यवसायिनमलसं दैवपरं पुरुषकारपरिहीनम् ।
वृद्धमिव पतिं कन्या नेच्छत्यवगूहितुं लक्ष्मीः ॥

2849

दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोमी ।
अभ्यासी विद्यान्तं धर्मार्थयशांसि च विनीतः ॥

2850

अविधेयो भृत्यजनः शठानि मित्राण्यदायकः स्वामी ।
विनयरहिता च भार्या मस्तकशूलानि चत्वारि ॥

2851

कार्यगतेर्वैचित्र्यान्नीचोपि क्वचिदलं न जातु महान् ।
कांस्येनैवादर्शः क्रियते राज्ञामपि न हेम्ना ॥

2852

अनुरञ्जिता अपि गुणैर्न नमन्ति प्रकृतयो विना दण्डात् ।
अङ्कगतापि न वीणा कलमधुरमताडिता क्वणति ॥

2853

गुण एव नालमृजुता कौटिल्यं दोष एव न च जन्तोः ।
ऋजुरपि मारयति शरो वक्रमपि धनुस्तनुं पाति ॥

2854

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥

2855

शान्तवपुरेष नास्माद्भयमुद्भवतीति नायमेकान्तः ।
शुक्लाः कज्जलमसितं दीपदशाः किं न जनयन्ति ॥

2856

आकारदारुणोयं भयमस्मादित्यनिश्चयोयमपि ।
भवति महाभैरवमपि शिवस्य रूपं शिवायैव ॥

2857

उच्चैः पदमधितिष्ठँल्लोकस्तत्त्वेषु मुह्यति प्रायः ।
विषममपि पश्यति समं पर्वतशिखराग्रमारूढः ॥

2858

शिक्षयति लोक एव प्रायः कुसृतीर्जनं सुशीलमपि ।
इन्धनमेव प्रथयति हविर्भुजो दाहसामर्थ्यम् ॥

2859

कुलजोयं गुणवानिति विश्वासं नाचरेत्खलप्रकृतौ ।
ननु मलयचन्दनादपि समुत्थितोग्निर्दहत्येव ॥

2860

प्रखला एव खलानां प्रशमायालं न जातु सत्पुरुषः ।
कुष्ठव्याधेरौषधमनुरूपमुशन्त्यरिष्टतरुम् ॥

2861

कार्याकार्ये तुलयति सर्वस्तृप्तो न जातु तृष्णार्तः ।
स्वादु शुचि वा च तोयं मरुपथिकः को विचारयति ॥

2862

प्रथमतरमेव धूर्ताः सगुणानत्युन्नतान्प्रबाधन्ते ।
स्त्रीणां स्तनेषु लक्ष्मीस्तेष्वेवादौ जरा पतति ॥

2863

क्वचिदपि वस्तुविशेषे दोषोपि गुणेन तुल्यतामेति ।
खण्डनमेव हि मण्डनमधरमणौ भवति रमणीनाम् ॥

एते रविगुप्तस्य.

2864

यस्यार्थिनो न विमुखाः सर्वार्तिहरं यशः स किल राजा ।
अभिषेकपट्टबन्धौ वालव्यजनं व्रणस्यापि ॥

2865

पृथुरहमयं कृशीयान्गम्यो नास्याहमित्यनास्थैषा ।
किमचलशिरो नमहदपि वज्रमणीयो विदारयति ॥

2866

असतोपि भवति गुणवान्सद्वृत्तोपि परं भवन्त्यसद्वृत्ताः ।
पङ्कादुदेति कमलं क्रिमयः कमलादपि भवन्ति ॥

2867

नम्रीभूय परेषां सकृदपि यः परिभवं नरः सहते ।
अब्धिरिव वृष्टिमार्गैः स पूर्यते परिभवैरेत्य ॥

2868

दानपरोप्युन्नतिमान्भूभृत्कटकेषु भेदमपि कुर्वन् ।
स्त्रीव्यसनात्परवश्यो भवति नरेन्द्रः करीन्द्र इव ॥

2869

अतितेजस्व्यपि राजा पानासक्तो न साधयत्यर्थम् ।
तृणमपि दग्धुं शक्तो न वाडवाग्निः पिबन्ननिशम् ॥

2870

रिक्ताः कर्मणि पटवस्तृप्तास्त्वलसा भवन्ति ये भृत्याः ।
तेषां जलौकसामिव पूर्णानां रिक्तता कार्या ॥

2871

पित्रास्येदं कृतमिति तत्कर्मणि योजयेन्न दुष्पुत्रम् ।
हवनविधौ हव्यभुजां तिलं प्रशंसन्ति न तु तैलम् ॥

2872

यस्मिन्कर्मणि शक्तिर्यस्यास्त्यधिका स तत्र विनियोज्यः ।
मधुनि सहकारगन्धो गुणाय महते भवति न क्षीरे ॥

2873

लक्ष्मीपरिपूर्णोहं भयं न मेस्तीति मोहनिद्रैषा ।
परिपूर्णस्यैवेन्दोर्भवति भयं सिंहिकासूनोः ॥

2874

सान्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोर्थः पटोलेन ॥

एते अर्गटस्य.

2875

भङ्क्तुं शक्तो यादृग्भवति मृदुः स्यान्न तादृशस्तीक्ष्णः ।
अतिमृदु जलमपि निपतद्भिनत्ति शैलं क्षुरं न यत्नेन ॥

वल्लभदेवस्य.

2876

कार्यज्ञः प्रष्टव्यो न पुनर्मान्यो मम प्रियो वेति ।
गुरुरप्यासनसेव्यः प्रियानितम्बः कदा मन्त्री ॥

2877

गुणवानस्मि विदेशः क इव ममेत्येष दुरभिमानलवः ।
अञ्जनमक्ष्णि विराजति विन्यस्तं न पुनरधरमणौ ॥

2878

स्तब्धप्रकृतिर्लोके बहुमानमुपैति नातिशयनम्रः ।
स्फुटमत्रोदाहरणं पयोधरः कुवलयाक्षीणाम् ॥

2879

पुंसामसमर्थानामुपद्रवायात्मनो भवति कोपः ।
पिठरं क्वथदतिमात्रं निजपार्श्वान्येव दहतितराम् ॥

एते प्रकाशवर्षस्य.

2880

परपक्षक्षयदक्षो नरपतिदयितोपि वंशजन्मापि ।
न भवति तावद्गुणवान्धनुरिव यावन्न मानवो नमति ॥

2881

आश्रयमाश्रयलिप्सुस्तुङ्गं सेवेत दुरधिरोहमपि ।
विनिपतति यदि स तस्मात्तथाप्युपर्येव नीचानाम् ॥

2882

द्वेपयाति प्रियवचनैरादरमुपदर्शयन्खलीकुरुते ।
उत्कर्षयंश्च लघयति मूर्खसुहृत्सर्वथा वर्ज्यः ॥

2883

व्यसनैरेवाघ्राताः शृण्वन्ति वचांसि पापमित्त्राणाम् ।
उद्भूतारिष्टेभ्यो ह्यपथ्यमेवाधिकं स्वदते ॥

केषामपि.

2884

विद्वानृजुरभिगम्यो विदुषि शठे चाप्रमादिना भाव्यम् ।
ऋजुमूर्खस्त्वनुकम्प्यो मूर्खशठः सर्वथा वर्ज्यः ॥

2885

येन सहासितमशितं कथितं च रहस्यविस्रब्धम् ।
तं प्रति कथमसतामपि निवर्तते चित्तमामरणात् ॥

कस्यापि.

2886

तापयिता गुणिरागान्नक्षयमाप्नोति सूर्यवन्नृपतिः ।
सुखयन्नपि तद्द्वेषी क्षिप्रं क्षयमेति सोम इव ॥

वल्लभदेवस्य.

2887

कुसुमानीव फलानामर्थानां हेतवो गुणाः प्रायः ।
अत एव कृतार्था इव धनवत्सु गुणा न दृश्यन्ते ॥

कपिलस्वामिनः.

2888

अप्रतिबुद्धे श्रोतरि वक्तृत्वमनर्थकं पुंसाम् ।
नेत्रविहीने कामिनि लावण्यविलासवल्लीणाम् ॥

2889

उत्कोचपारितोषकभाटसुभाषिततरार्थचौर्याशाः ।
तत्क्षणमेव ग्राह्याः षडन्यकाले न लभ्यन्ते ॥

2890

जलधिजलान्ता नद्यः स्त्रीभेदान्तानि बन्धुहृदयानि ।
पिशुनजनान्तं सख्यं दुष्पुत्रान्तानि च कुलानि ॥

2891

बाल इव यो न पश्यति तत्त्वं किं तेन पण्डितेनापि ।
द्वावप्येतावन्धौ योऽध्यक्षो योऽप्रसन्नाक्षः ॥

2892

कल्पयति येन वृत्तिं लोके च यतः प्रसिद्धिमुपयाति ।
स गुणस्तेन गुणवता विवर्धनीयः प्रकाश्यश्च ॥

2893

मित्रं वा बन्धुं वा नैवातिप्रणयपीडितं कुर्यात् ।
स्वं वत्समपि पिबन्तं विषाणकोट्या क्षिपति धेनुः ॥

2894

अतिपरिचयादवज्ञा भवति विशिष्टेपि वस्तुनि प्रायः ।
लोकः प्रयागवासी कूपस्नानं सदाचरति ॥

एते केषामपि.

2895

अतिरिच्यते सुजन्मा कश्चिज्जनकान्निजेन चरितेन ।
कुम्भः परिमितमम्भः पिबति पपौ कुम्भसंभवोम्भोधिम् ॥

कस्यापि.

2896

सत्सङ्गात्स्याद्गुणवान्गुणवति लोकोनुरज्यते सकलः ।
अभिगम्यतेनुरक्तः ससहायो युज्यते लक्ष्म्या ॥

2897

भ्रातॄणां सततं भेदः कथं नाम न जायते ।
अध्यापितानां पत्नीभिर्द्वेषविद्यां सदा निशि ॥

2898

सुहृदामुपकारकारणा-
द्द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधै-
र्जठरं को न बिभर्ति केवलम् ॥

पञ्चतन्त्रे.

2899

उन्नतानां सुवंशानां द्वैधं तावन्न जायते ।
यावत्कुठारधारेव योषिद्विशति नान्तरम् ॥

2900

यः कुरुते परयोषित्सङ्गं
वाञ्छति यश्च धनं परकीयम् ।
यश्च सदा गुरुवृद्धविमानी
तस्य सुखं न परत्र न चेह ॥

राहुलकस्य.

2901

यस्य जना न वदन्ति महत्त्वं
नो समरे मरणं विजयं वा ।
न श्रुतदानमहाधनतां वा
तस्य भवः क्रिमिकीटसमानः ॥

वराहमिहिरस्य.

2902

यस्यास्ति सर्वत्र गतिः स कस्मा-
त्स्वदेशरागेण हि याति नाशम् ।
तातस्य कूपोयमिति ब्रुवाणाः
क्षारं जलं कापुरुषाः पिबन्ति ॥

2903

यदकार्यमकार्यमेव त-
न्न बुधस्तत्र मतिं नियोजयेत् ।
परयापि तृषार्दितैर्जनै-
र्नहि रथ्यागतमम्बु पीयते ॥

पञ्चतन्त्रके.

2904

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणुते हि विमृष्यकारिणं
गुणलुब्धाः स्वयमेव संपदः ॥

2905

सर्वथा स्वहितमाचरणीयं
किं करिष्यति जनो बहुजल्पः ।
विद्यते नहि स कश्चिदुपायः
सर्वलोकपरितोषकरो यः ॥

भारवेः.

2906

वश्याः सुता वित्तकरी च विद्या
नीरोगता सज्जनसंगतिश्च ।
इष्टा च भार्या वशवर्तिनी च
दुःखस्य मूलोद्धरणानि पञ्च ॥

2907

विद्वद्गोष्ठी भारतं काव्यचिन्ता
तन्त्रीवाद्यं सुप्रयुक्तं च गेयम् ।
इष्टा भार्या तत्समानं च मित्रं
सद्यः शोकं नाशयन्तीह सप्त ॥

2908

दानं दरिद्रस्य विभोः क्षमित्वं
यूनस्तपो ज्ञानवतश्च मौनम् ।
इच्छानिवृत्तिश्च सुखोचितानां
दया च भूतेषु दिवं नयन्ति ॥

2909

घ्नन्तः शपन्तः परुषं वदन्त-
स्तथापि विप्राः प्रणयेन पूज्याः ।
पराजयोप्यत्र जयेन तुल्यो
मास्मत्कुले ब्रह्मजितो भवेयुः ॥

2910

निम्नेन तोयं हरितेन गावः
सान्त्वेन बाला विनयेन सन्तः ।

2921

शिरः सुधौतं चरणौ च निर्मलौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्वमैथुनं
चिरप्रणष्टां श्रियमानयन्ति षट् ॥

2922

विमानना दुश्चरितानुकीर्तनं
कथाप्रसङ्गे वचनादविस्मयः ।
न दृष्टिदानं कृतपूर्वनाशनं
विरक्तभावस्य नरस्य लक्षणम् ॥

2923

प्रकीर्णभाण्डामनवेक्ष्य कारिणीं
सदा च भर्तुः प्रतिकूलभाषिणीम् ।
परस्य वेश्माभिरतामपत्रपा-
मेवंविधां योषितमाशु वर्जयेत् ॥

व्यासस्य.

2924

बलोपपन्नोपि हि बुद्धिमान्नरः
परं नयेन्न स्वयमेव वैरिताम् ।
भिषङ्ममास्तीति विचिन्त्य भक्षये-
दकारणं को नु विषं विचक्षणः ॥

2925

यशस्करे कर्मणि मित्रसंग्रहे
प्रियासु नारीष्वधनेषु बन्धुषु ।
क्रतौ विवाहे व्यसने रिपुक्षये
धनव्ययोष्टासु न गण्यते बुधैः ॥

2926

शास्त्रं सुनिश्चितधिया परिचिन्तनीय-
माराधितोपि नृपतिः परिशङ्कनीयः ।

आत्मीकृतापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वम् ॥

2927

रत्नान्यधो नयति जातिगुरूणि मोहा-
दूर्ध्वं सदा वहति काष्ठतृणं समुद्रः ।
तोयानि दूषयति पाति भुजंगलोकं
प्रायो महान्भवति कार्यविमूढचेताः ॥

2928

एकं हि चक्षुरमलं सहजं विवेको
विद्वद्भिरेव सह संवसतिर्द्वितीयम् ।
यस्यास्ति न द्वयमिदं स्फुटमेव सोन्ध-
स्तस्याप्यमार्गचलने वद कोपराधः ॥

2929

तन्मित्रमापदि सुखे च समक्रियं य-
त्प्रीणाति यः सुचरितैः पितरं स पुत्रः ।
यद्भर्तुरेव हितमिच्छति तत्कलत्र-
मेतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

2930

स्तब्धस्य नश्यति यशो विषमस्य मित्रं
नष्टक्रियस्य कुलमर्थपरस्य भृत्याः ।
विद्याबलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥

2931

यस्मिञ्जने मदकरी कलभश्च तुल्यौ
यत्रापि नास्ति हयरासभयोर्विशेषः ।
विद्वज्जनस्तदितरश्च न यत्र भिन्नः
कस्तत्र नाम गुणिनामधिवासरागः ॥

2932

वह्निः समुद्भवति निर्मथनेन काष्ठा-
दम्भो ददाति वसुधा च निखन्यमाना ।
गच्छन्प्रयास्यति शनैरपि चाध्वनोन्त-
मारब्धकार्यं इह किं न नरः करोति ॥

2933

अधिगतपरमार्थान्पण्डितान्मावमंस्था-
स्तृणमिव परिलघ्वी तान्न लक्ष्मी रुणद्धि ।
अविरलमदलेखाश्यामगण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम् ॥

2934

गुणवदगुणवद्वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामा विपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥

केषामपि.

2935

यदपसरति मेषः कारणं तत्प्रहर्तुं
मृगपतिरतिकोपात्संकुचत्युत्पतिष्णुः ।
हृदयनिहितवैरा गूढमन्त्रोपचाराः
किमिव हि गणयन्तो बुद्धिमन्तः क्षमन्ते ॥

भसूराक्षस्य.

2936

लघीयः प्राज्यं वा फलमभिमतं प्राप्तुमनसा
निरीहेण स्थातुं क्षणमपि न युक्तं मतिमता ।
कुलालो दण्डेन भ्रमयति न चेच्चक्रमनिशं
शरावः कुम्भो वा नहि भवति सत्यामपि मृदि ॥

2937

ः श्रोता श्रुतमात्रमर्थमखिलं गृह्णाति स श्राव्यतां
यो वेत्ति द्विरुदाहृतं कृतफलं तत्रापि वक्तुर्वचः ।
यस्तु स्पष्टमनेकशोप्यभिहितां नावैति लेख्यार्थतां
तस्मिन्वन्ध्यपरिश्रमस्य विदुषो मूकव्रतं शोभते ॥

एतौ हरिभट्टस्य.

2938

पत्नीयत्यपि मातरं मदवशात्पत्नीं च मात्रीयति
श्वभ्रीयत्यपि मन्दिरं श्वभ्रशिलं कूपं च गेहीयति ।
स्वल्पं वार्युदधीयतीश्वरमपां मोहात्स्थलीयत्यपि
मित्रीयत्यपि पार्थिवं किमपरं कुर्यान्न यन्मद्यपः ॥

2939

यत्पीत्वा गुरवेपि कुप्यति विना हेतोस्तथा रोदिति
भ्रान्तिं याति करोति साहसमपि व्याधेर्भवत्यास्पदम् ।
कौपीनं विवृणोति लोकपुरतोप्युन्मत्तवच्चेष्टते
तल्लज्जापरिपन्थि मोहजननं मद्यं न पेयं बुधैः ॥

2940

क्वचिद्भूमौ शायी क्वचिदपि च पर्यङ्कशयनः
क्वचिच्छाकाहारी क्वचिदपि च मांसौदनरुचिः ।
क्वचित्कन्थाधारी क्वचिदपि विचित्राम्बरधरो
मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम् ॥

2941

क्वचिन्नृत्तं गीतं क्वचिदपि च हा हेति रुदितं
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः ।
क्वचिद्रम्या नारी क्वचिदपि जराजर्जरवपु-
र्न जाने संसारः किममृतमयः किं विषमयः ॥

2942

ये तावन्मलयोपकण्ठनिलयास्तेष्विन्धनं चन्दनं
तीरोपान्तनिवासिनां जलनिधे रत्नानि पाषाणवत् ।
काश्मीरेषु निवासिनामपि नृणां नास्त्यादरः कुङ्कुमे
दूरस्थस्य महार्घता परिभवः संवासतो जायते ॥

2943

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।

2944

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खला-
द्येते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥

2945

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालना-
द्विप्रोनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
स्त्री मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥

2946

दाक्षिण्यं स्वजने दया परिजने शाठ्यं तथा दुर्जने
प्रीतिः साधुजने स्मयः खलजने विद्वज्जनेष्वार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥

2947

उत्खातान्प्रतिरोपयन्कुसुमितांश्चिन्वँल्लघून्वर्धय-
न्नत्युच्चान्नमयन्पृथून्विदलयन्विश्लेषयन्संहतान् ।

तीक्ष्णान्कण्टकिनो बहिर्नियमयन्स्वारोपितान्पालय-
न्मालाकार इव प्रयोगकुशलो राज्ये चिरं तिष्ठति ॥

2948

स्नानं नाम मनःप्रसादजननं दुःस्वप्नविध्वंसनं
शौचस्यायतनं मलापहरणं संवर्धनं तेजसः ।
रूपोद्द्योतकरं रिपुप्रशमनं कायाग्निसंदीपनं
नारीणां च मनोहरं श्रमहरं स्नाने दशैते गुणाः ॥

2949

मानुष्यं वरवंशजन्म विभवो दीर्घायुरारोग्यता
सन्मित्रं सुसुता सती प्रियतमा भक्तिश्च नारायणे ।
विद्वत्त्वं सुजनत्वमिन्द्रियजयः सत्पात्रदाने रति-
स्ते पुण्येन विना त्रयोदश गुणाः संसारिणां दुर्लभाः ॥

अथ वैराग्यपद्धतिः

तत्रादौ

तावद्धर्मकथा

2950

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधारयेत् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

2951

कामार्थौ लिप्समानस्तु धर्ममेवादितश्चरेत् ।
नहि धर्मादपेत्यार्थः कामो वापि कदाचन ॥

2952

आहरेज्ज्ञानमर्थांश्च पुमानमरवत्सदा ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥

2953

आ धूमान्निवर्तन्ते ज्ञातयः सह बान्धवैः ।
येन त्वमनुगन्तव्यस्तत्कर्म सुकृतं कुरु ॥

2954

मृतं शरीरमुत्सृज्य काष्ठलोष्टोपमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्त्वेकोनुगच्छति ॥

2955

पुलाका इव धान्येषु पुत्तिका इव पक्षिषु ।
तादृशास्ते मनुष्येषु येषां धर्मो न कारणम् ॥

2956

यस्य धर्मविहीनानि दिनान्यायान्ति यान्ति च ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥

2957

धनस्य यस्य राजतो न चौरतोपि वा भयम् ।
मृतं च यन्न मुञ्चति त्वमर्जयस्व तद्धनम् ॥

2958

व्यापृतेनापि ते धर्मः कार्य एवान्तरात्मना ।
वीथीबद्धोपि हि भ्राम्यन्घासग्रासं करोति गौः ॥

2959

आर्जवं चानृशंस्यं च दम इन्द्रियनिग्रहः ।
एतं साधारणं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥

2960

इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभौ ।
निगृहीतविसृष्टानि स्वर्गाय नरकाय वा ॥

2961

कायेन त्रिविधं चैव वाचा चैव चतुर्विधम् ।
मनसा त्रिविधं नित्यं दशाधर्मपथांस्त्यजेत् ॥

2962

प्राणातिपातं स्तैन्यं च परदारामथापि च ।
त्रीणि पापानि कायेन नित्यशः परिवर्जयेत् ॥

2963

असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा ।
चत्वारि वाचा राजेन्द्र न जल्पेन्नापि चिन्तयेत् ॥

2964

अस्पृहां परवित्तेषु सर्वसत्त्वेषु सौहृदम् ।
कर्मणां फलमस्तीति मनसा त्रिविधं चरेत् ॥

2965

शारीरैः कर्मदोषैश्च याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥

2966

भावशुद्धिर्मनुष्याणां विज्ञेया सर्वकर्मसु ।
अन्यथा चुम्ब्यते कान्ता भावेन दुहितान्यथा ॥

2967

न कामान्न च संरम्भान्न द्वेषाद्धर्ममुत्सृजेत् ।
धर्म एव परे लोके इह वाप्याश्रयः सताम् ॥

2968

दृष्टानुभूतमर्थं यः पृष्टो न विनिगूहते ।
यथाभूतप्रवादित्वमेतत्सत्यस्य लक्षणम् ॥

2969

न तत्त्ववचनं सत्यं नातत्त्ववचनं मृषा ।
यद्भूतहितमत्यन्तं तत्सत्यमिति कथ्यते ॥

2970

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोपि वा ।
यन्न भूतहितार्थाय तत्पशोरिव चेष्टितम् ॥

2971

स्खलितः स्खलितो वध्य इति चेन्निष्ठितं भवेत् ।
छित्त्वा यथावशिष्येरन्बहुदोषा हि मानवाः ॥

2990

मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य पिशुनस्य च ।
चतुर्णा वयमेतेषां निष्कृतिं नैव शुश्रुम ॥

2991

अकृतज्ञमकार्यज्ञं दीर्घरोषमनार्जवम् ।
चतुरो विद्धि चण्डालाञ्जन्मना चैव पञ्चमम् ॥

2992

न पुत्रः पितरं द्वेष्टि स्वभावात्स्वस्य रेतसः ।
यः पुत्रः पितरं द्वेष्टि तं विद्यादन्यरेतसम् ॥

2993

अमावास्याचतुर्दश्योः पौर्णमास्यष्टमीषु च ।
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥

2994

विषण्णं दीनमाविग्नं भयार्तं व्याधिपीडितम् ।
हृतस्वं व्यसनार्तं च भृशमाश्वासयेन्नरम् ॥

2995

आनृशंस्यं क्षमा सत्यमहिंसा च दया स्पृहा ।
प्रीतिः प्रसादो माधुर्यमार्जवं च यमा दश ॥

2996

दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ ।
व्रतोपवासौ मौनं च स्नानं च नियमा दश ॥

2997

यज्ञाध्ययनदानानि तपः सत्यं क्षमा दया ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥

2998

तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरस्तु चतुर्वर्गो नामहात्मसु तिष्ठति ॥

2999

नवे वयसि यः शान्तः स शान्त इति कथ्यते ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥

3000

एकेनांशेन धर्मस्तु कर्तव्यो भूतिमिच्छता ।
एकेनांशेन कामश्चाप्येकमंशं विवर्धयेत् ॥

3001

धर्मार्थं यस्य वित्तेहा तस्यानीहा गरीयसी ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥

3002

मृत्तिकानां सहस्रैस्तु जलकुम्भशतैस्तथा ।
भावोपहतचेतस्का न शुद्ध्यन्ति कदाचन ॥

3003

नाधर्मश्चरितो राजन्सद्यः फलति गौरिव ।
शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति ॥

3004

यथा कापुरुषश्छिन्द्याद्वृक्षं परशुना वने ।
छेत्तुरेव हि तत्पापं परशोर्न कदाचन ॥

3005

धर्मश्चार्थश्च कामश्च त्रितयं जीविते फलम् ।
एतत्त्रयमवाप्तव्यमधर्मपरिवर्जनात् ॥

3006

आरोप्यतेऽश्मा शैलाग्रे कृच्छ्रेण महता यथा ।
निपात्यते क्षणेनाधस्तथात्मा गुणदोषयोः ॥

3007

यच्छ्रुतं न विरागाय न धर्माय न शान्तये ।
सुबद्धमपि शब्देन काकवाशितमेव तत् ॥

3008

नाच्छादयति कौपीनं न दंशमशकापहम् ।
शुनः पुच्छमिवानर्थं पाण्डित्यं धर्मवर्जितम् ॥

3009

दुर्बलार्थं बलं यस्य धर्मार्थश्च परिग्रहः ।
वाक्सत्यवचनार्थं च पिता तेनैव पुत्रवान् ॥

3010

अहिंसा सत्यवचनं सर्वभूतानुकम्पनम् ।
शमो दानं यथाशक्ति गार्हस्थो धर्म उच्यते ॥

3011

अतिथिः पूजितो यस्य गृहस्थस्य तु गच्छति ।
नान्यस्तस्मात्परो धर्म इति प्राहुर्मनीषिणः ॥

3012

देवान्पितॄन्मनुष्यांश्च भृत्यान्गृह्याश्च देवताः ।
अर्चयित्वा ततः पश्चाद्गृहस्थो भोक्तुमर्हति ॥

3013

येषां नाग्रभुजो देवा न वृद्धातिथिबालकाः ।
राक्षसानेव तान्विद्धि निर्वषट्कारमङ्गलान् ॥

3014

क्षुत्तर्षदुःखं यत्प्राप्तं प्रेतलोके सुदारुणम् ।
तत्स्मृत्वा कः सहृदयः स्वमांसान्यपि संत्यजेत् ॥

3015

कृते प्रत्युपकारो यो वणिग्धर्मो न साधुता ।
तत्रापि ये न कुर्वन्ति पशवस्ते न मानुषाः ॥

3016

चक्षुर्दद्यान्मनो दद्याद्वाचं दद्यात्सुसूनृताम् ।
उत्थाय चासनं दद्यादेष धर्मः सनातनः ॥

एते व्यासमुनेः

3017

स्वकर्मधर्मार्जितजीवितानां
स्वेष्वेव दारेषु सदा रतानाम् ।
जितेन्द्रियाणामतिथिप्रियाणां
गृहेऽपि मोक्षः पुरुषोत्तमानाम् ॥

3018

नादत्तमिच्छेन्न पिबेच्च मद्यं
प्राणान्न हिंसेन्न वदेच्च मिथ्या ।
परस्य दारान्मनसापि नेच्छे-
द्यः स्वर्गमिच्छेद्गृहवत्प्रवेष्टुम् ॥

श्रीभगवद्वाल्मीकिमुनेः.

3019

नाम्नां समासो युक्तार्थः स्रुसहस्रकृतो हरेः ।
हन्त्यघं यत्खला विष्णोस्तत्स्था लोप्या विभक्तयः ॥

प० पाजकस्य.

3020

फलाभिलाषोपहतान्तरात्मा
परीक्षते पात्रविशेषमेव ।
कृपालुकस्त्वर्थितयैव तुष्टः
प्रवर्तते दीनजनाय दातुम् ॥

अश्वदेवस्य.

3021

न दानतः किंचिदिहान्यदस्ति
जनस्य दुःखक्षतये निमित्तम् ।
संवर्धनीयं तदतः प्रयत्ना-
न्निरन्तरं मित्रमिवोपकारि ॥

3022

इहोपपत्तिर्मम केन कर्मणा
क्व वा प्रयातव्यमितो भवेदिति ।

विचारणा यस्य न विद्यते स्मृतौ
कथं स धर्मप्रवणो भविष्यति ॥

3023

पतति नियमवान्यमेष्वसक्तो
न तु यमवान्नियमालसः कदाचित् ।
इति यमनियमौ विचार्य बुद्धया
यमबहलेऽध्वनि संदधीत बुद्धिम् ॥

3024

धर्मे मतिर्भवतु वः सततोत्थितानां
स ह्येक एव परलोकगतस्य बन्धुः ।
अर्थाः स्त्रियश्च निपुणैरपि सेव्यमाना
नैवात्मभावमुपयान्ति न च स्थिरत्वम् ॥

श्रीव्यासमुनेः.

3025

हेमोज्ज्वलद्विरदवाजिरथाधिरूढः
श्वेतातपत्रविनिवारितभानुरश्मिः ।
यत्तूर्यशङ्खजयशब्दपदातिवृन्दै-
र्निर्याति मन्दिरवरात्तदुशन्ति दानात् ॥

3026

यद्धूलिधूसरशिरोरुहसास्त्रुकण्ठः
स्कन्धाग्रलग्नगुरुभारविनम्रमूर्तिः ।
शैलोपलस्खलनखण्डितपाणिपादो
निःश्वस्य याति विवशस्तदुशन्त्यदानात् ॥

भदन्तप्रज्ञाशान्तेः

3027

दानं यत्प्रथमोपकारिषु न तद्न्यासः स एवार्पितो
दीने याचनमूल्यमेव दयिते तत्किं न रागाभयात् ।

पात्रे यत्फलविस्तरप्रियतया तद्वार्धुषिक्यं न किं
तद्दानं यदुपेत्य निष्प्रणयिनि क्षीणे जने दीयते ॥

कस्यापि.

3028

सत्क्षेत्रप्रतिपादितः प्रियवचोबद्धालवालावलि-
र्निर्दोषेण मनःप्रसादपयसा निष्पन्नसेकक्रियः ।
दातुस्तत्तदभीप्सितं किल फलन्कालेपि बालोप्यसौ
राजन्दानमहीरुहो विजयते कल्पद्रुमादीनपि ॥

कह्लणस्य.

3029

निन्द्यं जन्म प्रमोहस्थिरतरतमसां यन्मनुष्यत्वहीनं
बुद्धया हीनो मनुष्यः शुभफलविकलस्तुल्यचेष्टः पशूनाम् ।
बुद्धिः पाण्डित्यहीना भ्रमति सदसतोस्तत्त्वचर्चाविचारे
पाण्डित्यं धर्महीनं शुकसदृशगिरां निष्फलक्लेशमेव ॥

3030

धर्मः शर्म परत्र चेह च नृणां धर्मोन्धकारे रविः
सर्वापत्प्रशमक्षमः सुमनसां धर्माभिधानो निधिः ।
धर्मो बन्धुरबान्धवे पृथुपथे धर्मः सुहृन्निश्चलः
संसारोरुमरुस्थले सुरतरुर्नास्त्येव धर्मात्परः ॥

3031

अन्धः स एव श्रुतिवर्जितो यः
षण्ढः स एवार्थिनिरर्थको यः ।
मृतः स एवास्ति यशो न यस्य
धर्मे न धीर्यस्य स एव शोच्यः ॥

3032

सत्यं वाचि दृशि प्रसादपरता सर्वाशयाश्वासिनी
पाणौ दानविमुक्तिरात्मजननक्लेशान्तचिन्ता मतौ ।
संसक्ता हृदये दयैव दयिता काये परार्थोद्यमो
यस्यैकः पुरुषः स जीवति भवे भ्राम्यन्ति जीवाः परे ॥

3033

प्राणानां परिरक्षणाय सततं सर्वाः क्रियाः प्राणिनां
प्राणेभ्योभ्यधिकं समस्तजगतां नास्त्येव किंचित्प्रियम् ।
पुण्यं तस्य न शक्यते गणयितुं यः पूर्णकारुण्यवा-
न्प्राणानामभयं ददाति सुकृती तेषामहिंसाव्रतः ॥

3034

लक्ष्मीर्दानफला श्रुतं शमफलं पाणिः सुरार्चाफल-
श्चेष्टा धर्मफला परार्तिहरणक्रीडाफलं जीवितम् ।
वाणी सत्यफला जगत्सुखफला स्फीता प्रभावोन्नति-
र्भव्यानां भवशान्तिचिन्तनफला भूत्यै भवत्येव धीः ॥

3035

शीलं शीलयतां कुलं कलयतां सद्भावमभ्यस्यतां
व्याजं वर्जयतां गुणं गणयतां धर्मे धियं बध्नताम् ।
क्षान्तिं चिन्तयतां तमः शमयतां तत्त्वश्रुतिं शृण्वतां
संसारे न परोपकारसदृशं पश्यामि पुण्यं सताम् ॥

क्षेमेन्द्रस्य.

3036

यो मानुष्यं कुशलविभवं प्राप्य कल्पैरनल्पै-
र्मोहात्पुण्यद्रविणमिह न स्वल्पमप्याचिनोति ।
सोस्माल्लोकात्परमुपगतस्तीव्रमभ्येति शोकं
रत्नद्वीपाद्वणिगिव गतः स्वं गृहं शून्यहस्तः ॥

कस्यापि.

3037

उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
केदारोदरसंस्थानां परीवाह इवाम्भसाम् ॥

कालिदासस्य.

3038

अनर्थितर्पणं वित्तं चित्तमध्यानदर्पणम् ।
अतीर्थसर्पणं देहं पर्यन्ते शोच्यतां व्रजेत् ॥

श्रीजोनराजस्य.

3039

मृत्पाषाणगणैः सुवर्णमणिभिः शुक्त्यस्थिभिर्मौक्तिकै-
र्लोके मूढतमे धनं धनमिति व्यक्त्या प्रसिद्धिं गतैः ।
यः कोषः क्रियते न तस्य रुचिरं पश्यामि किंचित्फलं
निःशेषाश्रितभृत्यबान्धवसुहृद्दीनार्थिदानं विना ॥

व्यासदासस्य.

3040

याचमानजनमानसवृत्तेः
पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं
न द्रुमैर्न गिरिभिर्न समुद्रैः ॥

3041

लोक एष परलोकमुपेता
हा विहाय निधने धनमेकः ।
इत्यमुं खलु तदस्य निनीष-
त्यर्थिबन्धुरुदयद्दयचित्तः ॥

नैषधकर्तुः.

3042

मानुष्ये सति दुर्लभा पुरुषता पुंस्त्वे पुनर्विप्रता
विप्रत्वे बहुविद्यता निपुणता विद्यावतोर्थज्ञता ।
अर्थज्ञस्य विचित्रवाक्यपटुता तत्रापि लोकज्ञता
लोकज्ञस्य समस्तशास्त्रविदुषो धर्मे मतिर्दुर्लभा ॥

कस्यापि.

3043

किं जीवावधिबन्धनैर्गुणगणैराराधितैर्बन्धुभि-
र्ये यान्त्यन्तदिने क्षणाश्रुपतनप्रत्यायनापात्रताम् ।
सद्धर्माधिगमः क्रियाव्युपरमः सत्संगमः संयमः
पर्यन्तेप्यचला विरक्तमनसामेते सतां बान्धवाः ॥

क्षेमेन्द्रस्य.

3044

कानीनस्य मुनेः स्वबान्धववधूवैधव्यविध्वंसिनो
नप्तारः किल पञ्च गोलकसुताः कुण्डाः स्वयं पाण्डवाः ।
ते पञ्चापि समानजानय इदं दुःस्वप्नविध्वंसनं
तेषां कीर्तनमामनन्ति मुनयो धर्मस्य सूक्ष्मा गतिः ॥

3045

स्थाल्यां वैदूर्यमय्यां पचति तिलखलीं चान्दनैरिन्धनौघै-
श्छित्त्वा कर्पूरखण्डान्वृतिमिह कुरुते कोद्रवाणां समन्तात् ।
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कमूलस्य हेतोः
प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः ॥

कयोरपि.

3046

दातुर्वारिधरस्य मूर्धनि तडिन्नाङ्केयशृङ्गारिता
वृक्षेभ्यः फलपुष्पदायिनि मधौ मत्तालिवृन्दस्तुतिः ।
भीतत्रातरि वृत्तिदातरि गिरौ पूजा झरैश्चामरैः
सत्कारोयमचेतनेष्वपि विधेः किं दातृषु ज्ञातृषु ॥

राजशेखरस्य.

अथ शीलम्

3047

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च शीलमेतद्विदुर्बुधाः ॥

3048

वृत्तं यत्नेन संरक्षेद्वित्तमायाति याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

3049

यथा हि मलिनैर्वस्त्रैर्यत्र तत्रोपविश्यते ।
एवं चलितवृत्तस्तु वृत्तशेषं न रक्षति ॥

3050

न कुले वृत्तहीनानां प्रमाणमिति मे मतिः ।
अन्तेष्वपि हि जातानां वृत्तमेव विशिष्यते ॥

3051

अकुलीनः कुलीनश्च मर्यादां यो न लङ्घयेत् ।
धर्मापेक्षी मृदुर्दान्तः स कुलीनशतैर्वरः ॥

व्यासमुनेः

3052

शीलं रक्षतु मेधावी प्राप्तुमिच्छुः सुखत्रयम् ।
प्रशंसां वित्तलाभं च प्रेत्य स्वर्गे च मोदनम् ॥

कस्यापि.

3053

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥

क्षेमेन्द्रस्य.

3054

पाण्डित्यस्य विभूषणं मधुरता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवतो धर्मस्य निर्व्याजता
सर्वस्यास्य पुनस्तथैव जगतः शीलं परं भूषणम् ॥

3055

वरं विन्ध्याटव्यामनशनतृषार्तस्य मरणं
वरं सर्पाकीर्णे तृणपिहितकूपे निपतनम् ।
वरं गर्तावर्ते गहनजलमध्ये विलयनं
न शीलाद्विभ्रंशो भवतु कुलजस्य श्रुतवतः ॥

अथ कलिकालः

3056

कलेरन्ते भविष्यन्ति राक्षसा नररूपिणः ।
मानुषान्भक्षयिष्यन्ति वित्ततो न शरीरतः ॥

व्यासस्य.

3057

नष्टा श्रुतिः स्मृतिर्लुप्ता प्रायेण पतिता द्विजाः ।
मलेन नाशिताः शिष्टा हा वृद्धो वर्तते कलिः ॥

माधवस्य.

3058

तामवस्थामयं नीतः खलेन कलिना जनः ।
यया स्वामिसुहृद्द्रोहनिरतिर्गण्यते गुणः ॥

3059

धार्मिको दूर एवास्तां भूयाः परमधार्मिकः ।
अधार्मिकजनोच्छल्वे मा भूदिति वृणोम्यहम् ॥

वल्लभदेवस्य.

3060

आसीज्जनः कृतघ्नः क्रियमाणघ्नश्च सांप्रतं जातः ।
इति मे मनसि वितर्को भविता लोकः कथं भविता ॥

3061

उपकारिणि विश्वस्ते शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसंधं भगवति वसुधे कथं वहसि ॥

3062

विजितात्मनां जनानामभवद्यः कृतयुगे दमो नाम ।
सोयं विपरीततया मदः स्थितः कलियुगे पुंसाम् ॥

3063

प्राप्ते कलौ राजनि चार्थलुब्धे
धनेन किं जीवितमेव रक्ष्यम् ।
किं नैष लाभो यदि सौनिकेन
मुच्येत मेषो हृतसर्वलोमा ॥

केषामपि.

3064

तैस्तैर्घोरैर्व्याधिभिः पीड्यमानः
पापाचारैस्तस्करैर्मुष्यमाणः ।

दुर्भिक्षार्तो राजदण्डावसन्न-
श्चक्रारूढः सांप्रतं जीवलोकः ॥

3065

गुणार्जने क्लेशमपार्थकं त्यज
प्रगल्भतामाश्रय जीव्यते यया ।
गतः स कालः सह साधुचेष्टितै-
रकृत्रिमैर्यत्र गुणैरजृम्भ्यत ॥

3066

सुहृदयमिति दुर्जनेस्ति काशा
बहुकृतमस्य मयेति लुप्तमेतत् ।
सुजन इति पुराणशब्द एष
धनलवमात्रनिबन्धनोद्य लोकः ॥

3067

दुष्टैर्जितं सुचरितानि खिलीकृतानि
सत्संकथाः खलकथातिमिरेण रुद्धाः ।
नीचाः प्रधानपुरुषत्वमपि प्रपन्ना
हे धर्म साधुजनवल्लभ किं करोषि ॥

3068

गच्छ त्रपे विरम धैर्य धियः किमत्र
मिथ्या कदर्थयसि किं पुरुषाभिमान ।
दूरादपास्तगुणमर्चितदोषसैन्यं
दैन्यं यदादिशति तद्वयमाचरामः ॥

धर्मदत्तस्य.

3069

अहतहृदयाः सन्तः सत्यं ब्रवीमि निशम्यतां
विपिनमधुना गत्वा वासो मृगैः सह कल्प्यताम् ।
सुजनचरितध्वंसिन्यस्मिन्खलोदयशालिनि
प्रभवति कलौ नायं कालो गृहेषु भवादृशाम् ॥

3070

कपटपटुवा द्रोहे चित्तं सतां च विमानना
मतिरविनये शाठ्यं मित्रे सुतेष्वपि वञ्चना ।
कृतकमधुरा वाक्प्रत्यक्षं परोक्षविघातिनी
कलियुगमहाराजस्यैताः स्वराज्यविभूतयः ॥

कवीरपि.

3071

देशः शोककरो नृपः पशुसमः कालः कलङ्काकुलः
सादः साधुषु दुर्जनेषु च सुखं भृत्या न वृत्त्या युताः ।
दुःसाधं धनमस्थिराश्च सुहृदः कुस्थानलिङ्गं वपुः
शीर्णप्रायमशक्तिरार्तिशमने वार्ता शरीरस्य का ॥

साराग्रीस्याम्.

3072

क्व भ्रातश्चलितोसि यामि कटकं किं तत्र सेवाशया
कः सेव्यो नृपतिः कथं निजगुणैः के ते गुणा ये सताम् ।
किं तैरद्य कुतोपरे व्रज वनं किं वा त्वया न श्रुतं
पूज्यन्ते शठमत्सरिप्रभृतयः कर्णेजपाः सेवकाः ॥

3073

शीलं शैलतटात्पतत्वभिजनो निर्दह्यतां वह्निना
मा श्रौषं जगति श्रुतस्य विफलक्लेशस्य नामाप्यहम् ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोस्तु मे सर्वदा
येनैकेन विना गुणास्तृणबुसप्रायाः समस्ता अमी ॥

माघस्य.

3074

या साधून्प्रखलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय चक्रिकां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनिन्गुणेषु विफलेष्वास्थां वृथा मा कृथाः ॥

श्रीवर्धनस्य.

3075

यद्यप्युन्नतवंशवानवसुधाधामाभिरामं वपुः
संप्राप्नोतिशयस्वभावसुभगच्छायः सतां तापहृत् ।
तत्राप्येष विसंस्थुलस्थितिरहो लक्ष्मीं निजात्मोचितां
प्रायश्चित्तिकया विना न लभते पश्यातपत्रं यथा ॥

रणादित्यस्य.

3076

धर्मः प्रव्रजितस्तपश्च चलितं सत्यं च दूरं गतं
पृथ्वी मन्दफला जनाः कपटिनो मौढ्ये स्थिता ब्राह्मणाः ।
राजा दण्डपरो विचाररहितः पुत्राः पितृद्वेषिणो
भार्या भर्तृविरोधिनी कलियुगे धन्या जना ये मृताः ॥

कस्यापि.

3077

वेश्यावेश्मसु सीधुगन्धिललनावक्त्रासवामोदितै-
र्नीत्वा निर्भरमन्मथोत्सवरसैरुन्निद्रचन्द्राः क्षपाः ।
सर्वज्ञा इति तापसा इति चिरप्राप्ताग्निहोत्रा इति
ब्रह्मज्ञा इति दीक्षिता इति दिवा धूर्तैर्जगद्वञ्च्यते ॥

3078

गङ्गातीरतरङ्गशीतलशिलाविन्यस्तभास्वद्बृसी-
संविष्टाः कुशमुष्टिमण्डितमहादण्डाः करण्डोज्ज्वलाः ।
पर्यायग्रथिताक्षसूत्रवलयप्रत्येकबीजग्रह-
व्यग्राग्राङ्गुलयो हरन्ति धनिनां वित्तान्यहो दाम्भिकाः ॥

कृष्णमिश्रस्य.

अथ कर्म

3079

नमस्यामो देवान्ननु हतविधेस्तेपि वशगा
विधिर्वन्द्यः सोपि प्रतिनियतकर्मैकफलदः ।

फलं कर्मायत्तं यदि किममरैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥

कस्यापि.

3080

यथा छायातपौ नित्यं सुसंबद्धौ निरन्तरम् ।
तथा कर्म च कर्ता च संबद्धौ सर्वजन्तुषु ॥

3081

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥

3082

अचोद्यमानानि यथा पुष्पाणि च फलानि च ।
स्वकालं नातिवर्तन्ते तथा कर्माणि देहिनाम् ॥

3083

कर्मजा हि शरीरेषु रोगाः शारीरमानसाः ।
शरा इव पतन्तीह विमुक्ता दृढधन्विभिः ॥

3084

एतदेव महच्चित्रं प्राक्तनस्येह कर्मणः ।
यदनात्मवतामायुर्यच्चानतिमतां श्रियः ॥

3085

यं यमिच्छेद्यथा कामं तं तमेव तथाप्नुयात् ।
यदि न स्यात्पराधीनं पुरुषस्य क्रियाफलम् ॥

3086

नहि वर्षशतस्यान्तं नरः संभृत्य जायते ।
उपायेन हि जीवन्ति नरा वर्षशतायुषः ॥

3087

आपत्सु किं विषादेन संपत्तौ विस्मयेन किम् ।
भवितव्यं भवत्येव कर्मणामेष निश्चयः ॥

3088

अन्यथा शास्त्रगर्भिण्या धिया धीरः समीहते ।
स्वामिवत्प्राक्तनं कर्म विदधाति तदन्यथा ॥

3089

को दर्शयति पन्थानमितश्चेतश्च गच्छताम् ।
स्वच्छन्दानां च पयसां प्राक्तनानां च कर्मणाम् ॥

3090

बुद्धिमन्तो महोत्साहाः प्राज्ञाः शूराः कुलोद्गताः ।
पाणिपादैरुपेताश्च परेषां भृत्यतां गताः ॥

3091

न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये ।
लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः ॥

3092

महच्च फलवैषम्यं दृश्यते कर्मसंधिषु ।
वहन्ति शिबिकामन्ये यान्त्यन्ये शिबिकारुहः ॥

3093

कृतान्तपाशबद्धानां दैवोपहतचेतसाम् ।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि ॥

3094

न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं तु रक्षितुमिच्छन्ति बुद्धया संयोजयन्ति तम् ॥

3095

यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि पश्यति ॥

3096

बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥

3097

न कालो दण्डमुद्यम्य शिरः कृन्तति देहिनाम् ।
कालस्य बलमेतावद्विपरीतार्थदर्शनम् ॥

3098

यदेव कर्मकौशलं स्वयं कृतं शुभाशुभम् ।
तदेव तस्य यौतकं भवेदमुत्र गच्छतः ॥

श्रीव्यासमुनेः.

3099

यदर्जितं प्राणहरैः परिश्रमै-
र्मृतस्य तत्संविभजन्ति रिक्थिनः ।
कृतं च यद्दुष्कृतमर्थलिप्सया
तदेव दैवोपहतस्य यौतकम् ॥

व्यासस्य.

3100

नैवाकृतिः फलति नैव कुलं न शीलं
विद्या सहस्रगुणिता न च वाग्विशुद्धिः ।
कर्माणि पूर्वशुभसंचयसंचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥

अश्वघोषस्य.

3101

दीर्घा कर्मलता नवैव सततं व्याप्ता पुराणैः फलैः
सार्धेया सहचारिणी तनुभृतां तत्राप्यलं निश्चला ।
याकृष्टा परिवेष्टिता विघटिता प्रोत्पाटिता मोटिता
निर्घृष्टा कणशः कृतापि कुशलैर्नैव प्रयाति क्षयम् ॥

3102

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डान्तरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे ।
रुद्रो येन कपालपाणिरनिशं भिक्षाचरः कल्पितो
भानुर्भ्राम्यति यद्वशेन गगने तस्मै नमः कर्मणे ॥

कस्यापि.

3103

यत्कर्मबीजमुप्तं येन पुरा निश्चितं स तद्भुङ्क्ते ।
पूर्वकृतस्य हि शक्यो विधिनापि न कर्तुमन्यथाभावः ॥

सोमदेवस्य.

3104

विपुलं गगनं तुरंगमाः
पवनस्यापि जवातिशायिनः ।
रविरेति तथाप्यरेर्मुखं
नहि नाशोस्ति कृतस्य कर्मणः ॥

3105

लब्ध्वा जन्म सह श्रिया स्वयमपि त्रैलोक्यभूषाकरः
स्थित्यर्थं शितिकण्ठमप्युपगतस्तेनापि मूर्ध्ना धृतः ।
वृद्धिं शीतकरस्तथापि न गतः क्षीणः परं प्रत्युत
प्रायः प्राक्तनमेव कर्म बलवत्कस्योपकुर्वीत कः ॥

कस्यापि.

अथ दैवम्

3106

दाता बलिर्याचनको मुरारि-
र्दानं मही वाजिमखस्य मध्ये ।
दातुः फलं बन्धनमेव जातं
नमोस्तु दैवाय यथेष्टकर्त्रे ॥

क्षेमेन्द्रस्य.

3107

क्षुब्धदैवानिलोद्भूते मर्यादामविमुञ्चति ।
मनस्विहृदयाम्भोधौ हा कल्लोलपरंपरा ॥

गोविन्दराजस्य.

3108

गुणा यत्र न तत्रार्थो यत्रार्थास्तत्र नो गुणाः ।
अहो परमसामर्थ्यं संविभागविधौ विधेः ॥

श्रीव्यासमुनेः.

3109

परीक्ष्य सत्कुलं विद्यां वयः शौर्यं सुशीलताम् ।
विधिर्ददाति निपुणः कन्यामिव दरिद्रताम् ॥

3110

मनसापि न यत्स्पृष्टं दूरादपि यदुज्झितम् ।
तदप्युपायैर्विविधैर्विधिरिच्छन्प्रयच्छति ॥

कवेरपि.

3111

न केवलं मनुष्येषु दैवं देवेष्वपि प्रभुः ।
सति मित्रे धनाध्यक्षे चर्मप्रावरणो हरः ॥

रविगुप्तस्य.

3112

दैवं पुरुषकारेण कोतिवर्तितुमर्हति ।
विधातृविहितं मार्गं न कश्चिदतिवर्तते ॥

श्रीवाल्मीकेः.

3113

दैवोपसृष्टः पुरुषो यत्कर्म कुरुते क्वचित् ।
कृतं कृतं तदेवास्य दैवेन प्रतिहन्यते ॥

3114

अनयो विनयस्तस्य विधिर्यस्यानुवर्तते ।
नयः सम्यक्प्रयुक्तोपि भाग्यहीनस्य दुर्नयः ॥

3115

यन्मनोरथगतेरगोचरं
यत्स्पृशन्ति न गिरः कवेरपि ।
स्वप्नवृत्तिरपि यत्र दुर्लभा
हेलयैव विदधाति तद्विधिः ॥

कस्यापि.

3116

आधर्मिकः कदर्यो गुणविमुखः परुषवागनेकमतिः ।
भुङ्क्ते संपदमीदृग्ब्रूत नृकारः किमस्ति दैवं वा ॥

वल्लभदेवस्य.

3117

राहुरबाहुर्गगनतले दशशतकरमपि हन्ति ।
अन्तःस्थे हि विधौ कुटिले शूराः क्व प्रभवन्ति ॥

चर्पटीनाथस्य.

3118

दुर्लभलाभोप्यद्धा कस्यापि भवत्युपद्रवायैव ।
राहुरहारयदमृतं समवाप्य निजं शरीरमपि ॥

3119

अल्पेनैव गुणेन हि कश्चिल्लोके प्रसिद्धिमुपयाति ।
एकेन करेण गजः करी न सूर्यः सहस्रेण ॥

प्रकाशवर्षस्य.

3120

मत्स्योपि हि विजानाति क्षीरनीरविवेचनम् ।
प्रसिद्धं राजहंसस्य यशः पुण्यैरवाप्यते ॥

3121

प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभू-
न्न पतिष्यतः करसहस्रमपि ॥

माघस्य.

3122

मुञ्चत गुणाभिमानं गुणिनो विधिकिंकराः स्थ संसत्सु ।
गुणनिर्भरमपि मूलं मज्जति पङ्के सरोजस्य ॥

रुद्रटस्य.

3123

सत्कुलजे पाण्डित्यं विदुषि धनं धनिनि दानसंभोगौ ।
इति नियमानकरिष्यद्यद्यभविष्यद्विधिः स्वस्थः ॥

3124

स्त्रीणां वैरूप्यं दुर्जनस्याधिपत्यं
साधोर्दारिद्र्यं पण्डितस्याल्पमायुः ।
येनेदं सृष्टं जानताजानता वा
सर्वं दौरात्म्यं तेन कुण्डेन पीतम् ॥

केषामपि.

3125

शशिदिवाकरयोर्ग्रहपीडनं
गजभुजंगमयोरपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥

3126

सृजति तावदशेषगुणाकरं
पुरुषरत्नमलंकरणं भुवः ।
तदनु तत्क्षणभङ्गि करोति चे-
दहह कष्टमपण्डितता विधेः ॥

फल्गुहस्तिन्याः.

3127

असमसाहससुव्यवसायिनः
सकललोकचमत्कृतिकारिणः ।
यदि भवन्ति न वाञ्छितसिद्धयो
हतविधेरयशो न मनस्विनः ॥

शङ्कुकस्य.

3128

संतापो न खलु नरेण जीवलोके
वृत्त्यर्थं क्षणमपि पण्डितेन कार्यः ।
निश्चेष्टः शयनगतोऽप्युपाभुते तं
प्राप्तव्यो नियतफलाश्रयेण योर्थः ॥

3129

सङ्ग्रामे प्रहरणसंकटे गृहे वा
दीप्तेग्नौ गिरिविवरे महोदधौ वा ।
सर्वैर्वा सह वसतामुदीर्णसत्त्वै-
र्नाभाव्यं भवति न भाविनो विनाशः ॥

भदन्तवासुदेवस्य.

3130

आ जन्मनो विहितभक्तिरनन्यनाथः
सारथ्यकर्मणि च योग्यतया नियुक्तः ।
नाद्याप्यवाप चरणावरुणोपि सूर्या-
त्पुण्यैर्विना नहि भवन्ति समीहितार्थाः ॥

वासुदेवस्य.

3131

विधुरप्यर्कति चन्दनमनलति मित्राण्यपि रिपवन्ति ।
विधुरे वेधसि खिन्ने चेतसि विपरीतानि भवन्ति ॥

सोमस्य.

3132

यः पातार्थमुपार्जितोन्यशिरसस्तेनैव सिन्धुप्रभु-
र्वृद्धक्षत्रधराधवो निजशिरःपातं वरेणान्वभूत् ।
देव्याः सैव गदा श्रुतायुधनृपं हन्तावधीदाहवे
यत्त्राणाय विगण्यते विधिवशात्तेनैव नाशो भवेत् ॥

3133

यो यं जनापकरणाय सृजत्युपायं
तेनैव तस्य नियमेन भवेद्विनाशः ।
धूमं प्रसौति नयनान्ध्यकरं यमग्नि-
र्भूत्वाम्बुदः स शमयेत्सलिलैस्तमेव ॥

कल्हणस्य.

3134

हंहो विधे विविधपण्डितपुण्डरीक-
खण्डावखण्डनकरिन्कलिकालबन्धो ।

यावृक्खलेषु सततं तव पक्षपातः
स्वप्नेपि सत्त्व स भवेद्यदि किं ततः स्यात् ॥

भट्टवासुदेवस्य.

3135

कल्पद्रुमान्विगतवाञ्छजने सुमेरौ
रत्नान्यगाधसलिले सरितामधीशे ।
धात्रा श्रियं निदधता प्रखलेषु नित्य-
मत्युज्ज्वलः खलु घटे निहितः प्रदीपः ॥

प्रकाशवर्षस्य.

3136

इह सरजसि मार्गे चञ्चलो यद्विधाता
ह्यगणितगुणदोषो हेतुशून्यत्वमुग्धः ।
सरभस इव बालः क्रीडितः पांसुपूरे-
र्लिखति किमपि किंचित्तच्च भूयः प्रमार्ष्टि ॥

कस्यापि.

3137

प्रियसखि विपद्दण्डप्रान्तप्रपातपरंपरा-
परिचयचले चिन्ताचक्रे निधाय विधिः खलः ।
मृदमिव बलात्पिण्डीकृत्य प्रगल्भकुलालव-
द्भ्रमयति मनो नो जानीमः किमत्र विधास्यति ॥

3138

विरम विफलायासादस्माद्दुरध्यवसायतो
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे ।
अयि जड विधे कल्पापायव्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः ॥

विज्ञाकायाः.

3139

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं
व्यालानां पशवस्तृणाङ्कुरभुजः सृष्टाः स्थलीशायिनः ।

संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति सहसा सर्वे समाप्तिं गुणाः ॥

भर्तृहरेः.

3140

कलत्रचिन्ताकुलितस्य पुंसः
श्रुतं च शीलं च गुणाश्च सर्वे ।
अपक्वकुम्भे निहिता इवापः
प्रयान्ति देहेन समं विनाशम् ॥

कस्यापि.

3141

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके
वाञ्छन्देशमनातपं विधिवशाद्बिल्वस्य मूलं गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः ॥

शिविरेश्वासिस्यस्य.

3142

व्यायस्यन्नपि कश्चिदर्थितफलप्राप्तेरभागी भवे-
त्सर्वारम्भनिरुद्यमोपि लभते कश्चिद्यथेष्टं फलम् ।
हस्तात्कस्यचिदाशु नश्यति धनं तेनापरो युज्यते
बालोन्मत्तजडोपमस्य हि विधेर्नानाविधं चेष्टितम् ॥

भदन्ताश्वघोषस्य.

3143

भग्नाशस्य करण्डपिण्डिततनोर्ग्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन तत्क्षणमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये चोद्यतम् ॥

3144

भूपाला गुणविद्विषः कृतधियो मात्सर्यपङ्कप्लुताः
सन्तो दुर्गतयः सदैव धनिनः पापप्रवृत्तस्पृहाः ।

मुग्धाक्ष्यो रजसः पदं सुनियताः प्रेम्णः परावृत्तयः
संसारे किमिवास्ति दुर्मदजुषः शोच्यं विधेर्नैव यत् ॥

3145

दूरोल्लासितसज्जनापदि दृढप्रारब्धनीचोन्नतौ
यः सर्गे क्षणदृष्टनष्टविरसे बद्धादरः सर्वदा ।
पश्येयं यदि तं क्वचित्सकरुणोपालम्भरूक्षोक्तिभि-
र्लज्जानिष्प्रतिपत्तिमूकवचनं कुर्यामहं वेधसम् ॥

3146

स एवाहं पार्थस्तदपि वरलब्धं धनुरिदं
त एवामी बाणाः प्रमथितसुरारातिपृतनाः ।
इमास्ता वृष्णीनां हरिबलमुखानां युवतयो
ह्रियन्ते गोपालैर्विधिरतिबलीयान्न पुरुषः ॥

केषामपि.

3147

अवश्यभव्येष्वनवग्रहग्रहा
यया दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तयानुगम्यते
जनस्य चित्तेन भृशावशात्मना ॥

श्रीहर्षस्य.

3148

भवति भिषगुपायैः पथ्यभुक्स्यिरोगी
धनहरणविनिद्रश्छिद्रगोप्ता दरिद्रः ।
अनयचयविधायी निश्चलैश्वर्यधैर्यैः
स्ववशनिशितशक्तेः शासनेनैव धातुः ॥

क्षेमेन्द्रस्य.

3149

शशिनि किल कलङ्कः कण्टकं पद्मनाले
गुणवति विधनत्वं चन्दने कृष्णसर्पाः ।

उदधिजलमपेयं निर्मितं येन लोके
स जगति खलु दृष्टो निर्विवेको विधाता ॥

3150

हंहो दैव सदैव विश्वघटनव्यापारबद्धादरं
त्वां याचेमहि बन्धुरेण शिरसा जन्मैव मा मास्तु नः ।
किं चान्यद्यदि संचरेम भुवने भूयोपि भूयात्तदा
ब्राह्मण्यं च वदान्यता च वपु च ख्यातिश्च विद्या च नः ॥

3151

नेता यत्र बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावणो वाहनम् ।
इत्याश्चर्यबलान्वितोपि बलजिद्भग्नोऽसुरैः संगरे
तद्युक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥

केषामपि.

3152

अम्भोधिः स्थलतां स्थलं जलधितां धूलीलवः शैलतां
मेरुर्मृत्कणतां तृणं कुलिशतां वज्रं तृणक्लीबताम् ।
वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया
स्वेच्छादुर्ललिताद्भुतव्यसनिने दैवाय तस्मै नमः ॥

3153

परिभ्रमसि किं मुधा क्वचन चित्त विश्रम्यतां
स्वयं भवति यद्यथा भवति तत्तथा नान्यथा ।
अतीतमननुस्मरन्नपि च भाव्यसंकल्पय-
न्नतर्कितगमागमाननुभवामि भोगानहम् ॥

क्षेमेन्द्रस्य.

3154

यद्भावि तद्भवति नित्यमयत्नतोपि
यत्नेन चापि महता न भवत्यभावि ।
इत्थं विधातृवशवर्तिनि जीवलोके
किं दुःखमत्र पुरुषस्य विचक्षणस्य ॥

3155

पुत्रादप्यधिकं च विन्दति विभुर्भृत्यं हि भाग्योदये
पश्चात्सोपि तमेव निन्दति यथा शत्रुं विरुद्धे विधौ ।
किं कष्टेन दिवानिशं विहितया भक्त्या भृशं सेवया
दैवाधिष्ठितमेव तिष्ठति फलं जन्तोः शुभं वाशुभम् ॥

क्षेमेन्द्रस्य.

3156

धिग्दैवममलं नेत्रं पात्रं कज्जलभस्मनः ।
सच्छिद्रः समलो वक्रः कर्णः स्वर्णस्य भाजनम् ॥

कस्यापि.

अथापत्पद्धतिः

3157

मौर्ख्यं सर्वापदां निष्ठा का हि नापदजानतः ।
तस्मिन्नप्यविषण्णो यः क्व सोन्यत्र विषत्स्यति ॥

3158

यदि नाम कुले जन्म तत्किमर्थं दरिद्रता ।
दरिद्रत्वेपि मूर्खत्वमहो दुःखपरंपरा ॥

3159

कः स्वभावगभीराणां जानीयाद्बहिरापदम् ।
बालापत्येन भृत्येन यदि सा न प्रकाश्यते ॥

कह्लणस्य.

3160

इह लोके हि धनिनां परोपि स्वजनायते ।
स्वजनोपि दरिद्राणां जीवतामेव नश्यति ॥

3161

सन्तोपि न विराजन्ते हीनार्थस्येतरे गुणाः ।
आदित्य इव भूतानां श्रीर्गुणानां प्रकाशिनी ॥

3162

चण्डालश्च दरिद्रश्च द्वावेतौ पुरुषौ समौ ।
चण्डालस्य न गृह्णन्ति दरिद्रो न प्रयच्छति ॥

3163

वरं हि नरके वासो न तु दुश्चरिते गृहे ।
नरकात्क्षीयते पापं कुगृहात्परिवर्धते ॥

3164

नातः पापीयसीं कांचिदवस्थां शम्बरोऽब्रवीत् ।
यस्यां नैवाद्य न प्रातर्भोजनं तात विद्यते ॥

3165

न तथा बाध्यते राजन्प्रकृत्या निर्धनो जनः ।
यथा भद्राणि संप्राप्य तैर्विहीनः सुखोचितः ॥

3166

कुब्जस्य कीटखातस्य दावनिष्कुषितत्वचः ।
तरोरप्यूषरस्थस्य वरं जन्म न चार्थिनः ॥

3167

धर्मार्थकामहीनस्य परकीयान्नभोजिनः ।
काकस्येव दरिद्रस्य दीर्घमायुर्विडम्बना ॥

3168

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
इत्थमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥

3169

शीतमध्वा कदन्नं च वयोतीताश्च योषितः ।
मनसः प्रातिकूल्यं च जरायाः पञ्च हेतवः ॥

3170

सुहृदां हि धनं भुक्त्वा कृत्वा प्रणयमीप्सितम् ।
प्रतिकर्तुमशक्तस्य जीवितान्मरणं वरम् ॥

एते व्यासमुनेः

3171

लज्जावतः कुलीनस्य याचितुं धनमिच्छतः ।
कण्ठे पारावतस्येव वाकरोति गतागतम् ॥

3172

कण्ठे गद्गदता स्वेदो मुखे वैवर्ण्यवेपथू ।
म्रियमाणस्य चिह्नानि यानि तान्येव याचतः ॥

3173

धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम् ।
परचित्तगतान्दारान्पुत्रं च व्यसनातुरम् ॥

केषामपि.

3174

वीणा वंशश्चन्दनं चन्द्रभासः
शय्या यानं यौवनस्थास्तरुण्यः ।
नैतद्रम्यं क्षुत्पिपासार्दितानां
सर्वारम्भास्तण्डुलप्रस्थमूलाः ॥

3175

खशभाष्यं तु काव्येन काव्यं गीतेन हन्यते ।
गीतं तु स्त्रीविलासेन स्त्रीविलासो बुभुक्षया ॥

3176

दानं न दत्तं न तपश्च तप्तं
नाराधितौ शंकरवासुदेवौ ।
अग्नौ रणे वा न हुतश्च कायः
शरीर किं प्रार्थयसे सुखानि ॥

3177

फलाशिनो मूलतृणाम्बुभक्षा
विवाससो निस्तरशायिनश्च ।
गृहे विमूढा मुनिवच्चरन्ति
तुल्यं तपः किं तु फलेन हीनम् ॥

3178

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः
सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः ।
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैरुज्झितम् ॥

3179

भग्नावयं परिभवासिभिरुग्रधारै-
र्दारिद्र्यचण्डदहनेन नितान्तदग्धाः ।
बन्धूपकारविषमित्थमपीह भुक्त्वा
जीवाम एव रविजस्य किमस्ति निद्रा ॥

3180

अर्था न सन्ति न च मुञ्चति मां दुराशा
दानान्न संकुचति दुर्ललितं मनो मे ।
याच्ञा च लाघवकरी स्ववधे च पापं
प्राणाः स्वयं व्रजत किं हि विलम्बनेन ॥

केषामपि.

3181

शीतेनोद्धूषितस्य माषशिमिवच्चिन्तार्णवे मज्जतः
शान्ताग्निं स्फुटिताधरस्य धमतः क्षुत्क्षामकण्ठस्य मे ।
निद्रा क्वाप्यवमानितेव दयिता संत्यज्य दूरं गता
सत्पात्रप्रतिपादितेव वसुधा न क्षीयते शर्वरी ॥

मातृगुप्तस्य.

3182

जीवन्त्यर्थक्षये नीचा याच्ञोपद्रववञ्चनैः ।
कुलाभिमानमूकानां साधूनां नास्ति जीवनम् ॥

क्षेमेन्द्रस्य.

3183

तावत्सन्ति सहाया यावज्जन्तुर्न कृच्छ्रमाप्नोति ।
अभिपतति शिरसि मृत्यौ कं कः शक्तः परित्रातुम् ॥

रविगुप्तस्य.

3184

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥

कस्यापि.

3185

अम्बा तुष्यति न मया न स्नुषया सापि नाम्बया न मया ।
अहमपि न तया न तया वद राजन्कस्य दोषोऽस्ति ॥

भट्टकपर्दिनः.

3186

विकसामि रवावुदिते संकोचमुपैमि चास्तमुपयाते ।
दारिद्र्यसरसि मग्नः पङ्कजलीलामनुभवामि ॥

3187

रात्रौ जानुर्दिवा भानुः कृशानुः संध्ययोर्द्वयोः ।
इत्थं शीतं मया नीतं जानुभानुकृशानुभिः ॥

3188

घृतलवणतैलतण्डुलशाकेन्धनचिन्तयानुदिनम् ।
विपुलमतेरपि पुंसो नश्यति धीर्मन्दविभवत्वात् ॥

3189

प्रायः समासन्नपराभवाणां
धियो विपर्यस्ततमा भवन्ति ।
असंभवो हेममयस्य जन्तो-
स्तथापि रामो लुलुभे मृगाय ॥

3190

दधति न जनास्तन्नैराश्यादद्दृष्टविभूतयो
यदुचितसुखभ्रंशाद्दुःखं निजच्युतसंपदः ।
भवति हि तथा जात्यन्धानां कुतो हृदि वेदना
नयनविषयं स्मृत्वा स्मृत्वा यथोद्धृतचक्षुषाम् ॥

भट्टानन्दकस्य.

3191

सखे खेदं मा गाः कलय किल तास्ता निजकलाः
स्वकीर्त्या वर्धस्व क्व न खलु तवैतद्व्यवसितम् ।
न तन्मोघत्यत्र स्फुरितमिति चेन्नैतदुचितं
विचित्रोत्साहानां किमिदमियदेव त्रिभुवनम् ॥

श्रीवासुदेवस्य.

3192

निरन्नस्थालीकं क्षुदुपहतसीदत्परिजनं
विना दीपान्नक्तं सुखगहनसंरुद्धतिमिरम् ।
अनाक्रान्तद्वारं प्रणयिभिरपूर्णोत्सवमहो
गृहं कारातुल्यं भवति खलु दुःखाय गृहिणः ॥

3193

दृष्टं दुर्जनचेष्टितं परिभवो लब्धः समानाज्जना-
त्पिण्डार्थे धनिनां कृतं श्वलडितं भुक्तं कपालेष्वपि ।
पद्भ्यामध्वनि संप्रयातमसकृत्सुप्तं तृणप्रस्तरे
यद्यान्यन्न कृतं कृतान्त कुरु हे तत्रापि सज्जा वयम् ॥

विक्रमादित्यस्य.

3194

भद्रे वाणि कुरुष्व तावदमलां वर्णानुपूर्वीं मुखे
चेतः स्वास्थ्यमुपैहि याहि गुरुते प्रज्ञे स्थिरत्वं भज ।
लज्जे तिष्ठ पराङ्मुखी क्षणमहो तृष्णे पुरः स्थीयतां
पापो यावदहं ब्रवीमि धनिनं देहीति दीनं वचः ॥

3195

उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं गुरुं
श्रान्तस्तावदहं चिरं मरणजं सेवे त्वदीयं सुखम् ।
इत्युक्तो धनवर्जितेन विदुषा गत्वा श्मशानं शवो
दारिद्र्यान्मरणं परं सुखमिति ज्ञात्वा स तूष्णीं स्थितः ॥

केषामपि.

3184

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥

कस्यापि.

3185

अम्बा तुष्यति न मया न स्नुषया सापि नाम्बया न मया ।
अहमपि न तया न तया वद राजन्कस्य दोषोऽस्ति ॥

भट्टकपर्दिनः.

3186

विकसामि रवावुदिते संकोचमुपैमि चास्तमुपयाते ।
दारिद्र्यसरसि मग्नः पङ्कजलीलामनुभवामि ॥

3187

रात्रौ जानुर्दिवा भानुः कृशानुः संध्ययोर्द्वयोः ।
इत्थं शीतं मया नीतं जानुभानुकृशानुभिः ॥

3188

घृतलवणतैलतण्डुलशाकेन्धनचिन्तयानुदिनम् ।
विपुलमतेरपि पुंसो नश्यति धीर्मन्दविभवत्वात् ॥

3189

प्रायः समासन्नपराभवाणां
धियो विपर्यस्ततमा भवन्ति ।
असंभवो हेममयस्य जन्तो-
स्तथापि रामो लुलुभे मृगाय ॥

3190

दधति न जनास्तत्रैराश्यादहृष्टविभूतयो
यदुचितसुखभ्रंशाद्दुःखं निजच्युतसंपदः ।
भवति हि तथा जात्यन्धानां कुतो हृदि वेदना
नयनविषयं स्मृत्वा स्मृत्वा यथोद्धृतचक्षुषाम् ॥

महानन्दकस्य.

3191

सखे खेदं मा गाः कलय किल तास्ता निजकलाः
स्वकीर्त्या वर्धस्व क्व न खलु तवैतद्व्यवसितम् ।
न तन्मोघत्यत्र स्फुरितमिति चेन्नैतदुचितं
विचित्रोत्साहानां किमिदमियदेव त्रिभुवनम् ॥

श्रीवासुदेवस्य.

3192

निरन्नस्थालीकं क्षुदुपहतसीदत्परिजनं
विना दीपान्नक्तं मुखगहनसंरुद्धतिमिरम् ।
अनाक्रान्तद्वारं प्रणयिभिरपूर्णोत्सवमहो
गृहं कारातुल्यं भवति खलु दुःखाय गृहिणः ॥

3193

दृष्टं दुर्जनचेष्टितं परिभवो लब्धः समानाज्जना-
त्पिण्डार्थे धनिनां कृतं श्वलडितं भुक्तं कपालेष्वपि ।
पद्भ्यामध्वनि संप्रयातमसकृत्सुप्तं तृणप्रस्तरे
यच्चान्यन्न कृतं कृतान्त कुरु हे तत्रापि सज्जा वयम् ॥

विक्रमादित्यस्य.

3194

भद्रे वाणि कुरुष्व तावदमलां वर्णानुपूर्वीं मुखे
चेतः स्वास्थ्यमुपैहि याहि गुरुते प्रज्ञे स्थिरत्वं भज ।
लज्जे तिष्ठ पराङ्मुखी क्षणमहो तृष्णे पुरः स्थीयतां
पापो यावदहं ब्रवीमि धनिनं देहीति दीनं वचः ॥

3195

उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं गुरुं
श्रान्तस्तावदहं चिरं मरणजं सेवे त्वदीयं सुखम् ।
इत्युक्तो धनवर्जितेन विदुषा गत्वा श्मशानं शवो
दारिद्र्यान्मरणं परं सुखमिति ज्ञात्वा स तूष्णीं स्थितः ॥

केषामपि.

3196

दीनां दीनमुखैः स्वकीयशिशुकैराकृष्टजीर्णांशुकां
क्रोशद्भिर्विधुरैः क्षुधार्तिविधुरां पश्येन्न चेद्गेहिनीम् ।
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी जनः ॥

श्रीभर्तृहरेः.

3197

मद्गेहे मशकीव मूषकवधूर्मूषीव मार्जारिका
मार्जारीव शुनी शुनीव गृहिणी वाच्यः किमन्यो जनः ।
इत्यापन्नशिशूनसून्विजहतः संप्रेक्ष्य झिल्लीरवै-
र्लूतातन्तुवितानसंवृतमुखी चुल्ली चिरं रोदिति ॥

कस्यापि.

3198

आसे चेत्स्वगृहे कुटुम्बभरणं कर्तुं न शक्तोस्म्यहं
सेवे चेत्सुखसाधनं मुनिवनं मुष्णन्ति मां तस्कराः ।
श्वभ्रे चेत्स्वतनुं त्यजामि नरकाङ्घ्रीरात्महत्यावशा-
न्नो जाने करवाणि दैव किमहं मर्तुं न वा जीवितुम् ॥

3199

मा भूज्जन्म महाकुले तदपि चेन्मा भूद्विपत्तापि चे-
न्मा भूद्भूरि कलत्रमस्ति यदि तन्मा भूद्दयार्द्रं मनः ।
तच्चेदस्ति तदस्तु मृत्युरथ चेत्तस्यापि नास्ति क्षण-
स्तज्जन्मान्तरनिर्विशेषसदसद्देशान्तरेस्तु स्थितिः ॥

3200

यैः कारुण्यपरिग्रहान्न गणितः स्वार्थः परार्थं प्रति
यैश्चात्यन्तदयापरैर्न विहिता वन्ध्यार्थिनां प्रार्थना ।
ये चासन्परदुःखदुःखितधियस्ते साधवोस्तं गता-
श्चक्षुः संहर बाष्पवेगमधुना कस्यामतो रुद्यते ॥

3201

सक्तूञ्शोषयति श्रुतान्प्रतिकरोत्याक्रन्दतो बालका-
न्प्रत्यासिञ्चति कर्परेण सलिलं शय्यातृणं रक्षति ।
धृत्वा मूर्ध्नि पुराणशूर्पशकलं शून्ये गृहे व्याकुला
किं तद्यन्न करोति दुर्गतवधूर्देवे भृशं वर्षति ॥

3202

अप्रस्तावस्तुतिभिरनिशं कर्णशूलं करोति
स्वं दारिद्र्यं वदति वसनं दर्शयत्येव जीर्णम् ।
छायाभूतश्चलति न पुरः पार्श्वयोर्नैव पश्चा-
न्निःस्वः खेदं दिशति धनिनां व्याधिवद्दुश्चिकित्स्यः ॥

क्षेमेन्द्रस्य.

3203

गते सुहृदि शत्रुतां सततनिर्विवेके प्रभौ
गृहे कुगृहिणीवचःक्रकचदारिते वा हृदि ।
महाजनविवर्जिते सदसि मानिनां श्रेयसे
वरं मरणमेव वा शरणमन्यदेशान्तरम् ॥

3204

दारिद्र्यक्षितिपः स मे निजपतिस्तस्य प्रसादादभू-
द्याञ्चा जीवनमम्बरं दश दिशो वासश्च देवालये ।
अस्मद्वैरिणि लब्धसंगतिरिति त्वय्याश्रये कुप्यता
मद्वृत्तिं विनियोजितास्त्वदरयः का नाम वृत्तिर्मम ॥

3205

तृणादपि लघुस्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामपि प्रार्थयेदिति ॥

3206

आसीत्ताम्रमयं शरीरमधुना सौवर्णवर्णं गतं
मुक्ताहारलताश्रुबिन्दुनिवहैर्निःस्वस्य मे कल्पिता ।

स्वल्पं स्वल्पमनल्पकल्पमधुना दीर्घं वयः कल्पितं
स्वामिन्दुःख भवत्प्रसादवशतः किं किं न लब्धं मया ॥

केषामपि.

अथ सेवापद्धतिः

3207

शीतवातातपक्लेशान्यत्सहन्ते हि सेवकाः ।
शतांशेनापि हि ततस्तपस्तप्त्वा सुखी भवेत् ॥

3208

जडेषु राजचित्तेषु सुलभे पिशुने जने ।
यदि जीवन्त्यहो चित्रं क्षणमप्यनुजीविनः ॥

3209

सर्वासामेव वृत्तीनां वृत्ती राजकुलाश्रया ।
अधर्मबहुला ह्येषा नित्योद्वेगा च भारत ॥

3210

नृपेणाहूयमानस्य यत्तिष्ठति भयं हृदि ।
तन्न तिष्ठति तुष्टानां वने मूलफलाशिनाम् ॥

3211

द्वयं जहाति सेवकः सुखं च मानमेव च ।
यदर्थमर्थमीहते तदेव तस्य हीयते ॥

3212

आत्मविक्रयिणि क्लीबे सदा शङ्कितचेतसि ।
नित्यमिष्टवियोगार्ते किं सेवकपशौ सुखम् ॥

3213

अबुधैरर्थलोभेन पण्यस्त्रीभिरिव स्वयम् ।
आत्मा संस्कृत्य संस्कृत्य परोपकरणीकृतः ॥

3214

मनुष्यजातौ तुल्यायां भृत्यत्वं नाम गर्हितम् ।
प्रथमो यो न तत्रापि सोपि जीवत्सु गण्यते ॥

3215

एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता ।
ये पराधीनजन्मानस्ते चेज्जीवन्ति के मृताः ॥

3216

जन्मैव तावद्दुःखाय ततो दुर्गतता परा ।
दौर्गत्ये सेवया वृत्तिरहो दुःखपरंपरा ॥

3217

द्वारपालकराघातकिणीकृतगलोपि सन् ।
तथापि कुरुते सेवामहो तृष्णा गरीयसी ॥

3218

लगुडैर्हन्यमानोपि यदि जीवति सेवकः ।
तत्क्षणं पुनरायाति धिग्दैन्यमनपत्रपम् ॥

3219

कंधरावनतस्योर्वीं गतस्याधोमुखस्य ते ।
लज्जा न नाम निर्लज्जा गर्वो न गलितः कथम् ॥

3220

सेवकादपरो मूर्खस्त्रैलोक्येपि न विद्यते ।
दिने दिने नमन्मोहादुन्नतिं योभिवाञ्छति ॥

श्रीव्यासमुनेः.

3221

अतीव कर्कशाः स्तब्धा हिंस्रैर्जन्तुभिरावृताः ।
दुराराधाश्च विषमा ईश्वराः पर्वता इव ॥

सोमदेवस्य.

3222

सेवा श्ववृत्तिर्यैरुक्ता तैर्न सम्यगुदाहृतम् ।
स्वच्छन्दचारी कुत्र श्वा विक्रीतासुः क्व सेवकः ॥

3223

करोति लाभहीनेन गौरवेण किमाश्रितः ।
क्षामस्येन्दोर्गुणं धत्ते कमीश्वरशिरोधृतिः ॥

3224

या प्रकृत्यैव चपला निपतत्यशुचावपि ।
स्वामिनां बहु मन्यन्ते दृष्टिं तामपि सेवकाः ॥

3225

पञ्चाननपरिष्वङ्गो व्यालीवदनचुम्बनम् ।
भूपालसेवनं पुंसामसिधारावलेहनम् ॥

केषामपि.

3226

भक्ते द्वेषो जडे प्रीतिरुचितं गुरुलङ्घनम् ।
मुखे च कटुता नित्यं धनिनां ज्वरिणामिव ॥

आनन्दवर्धनस्य.

3227

प्रभूतं धनमालोक्य यो राज्ञां द्वारि तिष्ठति ।
स बद्धः सौनिकश्वेव संशुष्यति न पुष्यति ॥

कस्यापि.

3228

क्षमी दाता गुणग्राही स्वामी दुःखेन लभ्यते ।
अनुकूलः शुचिर्दक्षो राजन्भृत्योपि दुर्लभः ॥

श्रीहर्षदेवतत्सेवकयोः.

3229

आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः
कोर्थस्तेषां पार्थिवोपाश्रयेण ॥

3230

राजवल्लभतयोद्धतचित्ताः
सेवकास्त्यजत मानमुदारम् ।
रन्ध्रदर्शिभिरसंवृतमन्त्रैः
कस्य राजभुजगैः सह सख्यम् ॥

कस्यापि.

3231

आराध्यमानो बहुभिः प्रकारै-
र्नाराध्यते नाम किमत्र चित्रम् ।
अयं त्वपूर्वः प्रतिमाविशेषो
यस्सेव्यमानो रिपुतामुपैति ॥

3232

हसति हसति स्वामिन्युच्चै रुदत्यपि रोदिति
कृतपरिकरः स्वेदोद्गारं प्रधावति धावति ।
गुणसमुदितं दोषापेतं प्रनिन्दति निन्दति
धनलवपरिक्रीतो भृत्यः प्रनृत्यति नृत्यति ॥

धर्मकीर्तेः.

3233

सप्रस्वेदः पुलकपरुषः संभ्रमात्सप्रकम्पः
सान्तर्दाहः प्रशिथिलधृतिः सास्यशोषः सतर्षः ।
संवृत्तो यो गुरुरपि लघुर्हन्त तैस्तैः प्रकारै-
र्याञ्चाशब्दः स्पृशति पदवीं संनिपातज्वरस्य ॥

3234

शून्यार्थैर्वचनैर्मया नरपते कर्णौ तवापूरितौ
तेभ्यः शून्यतमस्त्वयापि बहुशो मत्कर्णपूरः कृतः ।
इत्थं वञ्चयतोः परस्परमयं कालो व्रजत्यावयोः
क्षीणा शक्तिरहं जितस्त्वमजितो जेता नृपः शस्यते ॥

किशोरकस्य.

3235

उन्नत्यै नमति प्रभुं प्रभुगृहान्द्रष्टुं बहिस्तिष्ठति
स्वद्रव्यव्ययमातनोति जडधीरागामिवित्ताशया ।
प्राणान्प्राणितुमेव मुञ्चति रणे क्लिश्नाति भोगेच्छया
सर्वं तद्विपरीतमेव कुरुते तृष्णान्धदृक्सेवकः ॥

3236

सन्ति स्वादुफला वने तरुवराः शुद्धं पयो नैर्झरं
वासो वल्कलमाश्रयो गिरिगुहा शय्या लतापल्लवैः ।
आलोकाय निशासु चन्द्रकिरणाः सख्यं कुरङ्गैः सह
स्वाधीने विभवेप्यहो नरपतिं याचन्ति मूढा नराः ॥

केषामपि.

3237

सत्ये शङ्काचकितमनसो वञ्चकग्रामलीनाः
शीलस्थूलोपकृतिविफलाः स्वल्पदोषेतिकोपाः ।
मर्मोद्भिन्नाः पिशुनवचना धर्मनर्मोक्तिदुष्टाः
साधुद्विष्टाः प्रखलपुरुषाः सर्वथा भूमिपालाः ॥

3238

द्वारे रुद्धमुपेक्षते कथमपि प्राप्तं पुरो नेक्षते
विज्ञप्तौ गजमीलनानि कुरुते गृह्णाति वाक्यच्छलम् ।
निर्यातस्य करोति दोषगणनां स्वल्पापराधे यमः
स स्वामी यदि सेव्यते मरुतटे किं नः पिशाचैः कृतम् ॥

क्षेमेन्द्रस्य.

3239

नमन्नपि हरिर्हन्यादाश्लिष्यन्नपि पन्नगः ।
विहसन्नपि वेतालः स्तुवन्नपि महीपतिः ॥

3240

काके शौचं द्यूतकारेषु सत्यं
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता ।
ज्ञाने भ्रान्तिः स्त्रीषु कामोपशान्ती
राजा मित्रं केन दृष्टं श्रुतं वा ॥

अथ तृष्णापद्धतिः

3241

मनोरथरथारूढं युक्तमिन्द्रियवाजिभिः ।
भ्राम्यत्येव जगत्कृत्स्नं तृष्णासारथिचोदितम् ॥

3242

वलिभिर्मुखमाक्रान्तं पलितै रञ्जितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥

3243

यौवनं जरया ग्रस्तमारोग्यं व्याधिभिर्हतम् ।
जीवितं मृत्युरभ्येति तृष्णैका निरुपद्रवा ॥

3244

यथा हि शृङ्गं गोः काले वर्धमानस्य वर्धते ।
एवं तृष्णापि चित्तेन वर्धमानेन वर्धते ॥

3245

अकर्तव्येष्वसाध्वीव तृष्णा प्रेरयते जनम् ।
तमेव सर्वपापेभ्यो लज्जा मातेव रक्षति ॥

3246

आशा बलवती कष्टं नैराश्यं परमं सुखम् ।
आशा निराशाः कृत्वा तु सुखं स्वपिति पिङ्गला ॥

3247

तृष्णाखनिरगाधेयं दुष्पूरा केन पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते ॥

3248

तृष्णे त्वमपि तृष्णार्ता त्रिषु स्थानेषु रज्यसि ।
व्याधितेष्वनपत्येषु जरापरिणतेषु च ॥

3249

आसन्नान्पुरतो भावान्दर्शयित्वा पुरः पुरः ।
छागो हरितमुष्टयेव दूरं नीतोस्मि तृष्णया ॥

3250

वर्तते येन न विना नरो वाञ्छतु नाम तत् ।
ततोधिकार्थप्रणयी पृष्टो दद्यात्किमुत्तरम् ॥

3251

विभूतिरर्थेत्यपि याचकानां
न दुर्गतं केचिदिहाद्रियन्ते ।
पीताम्बरोऽर्थेः समवाप लक्ष्मीं
दिगम्बरस्योपनतोऽर्धचन्द्रः ॥

एते व्यासमुनेः.

3252

तावद्गुणा गुरुत्वं च यावन्नार्थयते परम् ।
अर्थित्वे वर्तमानस्य न गुणा न च गौरवम् ॥

3253

विद्वत्तां चैव शौर्यं च सौजन्यं च कुलीनताम् ।
खलीकरोति याच्ञैका दुःशीलेवाङ्गना कुलम् ॥

3254

च्युता दन्ताः सिता केशा वाङ्निरोधः पदे पदे ।
पातसज्जमिमं देहं तृष्णा साध्वी न मुञ्चति ॥

3255

इच्छति शती सहस्रं ससहस्रः कोटिमीहते कर्तुम् ।
कोटियुतोपि नृपत्वं नृपोपि बत चक्रवर्तित्वम् ॥

3256

चक्रधरोपि सुरत्वं सुरोपि सुरराज्यमीहते कर्तुम् ।
सुरराजोप्यूर्ध्वगतिं तथापि न निवर्तते तृष्णा ॥

केषामपि.

3257

या सा जगत्परिभवस्य निमित्तभूता
हेतुः स्वयं सुरपतेरपि लाघवस्य ।
सा मां विडम्बयति नाथ सदैव तृष्णा
छिन्धि प्रसह्य भगवन्नपुनर्भवाय ॥

अवधूतस्य.

3258

आराध्य भूपतिमवाप्य ततो धनानि
भोक्ष्यामहे किल वयं सततं सुखानि ।

इत्याशया भवविमोहितमानसानां
कालः प्रयाति मरणावधिरेष पुंसाम् ॥

3259

दुग्धं च यत्तदनु यत्क्वथितं ततो नु
माधुर्यमस्य हतमुन्मथितं च वेगात् ।
जातं पुनर्घृतकृते नवनीतवृत्ति
स्नेहो निबन्धनमनर्थपरंपराणाम् ॥

सुभद्रायाः.

3260

आसिष्ये सुखितो गृहीति विहितो मोहेन दारग्रह-
स्तत्सङ्गात्सुतदासबान्धवसुहृत्सम्बन्धिनामुद्भवः ।
तन्निर्वाहकदर्थनापरिभवानौचित्यचिन्ताजुषः
किं सौख्यं कतमा गृहस्थितिरतोनर्थो मया स्वीकृतः ॥

कस्यापि.

3261

खलोल्लापाः सोढाः कथमपि तदाराधनपरै-
र्निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ।
कृतो वित्तस्तम्भप्रणिहितधियामञ्जलिरपि
त्वमाशे मोघाशे किमपरमतो नर्तयसि माम् ॥

भर्तृहरेः.

3262

देशे भ्रान्तमनेकदुर्गविषमे प्राप्तं न किंचित्फल-
मुत्कण्ठापरिखेदितेन मनसा नीतं वृथा यौवनम् ।
त्यक्त्वा मानकुलानुरूपचरितं सेवा कृता निष्फला
तृष्णे ब्रूहि किमन्यदिच्छसि परं तत्रापि सज्जा वयम् ॥

कस्यापि.

3263

अहो तृष्णावेश्या सकलजनतामोहनकरी
विदग्धा मुग्धानां हरति विवशानां शमधनम् ।

विपक्षीक्षादक्षासहतरलतारैः प्रणयिनी-
कटाक्षैः कूटाक्षैः कपटकुटिलः कामकितवः ॥

क्षेमेन्द्रस्य.

3264

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृतालङ्काभर्तुर्वदनपरिपाटीषुघटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥

अथानित्यतापद्धतिः

3265

अनित्यते जगन्निन्द्ये वन्दनीयासि संप्रति ।
या करोषि प्रसङ्गेन दुःखानामप्यनित्यताम् ॥

कस्यापि.

3266

सत्यं मनोरमाः कामाः सत्यं रम्या विभूतयः ।
किं तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् ॥

3267

मस्तकस्थायिनं मृत्युं यदि विन्दत्ययं जनः ।
आहारोपि विमुच्येत किमुताकार्यकारिता ॥

3268

अदर्शनादापतिताः पुनश्चादर्शनं गताः ।
न ते तव न तेषां त्वं तत्र का परिदेवना ॥

3269

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येर्थे नानुशोचितुमर्हसि ॥

3270

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥

3271

अशोच्यः शोचते शोच्यं किं वा शोच्यो न शोच्यते ।
कश्च कस्येह शोच्योस्ति देहेस्मिन्बुद्बुदोपमे ॥

3272

येपि नास्तीति मन्यन्ते तदैश्वर्यकदर्थिताः ।
दिनैः कतिपयैरेव तान्समीकुरुतेन्तकः ॥

3273

प्रबोध्यन्ते च ये तूर्यैर्मधुरैर्गीतवादितैः ।
ये चानाथाः परान्नादाः कालस्तेषां समक्रियः ॥

3274

यद्गतं तदतिक्रान्तं यदेष्यत्तच्च दूरतः ।
वर्तमानसुखभ्रान्तिभेदो भोगिदरिद्रयोः ॥

3275

क्रिमयो भस्म विष्ठा वा निष्ठा यस्येयमीदृशी ।
स कायः परपीडाभिर्धार्यतामिति को नयः ॥

3276

यस्यान्ते श्वापि कुरुते चरणौ मूर्ध्न्यशङ्कितः ।
अपहृत्य परान्पुंभिः कायः सोपि हि धार्यते ॥

3277

कथं ते व्यक्तदुर्वृत्ताः सुखं रात्रिषु शेरते ।
मरणान्तरिता येषां नरकेषूपपत्तयः ॥

3278

दिष्ट्या दूरोज्झितापायां संप्राप्तोस्मि जराभुवम् ।
महान्यौवनकान्तारः कुशलेनातिवाहितः ॥

3279

कृपणं विलपन्नार्तो जरया जर्जरीकृतः ।
ज्ञातीनां रुदतां मध्ये म्रियते न स पूरुषः ॥

3280

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥

3281

श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
नहि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम् ॥

3282

लम्बमाने यदादित्ये न दत्तं धनमर्थिनाम् ।
नहि जानामि तद्वित्तं प्रातः कस्य भविष्यति ॥

3283

यद्ददाति यदश्नाति तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥

3284

नियतो देहिनां मृत्युरनित्यं खलु जीवितम् ।
को हि जानाति नामाद्य प्रातः कस्य भविष्यति ॥

3285

इदं युगसहस्रेषु भविष्यदभवद्दिनम् ।
तदप्यद्यत्वमापन्नं का कथा मरणावधेः ॥

3286

अवश्यं भाविनं नाशं भावित्वाद्धिद्ध्युपस्थितम् ।
अयमेव हि ते कालः पूर्वमासीदनागतः ॥

3287

यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥

3288

मातापितृसहस्राणि पुत्रदारशतानि च ।
युगे युगे व्यतीतानि कस्य ते कस्य वा वयम् ॥

3289

समानानि व्यतीतानि नवानि न समानि मे ।
आत्मानमनुशोचामि सार्थभ्रष्ट इवाध्वगः ॥

3290

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम् ।
मरणव्याधिशोकानां किमद्य निपतिष्यति ॥

3291

सुखास्वादलवः कोपि संसारे सत्समागमः ।
यद्वियोगाग्निदग्धस्य मनसो नास्ति भेषजम् ॥

3292

किं धनेन करिष्यन्ति मनुष्या भङ्गुराश्रयाः ।
यदर्थं धनमिच्छन्ति शरीरं कस्य तत्स्थिरम् ॥

3293

शुक्लानि दिनखण्डानि निपतन्ति तवाग्रतः ।
आयुषश्छिद्यमानस्य मृत्युना किं न पश्यसि ॥

3294

आसन्नतरतामेति मृत्युर्याति दिने दिने ।
आघातं नीयमानस्य वध्यस्येव पदे पदे ॥

3295

मृत्योर्बिभेषि किं मर्त्य नहि भीतान्विमुञ्चति ।
अजातानैव गृह्णाति कुरु यत्नमजन्मने ॥

3296

तिष्ठन्तं च शयानं च मृत्युरभ्येति वै यदा ।
किं पल्वले मत्स्य इव सुखं स्वपिषि पुत्रक ॥

3297

करिष्यामि करिष्यामि करिष्यामीति चिन्तया ।
मरिष्यामि मरिष्यामि मरिष्यामीति विस्मृतम् ॥

3298

तुल्यजातिवयोरूपान्हतान्पश्यसि मृत्युना ।
कथं ते नास्ति निर्वेदो लौहं हि हृदयं तव ॥

3299

कायः संनिहितापायः संपदः पदमापदाम् ।
समागमाः सापगमाः सर्वं पर्यन्तभङ्गुरम् ॥

कस्यापि.

3300

श्वः श्वः प्राणप्रायणेपि न स्मरन्ति स्मरद्विषम् ।
मग्नाः कुटुम्बजम्बाले बालवन्मोहमोहिताः ॥

श्रीहर्षस्य.

3301

अहो संसृतिवेश्येयं रागाद्युद्दीपनोद्यता ।
रसमुत्पाद्य सर्वेषामन्ते वैरस्यकारिणी ॥

3302

अज्ञानवलितो बाल्ये मदमूढश्च यौवने ।
वार्द्धके विह्वलाङ्गश्च कदा कुशलभाग्जनः ॥

एतौ प° श्रीबकस्य.

3303

अज्ञानोपहतो बाल्ये यौवने मदनाहतः ।
शेषे कलत्रचिन्तार्तः किं करोतु कदा जनः ॥

3304

बाल्यमद्य दिनैरेव यौवनश्रीस्ततो जरा ।
देहेपि नैकरूपत्वं कास्था बाह्येषु वस्तुषु ॥

एतौ वाल्मीकिमुनेः.

3305

आपन्नया सन्नगिरा वेपमानोरुमूलया ।
जातो मे जरया सार्धं नववध्वेव संगमः ॥

3306

धर्मस्यार्थस्य कामस्य यशसो जीवितस्य च ।
अतृप्ताः पुरुषा राजन्याता यास्यन्ति यान्ति च ॥

3307

आयुषः क्षण एकोपि न लभ्यः स्वर्णकोटिभिः ।
स वृथा नीयते येन तस्मै नृपशवे नमः ॥

3308

पृथिवी दह्यते यत्र मेरुश्चापि विशीर्यते ।
शुष्यत्यम्भोनिधिजलं शरीरे तत्र का कथा ॥

3309

पुरंदरसहस्राणि चक्रवर्तिशतानि च ।
निर्वापितानि कालेन प्रदीपा इव वायुना ॥

श्रीव्यासमुनेः.

3310

एतेन बद्धबलिना संकोचमवाप्य वृद्धदेहेन ।
यातं हरिणेव मया त्रित्राणि पदानि कृच्छ्रेण ॥

3311

ऋज्वी स्थिरा सुवृत्ता पाणिग्रहणोज्ज्वला सुवंशोत्था ।
संधारयति पतन्तं संप्रति गृहणीव यष्टिर्माम् ॥

3312

दृष्टा बालकचेष्टा यौवनदर्पोथ वृद्धवैराग्यम् ।
सापि गता सोपि गतस्तदपि गतं स्वप्नमायेयम् ॥

केषामपि.

3313

क्षणसंपदियं सुदुर्लभा
प्रतिलब्धा पुरुषार्थसाधनी ।
यदि नात्र विचिन्त्यते हितं
पुनरप्येष समागमः कुतः ॥

बोधिसत्त्वस्य.

3314

यदि जन्मजरामरणं न भवे-
यदि चेष्टवियोगभयं न भवेत् ।
यदि सर्वमनित्यमिदं न भवे-
दिह जन्मनि कस्य रतिर्न भवेत् ॥

3315

चला विभूतिः क्षणभङ्गि यौवनं
कृतान्तदन्तान्तरवर्ति जीवितम् ।
तथाप्यवज्ञा परलोकसाधने
नृणामहो विस्मयकारि चेष्टितम् ॥

3316

संपदो जलतरङ्गविलोला
यौवनं त्रिचतुराणि दिनानि ।
शारदाभ्रपरिचञ्चलमायुः
किं धनैः परहितानि कुरुध्वम् ॥

3317

धर्मात्मजेन चरणाविह वन्दितौ मे
भीमेन सार्धमिह संकथिताः कथाश्च ।
अत्रार्जुनश्च यमजौ च सहानुयातौ
स्थानानि तानि खलु सन्ति न ते मनुष्याः ॥

अयं व्यासस्य.

3318

चेतोहरा युवतयः सुहृदोनुकूलाः
सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ।
नानाविधोपकरणाः करिणस्तुरंगाः
संमीलिते हि नयने न तदस्ति किंचित् ॥

श्रीविक्रमादित्यस्य.

3319

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-
र्नरः संसाराङ्के विशति यमधानीजवनिकाम् ॥

भर्तृहरेः.

3320

नरकनिलयात्प्रेतावासं ततस्त्रिदशालयं
त्रिदशभवनात्तिर्यग्योनिं परैति शुभक्षयात् ।
पुनरुपरतं तिर्यग्योनेर्मनुष्यगतावपि
भ्रमति विवशं कर्माविद्धं जगद्रथचक्रवत् ॥

साराशीत्याम्.

3321

जातोहं जनको ममैष जननी क्षेत्रं कलत्रं कुलं
पुत्रा मित्त्रमरातयो वसु गृहं भ्राता स्वसा बान्धवाः ।
संसारे शयने यथाप्य सुचिरं निद्रामविद्यामयीं
हंहो चित्त विघूर्णितो बहुविधान्स्वप्नानिमान्पश्यसि ॥

कृष्णमिश्रस्य.

3322

सेवध्वं विबुधास्तमन्धकरिपुं मा क्लिष्ट कष्ट श्रुते
यस्मादत्र परत्र च त्रिजगति त्राता स एकः शिवः ।
आयाते नियतेर्वशादविरले कालात्करालाद्भये
कुत्र व्याकरणं क्व तर्ककलहः कुत्रापि काव्यभ्रमः ॥

श्रीमद्राजानकलौलकस्य.

3323

ग्रीष्मे हारतुषारचन्दनचयश्चीनांशुकं चन्द्रिका
शीते राङ्कवकुङ्कुमाङ्कतरुणीपीनस्तनालिङ्गनम् ।
रात्रौ वेणुरवाग्र्यवाररमणीगीतं दिने सत्सभा
यस्यैतत्क्रियते स कस्य रुचिरः कायः कृतघ्नः स्थिरः ॥

क्षेमेन्द्रस्य.

3324

मृत्यो मुञ्च जराकरेण पुरुषं केशेषु मा मा ग्रहीः
संसारादपलायनप्रतिभुवो रागादयो यत्स्थिताः ।
तृष्णाबन्धनबद्धमानसशिखं किं वेत्सि नेदं जग-
द्देहीत्यादरजल्पितानि भवतः किं नाशयिष्याम्यहम् ॥

3325

माने म्लानिमुपागते विगलिते भोगाकुले यौवने
कालेन क्षपितेषु बन्धुषु शनैर्लब्धे विवेकोदये ।
विच्छिन्नावसरोपभोगलघुतामुक्तस्पृहाणां परं
सत्यं सत्यमभाव एव हि सुखं जाने धनानामहम् ॥

3326

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीतये ।
किं तूद्भ्रान्तपतत्पतंगपवनव्यालोलदीपानल-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥

3327

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ।
दृष्ट्वा जन्मजराविपोगमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥

केषामपि.

3328

भ्रातः कष्टमहो गतः स नृपतिः सामन्तचक्रं च त-
त्पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।
उद्वृत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥

श्रीकमलायुधस्य.

3329

संसारे सुखितामवाप्य सुचिरं सार्कं सुहृद्बान्धवै-
रन्ते क्रूरकृतान्तदन्तदलनक्लेशस्य भागी जनः ।
कार्यं कार्यमतो विचार्य निपुणैर्मोक्षोपलब्धिक्षमं
सामग्री पुनरीदृशी न घटते कल्पैरनल्पैरपि ॥

3330

आयूंषि क्षणिकानि यौवनमपि प्रायो जराध्यासितं
संयोगा विरहावसानविरसा भोगाः क्षणध्वंसिनः ।
जानन्तोपि यथाव्यवस्थितमिदं लोकाः समस्तं जग-
च्चित्रं यद्गुरुगर्वभावितधियः क्रुध्यन्ति माद्यन्ति च ॥

3331

उत्थायोत्थाय पापे परिणमति मतिर्मन्दबुद्धे यथा ते
न त्रासो नैव लज्जा न च भवति घृणा कुर्वतः कर्म पापम् ।
नूनं सा न श्रुता ते ज्वलदनलशिखा रौरवारावरौद्रा
तीक्ष्णायःकीलचक्रक्रकचपटुरवा राजधानी यमस्य ॥

कस्यापि.

अथ विषयोपहासः

3332

जन्मान्तरशताभ्यस्ता विषयेषु मतिर्नृणाम् ।
जरद्गौरिव सस्येभ्यः सा हि दुःखेन वार्यते ॥

3333

अपि चण्डानिलोद्भूतप्रसरस्य महोदधेः ।
शक्यते प्रसरो रोद्धुं नानुरक्तस्य चेतसः ॥

श्रीव्यासमुनेः.

3334

यदि नामास्य कायस्य यदन्तस्तद्बहिर्भवेत् ।
दण्डमुद्यम्य लोकोयं शुनः काकांश्च वारयेत् ॥

3335

लालेत्युद्विजते लोको वक्त्रासवमिति स्पृहा ।
प्रवञ्च्यते जनेनात्मा संज्ञाशब्दैः स्वयं कृतैः ॥

3336

प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया ।
तृप्ताः कामेन बाध्यन्ते जन्तवो निशि निद्रया ॥

3337

या इमाः प्रेक्षसे राजन्मदनव्याधवागुराः ।
आसामेव प्रभावेण ज्वलन्ति नरकाग्नयः ॥

3338

रक्ता हरन्ति सर्वस्वं प्राणानपि विरागतः ।
अहो रागविरागाभ्यां कष्टकष्टा हि योषितः ॥

3339

प्राज्ञं विनीतं स्वाचारं विद्वांसमपि मन्त्रिणम् ।
छलयन्ति नरं नित्यमेता योषित्पिशाचिकाः ॥

3340

नग्नत्वमशुचिस्पर्शो मूढताव्यक्तभाषणम् ।
कामिनः सदृशं सर्वमेतदुन्मत्तकस्य च ॥

3341

उत्तानोच्छूनमण्डूकपाटितोदरसंनिभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरक्रिमेः कस्य जायते ॥

3342

प्रस्वेदमलदिग्धेन वहता मूत्रशोणितम् ।
व्रणेन विकृतेनेदं सर्वमन्धीकृतं जगत् ॥

3343

अधोमुखैकदंष्ट्रेण विषभुक्प्रवाहिणा ।
अनेन दुश्चिकित्स्येन जगद्दष्टं भगाहिना ॥

कस्यापि.

3344

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
तस्मात्संजायते कामः कामात्क्रोधोपि जायते ॥

3345

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

व्यासमुनेः.

3346

संतोषैश्वर्यसुखिनां दूरे दुर्गतिभूमयः ।
भोगाशापाशबद्धानामवमानाः पदे पदे ॥

3347

सर्वत्र संपदस्तस्य संतुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ॥

3348

संतोषामृततृप्तस्य महतः पूर्णचेतसः ।
क्षीराब्धेरिव शुद्धस्य मुखे लक्ष्मीर्विराजते ॥

3349

अहो नु चित्रं पद्मोत्थैर्बद्धास्तन्तुभिरद्रयः ।
अविद्यमाना याविद्या तया सर्वे वशीकृताः ॥

एते भगवद्वाल्मीकिमुनेः

3350

जन्मनि क्लेशबहुले किं नु दुःखमतः परम् ।
इच्छायाः पूर्णता नास्ति यच्चेच्छा न निवर्तते ॥

3351

दोषान्दोषतया पश्यन्कालेनापि विरंस्यति ।
का कथा दोषविरतौ तद्गुणमहमानिनः ॥

3352

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥

3353

अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।
नाशे दुःखं व्यये दुःखं धिगर्थान्दुःखभाजनान् ॥

3354

संमोहयन्ति संपत्सु तापयन्ति विपत्सु च ।
खेदयन्त्यर्जने काले कदा भोगाः सुखावहाः ॥

3355

अहिंसा धाम धर्मस्य दुःखस्यायतनं स्पृहा ।
सङ्गत्यागः पदं मुक्तेर्भोगाभ्यासः पदं शुचः ॥

3356

यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि ।
भक्ष्यते सलिले मत्स्यैस्तथा सर्वेण वित्तवान् ॥

3357

राजतः सलिलादग्नेश्चौरतः स्वजनादपि ।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥

3358

अपकारिषु मा पापं चिन्तयस्व महामते ।
स्वयमेव हि नश्यन्ति कूलजाता इव द्रुमाः ॥

3359

न द्विषन्तः क्षयं यान्ति यावज्जीवमपि घ्नतः ।
क्रोधमेव तु यो हन्ति तेन सर्वे द्विषो हताः ॥

3360

अदीर्घदर्शिभिः क्रूरैर्मूढैरिन्द्रियसायकैः ।
हसद्भिः क्रियते कर्म रुदद्भिरनुभूयते ॥

3361

आत्मैव यदि नात्मानमहितेभ्यो निवारयेत् ।
कोन्यो हिततरस्तस्माद्य एनं विनिवारयेत् ॥

3362

इहैव नरकव्याधेश्चिकित्सां न करोति यः ।
गत्वा निरौषधं स्थानं स रुजः किं करिष्यति ॥

3363

स्वार्थसंप्रतिपत्त्यर्थमात्मीयानीन्द्रियाण्यपि ।
हितं व्यतीत्य वर्तन्ते कास्था मित्राप्तबन्धुषु ॥

श्रीव्यासमुनेः.

3364

गोभुजां वल्लभा लक्ष्मीर्मातङ्गोत्सङ्गलालिता ।
सेयं स्पृहां समुत्पाद्य दूषयत्युन्नतात्मनः ॥

कल्हणस्य.

3365

श्वस्त्वया सुखसंवित्तिः स्मरणीयाधुनातनी ।
इति स्वप्नोपमान्मत्वा कामान्मा गास्तदङ्गताम् ॥

भारवेः.

3366

मातापितृमयो बाल्ये यौवने दयितामयः ।
तदपत्यमयः शेषे मूढो नात्ममयः क्वचित् ॥

3367

जायमानो हरेद्भार्यां वर्धमानो हरेद्धनम् ।
म्रियमाणो हरेत्प्राणान्नास्ति पुत्रसमो रिपुः ॥

एतौ श्रीव्यासमुनेः

3368

विषस्य विषयाणां च दूरमत्यन्तमन्तरम् ।
उपभुक्तं विषं हन्ति विषयाः स्मरणादपि ॥

चन्द्रगोपिनः.

3369

मृगो मृगयुगीतेन नीयते शरगोचरम् ।
विषयास्वादलुब्धानां भवन्तीह विपत्तयः ॥

हरिभद्रस्य.

3370

अर्थप्रियतयात्मानमभिधाय ददाति या ।
तामात्मन्यपि निःस्नेहां कोनुरक्तेति मन्यते ॥

3371

को नु वेश्याजनात्तस्मात्कुशलेनापयास्यति ।
समृद्धिर्गुह्यकेशानामपि यत्र विहन्यते ॥

एतौ क्षेमेन्द्रस्य.

3372

यतो यतो निवर्तते ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि ॥

3373

अतिवाहितमतिगहनं विनापवादेन यौवनं येन ।
दोषनिधाने जन्मनि किं न प्राप्तं फलं तेन ॥

3374

महति कुलेपि च जाता योषित्प्रायेण मधुपमालेव ।
दानावर्जितहृदया चुम्बति मातङ्गवक्त्रमपि ॥

कयोरपि.

3375

हिंसाप्रभवो विजयस्तस्य फलं श्रीस्ततः सुखं क्षणिकम् ।
तत्प्राप्तये हि शुद्धं धर्मं च यशश्च को जह्यात् ॥

भदन्तभास्करस्य.

3376

अभ्यासो रतिहेतोर्भवति नराणां न वस्तुसद्गुणतः ।
सत्यपि मांसोपचये रागाय कुचौ स्फिजौ न पुनः ॥

3377

दाराः परिभवकारा बन्धुजनो बन्धनं विषं विषयाः ।
कोयं जनस्य मोहो ये रिपवस्तेषु सुहृदाशा ॥

कयोरपि.

3378

शमसुखशीलितमनसामशनमपि द्वेषमेति किमु कामः ।
स्थलमपि पचति झषाणां किमङ्ग पुनरङ्गमङ्गारः ॥

शङ्कुकस्य.

3379

यथा हि कश्चित्क्षुदुपद्रुतः श्वा
शुष्कास्थिसंघट्टविचूर्णितास्यः ।
स्वं शोणितं विन्दति तत्प्रसूतं
तथेन्द्रियान्धः सुखमङ्गनानाम् ॥

कस्यापि.

3380

मधु तिष्ठति वाचि योषितां
हृदि हालाहलमेव केवलम् ।
अत एव निपीयतेधरो
हृदयं मुष्टिभिरेव ताड्यते ॥

कालिदासमाघयोः.

3381

यदेव ते लाघवहेतुरर्थिता
पतन्ति यन्मूर्ध्नि निकारपांसवः ।
स्पृशन्त्यधिक्षेपशराश्च यन्मन-
स्तदङ्गनाभिः क्रियते शरीरिणाम् ॥

3382

स्थितासनस्था शयिता पराङ्मुखी
स्वलंकृता वाप्यनलंकृताथवा ।
निरीक्ष्यमाणा प्रमदा सुदुर्बलं
मनुष्यमालेख्यगतापि कर्षति ॥

3383

स्मितेन हावेन च लज्जया भिया
पराङ्मुखैरर्धकटाक्षवीक्षितैः ।

वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥

3384

कामं विषं च विषयाश्च निरीक्ष्यमाणाः
श्रेयो विषं न विषयाः परिसेव्यमानाः ।
एकत्र जन्मनि विषं विनिहन्ति पीतं
जन्मान्तरेषु विषयाः परितापयन्ति ॥

चन्द्रगोपिनः.

3385

विरमत बुधा योषित्सङ्गात्सुखात्क्षणभङ्गुरा-
त्कुरुत करुणामैत्रीप्रज्ञावधूजनसंगमम् ।
न खलु नरके हाराक्रान्तं वधूस्तनमण्डलं
शरणमथवा श्रोणीबिम्बं रणन्मणिमेखलम् ॥

कस्यापि.

3386

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥

जयादित्यस्य.

3387

तृषा शुष्यत्यास्ये पिबति सलिलं शीतसुरभि
क्षुधार्तः सञ्छालीन्कवलयति मांसाकवलितान् ।
प्रदीप्ते रागाग्नौ घननिविडमाश्लिष्यति वधूं
प्रतीकारे व्याधेः सुखमिति विपर्यस्यति जनः ॥

3388

समाश्लिष्यत्युच्चैः पिशितघनपिण्डं स्तनधिया
मुखं लालापूर्णं पिबति चषकं सासवमिति ।

अमेध्यक्लेदार्द्रे पथि च रमते स्पर्शरसिको
महामोहान्धानां किमिव कमनीयं त्रिजगताम् ॥

3389

सुधौतं कौशेयं सुरभि कुसुमं कौङ्कुममपि
क्षणाद्यत्रास्मिन्पतितमशुचित्वे निपतति ।
विगन्धानिःष्यन्दान्वमति नवभिर्यो व्रणमुखैः
कथं तस्मिन्काये सुभग बहुमानोऽभवताम् ॥

धीरनागस्य.

3390

कृशः काणः खञ्जः श्रवणविकलः पुच्छरहितः
क्षुधाक्षामो वृद्धः पिठरककपालार्पितकरः ।
व्रणैः पूयक्लिन्नैः क्रिमिकुलकृतस्रावबहुलैः
शुनीमभ्येति श्वा तमपि मदयत्येव मदनः ॥

कस्यापि.

3391

परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ ।
कुणपः कामिनी मांसमिति तिस्रो विडम्बनाः ॥

3392

अशनैरशनैर्बाल्ये यौवने घस्मरात्स्मरात् ।
कल्यवैकल्यतः शेषे स्फुटं नष्टं वयो नृणाम् ॥

अथ परिदेवना

3393

मनोरथैकसाराणामेवमेव गतं वयः ।
अद्यापि न कृतं किंचित्सतां संस्मरणोचितम् ॥

3394

यातं यौवनमधुना वनमधुना शरणमस्माकम् ।
स्फुरदुरुहारमणीनां हा रमणीनां गतः कालः ॥

3395

स्वस्ति सुखेभ्यः संप्रति सलिलाञ्जलिरेव मन्मथकथायाः ।
ता मामतिवयसं बत तरलदृशः स्खलितमीक्षन्ते ॥

3396

भोगा न भुक्ता वयमेव भुक्ता-
स्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव याता-
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥

केषामपि.

3397

लावण्यपण्यसुरतक्रयविक्रयस्य
कालो गतः प्रथमयौवनविभ्रमस्य ।
गात्रं हि मे वलितरंगसहस्रचित्रं
लज्जामपास्य तरुणायत एव चित्तम् ॥

3398

निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्योत्थानं घनतिमिररुद्धे च नयने
अहो धृष्टः कायस्तदपि मरणापायचकितः ॥

3399

स्फुटापायः कायः सखिसुतसुखं स्थैर्यविमुखं
महारोगा भोगाः कुवलयदृशः शल्यसदृशः ।
गृहावेशः क्लेशः प्रकृतिचपला श्रीरपि खला
यमः स्वैरी वैरी तदपि च हितं नैव विहितम् ॥

3400

न प्राप्ता भुवि वादिदन्तिदमनी विद्या विनीतोचिता
खड्गाग्रैः करियूथकुम्भदलनैर्नाकं न नीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलतया शून्यालये दीपवत् ॥

अथ मनोरथः

3401

कदा संसारजालान्तर्बद्धं त्रिगुणरज्जुभिः ।
आत्मानं मोचयिष्यामि शिवभक्तिशलाकया ॥

3402

वाङ्मनःकायकर्माणि विनिवेश्य त्वयि प्रभो ।
त्वन्मयीभूय निर्द्वन्द्वः कश्चित्स्यामपि कर्हिचित् ॥

3403

मलतैलाक्तसंसारवासनावर्तिदाहिना ।
ज्ञानदीपेन देव त्वं कदा नु स्यामुपस्थितः ॥

3404

एकाकी निस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।
कदा शंभो भविष्यामि संसारोन्मूलनक्षमः ॥

3405

सुशान्तशास्त्रार्थविचारचापलं
निवृत्तनानारसकाव्यकौतुकम् ।
निरस्तनिःशेषविकल्पविप्लवं
प्रपत्तुमन्विच्छति चक्रिणं मनः ॥

3406

कृष्ण त्वदङ्घ्रियुगलाम्बुजभक्तिरेणु-
पुञ्जान्तरालपरिधूसरविग्रहोऽहम् ।
भृङ्गः कदा निजपतत्रविधूननेन
प्रेतेशदिक्तिमिरपातपटुर्भवेयम् ॥

3407

विजृम्भमाणे तमसि प्रगल्भे
यथा भवासक्तमतिः स्थितोऽहम् ।
गतेऽपि तस्मिन्नुदितावबोध-
स्तथा भवासक्तमतिर्भवेयम् ॥

3408

गुहाश्रितो धर्मरतिर्गिरीश-
प्रथां दधानो भवतः प्रसादात् ।
सत्याहितप्रीतिरहीनभक्ति-
र्भवानिवाहं भगवन्भवेयम् ॥

प° अगजुरस्य.

3409

दीनेषु दानपरमः परकार्यदक्षः
क्षेत्रज्ञचिन्तनपरो निरतः समाधौ ।
कर्हीशसंस्तुतिपरः प्रणतो गुरुभ्यः
स्यां सर्वदा सकलभोगविरक्तचित्तः ॥

कस्यापि.

3410

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशकलिलम् ।
प्रसन्ने त्वय्येव स्वयमुचितचिन्तामणिगुणे
विविक्तः संकल्पः किमभिलषितं पुष्यति न ते ॥

3411

पाणौ पावनमक्षसूत्रमुचितं रुद्राक्षमाला गले
भस्माङ्के सुभगं शिरस्यपि तडित्पिङ्गत्विषोमे जटाः ।
जीर्णं वल्कलमंसयोस्तरुतले वासः प्रशान्तस्य मे
भूयादाश्रमवर्तिनः किमपरं कर्णे कथा शांभवी ॥

3412

गङ्गातीरकृतोटजस्य नियमक्षामस्य शान्तात्मनो
नीवारप्रसृतिंपचस्य दधतो मेध्यां त्वचं तारवीम् ।
दर्भप्रस्तरशायिनः शिव शिवेत्याक्रन्दतः प्रत्यहं
भस्मस्नानकृतः कदा मम मनो निर्वाणमभ्येष्यति ॥

3413

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
कदा पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः ॥

3414

घनोद्यानच्छायामिव मरुपथाद्दावदहना-
त्तुषाराम्भोवापीमिव विषविपाकादिव सुधाम् ।
प्रवृद्धादुन्मादात्प्रकृतिमिव निस्तीर्य विरहा-
ल्लभेयं त्वद्भक्तिं निरुपमरसां शंकर कदा ॥

श्रीहर्षदेवात्मजवाक्पतेः

3415

सान्द्रानन्दस्तिमितकरणः पुण्यनैपुण्यभागी
भागीरथ्यास्तटविटपिनः क्वापि मूले निलीनः ।
सर्वाकारं गिरिपतिसुताकान्तमेकं प्रपन्नः
स्वात्मारामः शमसुखसुधास्वादमभ्येति धन्यः ॥

3416

सुरस्रोतस्वत्यास्तटविटपिपुष्पौघसुरभौ
गिरिग्रावग्रामस्खलनमुखरस्रोतसि जले ।
शमक्षामैरङ्गैरगणितभवक्लेशविपदः
कदा मे स्यात्तृप्तिर्हरचरणसेवासुखरसैः ॥

3417

उदारैर्मन्दारै रचितशिखरं चन्द्रशिखरं
समभ्यर्च्य प्रेम्णा विपुलपुलकालंकृततनुः ।
कदा गन्धाबन्धप्रमदमुदितोद्दाममधुप-
स्फुरद्गुञ्जागर्भैर्विभुमभिभजेयं नुतिपदैः ॥

3418

अमन्दानन्दानां गलदलघुसंतापविपदां
पदाम्भोजद्वन्द्वं शिरसि दधतामिन्दुशिरसः ।
कदा नः कालिन्दीसलिलशबलैरम्बरसरि-
त्तरङ्गैरङ्गारीभवति भवबन्धेन्धनचयः ॥

एते पं° जगद्धरस्य.

3419

लक्ष्मीपङ्ककलङ्किताः परिमितक्ष्माखण्डपिण्डीभुजो
गर्वग्रन्थिविसंस्थुलैरवयवैर्नैपथ्यकन्थाभृतः ।
एते कीदृश ईश्वराः कुपतयः किं वानया चर्चया
यस्त्रैलोक्यविलक्षणः फलतु नः सत्यं स एवेश्वरः ॥

3420

वाराणस्याममी वारा नीवाराशनसुस्थितेः ।
नवारामनिषण्णस्य वारा स्नातस्य यान्तु मे ॥

3421

स्वजनवसतेर्निःसृत्याराच्छलेन बलेन वा
लघु विरचयन्गेहं भूमेस्तलेन दलेन वा ।
विदधदतुलं प्राणत्राणं फलेन जलेन वा
वनभुवि कदा स्यां भून्योहं मलेन खलेन वा ॥

पं° पाजकस्य.

3422

स्वःसिन्धुतीरेऽप्रविघातवीरे
लसत्समीरे करलभ्यनीरे ।
वसन्कुटीरे परिधाय चीरे
करोम्यधीरे न रुचिं शरीरे ॥

कस्यापि.

3423

शरीररोगं प्रियविप्रयोगं
पापौघयोगं कुविभोर्नियोगम् ।

भिक्षाप्रयोगं च खलोपयोगं
कदन्नभोगं हर मे हराशु ॥
रैरुप्पकस्य.

3424

भोगेच्छाविरिरंसया मलमुषामादित्सया श्रेयसां
नो ब्रह्माण्डजिगीषया भवमहासिन्धोस्तितीर्षाधिया ।
पात्रं पर्णपुटी गृहं गिरितटी वल्कप्रकारः पटी-
स्त्यैश्वर्यारभटी सदा मम भवेत्सेव्या च गङ्गातटी ॥

अथ संकीर्णवस्तुवर्णनम्

3425

निवासः क्रियतां गाङ्गे पापवारिणि वारिणि ।
स्तनद्वन्द्वे मृगाक्ष्या वा मनोहारिणि हारिणि ॥

3426

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ॥

3427

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।
अश्रेयसि प्रपन्ने तु क्वापि यान्ति विनायकाः ॥
केषामपि.

3428

अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम् ।
रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥

3429

अनेकदोषदुष्टोपि कायः कस्यास्ति न प्रियः ।
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ॥

3430

विषं वेश्म दरिद्रस्य वृद्धस्य तरुणी विषम् ।
विषं त्वशिक्षिता विद्या ह्यजीर्णे भोजनं विषम् ॥

3431

सत्काव्यभूषणा वाणी रजनी चन्द्रभूषणा ।
सुशीलभूषणा नारी लक्ष्मीर्विनयभूषणा ॥

3432

विद्याविक्रमजं योऽत्ति साधु सोऽत्तीह मानवः ।
श्वापि नाम स्वलाङ्गूलवलनात्फलमश्नुते ॥

3433

प्रवर्धमानः पुरुषस्त्रयाणामसुखावहः ।
पूर्वार्जितानां मित्राणां दाराणामथ वेश्मनाम् ॥

3434

प्रलीयन्तेऽल्पपुण्यानां शरीरेष्वखिला गुणाः ।
बालवैधव्यदग्धानां कुलस्त्रीणां स्तना इव ॥

3435

उत्थाय हृदि लीयन्ते दरिद्राणां मनोरथाः ।
बालवैधव्यदग्धानां कुलस्त्रीणां स्तना इव ॥

3436

ये बालभावे न पठन्ति विद्या
ये यौवनस्था अधना अदाराः ।
ते शोचनीया इह जीवलोके
मनुष्यरूपेण मृगाश्चरन्ति ॥

केषामपि.

3437

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नासौ मुनिर्यस्य वचोऽप्रमाणम् ।
धर्मस्य मूलं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥

दिङ्नागस्य.

3438

एको हि दोषो गुणसंनिपाते
निमज्जतीत्येतदयुक्तमुक्तम् ।
रूपादिकान्सर्वगुणान्विहन्ति
किं मौर्ख्यमेकं न शरीरभाजाम् ॥

3439

एको हि दोषो गुणसंनिपाते
निमज्जतीत्येतदयुक्तमुक्तम् ।
तेनापि नूनं कविना न दृष्टं
दारिद्र्यमेकं गुणपूगहारि ॥

3440

वरं दरिद्रः श्रुतिशास्त्रपाठको
न चार्थयुक्तः श्रुतशीलवर्जितः ।
सुलोचनः क्षीणपटोपि शोभते
न नेत्रहीनः कनकाद्यलंकृतः ॥

3441

अर्थातुराणां न सुहृन्न बन्धुः
कामातुराणां न भयं न लज्जा ।
विद्यातुराणां न सुखं न निद्रा
क्षुधातुराणां न वपुर्न तेजः ॥

3442

क्षुधासमा नास्ति शरीरवेदना
चिन्तासमा नास्ति शरीरशोषणा ।
विद्यासमा नास्ति शरीरभूषणा
वृत्त्या समा नास्ति शरीरपोषणा ॥

3443

विजृम्भितोद्दामरसेन चेतसा
निरूप्यमाणं किमपि प्रियावपुः ।

तथैव वैराग्यवता विभागशो
निरूप्यमाणं किमपि प्रियावपुः ॥

3444

अहितहितविचारशून्यबुद्धेः
श्रुतिसमयैर्बहुभिर्बहिष्कृतस्य ।
उदरभरणमात्रकेवलेच्छोः
पुरुषपशोश्च पशोश्च को विशेषः ॥

3445

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय दुःखम् ।
कीर्तिं च दिक्षु वितनोति तनोति लक्ष्मीं
किं किं न साधयति कल्पलतेव विद्या ॥

केषामपि.

3446

लोकोत्तरं चरितमर्पयति प्रतिष्ठां
पुंसां कुलं नहि निमित्तमुदारतायाः ।
वातापितापनमुनेः कलशात्प्रसूति-
र्लीलायितं पुनरमुद्रसमुद्रपानम् ॥

3447

पातालमाविशसि यासि नभो विलङ्घ्य
दिङ्मण्डलं भ्रमसि मानस चापलेन ।
भ्रान्त्वापि देशमपरं हि तदात्मनीनं
न ब्रह्म संस्पृशसि निर्वृतिमेषि येन ॥

अर्गटस्य.

3448

दुर्गन्धिपूतिविकृतैररविन्दमिन्दु-
मिन्दीवरं च तुलयन्ति यदङ्गनाङ्गैः ।

तस्यानपायि फलमुग्रमिदं कवीनां
तास्वेव गर्भनिलयं यदमी विशन्ति ॥

चन्द्रगोपिनः.

3449

केचिद्भयेन हि भजन्ति विनीतभाव-
मन्ये जना विभवलोभकृतप्रयत्नाः ।
केचिच्च साधुजनसंसदि कीर्तिलोभा-
त्सद्भाववाञ्जगति कोपि न साधुरस्ति ॥

चन्द्रगोपिनः.

3450

दम्भेन लोभेन भिया ह्रिया वा
प्रायो विनीतो जन एष सर्वः ।
वैराग्यतस्त्वा हृदयं विनीतं
नरं वरं दुर्लभमेव मन्ये ॥

भट्टश्रीदत्तस्य.

3451

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम् ।
संतर्पिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ॥

3452

तस्मादनन्तमजरं परमं विकासि
तद्ब्रह्म वाञ्छसि सदा यदि चेतनास्ति ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादयः कृपणलोकमता भवन्ति ॥

भर्तृहरेः.

3453

किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापै-
र्द्वयमिह पुरुषाणां सर्वदा सेवनीयम् ।

अभिनवमदलेखालालसं सुन्दरीणां
स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥

महोद्धदस्य.

3454

प्रतिदिनमिह लोके किं किमभ्यस्यमानं
नवनवमिव चेतो ह्लादयत्येव पुंसाम् ।
मम तु विदितमेतत्संगतं सज्जनाना-
मभिनववनिताभिर्वा रतं भारतं वा ॥

कस्यापि.

3455

न संसारोत्पन्नं चरितमभिपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृषतः ।
महद्भिः पुण्यौघैश्चिरपरिगृहीता हि विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥

3456

यदा किंचिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोस्मीत्यभवदवलिप्तं मम मनः ।
यदा किंचित्किंचिद्बुधजनसकाशादधिगतं
तदा मूर्खोस्मीति ज्वर इव मदो मे व्यपगतः ॥

भर्तृहरेः.

3457

मणिः शाणोल्लीढः समरविजयी हेतिनिहतो
मदक्षीणो नागः शरदि सरिदाश्यानपुलिना ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवश्चार्थिषु नरः ॥

3458

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।

प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥

भर्तृहरेः.

3459

हर्तुर्याति न गोचरं किमपि शं पुष्णाति सर्वात्मना
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं वृद्धिं परां गच्छति ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥

भर्तृहरेः.

3460

फलमुपशमो विद्वत्तायास्ततो धनमिच्छतां
भवति विदुषां व्यर्थः क्लेशो यदत्र किमद्भुतम् ।
न नियतफलारम्भः कर्तुं फलार्थिभिरन्यथा
भवति हि खलु व्रीहेर्बीजं न जातु यवाङ्कुरः ॥

3461

यद्वित्ताढ्याः प्रखलपुरुषाः साधवो वित्तहीना
नास्मिन्नर्थे वचनपटुभिर्निन्दनीया खलु श्रीः ।
वित्तभ्रष्टाञ्जगति गणयेत्कस्तृणेनापि मूर्खा-
न्विद्वांसस्तु प्रकृतिसुभगाः कस्य नाभ्यर्हणीयाः ॥

3462

स्थितो मध्ये सूरिः सुरगुरुसमानोप्यविदुषा-
मुदारो निर्वृत्तः कृपणजनसंपातपतितः ।
अलब्धाजिः शूरो भयविधुरचित्तैः सह वस-
न्नहो दुःखं जीवत्यविदिततदाचारविमनाः ॥

केषामपि.

3463

योर्थः स्यात्पुरुषस्य केनचिदिह व्याजेन तत्किल्बिषं
शास्त्राण्यागमितानि यानि रजसो नोच्छित्तये स भ्रमः ।

आस्ते यत्सह दुर्जनेन हृदयद्वेषेण तद्बन्धनं
या श्रीर्बन्धुसुहृज्जनप्रणयिनां न प्रीतये सा विपत् ॥

3464

यान्येतानि धनानि येपि च गुणा दुःसंघटैषा द्वयी
येनैकेन च योगमिच्छसि मनस्तस्मिन्सहायोस्मि ते ।
तत्किं तेभिमतं प्रजागररुजा क्रूरं समाक्रन्दितं
किं वाप्यासितुमादरा ------------ ॥

कस्यापि.

3465

सत्काव्यार्थनिरूपणं प्रियकथालापा रहोवस्थितिः
कण्ठान्तर्मृदुगीतमावृतसुहृद्दुःखोद्गमावेदनम् ।
उद्बाष्पं रुदितं प्रसुप्तमभवन्निद्रं रसार्द्रात्मनां
ता एता हृदयस्य हारितमतेराश्वासनाभूमयः ॥

3466

रम्यं हर्म्यं यदि कुलवधूस्त्यागभोगाय वित्तं
वक्त्रे वाणी सरसमधुरा केशवे चित्तवृत्तिः ।
यद्यस्त्येवं भज भवसुखं चित्त मा चिन्तयान्य-
द्धिग्धिग्दूरादनशनपदं स्वर्गमेकान्तदुःखम् ॥

3467

अग्रे गीतं सरसमधुरं पार्श्वयोर्गीतनादाः
पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ।
अस्त्येवं चेत्कुरु भवरसास्वादने लम्पटत्वं
नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥

3468

प्रायेणेह कुलान्वितं त्वकुलजाः स्त्रीवल्लभं दुर्भगा
दातारं कृपणा ऋजूननृजवस्तेजस्विनं कातराः ।
वैरूप्योपहताश्च कान्तवपुषं वृत्तिस्थितं दुस्थिता
नानाशास्त्रविचारिणं च पुरुषं निन्दन्ति मूढाः सदा ॥

3469

दैवं केन विलङ्घ्यते क्व विपदो न्यस्यन्ति नो तत्पदं
कः कामस्य न लक्ष्यतामुपगतः कस्य स्थिराः संपदः ।
कश्चित्तग्रहणं जनस्य गुणवान्सर्वस्य कर्तुं क्षमः
का योषित्स्वयमर्थिनी बहुमतः पुंसः क्व दानं वृथा ॥

3470

कोर्थान्प्राप्य न गर्वितो भुवि नरः कस्यापदोऽस्तं गताः
स्त्रीभिः कस्य न खण्डितं बत मनः को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरो धनकृते कोऽर्थी गतो गौरवं
को वा दुर्जनवागुरानिपतितः क्षेमेण यातो गृहम् ॥

पञ्चतन्त्रे.

3471

ये नैकाङ्गुलितर्जनामपि गुरोः सोढुं समर्था नरा
नामाप्युन्नतमानसाश्च सकलं पश्यन्त्यधस्ताज्जगत् ।
ते रागेण कदर्थिता धृतिभिदा पादैर्हता योषिता-
माज्ञां मूर्धभिरुद्वहन्ति कृपणा मालामिवाम्लायिनीम् ॥

कस्यापि.

3472

किं शाकानि न सन्ति भूधरसरित्कुञ्जेषु मूलानि वा
किं वा जीवनमेतदेव विहितं याच्ञैव नान्यत्क्वचित् ।
येन श्रीमदमोहमूढमनसां स्थित्वाग्रतो भूभृतां
श्वासोत्कम्पकदर्थिताक्षरपदैर्देहीति वागुच्यते ॥

3473

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्थं मानद नातिदूरमुभयोरस्त्यावयोरन्तरं
यद्यस्मासु पराङ्मुखोसि वयमप्येकान्ततो निस्पृहाः ॥

3474

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदित्थं
शूरस्त्वं वादिदर्पव्युपशमनविधावक्षतं पाटवं नः ।
सेवन्ते त्वां धनान्धा मतिमलहतये मामपि श्रोतुकामा
मय्यप्यास्था न चेत्तत्त्वयि मम सुतरामेष राजन्गतोस्मि ॥

3475

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषो विशेषैः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि तु परितुष्टे कोर्थवान्को दरिद्रः ॥

3476

सेवादैन्यान्न जातु प्रणिपतिताशिरा नार्थितामेति लघ्वीं
स्वामिन्नाज्ञापयेति द्रविणमदवतां नाग्रतो वक्ति वाचः ।
मध्ये नायात्यसूयां विषदहनमुचां दुर्जनाशीविषाणा-
मेकः सर्वोपलम्बी नयति फलवतीं जन्मवत्तां सुखेन ॥

केषामपि.

3477

राज्ञामव्याहताज्ञा यमनियमवती चित्तवृत्तिर्मुनीनां
भृत्यानां स्वामिभक्तिर्वरविभवभृतां त्यागसंभोगसङ्गः ।
स्त्रीणां चारित्रशुद्धिर्मधुरवचनता सत्कवीनां प्रबन्धे
धर्म्याद्न्यायाच्च मार्गान्मुनिवदचलनं मण्डनं पण्डितानाम् ॥

सुखवर्मणः.

3478

शूरं वैधव्यभीता बुधमपि च तथा विप्रयोत्पादितेर्ष्या
मा मांस्प्राक्षीज्जनोन्यः क्वचिदिति च सती मुक्तहस्तं विहाय ।
क्लीबं मूर्खं कदर्यं भयति यदि नरं श्रीः - - - - - -
- ॥

3479

आशापाशविमुक्तिनिश्चलसुखा स्वायत्तचित्तस्थितिः
र्मोहद्वेषविषादलोभविरतिः संतोषतृप्तं मनः ।
चिन्ता नित्यमनित्यतापरिचये सङ्गेऽपि निःसङ्गता
संविस्सेकविवेकपूतमनसामित्येष मोक्षक्रमः ॥

क्षेमेन्द्रस्य.

3480

तर्कः कार्कश्यवश्यत्वपयति नितरां सा हि साहित्यकन्था
पन्थाः किं चागमानां निरवधिरधिकं दुर्गमा स्मार्तवार्ता ।
भीमा मीमांसकानां सरणिरपि मुधा भ्राम्यसे ताम्यसे किं
रे चेतश्चेतना चेदमृतकरकलासंश्रयं संश्रयेथाः ॥

कस्यापि.

3481

नाम्नामकारि बहुता निजसर्वशक्ति-
स्तत्रार्पिता नियमितः स्मरणे न कालः ।
एतावती तव कृपा भगवंस्तथापि
दुर्दैवमीदृशमिहाजनि नानुरागः ॥

3482

निरोधो न द्वारेनवसरकथा नैव हृदये
न चावज्ञा नो वा खलजनभयं याचनविधौ ।
न दैन्यं नासिद्धिर्यदपि भजतस्त्वामयि विभो
वयं भूयोपायां तदपि परसेवां वितनुमः ॥

एतौ मधुसूदनस्य.

3483

मित्रे क्वापि गते सरोरुहवने बद्धानने तिष्ठति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नां पुरः सारसीम् ।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥

3484

येन स्वेन करेण शोकदहने संदीप्य काष्ठावलीं
निःक्षिप्तौ द्विजदंपती प्रतिदिनं यो वारुणीं सेवते ।
पद्मिन्याश्च सुवर्णहारमकरोद्दारा गुरोराहृता
संसर्गेश्च कपालिना सखि न किं दोषाकरे दूषणम् ॥

3485

आहारे विरतिः समग्रविषयग्रामे निवृत्तिः परा
नासाग्रे नयने यदेतदपरं यच्चैकतानं मनः ।
मौनं चेदमिदं च शून्यमखिलं यद्विश्वमाभाति ते
तद्ब्रूयाः सखि योगिनी किमसि वा किं वा वियोगिन्यसि ॥

अथ श्रीभगवत्स्वरूपवर्णनपद्धतिः

3486

किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
हृदिस्थो यस्य भगवान्मङ्गलायतनं हरिः ॥

3487

नमः शिवाय मन्त्रोयं वागेषा वशवर्तिनी ।
अहो मोहस्य माहात्म्यं नरकं येन पश्यति ॥

कस्यापि.

3488

तद्ध्यानं यत्र गोविन्दः सा कथा यत्र माधवः ।
तत्कर्म यत्तदर्थीयं किमन्यैर्बहुभाषितैः ॥

3489

सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पणम् ।
तावेव केवलं श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥

श्रीव्यासमुनेः.

3490

कृतगङ्गोदकस्नानं श्रुतभारतसत्कथम् ।
अर्चिताच्युतपादाब्जं दिनं कल्पशताहरम् ॥

3491

अर्थार्थी यानि दुःखानि सहते कृपणो जनः ।
तान्येव यदि धर्मार्थी न भूयो जन्मभाग्भवेत् ॥

3492

स्नातो वा यदि वास्नातः शुचिर्वा यदि वाशुचिः ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरं शुचिः ॥

3493

हरिरेव महावैद्यः परमद्रव्यप्रवृद्धमहिमासौ ।
शमयति जन्मव्याधिं वैराग्यमहौषधप्रयोगेण ॥

विद्याधरस्य.

3494

रुजासु नाथः परमं हि भेषजं
तमःप्रदीपो विषमेषु संक्रमः ।
भयेषु रक्षा व्यसनेषु बान्धवो
भवत्यगाधे व्यसनाम्भसि प्लवः ॥

श्रीविक्रमादित्यस्य.

3495

कस्योदपत्स्यत रुचिर्विरसावसाने
स्तोकस्थितावनुचितप्रभवे भवेस्मिन् ।
नारायणस्मृतिकथामृतपानगोष्ठी
चेतोविनोदनमियं यदि नाम न स्यात् ॥

3496

यावृङ्मनोभिरमते तरुणीषु पुंसां
तावृग्यदि प्रवरचक्रधरे रमेत ।
तत्को भवाम्बुनिधिदुःखमहोर्मिवेग-
मुल्लङ्घ्य धाम परमं पुरुषो न यायात् ॥

3497

यादृशं जनमनः परनार्यां
यादृशं परधनग्रहणेषु ।

तादृशं यदि भवेज्जगदीशे
मोक्षवस्तु किमु तिष्ठति दूरे ॥

3498

भवजलधिगतानां द्वन्द्ववाताहतानां
सुतदुहितृकलत्रत्राणभारावृतानाम् ।
विषमविषयतोये मज्जतामप्लवानां
भवति शरणमेको विष्णुपोतो नराणाम् ॥

क्षेमेन्द्रस्य.

3499

करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तम् ।
अश्वत्थपत्रस्य पुटे शयानं
बालं मुकुन्दं सततं स्मरामि ॥

कस्यापि.

3500

पूजापद्मपरंपरापुलकितौ पाष्ण्योंः परं पेलवौ
पुण्यौ पातकिपापपाटनपटू पृथ्वीं प्रपन्नौ प्रथाम् ।
प्रायः पर्वतपुत्रिकापृथुपटैः पस्त्ये पुरा पूरितौ
पादौ पण्डितपाजकः पशुपतेः प्रीत्या पुरः पश्यतु ॥

प० पाजकस्य.

3501

अलब्धान्तःप्रवेशस्य तारमाक्रन्दतो बहिः ।
प्रभो करुणया कर्णे क्रियन्तां कृपणोक्तयः ॥

अर्चितदेवस्य.

3502

कृष्ण कृष्ण कृपालुस्त्वमगतीनां गतिर्भव ।
संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥

3503

आर्तो मत्सदृशो नान्यस्त्वत्तो नान्यः कृपापरः ।
तुल्य एवावयोर्योगः कथं नाथ न पासि माम् ॥

3504

अभिधावति मां मृत्युरयमुद्धूर्णमुद्गरः ।
कृपणं पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥

गङ्गारत्नस्य.

3505

यदि नास्मि महापापी यदि नास्मि भयाकुलः ।
यदि नेन्द्रियसंसक्तस्तत्कोर्थः शरणे मम ॥

भट्टसुनन्दनस्य.

3506

यत्र यत्राभिजायेयं यदि दुःखाकुले कुले ।
तत्र तत्राक्षयं मेस्तु माधवाराधनं धनम् ॥

वररुचेः.

3507

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोपि वा ।
मा भून्मनः कदाचिन्मे त्वया विरहितं हरे ॥

कस्यापि.

3508

स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम् ।
तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ॥

3509

न चिरं मयासि सेवित इति चेन्न श्रायसे न तद्घटते ।
किं सद्य एव पीतं नामृतमजरामरीकुरुते ॥

मलयस्य.

3510

पाहि पाहि भगवन्भवभीतं
दुर्विषह्यविषयैः परिभूतम् ।
नाथ नाथ परमेश्वर विष्णो
कृष्ण कृष्ण परमा हि गतिस्त्वम् ॥

3511

कृष्ण कृष्ण परमेश्वर विष्णो
पाहि पाहि भवकर्दममध्ये ।
कामलोभमदमत्सरकोपै-
र्बाध्यमानमनिशं कृपणं माम् ॥

वल्लभदेवस्य.

3512

नश्यति यावदिदं न शरीरं
व्याधिवृतं परमेश्वर तावत् ।
श्रेयसि दर्शय मे शुभमार्गं
येन पुनर्न भवेद्भुवि जन्म ॥

भास्करस्य.

3513

त्वयि जनार्दन भक्तिरचञ्चला
यदि भवेदफलप्रवणा मम ।
अभिलषाम्यपवर्गपराङ्मुखः
पुनरपीह शरीरपरिग्रहम् ॥

आनन्दवर्धनस्य.

3514

ध्यातोसि नो मधुरिपो न च कीर्तितोसि
नैव स्तुतोसि न कथापि कृता त्वदीया ।
भक्त्या तृणैरपि मया न च पूजितोसि
तत्रापि मे कुरु दयां शरणागतस्य ॥

भा० शङ्कुस्य.

3515

सर्वापदां निलयमध्रुवमस्वतन्त्र-
मासन्नपातमविवेकमसारसंज्ञम् ।

यावच्छरीरकमिदं न विपत्स्यते मे
तावन्नियोजय विभो कुशलक्रियासु ॥

अवधूतस्य.

3516

अन्धस्य मे हृतविवेकमहाधनस्य
चौरैर्विभो बलिभिरिन्द्रियनामधेयैः ।
मोहान्धकूपकुहरे विनिपातितस्य
देवेश देहि कृपणस्य करावलम्बम् ॥

राज्ञानकरत्नाकरस्य.

3517

जातौ जातौ पथि पथि तथा मन्दिरे मन्दिरेहं
त्वत्स्तोता स्यां त्वयि रतिपरस्त्वत्प्रधानस्त्वदर्थी ।
माभूदेव व्यपगतफलः काललेशोपि यस्मि-
न्नन्यासक्ता भवदनुमतौ मन्थरा भारती स्यात् ॥

3518

यस्या बीजमहंकृतिर्गुरुतरं मूलं ममेति ग्रहो
नित्यं तु स्मृतिरङ्कुरः सुतसुहृज्ज्ञात्यादयः पल्लवाः ।
स्कन्धो दारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः
सा मे त्वत्स्मृतिसत्क्रियापरशुना तृष्णालता लूयताम् ॥

कवीरपि.

3519

जय कृष्ण महाबाहो संसारनिदाघतापघनसमय ।
नन्दकजलधरधाराशमितासुरदर्पदावाग्ने ॥

आनन्दवर्धनस्य.

3520

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः ॥

शंकराचार्यस्य.

3521

इदमहं करुणामृतसागरं
शशिकिशोरशिरोमणिमर्थये ।
व्रजतु जन्मनि जन्मनि मे वपु-
र्भवदुपासनसाधनतामिति ॥

3522

अज्ञानान्धमबान्धवं कवलितं रक्षोभिरक्षाभिधैः
क्षिप्तं मोहमहान्धकूपकुहरे दुर्दान्तिराभ्यन्तरैः ।
क्रन्दन्तं शरणागतं गतधृतिं सर्वापदामास्पदं
मा मां मुञ्च महेश पेशलदृशा सत्रासमाश्वासय ॥

3523

अज्ञस्तावदहं न मन्दधिषणः कर्तुं मनोहारिणी-
श्चाटूक्तीः प्रभवामि यामि भवतो याभिः कृपापात्रताम् ।
आर्तेनाशरणेन किं तु कृपणेनाक्रन्दितं कर्णयोः
कृत्वा सत्वरमेहि देहि चरणं मूर्धन्यधन्यस्य मे ॥

3524

पापः खलोयमिति नार्हसि मां विहातुं
किं रक्षया कृतमतेरकुतोभयस्य ।
यस्मादसाधुरधमोहमपुण्यकर्मा
तस्मात्तवास्मि सुतरामनुकम्पनीयः ॥

एते प० जगद्धरस्य.

3525

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमदनान्याहुतिविधिः ।
प्रणामः संवेशः सकलमिदमात्मार्पणविधौ
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥

श्रीशंकराचार्यस्य.

3526

नादायि दानमथ नैव तपो व्यधायि
नासेवि तीर्थदिगसाध्यतरः समाधिः ।
तत्का परत्र गतिरस्त्यनवाप्तपुण्य-
ज्ञानस्य मे भव भवत्स्मृतिमन्तरेण ॥

कस्यापि.

3527

आपन्नोस्मि शरण्योस्मि सर्वावस्थोस्मि सर्वदा ।
भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतम् ॥

श्लोकानुक्रमणिका.

अ 360

अंशावस्खव 1123
अंशुकमिव 1851
अंशुमानपि 1894
अकर्णधारा० 2559
अकर्तव्येष्व० 3245
अकलङ्केन 2471
अकालजलद० 1723
अकालधृत० 2504
अकुलीनः 3051
अकृतज्ञ० 2991
अकृतप्रेमैव 1389
अकृत्रिमप्रेम० 1453
अकृत्वा पर० 2660
अक्रोधं 2323
अक्षदेवन० 2048
अक्षराणा० 2460
अक्षिपक्ष्म 2746
अक्ष्णोश्रियं 924
अक्षोटशुण्ठि० 2357
अक्ष्णोर्विपक्ष० 1820
अगतीनां 792
अगम्यगमना० 2462
अगुणकणो 466
अग्निहोत्रफला 3428
अग्रे गीतं 3467
अङ्कं केऽपि 1982
अङ्के वृद्धि० 756
अङ्गणवीथी 2270
अङ्गनामति० 1584
अङ्गुलीभिरिव 1963
अङ्गुल्यग्रनिरोध० 1711
अङ्गुल्या कः 130
अचोद्यमानानि 3082
अच्छिन्नं नयनाम्बु 1407
अजातमृत० 2728
अज्ञः सुख० 393
अज्ञस्तावदहं 3523
अज्ञातपाण्डित्य० 169
अज्ञातागम० 2068
अज्ञानवलितो 3302
अज्ञानान्ध० 3522
अज्ञानोपहतो 3303
अज्ञो न वितर० 2977
अज्ञोऽपि तज्ज्ञता० 2679
अञ्जनस्य क्षयं 2684
अटता पृथिवी० 2531
अणु पूर्वं 2710
अणुरपि मणिः 325
अतः पर० 1496
अतथ्यास्तथ्य० 2786
अतसीपुष्प० 1718
अतिकुपिता 249
अतितेजस्व्यपि 2869
अतिथिः पूजितो 3011
अतिपरिगृहीत० 1384
अतिपरिचया० 2894
अतिमलिने 328
अतिरिच्यते 2895
अतिवाहित० 3373
अतिसंचय० 474
अतिसत्कृता 404
अतीव कर्कशाः 3221
अतो हास्यतरं 371
अत्यद्भुत० 514
अत्यन्तकृष्णः 2538
अत्यन्तपरिणाहि० 1564
अत्यन्तशीतल० 807
अत्यन्तोन्नत० 1996
अत्यर्थवकल्० 174
अत्यार्यमति० 2646
अत्युन्नति 677
अत्रास्मिन्सुरत० 1866
अत्रोत्पात० 849
अथ चेद्बुद्धि० 2709
अथ प्रसन्नेन्दु० 1818
अथ मनसिज० 1758
अथ लक्ष्मणा० 1974
अथाससादास्त० 1898
अदभ्रमभ्रो० 1781
अदर्शनादाप० 3268
अदीर्घदर्शिभिः 3360
अदृष्टपूर्वं 1729
अदृष्टमुख० 503
अदृष्टे दर्शनो० 1043

अदैवं दैवतं 2835
अद्य द्यूत० 2110
अद्य भीमदिने 1179
अद्यापि तत्प्रचल० 1291
अद्यापि तन्मनसि 1378
अद्यापि तां सुरत० 1278
अद्यापि हि नृशं० 1106
अद्यारभ्य यदि 1159
अद्येश्वरा० 2395
अद्रोहः सर्वे० 3047
अधमं बाधते 300
अधमर्णशवा० 2322
अधरामृतेन 2340
अधर्ममन्यत्र 2543
अधिगतपर० 2933
अधीतविद्यै० 2230
अधोगतिं च 936
अधोमुखैक० 2310-3343
अध्वन्यस्य 1687
अनङ्गशस्त्राणि 1782
अनन्त नाम० 11
अनन्तोद्भूत० 2256
अनपेक्षितगुरु० 2
अनया जघना० 1205
अनयो विनय० 3114
अनर्थितर्पणं 3038
अनवरत—घटिताक्ष० 1386
अनवरत—परिमुषित० 1595
अनागत० 2650
अनाघ्रातं 1332
अनादेयं 2832
अनारब्धा० 1333
अनालोच्य 1170
अनास्वादित० 2426
अनाहूत० 2348
अनिःसरन्ती० 2545
अनित्यते 3265
अनिरीक्षण० 2051
अनीर्ष्याः 1012
अनुकृत० 606
अनुगन्तुं 2641
अनुदिनमति० 1117
अनुदिनमभ्यास० 2045
अनुनयगुरो० 2103
अनुनयमगृहीत्वा 2175
अनुरञ्जिता 2852
अनुरागवन्त० 1923
अनृतमनृत० 1116
अनेकदोष० 3429
अनेकैर्नायक० 2387
अनेन किं 2983
अनेन वीत० 1427
अन्तः प्रतप्त० 802
अन्तः संतोष० 2603
अन्तः समुत्थ० 626
अन्तःस्थसुरता० 2044
अन्तर्मलीमसे 1207-1497
अन्तर्ये सततं 889
अन्तश्छिद्राणि 921
अन्त्यावस्थोपि 243
अन्धः स एव 3031
अन्धस्य मे 3516
अन्यतो नय 2029
अन्यथा शास्त्र० 3088
अन्ययान्यवनिता० 2010
अन्यस्मिन्नपि 1747
अन्यासु ताव० 735
अन्योन्यग्रथिता० 1099
अन्योन्यप्रकटा० 2115
अन्योन्यमुत्पीड० 1542
अन्योन्यलावण्य० 1505
अन्योन्यस्य लये 1029
अपकारमर्से० 372
अपकारिषु मा 3358
अपकुर्वन्नपि 227
अपगतरजो० 1738
अपथ्यभोगेषु 2393
अपराधानुरूपं 2828
अपराधो न 2737
अपसारय 1071
अपहरसि 2491
अपहृत्य 2978
अपारपुलिन० 2607
अपास्य लक्ष्मी० 861
अपि कुञ्जर० 2770
अपि चण्डानिलो० 3333
अपि नाम स 501
अपि विभव० 263

अपुत्रत्वं भवे०	2729
अपूर्वः कोपि	1217
अपूर्वेयं धनु०	2455
अपूर्वोयं कान्ते	1320
अपेक्षन्ते न च	224
अपेहि हृदया०	1252
अप्यापत्समयः	297
अप्युन्मत्ता०	2714
अप्रगल्भपद०	135
अप्रतिबुद्धे	2888
अप्रसन्नमप०	2011
अप्रस्ताव०	3202
अप्राप्तकालं	2789
अप्रार्थितानि	2661
अफलानि	2720
अबन्धुश्चापि	2702
अबुधैरर्थ०	3213
अब्देभकुम्भे	1731
अभिजातजन०	1702
अभिधावति	3504
अभिनवं	2161
अभिनवपल्लव०	1665
अभिप्रेतार्थ०	9
अभिमुख०	2272
अभिहिता०	2489
अभुक्तायां	533
अभूत्प्राची	2218
अभेदेनोपास्ते	320
अभ्यस्तोपि	1102
अभ्यस्य पवन०	2305
अभ्यासः कर्मणां	1454
अभ्यासो रति०	3376
अभ्युपयुक्ताः	481
अमन्दानन्दानां	3418
अमरैरमृतं	429
अमानेनापि	2440
अमावास्या०	2993
अमी पान०	2456
अमी व्यर्था०	1705
अमुष्मिँल्लावण्या०	1558
अमुष्मै चौराय	1979
अमूल्यस्य	1570
अमृतममृतं	1466
अमृतरसविसर०	858
अमृतरससारभूतः	1458
अमृतस्येव	1450
अमृता विगत०	647
अम्बरं विनयतः	2094
अम्बा तुष्यति	3185
अम्बा शेतेत्र	2247
अम्बुदः कृत०	833
अम्बुधेरुद०	1124
अम्भोजगर्भ०	1281
अम्भोधिः स्थलतां	3152
अम्भोमुचां सलिल०	2413
अम्भोराशिरिवा०	2575
अयं बन्धुः परो	498
अयं स भुवन०	1038
अयं हि तीव्रेण	1905
अयि चकित०	675
अयि लज्जित०	1108
अयि वरोरु	1274
अयि संप्रसीद	110
अयि हस्तगतैः	1593
अयि हृदय	1259
अये वापीहंसा	705
अरयायि साहस०	1549
अरण्यरुदितं	448
अरातिरिय०	1113
अरोदि मधुपै०	2006
अर्थप्रियतया०	3370
अर्थाकृष्टधियः	2566
अर्थातुराणां	3441
अर्था न सन्ति	3180
अर्थानामर्जनं कार्यं	2815
अथानामर्जने दुःख०	3353
अर्थानामीशिषे	3474
अर्थार्थी यानि	3491
अर्थिभ्रंश०	2517
अर्थोस्ति चेन्न	176
अर्धं सुप्तो	1824
अर्धपीतमदिरा	2017
अलब्धान्तःप्रवे०	3501
अलभन्त नभःक्षेत्रे	1828
अलमलमघृ०	1418
अलमलमति०	1556
अलमलमनु०	1046
अलसयति	1262

अलसवलित० 1297
अलसवलितैः 1098
अल्पश्रुतलव 396
अल्पीयः स्खलनेन 652
अल्पीयसामेव 541
अल्पेनापि 1508
अल्पेनैव 3119
अवकाशः 2795
अवचनं 2052
अवचितकुसुमा 1863
अवधीरणा 1339
अवलोकन० 1266
अवश्यं कोपाग्नि० 1606
अवश्यं भाविनं 3286
अवश्यं यातार० 3386
अवश्यभव्ये० 3147
अवसरपठितं 150
अविकारिण० 409
अविज्ञात० 1889
अविदग्धः 2339
अविद्यानाशिनी 2644
अविधेयो 2850
अविनयभुवा० 364
अविभाव्य० 1925
अविरतमभि० 2173
अविरताम्बुज० 28
अविरलधारा० 1736
अविशदचलं 1624
अवृत्तिभय० 204
अवेक्ष्य स्वात्मानं 452
अव्यक्तादीनि 3270
अव्याद्वो वामनो 59
अव्यवसायिन० 2848
अव्यापाररता 2547
अव्युत्पन्न० 1847
अशठमलोल० 233
अशनैरशनै० 3392
अशोच्यः शोचते 3271
अश्वः शस्त्रं 314
असंख्यपुष्पो० 1868
असतोपि 2866
असत्कवि० 2469
असत्प्रलापं 2963
असद्वृत्तो 1607
असमप्रविलो० 1596
असमये मति० 1135
असमसाहस० 3127
असहायः समर्थो० 2656
असामान्योल्लेखं 1473
असारो निर्गुणो 1802
असितात्मा 1490
असुभिरशुभे 2032
असुरहित० 2200
असौ मरुच्चुम्बित० 1677
असौ हि संकेत० 1897
अस्तमितविषय० 1385
अस्ताद्रिपार्श्वे० 1912
अस्तावलम्बि० 1909
अस्ति यद्यपि 693
अस्त्येव भूभृतां 832
अस्थानगामिभि० 1953
अस्थानाभि० 394
अस्थाने गमिता 185
अस्थिरमनेक० 1734
अस्पृहां पर० 2964
अस्मद्वैरी 1483
अस्माकमस्मा० 1315-1518
अस्मिञ्जडे 628
अस्मिन्मरौ 941
अस्मिन्सखे 900
अस्याः कचानां 1486
अस्याः कान्तस्य 1455
अस्याः कुशेशय० 1503
अस्याः सर्गविधौ—न संभाव्यते 1460
अस्याः सर्गविधौ—नु कान्तिप्रदः 1467
अस्या मनोहरा० 1480
अस्या मुखं 1506
अस्या मुखेन 1514
अस्या ललाटे 1487
अहं नश्यामि 1110
अहं वो रक्षिते० 2842
अहं सदा प्राण० 2560
अहतहृदयाः 3069
अहमिव शून्य० 1701
अहिंसा धाम 3355
अहिंसा सत्य० 3010
अहिताहित० 3444
अहो अहं 1243

अहो किमपि	2479
अहो कुटिल०	344
अहो तृष्णा०	3263
अहो धनानां	490
अहो नु चित्रं	3349
अहो प्रकृति०	353
अहो प्रमादी	1551
अहो बत खलः	334
अहो बत मह०	368
अहो बत सरि०	876
अहो संसृति०	3301
अहो वा हारे	3413

आ 141.

आः किमर्थमिदं	213
आकर्णमूल०	1293
आकर्षन्निव	2419
आकारदारुणो०	2856
आकारमात्र०	511
आकाराहीन०	2599
आकारेण शशी	2886
आकारेणेङ्गितै०	2803
आकाशकुण्डे	1780
आकाशवापी०	1986
आकृष्टे युधि	99
आकृष्यादा०	1164
आकोपितोपि	277
आक्रन्दाः स्तनितै०	1776
आक्रम्योच्चैः	840
आक्षिप्तिः प्रति०	2572
आखुः कैलास०	465
आगत्य प्रणि०	2083
आगमिष्यन्ति	2663
आघ्रायाघ्राय	2422
आजन्मनः कुशल०	986
आजन्मनो विहित०	3130
आज्ञा कीर्तिः	3229
आतुराद्वित्त०	2320
आत्मकृतादपि	765
आत्मविक्रयिणि	3212
आत्मायत्ते	2674
आत्मैव यदि	3361
आदरात्संगृही०	2763
आदाय दण्डं	1931
आदाय मांस०	660
आदाय वारि	891
आदायि वारि	981
आदित्यस्य	3327
आदित्याः किं	53
आदिमध्य०	257
आदीप्तवह्नि०	1678
आदृष्टिप्रसरा०	1056
आदौ तावद्व्यापार०	2405
आदौ तु मन्द०	254
आदौ नम्रस्ततः	2298
आदौ मज्जन०	2137
आदौ लज्जयति	391
आद्यः प्रवेश०	776
आधार्मिकः	3116
आधाराय	537
आ धूमाग्रा०	2953
आनन्दं दधति	1882
आनन्देन	39
आनन्दोद्गत०	2065
आनीलचूचुक०	1545
आनृशंस्यं	2995
आन्दोलय०	1037
आपत्सु किं विषा०	3087
आपत्सु मित्रं	2793
आपन्नया	3305
आपन्नोस्मि	3527
आपूर्येत	711
आपृष्टासि	1054
आप्लाप्यात्म०	412
आबद्धकृत्रिम०	995
आबद्धपद्म०	1911
आ बाल्यादपि	618
आ बाह्वद्गत०	74
आभाति चन्द्र०	572
आभाति रोम०	1554
आभोगिनी	1219
आमूलतो	1674
आमोदाहृत०	2585
आमोदैर्मरुतो	823
आम्राः किं फल०	950
आयाते दयिते मनोरथ०	2076
आयाते दयिते मरुस्थल०	2075
आयाते रभसाद्यदि	1173

आयाते श्रुति०	1052
आयातो दयित०	2077
आयातो भवतः	2415
आयास्य बहुभि०	2833
आयास्यस्यवषा०	1061
आयुषः क्षण०	3307
आयूंषि क्षणिकानि	3330
आरात्कारीष०	2417
आराध्य भूपति०	3258
आराध्यमानो	426-3231
आरोग्यं विद्वत्ता	234
आरोपयसि	128
आरोपितः	994
आरोप्यते०	3006
आर्जवं चानृ०	2959
आर्ता मत्सदृशो	3503
आलि कल्पय	1119
आलेख्यं निज०	2615
आलोकत्रस्त०	2421
आलोकयति	1743
आलोलामल०	1304
आलोहित०	1740
आवेपते	1914
आशङ्क्य प्रणतिं	1590
आशाः प्रकाश०	574
आशापाश०	3479
आशा बलवती	3246
आश्चर्यं वडवा०	884
आश्चर्यधाम०	2498
आश्रयमाश्रय०	2881
आश्लिष्टापि करोति	1368
आश्लिष्टा रभसा०	2241
आश्लेषाधर०	68
आश्वासयति	1956
आसन्नतरता०	3294
आसन्नान्पुरतो	3249
आसन्नामव०	1100
आसन्नाय सुदू०	22
आ सप्ततेर्यस्य	2350
आ सर्गात्प्रति०	564
आसां जला०	1874
आसारेण	1784
आसिष्ये सुखितो	3260
आसीज्जनः	3060
आसीत्ताम्रमयं	3206
आसीददभ्र०	2634
आसीदासीम०	2606
आसीन्नाथ	2546
आसे चेत्स्वगृहे	3198
आस्तां क्ष्माप०	865
आस्तां दूरेण	2087
आस्तां विश्वसनं	1148
आस्तेत्रैव	1015
आस्ते दामोदरी०	2520
आ स्त्रीशिशु०	868
आस्यं निरस्य	839
आस्यं पिधाय	2411
आ स्वर्लोका०	2594
आहतं कुच०	2124
आहते तव	2454
आहत्याहत्य	2425
आहरे ज्ञान०	2952
आहवे जग०	2447
आहारं प्रति	1415
आहारे विरतिः	3485
आहूतेषु	1001
आहूतापि	1838

इ 36.

इक्षोर्विकारा	2138
इच्छति शती	3255
इतः काका०	945
इतः स्वपिति	886
इतरदेव	431
इत्थं पशुपति०	129
इदं किं ते	1334
इदं कृष्णं	1138
इदं युग०	3285
इदं व्योम०	1997
इदं हि माह्म०	268
इदमपर०	2532
इदमहं	3521
इन्दिन्दिरे०	1659
इन्दीवरेण	1610
इन्दुं तण्डुल०	1856
इन्दुः प्रयास्यति	782
इन्दुर्यत्र	2398
इन्दोः संक्षय०	1475

इन्दोर्लक्ष्म 2563
इन्द्रगोपै॰ 1719
इन्द्रायवीक्ष॰ 2089
इन्द्रियाण्येव 2960
इन्द्रो यच्छत॰ 2551
इमे पद्मे 1478
इयं पत्नी 768
इयं मयि 2159
इयन्त्यप्येत॰ 530
इयमुन्नत॰ 255
इष्टा बालक॰ 3312
इष्टो वा सुकृत॰ 437
इह लोके हि 3160
इह सरजसि 3136
इहैकचूडालो 877
इहैव नरक॰ 3362
इहोपपत्ति॰ 3022

ई 2.

ईर्ष्याप्रस्फुरिता॰ 1591
ईषन्मन्थर॰ 1361

उ 89.

उग्रग्राह॰ 2554
उच्चः सत्फल॰ 577
उच्चित्य प्रथम॰ 1865
उच्चैः पदमधि॰ 2857
उच्चैरध्ययनं 2378
उच्चैरुच्चरतु 912
उच्चैर्यो मधु॰ 830
उच्छृङ्खलेन 624
उच्यतां स 1181
उज्ज्वलचम्पक॰ 961
उडुगणा॰ 576
उडुपरिवृढः 2210
उत्कण्ठितं मनो 1204
उत्कम्पोऽपि 1152
उत्कम्पो हृदये 1158
उत्कूजति 1991
उत्कोचपारि॰ 2349-2889
उत्खातान्प्रति॰ 2947
उत्तमं सुचिरं 303
उत्तमः क्लेश॰ 291
उत्तानोच्छून॰ 3341
उत्तिष्ठ क्षण॰ 3195
उत्तिष्ठ दूति 1940
उत्तिष्ठन्त्या 79
उत्तुङ्गशैल॰ 837
उत्थाय हृदि 3435
उत्थायोत्थाय पापे 3331
उत्थायोत्थाय बोद्धव्यं 3290
उत्पत्तिर्महतां 775
उत्पन्नपरि॰ 2678
उत्पन्ना बहव॰ 933
उत्पादयन्ती 2050
उत्पादिता स्वय॰ 523
उत्सन्नमापण॰ 960
उत्साहसंपन्न॰ 315-2012
उत्साहिता 2054
उदन्वच्छिन्ना 322
उदमज्जि 1973
उदयगिरि॰ 2028
उदयति 2163
उदयनगा॰ 1962
उदयमुदित॰ 2177
उदयशिखरि॰ 2187
उदारैर्मन्दारै 3417
उदिते दृष्टि॰ 2480
उदेति सविता 220
उद्गर्जन्कुटिल॰ 1035
उद्गीर्णं खलु 1349
उद्दामदक्षिण॰ 1680
उद्दामाम्बुद॰ 2555
उद्भाव्यमानो 1077
उद्यच्छशी 1971
उद्यन्त्यमूनि 558
उद्वृत्तः स्तनभार एष 1354
उद्वृत्तदित्य॰ 50
उद्वृत्तस्तनभारभङ्गुर॰ 1344
उन्नतः प्रोल्ल॰ 1538
उन्नतानां 2899
उन्नत्यै नमति 3235
उन्नमय्य 2090
उन्मीलद्गुड॰ 1640
उन्मुक्तमान॰ 1650
उन्मृष्टपत्त्रा 1870
उपकर्तुं॰ 252
उपकारः 2642

उपकारिणि विक्षीणे 1808
उपकारिणि विश्वस्ते 3061
उपकारिणि वीत० 256
उपकारेण 202
उपकृतमनेन 416
उपकृतवता 872
उपकृतिरेव 417
उपकृतिसाह० 250
उपपत्तिभि० 142
उपप्लवोसौ 1269
उपभोग० 482
उपयुक्त० 2336
उपरि घनं 1744
उपरि निपतिता० 2135
उपरि पयोधर० 1745
उपलभ्य० 1735
उपसर्गाः 2467
उपार्जितानां 3037
उपोढरागेण 1969
उरसि निहित० 1947
उर्वी मौर्वी० 2608
उल्लापयन्त्या 1416
उल्लासिताखिल० 444
उल्लेखं निज० 2618

ऊ 3.

ऊढा येन 1018
ऊरुमूलगत० 2125
ऊष्मव्यपेता० 2485

ऋ 3.

ऋज्वी दृष्टि० 2367
ऋज्वी स्थिरा 2311
ऋणशेषो० 2760

ए 55.

एकं दन्त० 70
एकं मित्रं 2481
एकं हि चक्षु० 2928
एकः स एव 2253
एकः स व्यसनी 1365
एक एव खगो 674
एकतो दिवसा० 1245
एकत्र नास्य 1657
एकत्रासन० 1583
एकमुत्कण्ठया 1239
एकस्यं जीविते० 60
एकस्मिञ्छयने 2112
एकाकिनि वन० 594
एकाकिनी यद० 2234
एकाकी निस्पृहः 3404
एकान्तसुन्दर० 1464
एकान्ते वनतो 2239
एकार्थाभिनिवे० 2846
एकीभावं 420
एकेनाशेन 3000
एकेनाक्ष्णा 1916
एके वारिनिधौ 1902
एकैकाशया० 492
एकैव संगमे 1250
एकैव सामृत० 557
एकोऽपि गुण० 2730
एकोऽहमस० 582
एको हि दोषो—तेनापि नूनं ... 3439
एको हि दोषो—रूपादिका० ... 3438
एतत्कान्त० 1214
एतत्तस्य 1014
एतत्प्रचण्डि 1988
एतदत्र 834
एतदेव मह० 3084
एतदेवायुषः 2698
एतद्भ्रूकचा० 1928
एतन्नरेन्द्र० 2166
एतस्मिन्दक्षि० 1690
एतांश्छिनद्मि 2355
एतावच्छक्य० 2437
एतावज्जन्म० 3215
एतेन बद्ध० 3310
एवं चेत्सरस० 1002
एवं चेद्विधिना 949
एवं यथाह 1631
एवमेव नहि 428
एष तुङ्गमर० 1966
एष बकः 759
एष विशेषः 2529
एष सूर्यांशु० 1694
एषा ते हर 67
एषा हि मे 2275

एषोऽग्निहोत्रीति 2353
एहि गच्छ—इति वित्रस्त० 1228
एहि गच्छ—इत्थमाश्रा० 3168

ऐ 3.

ऐन्द्रं धनुः 1815
ऐरावणानन० 736
ऐरावणे 2493

ओ

ॐकारो मदन० 1983
ॐ नमः परमा० 12

औ 1.

औदार्ये सघने 2622

क 365.

कंचित्क्षणं 2053
कंदर्प नउ० 2616
कः कः कुत्र 617
कः कालः कानि 2804
कः स्वभाव० 3159
कचाधर० 2347
कचग्रहो० 1283
कटी मुष्टि० 2360
कटु रटनि 692
कटु रटसि 1034
कठिनहृदये मुञ्च कोपं 1619
कठिनहृदये मुञ्च भ्रान्तिं 1620
कठोरनखरा० 610
कण्टकस्य 2805
कण्टकेनापि 2982
कण्ठग्रहे 1085
कण्ठस्य तस्याः 1528
कण्ठस्य नाकरो० 1527
कण्ठाद्रक्तं 2363
कण्ठान्तः क्वणितं 2623
कण्ठे गद्गदना 3172
कथं ते व्यक्त० 3277
कथं न लज्जित० 547
कथं त्वेषा 2130
कथं मुग्धे 1223
कथं स दन्न० 553
कथमपि सखि 1143
कथमियति 808
कथय निपुणं 1420
कदर्थितस्यापि 316-528
कदाधरदले 1318
कदान्वहं 1194
कदा संसार० 3401
कंधरावनत० 3219
कनकभूषण० 898
कनिष्ठास्तं 2726
कन्या कौतुक० 2238
कपटपटुता 3070
कपोले पत्त्राली 1627
कपोले मार्जारः 1994
कमलं भवनं 728
कमलमनम्भसि 1516
कमलिनीमलिनी 730-1676
कम्पप्रदोसी 1834
करकिसलयं 2105
करचरण० 1852
करजाल० 72
करपति० 2436
करभ किमिदं 668
करभदयिते यत्तत्पीतं 666
करभदयिते योसौ पीलुः 667
करभ यदि 664
करभ रभसा० 669
करसादो० 1886
करान्प्रसार्य 550
करारविन्देन 3499
करिकलभ 622
करिष्यामि 3297
करे बिभाति 1532
करोति पूज्य० 365
करोति लाभ 3223
करौ धुनाना—पयस्यगाधे 1878
करौ धुनाना—वृथा कृथा 1860
कर्णिकादिष्विव 14
कर्णिकारलताः 1655
कर्णे तत्कथयन्ति 462
